अष्टाङ्गहृदयसंहिता ।

श्रीमद्वाग्भटविरचिता ।

वि, ए, उपाधिधारिणा
श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण
संस्कृता प्रकाशिता च ।



द्वितीयसंस्करणम् ।

कलिकातानगरे
सरस्वतीयन्त्रे
मुद्रिता ।
ई १८८०

প্রকাশক শ্রীজীবানন্দবিদ্যাসাগর
২ নং রমানাথমজুমদারেরষ্ট্রীট্।
প্রিণ্টর শ্রীক্ষেত্রমোহনমুখোপাধ্যায়
৫৫ নং পঞ্চাননঘোষের লেন।

अष्टाङ्गहृदयसंहितायाम्।

सूत्रस्थानम्।

रागादिरोगान् सततानुषक्तानशेषकायप्रसृतानशेषान्।
औत्सुक्यमोहारतिदान् जघान यो पूर्ववैद्याय नमोऽस्तु तस्मै ॥१॥

अथात आयुष्कामीयमध्याय व्याख्यास्यामः।

इतिह स्माहुरात्रेयादयो महर्षयः॥

आयुष्कामयमानेन धर्मार्थसुखसाधनम्।
आयुर्वेदोपदेशेषु विधेयः परमादरः॥ २॥

ब्रह्मा स्मृत्वायुषो वेदं प्रजापतिमजिग्रहत्।
सोऽश्विनौ तौ सहस्राक्षं सोऽत्रिपुत्रादिकान् मुनीन् ॥३॥
तेऽग्निवेशादिकांस्ते तु पृथक् तन्त्राणि तेनिरे।
तेभ्योऽतिविप्रकीर्णेभ्यः प्रायः सारतरोच्चयः॥ ४॥
क्रियतेऽष्टाङ्गहृदयं नातिसंक्षेपविस्तरम्।
कायबालग्रहोर्ध्वाङ्गशल्यदंष्ट्राजरावृषान्॥ ५॥
अष्टावङ्गानि तस्याहुश्चिकित्सा येषु संश्रिता।
वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः॥६॥
विकृताऽविकृता देहं घ्नन्ति ते वर्त्तन्ति च।
ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः॥७॥
वयोऽहोरात्रिभुक्तानां तेऽन्तमध्यादिगाः क्रमात्।
तैर्भवेद्विषमस्तीक्ष्णो मन्दश्चाग्निः समैः समः॥ ८॥

ओष्ठः क्रूरो मृदुर्मध्यो मध्यः स्यात्तैः समैरपि ।
शुक्रार्त्तवस्थैर्जन्मादौ विषेणेव विषक्रियेः ॥ ९ ॥
तैश्च त्रिधाः प्रकृतयो हीनमध्योत्तमाः पृथक् ।
समधातुः समस्तासु श्रेष्ठा निन्द्या द्विदोषजाः ॥ १० ॥
तत्र रूक्षो लघुः शीतः खरः सूक्ष्मश्चलोऽनिलः ।
पित्तं सस्नेहतीक्ष्णोष्णं लघु विस्रं सरं द्रवम् ॥ ११ ॥
स्निग्धः शीतो गुरुर्मन्दः श्लक्ष्णो मृत्स्नः स्थिरः कफः ।
सर्गः सन्निपातश्च तद्विज्ञेयकोपतः ॥ १२ ॥
रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः ।
सप्त दूष्याः
मला मूत्रशकृत्स्वेदादयोऽपि च ॥ १३ ॥
वृद्धिः समानैः सर्वेषां विपरीतैर्विपर्ययः ।
रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः ॥ १४ ॥
षट् द्रव्यमाश्रितास्ते तु यथापूर्वं बलावहाः ।
तत्राद्या मारुतं घ्नन्ति त्रयस्तिक्तादयः कफम् ॥ १५ ॥
कषायतिक्तमधुराः पित्तमन्ये तु कुर्वते ।
शमनं कोपनं स्वस्थहितं द्रव्यमिति त्रिधा ॥ १६ ॥
उष्णशीतगुणोत्कर्षात्तत्र वीर्यं द्विधा स्मृतम् ।
त्रिधा विपाको द्रव्यस्य स्वाद्वम्लकटुकात्मकः ॥ १७ ॥
गुरुमन्दहिमस्निग्धश्लक्ष्णसान्द्रमृदुस्थिराः ।
गुणाः ससूक्ष्मविशदा विंशतिः सविपर्ययाः ॥ १८ ॥
कालार्थकर्मणां योगो हीनमिथ्यातिमात्रकाः ।
सम्यग्योगश्च विज्ञेयो रोगारोग्यैककारणम् ॥ १९ ॥
रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता ।
निजागन्तुविभागेन तत्र रोगा द्विधा स्मृताः ।
तेषां कायमनोभेदादधिष्ठानमपि द्विधा ॥ २० ॥

रजस्तमश्च मनसौ द्वौ च दोषावुदाहृतौ ।
दर्शनस्पर्शनप्रश्नैः परीक्षेताथ रोगिणम् ॥ २१ ॥
रोगं निदानप्राग्रूपलक्षणोपशयादिभिः ।
भूमिदेहप्रभेदेन देशमाहुरिह द्विधा ॥ २२ ॥
जाङ्गलं वातभूयिष्ठमनूपं तु कफोल्बणम् ।
साधारणं सममलं त्रिधा भूदेशमादिशेत् ॥ २३ ॥
क्षणादिर्व्याध्यवस्था च कालो भेषजयोगकृत् ।
शोधनं शमनञ्चेति समासादौषधं द्विधा ॥ २४ ॥
शरीरजानां दोषाणां क्रमेण परमौषधम् ।
वस्तिर्विरेको वमनं तथा तैल घृत मधु ॥ २५ ॥
धीधैर्यात्मादिविज्ञानं मनोदोषौषधं परम् ।
भिषक् द्रव्याण्युपस्थाता रोगी पादचतुष्टयम् ॥२६॥
चिकित्सितस्य निर्दिष्ट प्रत्येकं तच्चतुर्गुणम् ।
दक्षस्तीर्थात्तशास्त्रार्थो दृष्टकर्मा शुचिर्भिषक् ॥ २७ ॥
बहुकल्पं बहुगुणं सम्पन्नं योग्यमौषधम् ।
अनुरक्तः शुचिर्दक्षो बुद्धिमान् परिचारकः ॥ २८ ॥
आढ्यो रोगी भिषग्वश्यो ज्ञापकः सत्त्ववानपि ।
सर्वौषधक्षमे देहे यूनः पुंसो जितात्मनः ॥ २९ ॥
अमर्मगोऽल्पहेत्वग्ररूपरूपोऽनुपद्रवः ।
अतुल्यदूष्यदेशर्तुप्रकृतिः पादसम्पदि ॥ ३० ॥
ग्रहेष्वनुगुणेष्वेकदोषमार्गो नवः सुखः ।
शस्त्रादिसाधनः कृच्छ्रः सङ्करे च ततो गदः ॥ ३१॥
शेषत्वादायुषो याप्यः पथ्याभ्यासाद्विपर्य्यये ।
अनुपक्रम एव स्यात् क्षितोऽत्यन्तविपर्य्यये ॥३२॥
औत्सुक्यमोहारतिकृद्दृष्टरिष्टोक्षनाशनः ।
त्यजेदार्त्तं भिषग्भूपैर्दिष्टं तेषां द्विषं द्विषम् ॥ ३३ ॥

हीनोपकरणं व्यग्रमविधेयं गतायुषम्।
चण्डं शोकातुरं भीरुं कृतघ्नं वैद्यमानिनम् ॥३४॥
तन्त्रस्यास्य परिज्ञाती वक्ष्यतेऽध्यायसंग्रहः।
आयुष्कामदिनर्त्तीहारोगानुत्पादनद्रवाः ॥ ३५ ॥
अन्नज्ञानान्नसंरक्षामात्रादव्यरसाश्रयाः।
दोषादिज्ञानतद्भेदतच्चिकित्साद्युपक्रमः ॥ ३६ ॥
शुद्धादिस्नेहनस्वेदरेकास्थापननावनम्।
धूमगण्डूषष्टक्सेकतर्पियन्त्रकशस्त्रकम् ॥ ३७ ॥
शिराविधिः शल्यविधिः शस्त्रक्षाराग्निकर्मकाः।
सूत्रस्थानमिमेऽध्यायास्त्रिंशत् शारीरमुच्यते ॥ ३८ ॥
गर्भावक्रान्ति तद्व्यापदङ्गमर्मविभागिकम्।
विक्रतिर्दूतज षष्ठं
निदानं सार्वरोगिकम् ॥ ३९ ॥
ज्वरासृक्श्वासयक्ष्मादिमदात्ययशोऽतिसारिणाम्।
मूत्राघातप्रमेहाणां विद्रध्यादुदरस्य च ॥ ४० ॥
पाण्डुकुष्ठानिलार्त्तानां वातासृस्य च षोडश।
चिकित्सितं ज्वरे रक्ते कासे श्वासे च यक्ष्मणि ॥ ४१ ॥
वमौ मदात्ययेऽर्शःसु विधि द्वौ द्वौ च मूत्रिते।
विद्रधौ गुल्मजठरपाण्डुरोफविसर्पिषु ॥ ४२ ॥
कुष्ठश्वित्रानिलव्याधिवातासृषु चिकित्सितम्।
द्वाविंशतिरिमेऽध्यायाः कल्पसिद्धिरतःपरम् ॥ ४३ ॥
कल्पो वमेर्विरेकस्य तत्सिद्धिर्वस्तिकल्पना।
सिद्धिर्वस्त्यापदां षष्ठो द्रव्यकल्पोऽत उत्तरम् ॥ ४४ ॥
बालोपचारे तद्ग्राही तद्ग्रहे द्वौ च भूतगौ।
उन्मादेऽथ स्मृतिभ्रंशे द्वौ द्वौ वर्त्मसु सन्धिषु ॥४५॥
दृक्तमो लिङ्गनाशेषु त्रयो द्वौ द्वौ च सर्वगौ।

कर्णनासामुखशिरोव्रणे भग्ने भगन्दरे ॥ ४६ ॥
अन्यादौ क्षुद्ररोगेषु गुह्यरोगे पृथग् द्वयम्।
विषे भुजङ्गे कीटेषु मूषकेषु रसायने ॥ ४७ ॥
चत्वारिंशोऽनपत्यानामध्यायो बीजपोषणः।
इत्यध्यायशतं विंशं षड्भिः स्थानैरुदीरितम् ॥ ४८ ॥

द्वितीयोऽध्यायः।

अथातो दिनचर्याध्यायं व्याख्यास्यामः।
ब्राह्मे मुहूर्ते उत्तिष्ठेत् स्वस्थो रक्षार्थमायुषः।
शरीरचिन्तां निर्वर्त्य कृतशौचविधिस्ततः ॥ १ ॥
अर्कन्यग्रोधखदिरकरञ्जककुभादिकम्।
प्रातर्भुक्त्वा च सद्वैद्यं कषायकटुतिक्तकम् ॥ २ ॥
भक्षयेद्दन्तधवन दन्तमांसान्यबाधयन्।
नाद्यादजीर्णवमथुश्वासकासज्वरार्दितो ॥ ३ ॥
तृष्णास्यपाकहृन्नेत्रशिरःकर्णामयी च तत्।
सौवीरमञ्जनं नित्यं हितमक्ष्णोस्ततो भजेत् ॥ ४ ॥
चक्षुस्तेजोमयं तस्य विशेषात् श्लेष्मणोभयम्।
योजयेत् सप्तरात्रेऽस्मात् स्रावणार्थं रसाञ्जनम् ॥ ५ ॥
ततो नावनगण्डूषधूमताम्बूलभाग्भवेत्।
ताम्बूल क्षतपित्तास्रशोषात्कुपितचक्षुषाम् ॥ ६ ॥
विषमूर्च्छामदार्त्तानामपथ्य शोषिणामपि।
अभ्यङ्गमाचरेन्नित्यं स जराश्रमवातहा ॥७॥
दृष्टिप्रसादपुष्ट्यायुःस्वप्नसुत्वक्त्वदार्ढ्यकृत्।
शिरःश्रवणपादेषु तं विशेषेण शीलयेत् ॥ ८ ॥
वर्ज्योऽभ्यङ्गः कफग्रस्तक्षतसंशुष्यजीर्णिभिः।

लाघवं कर्मसामर्थ्यं दोषोऽग्निर्मेदसः क्षयः ॥ ९ ॥
विभक्तघनगात्रत्वं व्यायामादुपजायते ।
वातपित्तामयी बालो वृद्धोऽजीर्णी च तं त्यजेत् ॥ १० ॥
अहेरुत्क्वा निषेव्यस्तु बलिभिः स्निग्धभोजिभिः ।
शीतकाले वसन्ते च मन्दमेव ततोऽन्यदा ॥ ११ ॥
तं कृत्वाऽनुसुखं देहं मर्दयेच्च समन्ततः ।
क्षुधा क्षयः प्रतमको रक्तपित्तं श्रमः क्लमः ॥ १२ ॥
अतिव्यायामतः कासो ज्वरश्छर्दिश्च जायते ।
व्यायामजागराध्वस्त्रीहास्यभाष्यादिसाहसम् ॥ १३ ॥
गजं सिंह इवाकर्षन् भजन्नतिविनश्यति ।
उद्वर्तनं कफहरं मेदसः प्रविलापनम् ॥ १४ ॥
शिरीकरञ्जमङ्गानां त्वक्प्रसादकरं परम् ।
दीपनं वृष्यमायुष्यं स्नानमूर्जाबलप्रदम् ॥ १५ ॥
कण्डूमलश्रमस्वेदतन्द्रातृड्दाहपापमजित् ।
उष्णाम्बुनाभः कायस्य परिषेको बलावहः ॥ १६ ॥
तेनैव चोत्तमाङ्गस्य बलकृत् केशचक्षुषाम् ।
स्नानमर्दितनेत्रास्यकर्णरोगातिसारिषु ॥ १७ ॥
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम् ।
जीर्णे हितं मितं चाद्यान्न वेगानीरयेद् बलात् ॥ १८ ॥
न वेगितोऽन्यकार्यः स्यान्नाजित्वा साध्यमामयम् ।
सुखार्थाः सर्वभूतानां मताः सर्वाः प्रवृत्तयः ॥ १९ ॥
सुखञ्च न विना धर्मात्तस्माद्धर्मपरो भवेत् ।
भक्त्या कल्याणमित्राणि सेवेतेतरदूरगः ॥ २० ॥
हिंसास्तेयान्यथा कामं पैशून्यं परुषानृते ।
सम्भिन्नालापव्यापादमभिध्यादृग्विपर्ययम् ॥ २१ ॥
पापं कर्मेति दशधा कायवाङ्मानसैस्त्यजेत् ।

अवृत्तिव्याधिशोकार्त्तानुवर्त्तेत शक्तितः ॥ २२ ॥
आत्मवत् सतत पश्येदपि कीटपिपीलिकम् ।
अर्चयेद्देवगोविप्रवृद्धवैद्यनृपातिथीन् ॥ २३ ॥
विमुखान्नार्थिनः कुर्यान्नावमन्येत कानपि ।
उपकारप्रधानः स्यादपकारपरेऽप्यरौ ॥ २४ ॥
सम्यङ्मिथ्योपचारेषु हेतावीर्ष्येत् फले न तु ।
काले हित मितं ब्रूयादविसंवादि पेशलम् ॥ २५ ॥
पूर्वाभिभाषी सुमुखः सुशीलः करुणामृदुः ।
नैकः सुखी न सर्वत्र विश्रब्धो न च शङ्कितः ॥ २६ ॥
न कञ्चिदात्मनः शत्रुं नात्मानं कस्यचिद्रिपुम् ।
प्रकाशयेन्नापमानं न च निःस्नेहतां प्रभोः ॥ २७ ॥
जनस्याशयमालक्ष्य यो यथा परितुष्यति ।
तं तथैवानुवर्त्तेत पराराधनपण्डितः ॥ २८ ॥
न पीडयेदिन्द्रियाणि न चैतान्यतिलालयेत् ।
त्रिवर्गशून्य नारम्भं भजेत्तञ्चाविरोधयन् ॥ २९ ॥
अनुयायात् प्रतिपदं सर्वधर्मेषु मध्यमाम् ।
नीचरोमनखश्मश्रुर्निर्मलाङ्घ्रिमलायनः ॥ ३० ॥
स्नानशीलः सुसुरभिः सुवेषोऽनुल्बणोज्ज्वलः ।
धारयेत् सततं रत्नसिद्धमन्त्रमहौषधीः ॥ ३१ ॥
सातपत्रपदत्राणो विचरेत् युगमात्रदृक् ।
निशि चात्ययिके कार्ये दण्डी मौली सहायवान् ॥३२॥
चैत्यपूज्यध्वजाश्वत्थच्छायाभस्मतुषाशुचीन् ।
नाक्रामेच्छर्करालोष्टबलिस्नानभुवोऽपि च ॥३३॥
नदीं तरेन्न बाहुभ्यां नाग्निस्कन्धमभिव्रजेत् ।
सन्दिग्धनावं हुच्चञ्च नारोहेद् दुष्टयानवत् ॥ ३४ ॥
नासंवृतमुखः कुर्य्यात् क्षुतिहास्यविजृम्भणम् ।

नासिक्यां न विकुर्वीयान्नाकस्माद्विलिखेद्भुवम् ॥ ३५ ॥
नाङ्गैश्चेष्टेत विगुणं नासीतोत्कटकस्थितः ।
देहवाक्चेतसां चेष्टाः प्राक् श्रमाद्विनिवर्त्तयेत् ॥ ३६ ॥
नोर्द्वजानुश्चिरं तिष्ठेन्नक्तं सेवेत न द्रुमम् ।
तथा चत्वरचैत्यान्तश्चतुष्पथसुरालयान् ॥ ३७ ॥
शून्याटवीशून्यगृहश्मशानानि दिवापि च ।
सर्वथैवेत नादित्यं न भारं शिरसा वहेत् ॥ ३८ ॥
नेक्षेत प्रतत सूक्ष्मदोषामेध्याप्रियाणि च ।
मद्यविक्रयसन्धानदानादानानि नाचरेत् ॥ ३९ ॥
पुरोवातातपरजस्तुषारपरुषानिलान् ।
अनृजुः क्षवथूद्गारकामस्वप्नान्न मैथुनम् ॥ ४० ॥
कूलच्छायानृपद्विष्टव्यालदष्टविषाणिनः ।
हीनानार्यातिनिपुणसेवा विग्रहमुत्तमैः ॥ ४१ ॥
सन्ध्यास्वभ्यवहारस्त्रीस्वप्नाध्ययनचिन्तनम् ।
शत्रुसत्त्वगणाकीर्णगणिकापणिकाङ्गनम् ॥ ४२ ॥
गात्रवक्त्रनखैर्वाद्य हस्तकेशावधूननम् ।
तोयाग्निपूज्यमध्येन यानं धूमं श्वसाश्रयम् ॥ ४३ ॥
मद्यातिसक्तिं विश्रम्भस्वातन्त्र्ये स्त्रीषु च त्यजेत् ।
आवार्य्याः सर्वचेष्टासु लोक एव हि धीमतः ॥ ४४ ॥
अनुकुर्य्यात्तमेवातो लौकिकेऽर्थे परीक्षकः ।
आर्द्रसन्तानता त्यागः कायवाक्चेतसां दमः ॥ ४५ ॥
स्वार्थबुद्धिः परार्थेषु पर्य्याप्तमिति सद्व्रतम् ।
नक्त दिनानि मे यान्ति कथमूतस्य सम्प्रति ॥ ४६ ॥
दुःखभाक् न भवत्येवं नित्य सन्निहितस्मृतिः ।
इत्याचारः समासेन सम्प्राप्नोति समाचरन् ।
आयुरारोग्यमैश्वर्य्यं यशो लोकांश्च शाश्वतान् ॥ ४७ ॥

तृतीयोऽध्यायः ।

अथात ऋतुचर्याध्यायं व्याख्यास्यामः ।
मासैर्द्विसङ्ख्यैर्माघाद्यैः क्रमात् षड्ऋतवः स्मृताः ।
शिशिरोऽथ वसन्तश्च ग्रीष्मवर्षाशरद्धिमाः ॥ १ ॥
शिशिराद्याक्षिभिस्तैस्तु विद्यादयनमुत्तरम् ।
आदानञ्च तदादत्ते नृणां प्रतिदिनं बलम् ॥ २ ॥
तस्मिन् ह्यत्यर्थतीक्ष्णोष्णरूक्षामार्गस्वभावतः ।
आदित्यपवनाः सौम्यान् क्षपयन्ति गुणान् भुवः ॥ ३ ॥
तिक्तः कषायः कटुको बलिनोऽत्र रसाः क्रमात् ।
तस्मादादानमाग्नेयम्
ऋतवो दक्षिणायनम् ॥ ४ ॥
वर्षादयो विसर्गश्च यद्बलं विसृजत्ययम् ।
सौम्यत्वादत्र सोमो हि बलवान् हीयते रविः ॥ ५ ॥
मेघहृष्यनिलैः शीतैः शान्ततापे महीतले ।
स्निग्धाम्बेहाम्ललवणमधुरा बलिनो रसाः ॥ ६ ॥
शीतेऽग्र्यं दृष्टिवर्मेऽल्पं बलं मध्यन्तु शैषयोः ।
बलिनः शीतसंरोधाद्वह्निमन्ते प्रबलोऽनलः ॥ ७ ॥
भवत्यल्पेन्धनो धातून् स पचेदायुनेरितः ।
अतो हिमेऽस्मिन् सेवेत स्वाद्वम्ललवणान् रसान् ॥ ८ ॥
दैर्घ्याच्छिशानामेतर्हि प्रातरेव बुभुक्षितः ।
अवश्यकार्य्यं सम्भाव्य यथोक्तं शीलयेदनु ॥ ९ ॥
वातघ्नतैलैरभ्यङ्ग मूर्ध्नि तैल विमर्दनम् ।
नियुद्धं कुशलैः सार्द्धं पादाघातं च युक्तितः ॥ १० ॥
कषायापहृतस्नेहस्ततः स्नातो यथाविधि ।
कुङ्कुमेन सदर्पेण प्रदिग्धोऽगुरुधूपितः ॥ ११ ॥

रसान् स्निग्धान् पलं पुष्टं गौडमच्छसुरां सुराम्।
गोधूमपिष्टमाषेक्षुक्षीरोत्थविकृतीः शुभाः ॥ १२ ॥
नवमन्नं वसां तैलं शौचकार्ये सुखोदकम्।
प्रावाराजिनकौशेयप्रवेणीकौचवास्तृतम् ॥ १३ ॥
उष्णस्वभावैर्लघुभिः प्राक्ततः शयनं भजेत्।
युक्त्यार्ककिरणान् स्वेदं पादत्राणं च सर्वदा ॥ १४ ॥
पीवरोरुस्तनश्रोण्यः समदाः प्रमदाः प्रियाः।
हरन्ति शीतमुष्णाङ्गो धूपकुङ्कुमयौवनैः ॥ १५ ॥
अङ्गारतापसन्तप्तगर्भभूवेश्मचारिणः।
शीतपारुष्यजनितो न दोषो जातु जायते ॥ १६ ॥
अयमेव विधिः कार्यः शिशिरेऽपि विशेषतः।
तदा हि शीतमधिकं रौक्ष्यं चादानकालजम् ॥ १७ ॥
कफश्चितो हि शिशिरे वसन्तेऽर्कांशुतापितः।
हत्वाऽग्निं कुरुते रोगानतस्तं त्वरया जयेत् ॥ १८ ॥
तीक्ष्णैर्वमननस्याद्यैर्लघुरूक्षैश्च भोजनैः।
व्यायामोद्वर्तनाघातैर्जित्वा श्लेष्माणमुल्बणम् ॥ १९ ॥
स्नातोऽनुलिप्तः कर्पूरचन्दनागुरुकुङ्कुमैः।
पुराणयवगोधूमक्षौद्रजाङ्गलशूल्यभुक् ॥ २० ॥
सहकाररसोन्मिश्रानास्वाद्य प्रिययार्पितान्।
प्रियास्यसङ्गसुरभीन् प्रियानेत्रोत्पलाङ्कितान् ॥ २१ ॥
सौमनस्यकृतो हृद्यान् वयस्यैः सहितः पिबेत्।
निर्गंदानासवारिष्टसीधुमार्द्वीकमाधवान् ॥ २२ ॥
शृङ्गवेराम्बु सारास्बु मध्वम्बु जलदाम्बु वा।
दक्षिणानिलशीतेषु परितो जलवाहिषु ॥ २३ ॥
अदृष्टनष्टसूर्य्येषु मणिकुट्टिमकान्तिषु।
परपुष्टविघुष्टेषु कामकर्मान्तभूमिषु ॥ २४ ॥

विचित्रपुष्पवृक्षेषु काननेषु सुगन्धिषु ।
गोष्ठीकथाभिश्चित्राभिर्मध्याह्नं गमयेत् सुखी ॥ २५ ॥
गुरुशीतदिवास्वप्नस्निग्धास्लमधुरांस्त्यजेत् ।
तीक्ष्णाशुरतितीक्ष्णांशुर्ग्रीष्मे संचिपतीव यत् ॥ २६ ॥
प्रत्यूह चीयते श्लेष्मा तेन वायुश्च वर्धते ।
अतोऽस्मिन् पटुकटूस्लव्यायामार्ककरांस्त्यजेत् ॥ २७ ॥
भजेन्मधुरमेवान्नं लघु स्निग्धं हिमं द्रवम् ।
सुशीततोयसिक्ताङ्गो लिह्यात् सक्तून् सशर्करान् ॥ २८ ॥
मद्यं न पेयं पेयं वा स्वल्पं सुबहुवारि वा ।
अन्यथा शोफशैथिल्यदाहमोहान् करोति तत् ॥२९॥
कुन्देन्दुधवल शालिमश्नीयाज्जाङ्गलैः पलैः ।
पिबेद्रस नातिघनं रसालां रागखाण्डवौ ॥ ३० ॥
पानकं पञ्चसारं वा नवमृद्भाजनस्थितम् ।
मोचचोचदलैर्युक्तं साम्लं मृन्मयशुक्तिभिः ॥ ३१ ॥
पटलावासितं चाम्भः सकर्पूरं सुशीतलम् ।
शशाङ्ककिरणान् भव्यान् रजन्या भक्षयन् पिबेत् ॥३२॥
ससितं माहिषं क्षीरं चन्द्रनक्षत्रशीतलम् ।
अभ्रङ्कषमहाशालतालरुद्धोष्णरश्मिषु ॥३३॥
वनेषु माधवीश्लिष्टद्राक्षास्तवकशालिषु ।
सुगन्धिहिमपानीयसिच्यमानपटालिके ॥ ३४ ॥
कायमाने चिते चूतप्रवालफललुम्बिभिः ।
कदलीदलकह्लारमृणालकमलोत्पलैः ॥ ३५ ॥
कल्पिते कोमलैस्तल्पे हसत्कुसुमपल्लवे ।
मध्यन्दिनेऽर्कतापार्त्तैः स्वप्याद्वारागृहेऽथवा ॥ ३६ ॥
पुंस्त्रीस्तनहस्तास्यप्रवृत्तोशीरवारिणि ।
निशाकरकराकीर्णे सौधपृष्ठे निशासु च ॥ ३७ ॥

आसना

स्वस्थचित्तस्य चन्दनार्द्रस्य मालिनः।
निवृत्तकामतल्पस्य सुसूक्ष्मतनुवाससः॥ ३८॥
जलार्द्रैस्तालवृन्तानि विस्तृताः पद्मिनीपुटाः।
उत्क्षेपाश्च मृदूत्क्षेपा जलवर्षिहिमानिलाः॥ ३९॥
कर्पूरमल्लिका माला हाराः सहरिचन्दनाः।
मनोहरकलालापाः शिशवः सारिकाः शुकाः॥ ४०॥
मृणालवलयाः कान्ताः प्रोत्फुल्लकमलोज्ज्वलाः।
जङ्गमा इव पद्मिन्यो हरन्ति दयिताः क्लमम्॥ ४१॥
आदानस्नानवपुषामग्निः सन्नोऽपि सीदति।
वर्षासु दोषैः
दुष्यन्ति तेऽम्बुलम्बाम्बुदेऽम्बरे॥ ४२॥
मलुषारेण मरुता सहसा शीतलेन च।
भूबाष्पेणाम्लपाकेन मलिनेन च वारिणा॥ ४३॥
वह्निनैव च मन्देन
तेष्वित्यन्योन्यदूषिषु।
भजेत् साधारणं सर्वमूषणस्नेजनं च यत्॥ ४४॥
आस्थापन शुद्धतनुर्जीर्णं धान्यं रसान् कृतान्।
जाङ्गल पिशित यूषान् मध्वरिष्टं चिरन्तनम्॥ ४५॥
मस्तु सौवर्चलाढ्यं वा पञ्चकोलावचूर्णितम्।
दिव्यं कौपं शृतं चाम्भो भोजन त्वतिदुर्दिने॥ ४६॥
व्यक्ताम्ललवणस्नेह संशुष्कं चौद्रवह्नयु।
अपादचारी सुरभिः सतत धूपिताम्बरः॥ ४७॥
हर्म्यपृष्ठे वसेद्वाप्यशीतशीकरवर्जिते।
नदीजलोदमन्थाहःस्वप्नायासातपांस्त्यजेत्॥ ४८॥
वर्षाशीतोचिताङ्गानां सहसैवार्करश्मिभिः।

तप्तानां सञ्चितं दृष्टौ पित्तं शरदि कुप्यति ॥ ४९ ॥
तज्जयाय घृतं तिक्तं विरेको रक्तमोक्षणम्।
तिक्तं स्वादु कषायं च क्षुधितोऽन्नं भजेल्लघु ॥ ५० ॥
शालिमुद्गसिताधात्रीपटोलमधुजाङ्गलम्।
तप्तं तप्तांशुकिरणैः शीतं शीतांशुरश्मिभिः ॥ ५१ ॥
समन्तादभ्रहोरात्रमगस्त्योदयनिर्विषम्।
शुचि हंसोदकं नाम निर्मलं मलजिज्जलम् ॥ ५२ ॥
नाभिष्यन्दि न वा रूक्षं पानादिष्वमृतोपमम्।
चन्दनोशीरकर्पूरमुक्तास्रग्वसनोज्ज्वलः ॥ ५३ ॥
सौधेषु सौधधवलां चन्द्रिकां रजनीमुखे।
तुषारक्षारसौहित्यदधितैलवसातपान् ॥ ५४ ॥
तीक्ष्णमद्यदिवास्वप्नपुरोवातान् परित्यजेत्।
शीते वर्षासु चाद्यांस्त्रीन् वसन्तेऽन्त्यान् रसान् भजेत् ॥ ५५ ॥
स्वादुं निदाघे शरदि स्वादुतिक्तकषायकान्।
शरद्वसन्तयो रूक्षं शीतं घर्मघनान्तयोः ॥ ५६ ॥
अन्नपानं समासेन विपरीतमतोऽन्यथा।
नित्यं सर्वरसाभ्यासः स्वलाधिक्यमृताहतौ ॥ ५७ ॥
ऋत्वोरन्त्यादिसप्ताहावृतुसन्धिरिति स्मृतः।
तत्र पूर्वो विधिस्त्याज्यः सेवनीयोऽपरः क्रमात्।
असात्म्यजा हि रोगाः स्युः सहसा त्यागशीलनात् ॥ ५८ ॥

चतुर्थोऽध्यायः।

अथातो रोगानुत्पादनीयमध्यायं व्याख्यास्यामः ॥
वेगान्न धारयेद्धीमान् वेगान्सन्धारयन्हि तान्।
निद्राकासश्रमश्वासजृम्भाश्रुच्छर्दिरेतसाम् ॥ १ ॥
अधोवातस्य रोधेन गुल्मोदावर्त्तरुक्क्लमाः।

वातमूत्रशकृत्सङ्गस्तृष्ण्यग्निवधहृद्गदाः ॥ २ ॥
स्नेहस्वेदविधिस्तत्र वर्त्तयो भोजनानि च।
पानानि वस्तयश्चैव शस्तं वातानुलोमनम् ॥ ३ ॥
शकृतः पिण्डिकोद्वेष्टप्रतिश्यायशिरोरुजः।
ऊर्द्ध्ववायुः परीकर्त्तो हृदयस्योपरोधनम् ॥ ४ ॥
मुखेन विट्प्रवृत्तिश्च पूर्वोक्ताश्चामयाः स्मृताः।
अङ्गभङ्गाश्मरीवस्तिमेढ्रवङ्क्षणवेदनाः ॥ ५ ॥
मूत्रस्य रोधात् पूर्वं च प्रायो रोगाः

तदौषधम्।

वर्त्म्यभ्यङ्गावगाहाश्च स्वेदनं वस्तिकर्म च ॥ ६ ॥
अन्नपानं च विड्भेदि विड्रोधोत्थेषु यच्छसु।
मूत्रजेषु च पाने च प्राग्भक्तं शस्यते घृतम् ॥ ७ ॥
जीर्णान्तिकं चोत्तमया मात्रया योजनाद्वयम्।
अवगीडकमितश्च संस्थितं

धारणात् पुनः ॥ ८ ॥

उद्गारस्यारुचिः कम्पो विबन्धो हृदयोरसोः।
आध्मानकासहिध्माश्च हिध्मावत्तत्र भेषजम् ॥ ९ ॥
शिरोत्तेन्द्रियदौर्बल्यमन्यास्तम्भार्दित क्षुतेः।
तीक्ष्णधूमाञ्जनाघ्राणनावनार्कविलोकनैः ॥ १० ॥
प्रवर्त्तयेत् क्षुतिं सक्ता स्नेहस्वेदौ च शीलयेत्।
शीर्षाङ्गवादवाधिर्य्यतमोहभ्रमहृद्ग्रहाः ॥ ११ ॥
तृष्णाया निग्रहात्तत्र शीतः सर्वो विधिर्हितः।
अङ्गभङ्गारुचिग्लानिकार्श्यशूलभ्रमाः क्लवः ॥ १२ ॥
तत्र योज्यं लघु स्निग्धमुष्णमल्पं च भोजनम्।
निद्रायां मोहमूर्च्छात्तिगौरवालस्यजृम्भिकाः ॥ १३ ॥
अङ्गमर्दश्च तत्रेष्टः स्वप्नः संवाहनानि च।

कासस्य रोधात्तद्वृद्धिः श्वासारुचिहृदामयाः ॥ १४ ॥
शोषो हिध्मा च कार्योऽत्र कासहा सुतरां विधिः ।
गुल्महृद्रोगसम्मोहाः श्रमश्वासाद् विधारितात् ॥१५॥
हितं विश्रमण तत्र वातघ्नश्च क्रियाक्रमः ।
जृम्भायाः क्षववद्रोगाः सर्वश्चानिलजिद् विधिः ॥१६॥
यौनसाक्षिशिरोहृद्गुदमन्यास्तम्भारुचिभ्रमाः ।
सगुल्मावाध्यतस्तत्र स्वप्नो मद्यं प्रियाः कथाः ॥१७॥
विसर्पकोठकुष्ठार्शःकण्डूपाण्डुामयज्वराः ।
सकाससश्वासहृल्लासव्यङ्गक्षयमयवो वमेः ॥ १८ ॥
गण्डूषधूमनाहारान् रूक्ष भुक्ता तदुद्गमः ।
व्यायामः सुतिरस्कस्य श्रस्तं चात्र विरेचनम् ॥१८॥
सक्षारलवण तैलमभ्यङ्गार्थं च श्रस्यते ।
शुक्रात्तत्स्रवणं गुह्यवेदना क्षयथुर्ज्वरः ॥ २० ॥
हृद्व्यथा मूत्रभङ्गाङ्गभङ्गवृद्ध्यश्मषण्ढताः ।
ताम्रचूडसुराशालिवस्त्यभ्यङ्गावगाहनम् ॥ २१ ॥
वस्तिशुद्धिकरैः सिद्ध भजेत् क्षीरं प्रियाः स्त्रियः ।
वट्शूलार्त्तं त्यजेत् क्षीणं विड्भं वेगरोधिनम् ॥२२॥
रोगाः सर्वेऽपि जायन्ते वेगोदीरणधारणैः ।
निर्दिष्टं साधनं तत्र भूयिष्ठं ये तु तान् प्रति ॥ २३ ॥
ततश्चानेकधा प्रायः पवनो यत् प्रकुप्यति ।
अन्नपानौषध तत्र युञ्जीतातोऽनुलोमनम् ॥ २४ ॥
धारयेत् तु सदा वेगान् हितैषी प्रेत्य चेह च ।
लोभेर्ष्याद्वेषमात्सर्य्यरागादीनां जितेन्द्रियः ॥ २५ ॥
यतेत च यथाकालं मलानां शोधनं प्रति ।
अत्यर्थसञ्चितास्ते हि कुद्धाः स्युर्जीवितच्छिदः ॥२६॥
दोषाः कदाचित् कुप्यन्ति जिता लङ्घनपाचनैः ।

ये तु संशोधनैः शुद्धा न तेषां पुनरुद्भवः ॥ २७ ॥
यथाक्रमं यथायोगमत ऊर्ध्वं प्रयोजयेत्।
रसायनानि सिद्धानि हृथयोगांश्च कालवित् ॥२८॥
भेषजक्षपिते पथ्यमाहारैर्बृंहणं क्रमात्।
शालिषष्टिकगोधूममुद्गमांसघृतादिभिः ॥ २९ ॥
हृद्यदीपनभैषज्यसंयोगाद्रुचिपक्तिदैः।
साभ्यङ्गोद्वर्त्तनस्नाननिरूहस्नेहवस्तिभिः ॥ ३० ॥
तथा स लभते शर्म सर्वपावकपाटवम्।
धीवर्णेन्द्रियवैमल्यं हृषतां दैर्घ्यमायुषः ॥ ३१ ॥
ये भूतविषवायुग्निक्षतभङ्गादिसम्भवाः।
कामक्रोधभयाद्याश्च ते स्युरागन्तवो गदाः ॥ ३२ ॥
त्यागः प्रज्ञापराधानामिन्द्रियोपशमः स्मृतिः।
देशकालात्मविज्ञानं सद्वृत्तस्यानुवर्त्तनम् ॥ ३३ ॥
अनुत्पत्त्यै समासेन विधिरेष प्रदर्शितः।
निजागन्तुविकाराणामुत्पन्नानां च शान्तये ॥३४॥
शीतोष्णं दोषचय वसन्ते विशोधयन् ग्रीष्मजमभ्रकाले।
घनात्यये वार्षिकमाशु सम्यक् प्राप्नोति रोगान्नृतुजान्न जातु॥३५
नित्यं हिताहारविहारसेवी समीक्ष्यकारी विषयेष्वसक्तः।
दाता समः सत्यपरः क्षमावानाप्तोपसेवी च भवत्यरोगः ॥३६॥

षष्ठोऽध्यायः।

अथातो द्रवद्रव्यविज्ञानीयमध्यायं व्याख्यास्यामः ॥
जीवनं तर्पणं हृद्य क्लादि बुद्धिप्रबोधनम्।
तन्वव्यक्तरसं स्पष्ट शीतं लघ्वमृतोपमम् ॥ १ ॥
गङ्गाम्बु नभसो भ्रष्ट स्पृष्टं त्वर्केन्दुमारुतैः।
हिताहितत्वे तद्भूयो देशकालावपेक्षते ॥ २ ॥

घनाभिहृष्टममलं शास्त्रन्नं राजतस्थितम् ।
अक्लिन्नमविवर्णं च तत् पेयं गाङ्गम्
अन्यथा ॥३॥
सामुद्रं तत्र पातव्यं मासादाश्वयुजादिना ।
ऐन्द्रमम्बु सुपात्रस्थमविपन्नं सदा पिबेत् ॥ ४ ॥
तदभावे च भूयिष्ठमन्तरिक्षानुकारि यत् ।
शुचि पृथ्वसितश्लक्ष्णे देशेऽर्कपवनाहतम् ॥ ५ ॥
न पिबेत् पङ्कशैवालतृणपर्णाविलास्तृतम् ।
सूर्येन्दुपवनाहृष्टमभिहृष्टं घन गुरु ॥ ६ ॥
फेनिलं जन्तुमत्तप्तं दन्तग्राह्यतिशैत्यतः ।
अनार्त्तवं च यद्दिव्यमार्त्तवं प्रथमं च यत् ॥७॥
लूतादितन्तुविण्मूत्रविषसङ्क्लेषदूषितम् ।
पश्चिमोदधिगाः शीघ्रवहा याश्चामलोदकाः ॥ ८ ॥
पथ्याः समासात्ता नद्यो विपरीतास्त्वतोऽन्यथा ।
उपलास्फालनाक्षेपविच्छेदैः खेदितोदकाः ॥ ९ ॥
हिमवन्मलयोद्भूताः पथ्यास्ता एव च स्थिराः ।
कृमिश्लीपदहृल्लण्ठशिरोरोगान् प्रकुर्वते ॥ १० ॥
प्राच्याऽऽवन्त्यापरान्तोत्था दुर्नामानि महेन्द्रजाः ।
उदरश्लीपदातङ्कान् सह्यविन्ध्योद्भवाः पुनः ॥११॥
कुष्ठपाण्डुशिरोरोगान् दोषघ्नाः पारियात्रजाः ।
बलपौरुषकारिण्यः सागराभ्यस्तिदोषकृत् ॥१२॥
विद्यात् कूपतडागादीन् जाङ्गलानूषशैलतः ।
नाम्बु पेयमशक्त्या वा स्वल्पमल्पाग्निगुल्मिभिः ॥१३॥
पाण्डूदरातिसारार्शोग्रहणीदोषशोथिभिः ।
ऋते शरन्निदाघाभ्यां पिबेत् स्वस्थोऽपि चाल्पशः ॥१४॥
समस्थूलकृशाभक्तमध्यान्तप्रथमाम्बुपाः ।

शीतं मदात्ययग्लानिमूर्च्छाच्छर्दिश्रमभ्रमान् ॥ १५॥
तृष्णोष्णदाहपित्तास्रविषाण्यम्बु नियच्छति ।
दीपनं पाचनं कण्ठ्यं लघूष्णं वस्तिशोधनम् ॥१६॥
हिध्माध्मानानिलश्लेष्मसद्यःशुद्धे नवज्वरे ।
कासामपीनसश्वासपार्श्वरुक्षु च शस्यते ॥ १७ ॥
अनभिष्यन्दि लघु च तोयं क्वथितशीतलम् ।
पित्तयुक्ते हितं दोषे व्यूषितं तच्चिदोषकृत् ॥ १८ ॥
नालिकेरोदकं स्निग्धं स्वादु तृष्यं हिमं लघु ।
तृष्णापित्तानिलहरं दीपनं वस्तिशोधनम् ॥ १९ ॥
वर्षासु दिव्यनादेये परं तोये वरावरे ।
स्वादुपाकरसं स्निग्धमोजस्यं धातुवर्धनम् ॥ २० ॥
वातपित्तहरं तृष्यं श्लेष्मलं गुरु शीतलम् ।
प्रायः पयः

अत्र गव्यं जीवनीयं रसायनम् ॥२१॥

तत्तच्छीतहितं मेध्यं बल्यं स्तन्यकरं सरम् ।
श्रमभ्रममदालस्यश्वासकासातिसृट्क्षुधः ॥ २२ ॥
जीर्णज्वरं मूत्रकृच्छ्रं रक्तपित्तं च नाशयेत् ।
हितमत्यग्न्यनिद्रेभ्यो गरीयो माहिषं हिमम् ॥ २३ ॥
अल्पाम्बुपानव्यायामकटुतिक्ताम्लनैर्लघु ।
आजं शोषज्वरश्वासरक्तपित्तातिसारजित् ॥२४॥
ईषद्रूक्षोष्णलवणमौष्ट्रकं दीपनं लघु ।
शस्तं वातकफानाहकृमिशोफोदरार्शसाम् ॥ २५ ॥
मानुषं वातपित्तास्रगभिघाताहिरोगजित् ।
तर्पणाद्योतनैर्नस्यैः

अक्षव्यं तूष्णमाविकम् ॥२६॥

वातव्याधिहरं हिध्माश्वासपित्तकफप्रदम् ।

हस्तिन्याः स्थैर्य्यकृत्
वाढ़मुष्णं त्वैकैशफं लघु ॥ २७ ॥
शाखावातहरं साम्ललवणं जड़ताकरम् ।
पयोऽभिष्यन्दि गुर्वामं युक्त्या शृतमतोऽन्यथा ॥ २८ ॥
भवेद्गरीयोऽतिशृतं धारोष्णममृतोपमम् ।
अम्लपाकरसं ग्राहि गुरूष्णं दधि वातजित् ॥ २९ ॥
मेदःशुक्रबलश्लेष्मपित्तरक्ताग्निशोफकृत् ।
रोचिष्णु शस्तमरुचौ शीतके विषमज्वरे ॥ ३० ॥
पीनसे मूत्रकृच्छ्रे च रूक्षं तु ग्रहणीगदे ।
नैवाद्यान्निशि नैवोष्णं वसन्तोष्णशरत्सु न ॥ ३१ ॥
नामुद्गसूपं नाचौद्र तन्नाशृतसितोपलम् ।
न चानामलकं नापि नित्यं नामन्दमन्यथा ॥३२॥
ज्वरासृक्पित्तवीसर्पकुष्ठपाण्डुभ्रमप्रदम् ।
यक्ष्मं लघु कषायाम्लं दीपनं कफवातजित् ॥ ३३ ॥
शोफोदरार्शोग्रहणीदोषमूत्रग्रहारुचीः ।
प्लीहगुल्मघृतव्यापद्गरपाण्ड्वामयान् जयेत् ॥ ३४ ॥
तद्वन्मस्तु सरं शीतः शोधि विष्टम्भजिल्लघु ।
नवनीतं नवं हृद्यं शीतं वर्णबलाग्निकृत् ॥ ३५ ॥
संग्राहि वातपित्तासृक्क्षयार्शोऽर्दितकासजित् ।
चीरोऽवं तु सग्राहि रक्तपित्तान्निरोगजित् ॥ ३६ ॥
शस्तं धीस्मृतिमेधाग्निबलायुःशुक्रचक्षुषाम् ।
बालवृद्धप्रजाकान्तिसौकुमार्य्यस्वरार्थिनाम् ॥ ३७ ॥
क्षतक्षीणपरीसर्पशस्त्राग्निग्लपितात्मनाम् ।
वातपित्तविषोन्मादशोषालक्ष्मीज्वरापहम् ॥३८॥
स्नेहानामुत्तमं शीतं वयसः स्थापनं परम् ।
सहस्रवीर्य्यं विधिभिर्घृतं कर्म्मसहस्रकृत् ॥ ३९ ॥

मदापस्मारमूर्च्छामशिरःकर्णाक्षियोनिजान्।
पुराणं जयति व्याधीन् व्रणशोधनरोपणम् ॥४०॥
वल्याः किलाटघीयूषकूर्चिकामोरणादयः।
शुक्रनिद्राकफकरा विष्टम्भिगुरुदोषलाः ॥ ४१ ॥
गव्ये क्षीरघृते श्रेष्ठे निन्दिते चाविसम्भवे।
इक्षो रसो गुरुः स्निग्धो बृंहणः कफमूत्रकृत् ॥४२॥
वृष्यः शीतोऽस्रपित्तघ्नः स्वादुपाकरसः सरः।
सोऽग्ये सलवणो दन्तपीडितः शर्करासमः ॥ ४३ ॥
मूलाग्रजन्तुजग्धादिपीड़नाच्चलसङ्करात्।
किञ्चित्कालं विधृत्या च विकृतिं याति यान्त्रिकः ॥४४॥
विदाही गुरुविष्टम्भी तेनासौ
तत्र पौरुषकः।
शैत्यप्रसादमाधुर्य्यैर्करस्तमनुवांशिकः ॥ ४५ ॥
ज्ञातपर्वककान्तारनैपालाद्यास्ततः क्रमात्।
सच्चाराः सकषायाश्च सौम्याः किञ्चिद्विदाहिनः ॥ ४६ ॥
फाणितं गुर्वभिष्यन्दि चयकृन्मूत्रशोधनम्।
नातिश्लेष्मकरो धौतः सृष्टमूत्रशकृद्गुडः ॥ ४७ ॥
प्रभूतक्रमिमज्जास्रमेदो मांसकफोऽपरः।
हृद्यः पुराणः पथ्यश्च नवः श्लेष्माग्निसादकृत् ॥ ४८ ॥
वृष्याः क्षतक्षीणहिता रक्तपित्तानिलापहाः।
मत्स्यण्डिकाखण्डसिताः क्रमेण गुणवत्तमाः ॥४९॥
तद्गुणा तिक्तमधुरा कषाया या सशर्करा।
दाहतृट्च्छर्दिमूर्च्छासृक्पित्तघ्नाः सर्वशर्कराः ॥५०॥
शर्करेक्षुविकाराणां फाणितं च वरावरि।
चक्षुष्यं छेदि तृट्श्लेष्मविषच्छर्द्यासपित्तनुत् ॥५१॥
मेहकुष्ठकृमिच्छर्दिश्वासकासातिसारनुत्।

व्रणशोधनसन्धानरोपणं वातलं मधु ॥ ५२ ॥
रूक्षं कषायमधुरं तत्तुल्या मधुशर्करा।
उष्णमुष्णार्त्तमुष्णे च युक्तं चौष्णैर्निहन्ति तत् ॥५३॥
प्रच्छर्दने निरूहे च मधूष्णं न निवार्य्यते।
अलब्धपाकमाश्वेव तयोर्यस्मान्निवर्त्तते ॥५४॥
तैलं स्वयोनिवत्तत्र मुख्यं तीक्ष्णं व्यवायि च।
त्वग्दोषकृदचक्षुष्यं सूक्ष्मोष्णं कफकृन्न च ॥५५॥
कृशानां बृंहणायालं स्थूलानां कर्शनाय च।
बद्धविट्कं कृमिघ्नं च संस्कारात् सर्वदोषजित् ॥५६॥
सतिक्तोषणमैरण्डं तैलं स्वादु सरं गुरु।
शूलगुल्मानिलकफानुदरं विषमज्वरम् ॥ ५७ ॥
रुक्शोफौ च कटीगुह्यकोष्ठपृष्ठास्रयौ जयेत्।
तीक्ष्णोष्णं पिच्छिलं विस्रं रक्तैरण्डोद्भवं त्वति ॥ ५८ ॥
कटूष्णं सार्षपं तीक्ष्णं कफशुक्रानिलापहम्।
लघु पित्तासृक्कृत् कोठकुष्ठार्शोव्रणजन्तुजित् ॥ ५९ ॥
आद्यं स्वादु हिमं केश्यं गुरु पित्तानिलापहम्।
नात्युष्णं निम्बजं तिक्तं कृमिकुष्ठकफप्रणुत् ॥ ६० ॥
उमाकुसुमभृजं चोष्णं त्वग्दोषकफपित्तकृत्।
वसा मज्जा च वातघ्नौ बलपित्तकफप्रदौ ॥ ६१ ॥
मांसानुगस्वरूपौ च विद्यान्मेदोऽपि तादृशम्।
दीपनं रोचनं मद्यं तीक्ष्णोष्णं तुष्टिपुष्टिदम् ॥ ६२ ॥
सस्वादुतिक्तकटुकमम्लपाकरसं सरम्।
सकषायं स्वरारोग्यप्रतिभावर्णकृल्लघु ॥ ६३ ॥
नष्टनिद्रातिनिद्रेभ्यो हितं पित्तासृदूषणम्।
व्रणस्थूलहितं रूक्षं सूक्ष्मं स्रोतोविशोधनम् ॥ ६४ ॥
वातश्लेष्महरं युक्त्या पीतं विषवदन्यथा।

गुरु विदोषजननं नवं जीर्णमतोऽन्यथा ॥ ६५ ॥
पेयं नोष्णोपचारेण न विरिक्तक्षुधातुरैः।
नात्यर्थतीक्ष्णमृदल्पसम्भारं कलुषं न च ॥ ६६ ॥
गुल्मोदरार्शोग्रहणीशोषहृत् स्नेहनी गुरुः।
सुराऽनिलघ्नी मेदोऽसृक्स्तन्यमूत्रकफावहा ॥ ६७ ॥
तद्गुणा वारुणी हृद्या लघुतीक्ष्णा निहन्ति च।
शूलकासवमिश्वासविबन्धाध्मानपीनसान् ॥ ६८ ॥
नातितीव्रमदा लघ्वी पथ्या वैभीतकी सुरा।
व्रणे पाण्डुामये कुष्ठे न चात्यर्थं विरुध्यते ॥ ६९ ॥
यथा द्रव्यगुणोऽरिष्टः सर्वमद्यगुणाधिकः।
ग्रहणीपाण्डुकुष्ठार्शःशोफशोषोदरज्वरान् ॥ ७० ॥
हन्ति गुल्मकृमिप्लीहान् कषायकटुवातलः।
मार्द्वीकं लेखनं हृद्यं नात्युष्णं मधुरं सरम् ॥ ७१ ॥
अल्पपित्तानिल पाण्डुमेहार्शःकृमिनाशनम्।
अस्मादल्पान्तरगुणं खार्जूरं वातलं गुरु ॥ ७२ ॥
शार्करः सुरभिः स्वादुर्हृद्यो नातिमदो लघुः।
सृष्टमूत्रशकृद्वातो गौडस्तर्पणदीपनः ॥ ७३ ॥
वातपित्तकरः सीधुः स्नेहस्त्वविकारहा।
मेदःशोफोदरार्शोघ्नस्तत्र पक्वरसो वरः ॥ ७४ ॥
छेदी मध्वासवस्तीक्ष्णो मेहपीनसकासजित्।
रक्तपित्तकफोत्क्लेदि शुक्तं वातानुलोमनम् ॥ ७५ ॥
शूलशोषतीक्ष्णरूक्षाम्लहृद्यं रुचिकरं सरम्।
दीपनं शिशिरस्पर्शं पाण्डुदृक्कृमिनाशनम् ॥ ७६ ॥
गुडेक्षुमद्यमार्द्वीकशुक्तं लघु यथोत्तरम्।
कन्दमूलफलाद्यं च तद्विद्यात्तदासुतम् ॥ ७७ ॥
शाण्डाकी चासुतं चान्यत् कालाम्लं रोचनं लघु।

धान्याम्लं भेदि तीक्ष्णोष्णं पित्तकृत् स्पर्शशीतलम् ॥ ७८ ॥
श्रमक्लमहरं रुच्यं दीपनं वस्तिशूलनुत् ।
शस्तमास्थापने हृद्यं लघु वातकफापहम् ॥ ७९ ॥
मूत्रं गोऽजाविमहिषीगजाश्वोष्ट्रखरोद्भवम् ।
पित्तलं रूक्षतीक्ष्णोष्णं लवणानुरसं कटु ॥ ८० ॥
कृमिशोफोदरानाहशूलपाण्डुकफानिलान् ।
गुल्मारुचिविषश्वित्रकुष्ठार्शांसि जयेत्क्षयम् ॥ ८१ ॥
तोयचीरेक्षुतैलानां वर्गैर्मद्यस्य च क्रमात् ।
इति द्रवैकदेशोऽयं यथास्थूलमुदाहृतः ॥ ८२ ॥

षष्ठोऽध्यायः ।

अथातोऽन्नस्वरूपविज्ञानीयमध्यायं व्याख्यास्यामः ॥
रक्तो महान् सकलमस्तूर्णकः शकुनाहृतः ।
सारामुखो दीर्घशूको रोध्रशूकः सुगन्धकः ॥ १ ॥
पतङ्गास्तपनीयाश्च ये चान्ये शालयः शुभाः ।
स्वादुपाकरसाः स्निग्धा वृष्या बलाल्पवर्चसः ॥ २ ॥
कषायानुरसाः पथ्या लघवो मूत्रला हिमाः ।
शूकजेषु
वरस्तत्र रक्तस्तृष्णाविदोषहा ॥ ३ ॥
महांस्तस्यानुकलमस्तं चाप्यनु
ततः परे ।
यवका हायनाः पांसुवाष्पनैषधकादयः ॥ ४ ॥
स्वादूष्णा गुरवः स्निग्धाः पाकेऽम्लाः श्लेष्मपित्तलाः ।
सृष्टमूत्रपुरीषाश्च पूर्वं पूर्वं च निन्दिताः ॥ ५ ॥
स्निग्धो ग्राही गुरुः स्वादुस्त्रिदोषघ्नः स्थिरो हिमः ।
षष्टिको व्रीहिषु श्रेष्ठो गौरश्चासितगौरतः ॥ ६ ॥

ततः क्रमाच्चहाव्रीहिकृष्णव्रीहिजतूमुखाः ।
कुक्कुटाण्डकपालाख्यपारावतकशूकराः ॥ ७ ॥
वरकोद्दालकोज्वालचीनशारददुर्दराः ।
गन्धनाः कुरुविन्दाश्च गुणैरल्पान्तराः स्मृताः ॥ ८ ॥
स्वादुरम्लविपाकोऽन्यो व्रीहिः पित्तकरो गुरुः ।
बहुमूत्रपुरीषोष्मा त्रिदोषस्त्वेव पाटलः ॥ ९ ॥
कङ्गुकोद्रवनीवारश्यामाकादि हिमं लघु ।
तृणधान्य पवनश्लेष्मनं कफपित्तहृत् ॥ १० ॥
भग्नसन्धानकृत्तत्र प्रियङ्गुर्ग्रहणी गुरुः ।
कोरदूषः परं ग्राही स्तम्भयेत्तो विषापहः ॥ ११ ॥
रूक्षः शीतो गुरुः स्वादुः सरो विड्वातकृद्यवः ।
वृष्यः स्थैर्यकरो मूत्रमेदःपित्तकफान् जयेत् ॥ १२ ॥
पीनसश्वासकासोरुस्तम्भकण्ठत्वगामयान् ।
न्यूनो यवादन्ययवः
रूक्षोष्णो वंशजो यवः ॥ १३ ॥
वृष्यः शीतो गुरुः स्निग्धो जीवनो वातपित्तहा ।
सन्धानकारी मधुरो गोधूमः स्थैर्यकृत् सरः ॥ १४ ॥
पथ्या नन्दीमुखी शीता कषायमधुरा लघुः ।
मुद्गाढकीमसूरादि शिम्बीधान्यं विबन्धकृत् ॥ १५ ॥
कषाय स्वादु संग्राहि कटुपाकं हिमं लघु ।
मेदःश्लेष्मास्रपित्तेषु हितं लेपोपसेकयोः ॥ १६ ॥
वरोऽत्र मुद्गोऽल्पचलः कलायस्त्वतिवातलः ।
राजमाषोऽनिलकरो रूक्षो बहुशुक्रदृगुरुः ॥ १७ ॥
उष्णाः कुलत्थाः पाकेऽम्लाः शुक्राश्मश्वासपीनसान् ।
कासार्शःकफवातांश्च घ्नन्ति पित्तासदाः परम् ॥१८॥
निष्पावो वातपित्तास्रस्तन्यमूत्रकरो गुरुः ।

सरो विदाही दृक्शुक्रकफशोफविषापहः ॥ १९ ॥
माषः स्निग्धो बलश्लेष्मलपित्तकरः सरः ।
गुरुर्वृष्योऽनिलहरः स्वादुः शुक्रबृद्धिविरेककृत् ॥ २० ॥
फलानि माषवद्विद्यात् काकाण्डोलात्मगुप्तयोः ।
उष्णस्त्वचो हिमः स्पर्शे केशो बल्यस्थिलो गुरुः ॥२१॥
अल्पमूत्रः कटुः पाके मेघाग्निकफपित्तकृत् ।
स्निग्धोमा स्वादुस्तिक्तोष्णा कफपित्तकरो गुरुः ॥२२॥
दृक्शुक्रकृत् कटुः पाके

तद्वद्बीजं कुसुम्भजम् ।

माषोऽत्र सर्वेष्ववरो यवकः शूकजेषु च ॥ २३ ॥
नवं धान्यमभिष्यन्दि लघु संवत्सरोषितम् ।
शीघ्रजन्म तथा सूप्यं निस्तुषं युक्तिभर्जितम् ॥ २४ ॥
मण्डपेयाविलेपीनामोदनस्य च लाघवम् ।
यथापूर्वं शिवस्तत्र मण्डो वातानुलोमनः ॥ २५ ॥
क्लमग्लानिदोषशोषघ्नः पाचनो धातुसाम्यकृत् ।
स्रोतोमार्दवकृत् स्वेदी सम्मुच्चयति चानलम् ॥२६॥
च्युत्तृष्णाग्लानिदौर्बल्यकुक्षिरोगज्वरापहा ।
मलानुलोमनी पथ्या पेया दीपनपाचनी ॥ २७ ॥
विलेपी ग्राहिणी हृद्या क्षुण्णाग्नेर्दीपनी हिता ।
व्रणाक्षिरोगसंशुद्धदुर्बलस्नेहयायिनाम् ॥ २८ ॥
सुधौतः प्रसृतः स्निग्धोऽत्यक्लोमा चौदनो लघुः ।
यश्चाग्नेयौषधक्वाथसाधितो भृष्टतण्डुलः ॥ २९ ॥
विपरीतो गुरुः क्षीरमांसाद्यैर्यश्च साधितः ।
इति द्रव्यक्रियायोगमानाद्यैः सर्वमादिशेत् ॥ ३० ॥
हृंहणः प्रीणनो हृद्यश्चक्षुष्यो व्रणशुद्धिकृत् ।
मौद्गस्तु पथ्यः संशुद्धव्रणकण्ठाक्षिरोगिणाम् ॥ ३१ ॥

वातानुलोमी कौलत्थो गुल्मतूनिप्रतूनिजित्।
तिलपिण्याकविकृतिः शुष्कशाकं विरूढकम् ॥३२॥
शाखाकीवटकं दृग्घ्नं दोषलं ग्लपनं गुरु।
रसाला हृद्या तृप्त्या स्निग्धा बल्या रुचिप्रदा ॥३३॥
श्रमच्छर्दितृट्क्लमहरं पानकं प्रीणनं गुरु।
विष्टम्भि मूत्रलं हृद्यं यथाद्रव्यगुणं च तत् ॥३४॥
लाजास्तृट्कृमितीसारमेहमेदःकफच्छिदः।
कासपित्तोपशमना दीपना लघवो हिमाः ॥ ३५ ॥
पृथुका गुरवो बल्याः कफविष्टम्भकारिणः।
धाना विष्टम्भिनी रूक्षा तर्पणी लेखनी गुरुः ॥ ३६ ॥
सक्तवो लघवः क्षुत्तृट्श्रमनेत्रामयव्रणान्।
घ्नन्ति सन्तर्पणाः, पानात् सद्य एव बलप्रदाः ॥ ३७ ॥
नोदकान्तरिता न दिवा निशायां न केवलान्।
न भुक्त्वा न द्विजैश्चित्त्वा सक्तूनद्यान्न वा बहून् ॥ ३८ ॥
पिण्याको ग्लपनो रूक्षो विष्टम्भी दृष्टिदूषणः।
वसवारो गुरुः स्निग्धो बलोपचयवर्धनः ॥ ३९ ॥
मुद्गादिजास्तु गुरवो यथाद्रव्यगुणानुगाः।
कुकूलकर्परभ्राष्टकन्दङ्गारविपाचितान् ॥ ४० ॥
एकयोनीन् लघून् विद्यादपूपानुत्तरोत्तरम्।
हरिणैणकुरङ्गर्क्षगोकर्णशृगमाढकाः ॥ ४१ ॥
शशशम्बरचारुष्कशरभाद्या मृगाः स्मृताः।
लाववर्त्तीकवार्त्तीररक्तवर्त्मककुक्कुभाः ॥ ४२ ॥
कपिञ्जलोपचक्राख्यचकोरकुरुबाह्वः।
वर्त्तको वर्त्तिका चैव तित्तिरिः क्रकरः शिखी ॥ ४३ ॥
ताम्रचूडाख्यवकरगोनर्दगिरिवर्त्तिकाः।
तथा शारपदद्राभवारटाद्येति विष्किराः ॥ ४४ ॥

जीवञ्जीवकदात्यूहभृङ्गाह्वशुकसारिकाः ।
लट्वाकोकिलहारीतकपोतचटकादयः ॥ ४५ ॥
प्रतुदाः
मेकागोधाहिखाविदाद्या विलेशयाः ।
गोखराश्वतरोष्ट्राश्वद्वीपिसिंहर्क्षवानराः ॥ ४६ ॥
मार्जारमूषिकव्याघ्रबभ्रुतरक्षवः ।
लोपाकजम्बुकश्येनचाषवान्तादवायसाः ॥ ४७ ॥
गृध्रघ्नीभासकुररगण्डोलूककुलिङ्गकाः ।
धूमिका मधुहा चेति प्रसहा मृगपक्षिणः ॥ ४८ ॥
वराहमहिषन्यङ्कुरुरोहितवारणाः ।
सृमरश्वमरः खड्गो गवयश्च महामृगाः ॥ ४९ ॥
हंससारसकादम्बवककारण्डवप्लवाः ।
बलाकोत्क्रोशचक्राह्वमद्गुक्रौञ्चादयोऽप्यवराः ॥ ५० ॥
मत्स्या रोहितपाठीनकूर्मकुम्भीरकर्कटाः ।
शुक्तिशङ्खोड्रशम्बूकशफरीवर्मिचन्द्रिकाः ॥ ५१ ॥
चुलुकिनक्रमकरशिशुमारतिमिङ्गिलाः ।
राजीचिल्लिचिमाद्याश्च
मांसमित्याहुरष्टधा ॥ ५२ ॥
योनिष्वजावी व्यामिश्रगोचरत्वादनिन्दिते ।
आद्यान्त्या जाङ्गलानूपा मध्यौ साधारणौ स्मृतौ ॥५३॥
तत्र बद्धमलाः शीता लघवो जाङ्गला हिताः ।
पित्तोत्तरे वातमध्ये सन्निपाते कफानुगे ॥ ५४ ॥
दीपनः कटुकः पाके ग्राही रूक्षो हिमः शशः ।
ह्रैषदुष्णा गुरुस्निग्धा हंसेना वर्त्तकादयः ॥ ५५ ॥
तित्तिरिस्तेष्वपि वरो मेधाग्निबलशुक्रकृत् ।
ग्राही वर्ण्योऽनिलोद्रिक्तसन्निपातहरः परम् ॥ ५६ ॥

नातिपथ्यः शिखी पथ्यः श्रोत्रस्वरवयोदृशाम्।
तद्वच्च कुक्कुटो हृद्यः
ग्राम्यस्तु श्लेष्मलो गुरुः ॥ ५७ ॥
मेधानलकरा हृद्याः क्रकराः सोपचक्रकाः।
गुरवः सलवणाः काणकपोताः सर्वदोषकृत् ॥ ५८ ॥
चटकाः श्लेष्मलाः स्निग्धा वातघ्नाः शुक्रलाः परम्।
गुरूष्णस्निग्धमधुरा वर्गाद्यातो यथोत्तरम् ॥ ५९ ॥
मूत्रशुक्रकृतो बल्या वातघ्नाः कफपित्तलाः।
शीता महामृगास्तेषु क्रव्यादाः प्रमहाः पुनः ॥ ६० ॥
लवणानुरसाः पाके कटुका मांसवर्धनाः।
जीर्णार्शोग्रहणीदोषशोषार्त्तानां घरं हिताः ॥ ६१ ॥
नातिशीतं गुरु स्निग्धं मांसमाजमदोषलम्।
शरीरधातुसामान्यादनभिष्यन्दि बृंहणम् ॥ ६२ ॥
विपरीतमतो ज्ञेयमाविकं बृंहणञ्तु तत्।
शुष्ककासश्रमात्यग्निविषमज्वरपीनसान् ॥ ६३ ॥
कार्श्यं केवलवातांश्च गोमांस सन्नियच्छति।
उष्णो गरीयान् महिषः स्वप्नदार्ढ्यबृंहत्त्वकृत् ॥ ६४ ॥
तद्वद् वराहः श्रमहा रुचिशुक्रबलप्रदः।
मत्स्याः पर कफकराः
चिलिचीमस्यिदोषकृत् ॥ ६५ ॥
लावरोहितगोधैणाः स्वे स्वे वर्गे वराः परम्।
मांसं सद्योहतं शुद्धं वयस्थञ्च भजेत्
त्यजेत् ॥ ६६ ॥
मृतं क्लिन्नं भृशं मेद्यं व्याधिवारिविषैर्हतम्।
पुंस्त्रियोः पूर्वपश्चार्द्धे गुरुणी गर्भिणी गुरुः ॥ ६७ ॥
लघुर्योषिच्चतुष्पात्सु विहङ्गेषु पुनः पुमान्।

शिरःस्कन्धोरुपृष्ठस्य कट्याः सक्थ्नोश्च गौरवम् ॥६८॥
तथामपक्वाशययोर्यथापूर्वं विनिर्दिशेत् ।
शोणितप्रभृतीनाञ्च धातूनामुत्तरोत्तरम् ॥ ६९ ॥
मांसाङ्गरीयो वृषणमेढ्रहृत्क्लोमकृद् गुरु ।
शाकं पाठासठीपूषामुनिषण्णसतोनजम् ॥ ७० ॥
त्रिदोषघ्नं लघु ग्राहि सराजक्षववास्तुकम् ।
मुनिषण्णोऽग्निकृद् वृष्यस्तेषु
राजक्षवः परम् ॥ ७१ ॥
ग्रहण्यर्शोविकारघ्नः
वर्चोभेदि तु वास्तुकम् ।
हन्ति दोषत्रयं कुष्ठं वृष्यं सोष्णं रसायनम् ॥ ७२ ॥
काकमाची सरा स्वर्य्या
चाङ्गेर्य्यग्न्यग्निदीपनी ।
ग्रहण्यर्शोऽनिलश्लेष्महितोष्णा ग्राहिणी लघुः ॥ ७३ ॥
पटोल सप्तलारिष्टशार्ङ्गेष्टावल्गुजाऽमृताः ।
वेत्राग्र वृहती वासा कुन्तली तिक्तपर्णिका ॥ ७४ ॥
मण्डूकपर्णी कर्कोटकारवेल्लकपर्पटाः ।
नाड़ीकलाय गोजिह्वा वार्त्ताकं वनतिक्तकम् ॥७५॥
करीरं कुलक नन्दी कुचेला शतुलादनी ।
कटिल्लं कैम्बुकं शीतं सकोशातककर्कशम् ॥ ७६ ॥
तिक्त पाके कटु ग्राहि वातलं कफपित्तजित् ।
वृष्य पटोल कृमिनुत् स्वादुपाकं रुचिप्रदम् ॥ ७७ ॥
पित्तल दीपन भेदि वातघ्नं वृहतीद्वयम् ।
वृषन्तु वमिकासघ्नं रक्तपित्तहरं परम् ॥ ७८ ॥
कारवेल्लं सकटुकं दीपनं कफजित् परम् ।
वार्त्ताक कटुतिक्तोष्ण मधुर कफवातजित् ॥ ७९ ॥

सक्षारमग्निजननं हृद्यं रुच्यमपित्तलम्।
करीरमाध्मानकरं कषायस्वादुतिक्तकम् ॥ ८० ॥
कोशातकावलुजकौ भेदनावग्निदीपनौ।
तण्डुलीयो हिमो रूक्षः स्वादुपाकरसो लघुः ॥८१॥
मदपित्तविषास्रघ्नः
मुञ्जातं वातपित्तजित्।
स्निग्धं शीतं गुरु स्वादु बृंहणं शुक्रकृत् परम् ॥ ८२ ॥
गुर्वी सरा तु पालक्या
मदघ्नी चाप्युपोदका।
पालक्यावत् स्मृतश्चक्षुः स तु संग्रहणात्मकः ॥ ८३ ॥
विदारी वातपित्तघ्नी मूत्रला स्वादुशीतला।
जीवनी बृंहणी कण्ठ्या गुर्वी हृद्या रसायनम् ॥८४॥
चक्षुष्या सर्वदोषघ्नी जीवन्ती मधुरा हिमा।
कुष्माण्डतुम्बकालिङ्गकर्कारुवीरुतिण्डिशम् ॥ ८५ ॥
तथा त्रपुसचीनाकचिर्भटं कफवातकृत्।
भेदि विष्टम्भाभिष्यन्दि स्वादुपाकरसं गुरु ॥ ८६ ॥
वल्लीफलानां प्रवरं कुष्माण्डं वातपित्तजित्।
वस्तिशुद्धिकरं हृद्यं
त्रपुसं त्वतिमूत्रलम् ॥ ८७ ॥
तुम्बं रूक्षतरं ग्राहि कालिङ्गैर्वारुचिर्भटम्।
बालं पित्तहरं शीतं विद्यात् पक्वमतोऽन्यथा ॥ ८८ ॥
शीर्णवृन्तं तु सक्षारं पित्तलं कफवातजित्।
रोचनं दीपनं हृद्यमष्ठीलानाहनुल्लघु ॥ ८९ ॥
मृणालविसशालूककुमुदोत्पलकन्दकम्।
नन्दीमाषककेलूटशृङ्गाटककशेरुकम् ॥ ९० ॥
क्रौञ्चादनं कलोड्यं च रूक्षं ग्राहि हिमं गुरु।

कलम्बनालिकाशार्षकुटिञ्जरकुतुम्बकम् ॥ ९१ ॥
चिल्लीलट्वाकलोणीकाकुरूटकगवेधुकम् ।
जीवन्तभुञ्जभृङ्गेडगजयवशाकसुवर्चलम् ॥ ९२ ॥
आलुकानि च सर्वाणि तथा सूप्यानि लक्षयेत् ।
स्वादु रुच्यं सलवणं वातश्लेष्मकरं गुरु ॥ ९३ ॥
शीतलं सृष्टविण्मूत्रं प्रायो विष्टभ्य जीर्य्यति ।
स्निग्धं निष्पीडितरसं स्वेदाढ्यं नातिदोषलम् ॥ ९४ ॥
लघुपत्रा तु या चिल्ली सा वास्तुकसमा मता ।
तत्कारोत्करणं स्वादु सतिक्तं कफवातजित् ॥ ९५ ॥
वर्षाभ्वी कालशाकं च सक्षार कटुतिक्तकम् ।
दीपनं भेदनं हन्ति गरशोफकफानिलान् ॥ ९६ ॥
दीपनाः कफवातघ्नाश्चिरिविल्वाङ्कुराः सराः ।
शतावर्य्यङ्कुरास्तिक्ता हृद्या दोषत्रयापहाः ॥९७॥
रूक्षो वंशकरीरस्तु विदाही वातपित्तलः ।
पत्तूरो दीपनस्तिक्तः श्लीहार्शःकफवातजित् ॥ ९८ ॥
क्रमिकासकफोत्क्लेदान् श्वासमर्दौ जयेत् सरः ।
रूक्षोष्णमम्लं कौसुम्भं गुरु पित्तकरं सरम् ॥ ९९ ॥
गुरूष्ण सार्षप बडविण्मूत्र सर्वदोषकृत् ।
यद्बालमव्यक्तरसं किञ्चित् क्षारं सतिक्तकम् ॥ १०० ॥
तन्मूलक दोषहरं लघु सोष्णं नियच्छति ।
गुल्मकासक्षयश्वासव्रणनेत्रगलामयान् ॥ १०१ ॥
स्वराग्निसादोदावर्त्तपीनसांश्च
महत् पुनः ।
रसे पाके च कटुकमुष्णवीर्य्यं त्रिदोषकृत् ॥ १०२ ॥
गुर्वभिष्यन्दि च
स्निग्धस्निग्धं तदपि वातजित् ।

वातश्लेष्महरं शुष्कं सर्वम्
आमं तु दोषलम् ॥ १०३ ॥
कटूष्णो वातकफहा पिण्डालुः पित्तवर्द्धनः ।
कुठेरशिग्रुसुरससुमुखासुरिभूस्तृणम् ॥ १०४ ॥
फणिज्झार्जकजम्बीरप्रभृति ग्राहि शातनम् ।
विदाहि कटु रूक्षोष्णं हृद्यं दीपनरोचनम् ॥१०५॥
दृक्शुक्रकृमिहृत्तीक्ष्णं दोषोत्क्लेशकरं लघु ।
हिध्मकासश्रमश्वासपार्श्वरुक्पूतिगन्धहा ॥ १०६ ॥
सुरसः
सुमुखो नातिविदाही गरशोफहा ।
आर्द्रिका तिक्तमधुरा सूत्रला न च पित्तकृत् ॥ १०७ ॥
लशुनो भृशतीक्ष्णोष्णः कटुपाकरसः सरः ।
हृद्यः केश्यो गुरुर्बल्यः स्निग्धो रोचनदीपनः ॥ १०८ ॥
किलासकुष्ठगुल्मार्शोमेहकृमिकफानिलान् ।
सहिध्मापीनसश्वासकासान् हन्त्यसपित्तकृत् ॥ १०९ ॥
पलाण्डुस्तद्गुणन्यूनः श्लेष्मलो नातिपित्तलः ।
कफवातार्शसां पथ्यः क्षेदेऽभ्यवहृतौ तथा ॥ ११० ॥
तीक्ष्णो गण्डनको ग्राही पित्तिना हितकृन्न सः ।
दीपनः सूरणो रुच्यः कफघ्नो विशदो लघुः ॥ १११ ॥
विशेषादर्शसां पथ्यः
भूकन्दस्त्वतिदोषलः ।
पत्रे पुष्पे फले नाले कन्दे च गुरुता क्रमात् ॥११२॥
वरा शाकेषु जीवन्ती सर्षपास्त्ववराः परम् ।
द्राक्षा फलोत्तमा हृद्या चक्षुष्या सृष्टमूत्रविट् ॥ ११३ ॥
स्वादुपाकरसा स्निग्धा सकषाया हिमा गुरुः ।
निहन्त्यनिलपित्तास्रतिक्तास्यत्वमदात्ययान् ॥ ११४ ॥

तृष्णाकासश्रमश्वासस्वरभेदक्षतक्षयान् ।
उद्रिक्तपित्तान् जयति त्रीन् दोषान् स्वादु दाडिमम् ॥११५
पित्ताविरोधि नात्युष्णमुष्णं वातकफापहम् ।
सर्वं हृद्यं लघु स्निग्धं ग्राहि रोचनदीपनम् ॥ ११६ ॥
मोचखर्जूरपनसनालिकेरपरूषकम् ।
आम्रातताल काश्मर्य्यराजादनमधूकजम् ॥ ११७ ॥
सौवीरवदराङ्कोलफल्गु श्लेष्मातकोद्भवम् ।
कातामाभिषुकाचोडमुकूलकनिकोचकम् ॥ ११८ ॥
उरुमाणं प्रियालञ्च बृंहणं गुरु शीतलम् ।
दाहक्षतक्षयहरं रक्तपित्तप्रसादनम् ॥ ११९ ॥
स्वादुपाकरसं स्निग्धं विष्टम्भि कफशुक्रकृत् ।
फलन्तु पित्तलं तालं सरं काश्मर्य्यजं हिमम् ॥ १२० ॥
शक्रमूत्रविबन्धघ्नं केश्यं मेध्यं रसायनम् ।
वात्तमाद्युष्णवीर्य्यन्तु कफपित्तकरं सरम् ॥ १२१ ॥
परं वातहरं स्निग्धमनुष्णन्तु प्रियालजम् ।
प्रियालमज्जा मधुरो हृद्यः पित्तानिलापहः ॥ १२२ ॥
कोलमज्जा गुणैस्तद्वत् छर्द्यतीसारजिच्च सः ।
पक्वं सुदुर्जरं विल्वं दोषलं पूतिमारुतम् ॥ १२३ ॥
दीपनं कफवातघ्नं बालं ग्राह्युभयं हि तत् ।
कपित्थमामं कण्ठघ्नं दोषलं दोषघ्नाति तु ॥ १२४ ॥
पक्वं हिक्कावमथुजित् सर्वं ग्राहि विषापहम् ।
जाम्बवं गुरु विष्टम्भि शीतलं भृशवातलम् ॥१२५॥
संग्राहि मूत्रशक्रतोरकण्ठ्यं कफपित्तनुत् ।
वातपित्तास्रकृद् बाल बल्यास्थि कफपित्तकृत् ॥१२६॥
गुर्वाम्रं वातजित् पक्वं स्वादम्लं कफशुक्रकृत् ।
वृक्षाम्लं ग्राहि रूक्षोष्णं वातश्लेष्महरं लघु ॥ १२७ ॥

शम्या गुरूष्णं केशघ्नं रूक्षं पीलु तु पित्तलम्।
कफवातहरं भेदि प्लीहार्शःकृमिगुल्मनुत् ॥ १२८ ॥
सतिक्तं स्वादु यत् पीलु नात्युष्णं तच्छिदोषजित्।
त्वक् तिक्तकटुका स्निग्धा मातुलुङ्गस्य वातजित् ॥ १२९ ॥
हरिण मधुर मांसं वातपित्तहरं गुरु।
लघु तत्केशरं कासश्वासहिध्मादात्ययान् ॥ १३० ॥
आस्यशोषानिलस्वेषविबन्धच्छर्दिरोचकान्।
गुल्मोदरार्शःशूलानि मन्दाग्नित्वं च नाशयेत् ॥ १३१ ॥
भल्लातकस्य त्वग्मांसं हरिणं स्वादु शीतलम्।
तदस्यग्निसमं मेध्यं कफवातहरं परम् ॥ १३२ ॥
स्वादम्लं शीतमुष्णं च द्विधा पालेवतं गुरु।
रुच्यमत्यग्निशमनं रुच्यं मधुरमारुकम् ॥ १३३ ॥
पक्वमाशु जरां याति नात्युष्णं गुरु दोषलम्।
द्राक्षापरूषक चार्द्रमम्लं पित्तकफप्रदम् ॥ १३४ ॥
गुरूष्णवीर्यं वातघ्नं सरं च करमर्दकम्।
तथाम्लं कोलकर्कन्धूलकुचाम्रातमारुकम् ॥ १३५ ॥
ऐरावतं दन्तशठं सतूदं मृगलिण्डिकम्।
नातिपित्तकरं पक्वं शुष्कं च करमर्दकम् ॥ १३६ ॥
दीपन भेदनं शुष्कमम्लीकाकोलयोः फलम्।
तृष्णाश्रमक्लमच्छर्दि लघ्विष्टं कफवातयोः ॥ १३७ ॥
फलानामवरं तत्र लकुच सर्वदोषकृत्।
हिमानिलोष्णदुर्वातव्याललालादिदूषितम् ॥ १३८ ॥
जन्तुजुष्टं जले मग्नमभूमिजमनार्त्तवम्।
अन्यधान्ययुत हीनवीर्यं जीर्णतयापि च ॥ १३९ ॥
धान्यं त्यजेत्तथा शाक रूक्षसिद्धमकोमलम्।
असङ्घातरसं तद्वच्छुष्कं चान्यत्र मूलकात् ॥ १४० ॥

प्रायेण फलमप्येवं तथाम विल्ववर्जितम्।
विष्यन्दि लवणं सर्वं सूक्ष्मं सृष्टमलं विदुः॥ १४१॥
वातघ्नं पाकि तीक्ष्णोष्ण रोचन कफपित्तकृत्।
सैन्धवं तत्र सस्वादु हृद्यं हृद्यं त्रिदोषनुत्॥ १४२॥
लघूनुष्ण हृद्यः पथ्यमविदाह्यग्निदीपनम्।
लघु सौवर्चल हृद्यं सुगन्ध्युद्गारशोधनम्॥ १४३॥
कटुपाक विबन्धघ्नं दीपनीयं रुचिप्रदम्।
ऊर्ध्वाधः कफवातानुलोमन दीपनं विड्म्॥ १४४॥
विबन्धानाहविष्टम्भशूलगौरवनाशनम्।
विपाके स्वादु सामुद्र गुरु श्लेष्मविवर्द्धनम्॥ १४५॥
सतिक्तकटुकक्षारं तीक्ष्णमुत्क्लेदि चौद्भिदम्।
कृष्णे सौवर्चलगुणा लवणे गन्धवर्जिताः॥ १४६॥
रोमक लघु पांसूत्थं सक्षारं श्लेष्मलं गुरु।
लवणानां प्रयोगे तु सैन्धवादीन् प्रयोजयेत्॥ १४७॥
गुल्महृद्ग्रहणीपाण्डुप्लीहानाहगलामयान्।
श्वासार्शःकफकासांश्च शमयेद् यवशूकजः॥ १४८॥
क्षारः सर्वत्र परमं तीक्ष्णोष्णः कृमिजिल्लघुः।
पित्तासृग्दूषणः पाकी छेद्यभेद्यो विदारणः॥ १४९॥
अपथ्यः कटुलावण्याच्छुक्रौजःकेशचक्षुषाम्।
छिद्रु वातकफानाहशूलघ्नं पित्तकोपनम्॥ १५०॥
कटु पाकरसं रुच्यं दीपनं पाचन लघु।
कषाया मधुरा पाके रूक्षा विलवणा लघुः॥ १५१॥
दीपनी पाचनी मेध्या वयसः स्थापनी परा।
उष्णवीर्या सरायुष्या बुद्धीन्द्रियबलप्रदा॥ १५२॥
कुष्ठवैवर्ण्यवैस्वर्य्यपुराणविषमज्वरान्।
शिरोऽक्षिपाण्डुहृद्रोगकामलाग्रहणीगदान्॥ १५३॥

सशोषशोफातीसारभेदमोहवमिक्रिमीन्।
श्वासकासप्रसेकार्शःप्लीहानाहयरोदरम् ॥ १५४ ॥
विबन्धं स्रोतसां गुल्ममूरुस्तम्भमरोचकम्।
हरीतकी जयेद् व्याधींस्तांस्तांश्च कफवातजान् ॥१५५॥
तद्दामलकं शीतमम्लं पित्तकफापहम्।
कटु पाके हिमं केश्यमक्षमीषच्च तद्गुणम् ॥ १५६ ॥
द्वयं रसायनवरा त्रिफलाऽश्यामयापहा।
रोपणी त्वग्दलक्लेदमेदोमेहकफास्रजित् ॥ १५७ ॥
सकेशरं चतुर्जातं त्वक्पत्रैलं त्रिजातकम्।
पित्तप्रकोपि तीक्ष्णोष्ण रूक्षं दीपनरोचनम् ॥१५८॥
रसे पाके च कटुकं कफघ्नं मरिचं लघु।
श्लेष्मला स्वादुशीतार्द्रा गुर्वी स्निग्धा च पिप्पली ॥१५९॥
सा शुष्का विपरीतातः स्निग्धा तृष्णा रसे कटुः।
स्वादुपाकाऽनिलघ्नी श्वासकासापहा सरा ॥ १६० ॥
न तामत्यु पयुञ्जीत रसायनविधिं विना।
नागरं दीपनं तृष्णं ग्राहि हृद्यं विबन्धनुत् ॥ १६१ ॥
रूक्षं लघु स्वादुपाकं स्निग्धोष्णं कफवातजित्।
तद्दार्द्रकमेतच्च त्रयं त्रिकटुकं जयेत् ॥ १६२ ॥
स्थौल्याग्निसदनश्वासकासश्लीपदपीनसान्।
चविका पिप्पलीमूल मरिचाल्पान्तरं गुणैः ॥ १६३ ॥
चित्रकोऽग्निसमः पाके शोफार्शःकृमिकुष्ठहा।
पञ्चकोलकमेतच्च मरिचेन विना स्मृतम् ॥१६४॥
गुल्मप्लीहोदरानाहशूलघ्नं दीपनं परम्।
विल्वकाश्मर्य्यतर्कारीपाटलाटुण्टुकैर्मतम् ॥१६५॥
जयेत् काषायतिक्तोष्णं पञ्चमूलं कफानिलौ।
क्वथ्य क्वथ्य शृतोदयगोचुरकैः स्मृतम् ॥ १६६ ॥

स्वादुपाकरसं नातिशीतोष्णं सर्वदोषजित् ।
बलापुनर्नवैरण्डशूर्पपर्णीहयेन तु ॥ १६७ ॥
मध्यमं कफवातघ्नं नातिपित्तकरं सरम् ।
ऋषभैरुवीराजीवन्तीजीवकर्षभकैः स्मृतम् ॥ १६८ ॥
जीवनाख्यं च चक्षुष्यं हृद्यं पित्तानिलापहम् ।
तृणाख्यं पित्तजिद्दर्भकाशेक्षुशरशालिभिः ॥ १६९ ॥
शूकशिम्बीजपक्वान्नमांसशाकफलौषधैः ।
वर्गितैरन्नलेशोऽयमुक्तो नित्योपयोगिकः ॥ १७० ॥

सप्तमोऽध्यायः ।

अथातोऽन्नरक्षाध्यायं व्याख्यास्यामः ॥
राजा राजगृहासन्ने प्राणाचार्यं निवेशयेत् ।
सर्वदा स भवत्येवं सर्वत्र प्रतिजागरूविः ॥ १ ॥
अन्नपानं विषाद्रक्षेद्विशेषेण महीपतेः ।
योगचेष्टौ तदायत्तौ धर्मार्थास्तन्निबन्धनाः ॥ २ ॥
ओदनो विषवान् स्निग्धो याव्यविस्राव्यतामिव ।
चिरेण पच्यते पक्वो भवेत् पर्य्युषितोपमः ॥ ३ ॥
मयूरकण्ठतुल्योष्मा मोहमूर्च्छाप्रसेककृत् ।
हीयते वर्णगन्धाद्यैः क्लिद्यते चन्द्रकाञ्चितः ॥ ४ ॥
व्यञ्जनान्याशु ग्रथ्नन्ति श्यामकाथानि तत्र च ।
हीनातिरिक्ता विकृता सा दृश्येत नैव वा ॥ ५ ॥
फेनोर्ध्वराजीसीमन्ततन्तुबुद्बुदसम्भवः ।
विच्छिन्नविरसा रागाः खाण्डवाः शाकमामिषम् ॥६॥
नीला राजी रसे ताम्रा क्षीरे दधनि दृश्यते ।
श्यावा पीताऽसिता तक्रे घृते पानीयसन्निभा ॥७॥
काली मद्याम्भसोः क्षौद्रे हरितैलेऽरुणोपमा ।

पाकः फलानामामानां पक्वानां परिक्षोपणम् ॥ ८ ॥
द्रव्याणामार्द्रशुष्काणां स्यातां स्नानिविवर्णते ।
मृदूनां कठिनानां च भवेत् स्पर्शविपर्ययः ॥ ९ ॥
माल्यस्य स्फुटिताग्रत्वं म्लानिर्गन्धान्तरोद्भवः ।
ध्याममण्डलता वस्त्रे शदनं तन्तुपक्ष्मणाम् ॥ १० ॥
धातुमौक्तिककाष्ठाश्मरत्नादिषु मलाक्तता ।
स्नेहस्पर्शप्रभाहानिः सप्रभत्वं तु मृण्मये ॥ ११ ॥
विषदः श्यावशुष्कास्यो विलक्षो वीक्षते दिशः ।
स्वेदवेपथुमांस्त्रस्तो भीतः स्खलति जृम्भते ॥ १२ ॥
प्राप्यान्न सविष त्वग्निरेकावर्त्तः स्फुटत्यति ।
गिरिकण्ठाभधूमार्चिरनर्चिर्वोग्रमन्यवान् ॥ १३ ॥
म्रियन्ते मक्षिकाः प्राश्य काकः क्षामस्वरो भवेत् ।
उत्क्रोशन्ति च दृष्ट्वैतच्छुकदात्यूहसारिकाः ॥ १४ ॥
हंसः प्रस्खलति म्लानिर्जीवञ्जीवस्य जायते ।
चकोरस्याक्षिवैराग्यं क्रौञ्चस्य स्यात् मदोदयः ॥ १५ ॥
कपोतपरभृद्दात्यूहचक्रवाका जहत्यसून् ।
उद्वेगं याति मार्जारः शकृत् मुञ्चति वानरः ॥ १६ ॥
कृष्णेक्षणायूरस्तद् दृष्ट्वा मन्दतेजो भवेद्विषम् ।
इत्यन्नं विषवज्ज्ञात्वा त्यजेदेवं प्रयत्नतः ॥ १७ ॥
यद्वा तेन विषेणैरन्नपि न क्षुद्रजन्तवः ।
स्पृष्टे तु कण्डूदाहोष्माज्वरार्त्तिस्फोटसुप्तयः ॥ १८ ॥
नखरोमच्युतिः शीफः सेकाद्या विषनाशनाः ।
शस्तास्तत्र प्रलेपाश्च सेव्यचन्दनपद्मकैः ॥ १९ ॥
ससोमवल्कतालीसपत्रकुष्ठामृतानतैः ।
लालाजिह्वौष्ठयोर्जाड्यमूषा चिमिचिमायनम् ॥ २० ॥
दन्तहर्षो रसाज्ञत्वं हनुस्तम्भश्च वक्त्रगे ।

सेव्यादौस्तत्र गण्डूषाः सर्वं च विषजिद्धितम् ॥२१॥
आमाशयगते खेदमूर्च्छाध्मानमदभ्रमाः ।
रोमहर्षो वमिर्दाहश्चक्षुर्हृदयरोधनम् ॥ २२ ॥
विन्दुभिश्चाचयोऽङ्गाना पक्वाशयगते पुनः ।
अनेकवर्णं वमति मूत्रयत्यतिसार्यते ॥ २३ ॥
तन्द्रा क्लमश्चलं पाण्डुत्वमुदर बलसंक्षयः ।
तयोर्वान्तविरिक्तस्य हरिद्रे कटभों गुडम् ॥ २४ ॥
सिन्दुवारितनिर्यासवाध्रिकाग्रतपर्विकाः ।
तण्डुलीयकमूलानि कुक्कुटाण्डभवल्गुजम् ॥ २५ ॥
भावनाञ्जनपानेषु योजयेद्विषशान्तये ।
विषभुक्ताय दद्याच्च शुद्धायोर्द्धमधस्तथा ॥ २६ ॥
सूक्ष्म ताम्ररजः काले सक्षौद्र हृद्विशोधनम् ।
शुद्धे हृदि ततः शाणं हैमचूर्णस्य दापयेत् ॥ २७ ॥
न सज्जते हैमपात्रे पद्मपत्रेऽम्बुवद्विषम् ।
जायते विपुल चायुर्गरेऽप्येष विधिः स्मृतः ॥ २८ ॥
विरुद्धमपि चाहार विद्याद्विषगरोपमम् ।
शानूपमामिषं माषक्षौद्रक्षीरविरूढकैः ॥ २९ ॥
विरुध्यते सह विसैर्मूलकेन गुडेन वा ।
विशेषात् पयसा मत्स्या मत्स्येष्वपि चिलीचिमः ॥३०॥
विरुद्धमन्नं पयसा सह सर्वं फलं तथा ।
तद्वत् कुलत्थवरककाङ्गुवल्लमकुष्टकाः ॥ ३१ ॥
भक्षयित्वा हरितकं मूलकादि पयस्त्यजेत् ।
वाराहं श्वाविधा नाद्याद्धा पृषतकुक्कुटौ ॥ ३२ ॥
आममांसानि पित्तेन माषसूपेन मूलकम् ।
अम्बि कुसुम्भशाकेन विसैः सह विरूढकम् ॥ ३३ ॥
माषसूपगुडक्षीरदध्याज्यैर्लाकुचं फलम् ।

कलं कदम्बास्तक्रेण दध्ना तालफलेन वा ॥ ३४ ॥
कणोषणाभ्यां मधुना काकमाचीं गुडेन वा।
सिद्धां वा मत्स्यपचने पचने नागरस्य वा ॥ ३५ ॥
सिद्धामन्यत्र वा पाचे कामात्तामुषितां निशाम्।
मत्स्यनिस्तलनस्नेहसाधिताः पिप्पलीरजेत् ॥ ३६ ॥
कांस्ये दशाहमुषितं सर्पिरुष्णं वरुष्करे।
भासो विरुध्यते शूल्यः कम्पिल्लस्तक्रसाधितः ॥ ३७ ॥
ऐकध्य पायससुराकृशराः परिवर्जयेत्।
मधुसर्पिर्वसातैलपानीयानि द्विशस्त्रिशः ॥ ३८ ॥
एकत्र वा समांशानि विरुध्यन्ते परस्परम्।
भिन्नांशे अपि मध्याह्ने दिव्यवार्य्यनुपानतः ॥ ३९ ॥
मधुपुष्करबीजं च मधुमैरेयशार्करम्।
मद्यानुपानः क्षैरेयो हारिद्रः कटुतैलवान् ॥ ४० ॥
उपोदकातिसाराय तिलकल्केन साधिता।
बलाका वारुणीयुक्ता कुल्माषैश्च विरुध्यते ॥ ४१ ॥
भृष्टा वराहवसया सैव सद्यो निहन्त्यसून्।
तद्वत्तित्तिरिपत्राढ्यगोधालावकपिञ्जलाः ॥ ४२ ॥
ऐरण्डेनाग्निना सिद्धास्तैलेन विमूर्च्छिताः।
हारीतमांसं हारिद्रशूलकप्रोतपाचितम् ॥ ४३ ॥
हारिद्रवह्निना सद्यो व्यापादयति जीवितम्।
भस्मपांशुपरिध्वस्तं तदेव च समाधिकम् ॥ ४४ ॥
यत्किञ्चिद्दोषमुत्क्लेश्य न हरेत् तत्समासतः।
विरुद्धं शुद्धिरन्वेष्टा शमो वा तद्विरोधिभिः ॥ ४५ ॥
द्रव्यैस्तैरेव वा पूर्वं शरीरस्याभिसंस्कृतिः।
व्यायामस्निग्धदीप्ताग्निवयःस्थबलशालिनाम् ॥ ४६ ॥
विरोध्यपि न पीड़ायै सात्म्यमल्पं च भोजनम्।

पादेनापथ्यमभ्यस्तं पादपादेन वा त्यजेत् ॥ ४७ ॥
निषेवेत हितं तदेकद्वित्रान्तरीकृतम् ।
अपथ्यमपि हि त्यक्तं शीलितं पथ्यमेव वा ॥ ४८ ॥
सात्म्यासात्म्यविकाराय जायते सहसान्यथा ।
क्रमेणोपचिता दोषाः क्रमेणोपचिता गुणाः ॥ ४९ ॥
नाप्नुवन्ति पुनर्भावमप्रकम्प्या भवन्ति च ।
अत्यन्तसन्निधानानां दोषाणां दूषणात्मनाम् ॥ ५० ॥
अहितैर्दूषणं भूयो न विद्वान् कर्त्तुमर्हति ।
आहारशयनब्रह्मचर्य्यैर्युक्त्या प्रयोजितैः ॥ ५१ ॥
शरीरं धार्य्यते नित्यमागारमिव धारणैः ।
आहारो वर्णितस्तत्र तत्र तत्र च वक्ष्यते ॥ ५२ ॥
निद्रायत्तं सुखं दुःखं पुष्टिः कार्श्यं बलाबलम् ।
वृषता क्लीवता ज्ञानमज्ञानं जीवितं न च ॥ ५३ ॥
अकालेऽतिप्रसङ्गाच्च न च निद्रा निषेविता ।
सुखायुषी परा कुर्य्यात् कालरात्रिरिवापरा ॥ ५४ ॥
रात्रौ जागरणं रूक्षं स्निग्धं प्रस्वपनं दिवा ।
अरूक्षमनभिष्यन्दि व्यासीनप्रचलायितम् ॥ ५५ ॥
ग्रीष्मे वायुचयादानरौक्ष्यरात्र्यल्पभावतः ।
दिवास्वप्नो हितोऽन्यस्मिन् कफपित्तकरो हि सः ॥५६॥
मुक्त्वा तु भाष्ययानाध्वमद्यस्त्रीभारकर्मभिः ।
क्रोधशोकभयैः क्लान्तान् श्वासहिक्कातिसारिणः ॥५७॥
वृद्धबालाबलक्षीणक्षतवर्च शूलपीडितान् ।
अजीर्णाभिहतोन्मत्तान् दिवास्वप्नोचितानपि ॥ ५८ ॥
धातुसाम्यं तथा श्लेष्मा स्नेहो चाङ्गानि पुष्यति ।
बहुमेदःकफाः स्थूलाः स्नेहनित्याश्च नाहनि ॥ ५९ ॥
विषार्त्तः कण्ठरोगी च नैव जातु निशास्वपि ।

अकालशयनान्मोहज्वरस्तैमित्यपीनसाः ॥ ६० ॥
शिरोरुक्शोफहृल्लासस्रोतोरोधाग्निमन्दताः।
तत्रोपवासवमनस्वेदनावनमौषधम् ॥ ६१ ॥
योजयेदतिनिद्रायां तीक्ष्णं प्रच्छर्दनाञ्जनम्।
नावनं लङ्घनं चिन्तां व्यवायं शोकभोक्रुधः ॥ ६२ ॥
एभिरेव च निद्राया नाशः श्लेष्मातिसञ्चयात्।
निद्रानाशादङ्गमर्दशिरोगौरवजृम्भिकाः ॥ ६३ ॥
जाड्यं ग्लानिभ्रमापक्तितन्द्रारोगाश्च वातजाः।
यथाकालमतो निद्रां रात्रौ सेवेत सात्म्यतः ॥ ६४ ॥
असात्म्याज्जागरादह्नि प्रातः स्वप्याद्भुक्तवान्।
शीलयेन्मन्दनिद्रस्तु क्षीरमद्यरसान् दधि ॥ ६५ ॥
अभ्यङ्गोद्वर्तनस्नानमूर्ध्वकर्णाक्षितर्पणम्।
कान्ताबाहुलताश्लेषो निर्व्यथिः कृतकृत्यता ॥ ६६ ॥
मनोऽनुकूला विषयाः काम निद्रासुखप्रदाः।
ब्रह्मचर्यरतेर्ग्राम्यसुखनिस्पृहचेतसः ॥ ६७ ॥
निद्रासन्तोषहर्षस्य सुखं काल नातिवर्त्तते।
ग्राम्यधर्मं त्यजेन्नारीमनुत्तानां रजस्वलाम् ॥ ६८ ॥
अप्रियामप्रियाचारां दुष्टसङ्कीर्णमेहनाम्।
अतिस्थूलकृशां सूतां गर्भिणीमन्ययोषितम् ॥ ६९ ॥
वर्णिनीमन्ययोनिं च गुरुदेवनृपालयम्।
चैत्यश्मशानायतनचत्वराम्बुचतुष्पथम् ॥ ७० ॥
पर्वाण्यनङ्गं दिवसं शिरोहृदयताडनम्।
अत्याशितोऽधृतिः क्षुद्वान् दुःस्थिताङ्गः पिपासितः ॥ ७१ ॥
बालो वृद्धोऽन्यवेगार्त्तस्त्यजेद्रोगी च मैथुनम्।
सेवेत कामतः काम ऋतौ वाजीकृतां हिमे ॥ ७२ ॥
अहोरात्रस्य शरदो पश्चाद्धर्षनिदाघयोः।

भ्रममक्षमोरुदौर्बल्यबलधात्विन्द्रियक्षयः ॥ ७३ ॥
अपर्वमरणं च स्यादन्यथा गच्छतः स्त्रियम् ।
स्मृतिमेधायुरारोग्यपुष्टीन्द्रियबलौजसैः ।
अधिका मन्दजरसो भवन्ति स्त्रीषु संयताः ॥ ७४ ॥

स्नानानुलेपनहिमानिलखण्डखाद्य-
शीताम्बुदुग्धरसयूषसुराप्रसन्नाः ।
सेवेत चानुशयनं विरतौ रतस्य
तस्यैवमाशु वपुषः पुनरेति धाम ॥ ७५ ॥
श्रुतचरितसमृद्धे कर्मदक्षे दयालौ
भिषजि निरनुबन्धं देहरक्षां निवेश्य ।
भवति विपुलतेजः स्वास्थ्यकीर्त्तिप्रभावः
सकुशलफलभोगी भूमिपालश्चिरायुः ॥ ७६ ॥

अष्टमोऽध्यायः ।

अथातो मात्राशितीयमध्यायं व्याख्यास्यामः ॥
मात्राशी सर्वकालं स्यात् मात्रा ह्यग्नेः प्रवर्त्तिका ।
मात्रां द्रव्याण्यपेक्षन्ते गुरूण्यपि लघून्यपि ॥ १ ॥
गुरूणामर्द्धसौहित्यं लघूनां नातिलङ्घनम् ।
मात्राप्रमाणं निर्दिष्टं सुखं यावद्विजीर्य्यति ॥ २ ॥
भोजनं हीनमात्रं तु न बलोपचयौजसे ।
सर्वेषां वातरोगाणां हेतुतां च प्रपद्यते ॥ ३ ॥
अतिमात्रं पुनः सर्वानाशु दोषान् प्रकोपयेत् ।
पीड्यमाना हि वाताद्या युगपत् तेन कोपिताः ॥ ४ ॥
आमेनान्नेन दुष्टेन तदेवाविश्य कुर्वते ।
विष्टम्भयन्तोऽलसकं चावयन्तो विसूचिकाम् ॥ ५ ॥
अधरोत्तरमार्गाभ्यां सङ्क्षयैवाजितात्मनः ।

प्रयाति नोर्ध्वं नाधस्तादाहारो न च पच्यते ॥ ६ ॥
आमाशयेऽलसीभूतस्तेन सोऽलसकः स्मृतः।
विविधैर्वेदनोद्रेकैर्वायुरादिभृशकोपतः ॥ ७ ॥
सूचीभिरिव गात्राणि विध्यतीति विसूचिका।
तत्र शूलभ्रमानाहकम्पस्तम्भादयोऽनिलात् ॥ ८ ॥
पित्ताज्ज्वरातिसारान्तर्दाहत्वट्प्रलयादयः।
कफाच्छर्द्यङ्गगुरुता वाक्सङ्गष्ठीवनादयः ॥ ९ ॥
विशेषाद् दुर्बलस्याल्पवह्नेर्वेगविधारिणः।
पीडितं मारुतेनान्त्रं श्लेष्मणा रुद्धमन्तरा ॥ १० ॥
अलसं चोभितं दोषैः शल्यत्वेनैव संस्थितम्।
शूलादीन् कुरुते तीव्रांश्छर्द्यतीसारवर्जितान् ॥ ११ ॥
सोऽलसः

अत्यर्थदुष्टास्तु दोषा दुष्टाम्बुवद्बलाः।
यान्तस्तिर्यक् तनुं सर्वां दण्डवत् स्तम्भयन्ति चेत् ॥ १२ ॥
दण्डकालसकं नाम तं त्यजेदाशुकारिणम्।
निरुद्धाध्मानजीर्णश्रीलिनो विषलक्षणम् ॥ १३ ॥
आमदोषं महाघोरं वर्जयेद्विषसंज्ञकम्।
विषरूपाशुकारित्वाद्विरुद्धोपक्रमत्वतः ॥ १४ ॥
अथाममलसीभूतं साध्यं त्वरितमुल्लिखेत्।
पीत्वा सोग्रापटुफलं वार्य्युष्णं योजयेत्ततः ॥ १५ ॥
स्वेदनं फलवर्त्तिं च मलवातानुलोमनीम्।
नाम्यमानानि चाङ्गानि भृशं स्निग्धानि वेष्टयेत् ॥ १६ ॥
विसूच्यामतिदुष्टायां पाणार्दोहः प्रशस्यते।
तदहश्चोपवासैनं विरिक्तवदुपाचरेत् ॥ १७ ॥
तीव्रार्त्तिरपि नाजीर्णी पिबेच्छूलघ्नमौषधम्।
आमसन्नोऽनलो नालं पक्तुं दोषौषधाशनम् ॥ १८ ॥

निहन्यादपि चैतेषां विभ्रमः सहसातुरम् ।
जीर्णाशने तु भैषज्यं युञ्जात् स्वाग्गुरूदरे ॥ १९ ॥
दोषशेषस्य पाकार्थमग्नेः सन्धुक्षणाय च ।
शान्तिरामविकाराणां भवति ह्यपतर्पणात् ॥ २० ॥
त्रिविधं त्रिविधे दोषे तत् समीक्ष्य प्रयोजयेत् ।
तत्राल्पे लङ्घनं पथ्यं मध्ये लङ्घनपाचनम् ॥ २१ ॥
प्रभूते शोधनं तद्धि मूलादुन्मूलयेन्मलान् ।
एवमन्यानपि व्याधीन् स्वनिदानविपर्ययात् ॥ २२ ॥
चिकित्सेदनुबन्धे तु सति हेतुविपर्ययम् ।
त्यक्त्वा यथायथं वैद्यो युञ्जाद् व्याधिविपर्ययम् ॥२३॥
तदर्थकारि वा पक्वे दोषे स्विन्ने च पावके ।
हितमभ्यञ्जनस्नेहपानवस्त्यादियुक्तितः ॥ २४ ॥
अजीर्णे च कफादामं तच्च शोफोऽङ्गिगण्डयोः ।
सद्यो भुक्त इवोद्गारः प्रसेकोत्क्लेशगौरवम् ॥ २५ ॥
विष्टब्धमनिलाच्छूलविबन्धाध्मानसादकृत् ।
पित्ताद्विदग्धं ह्लासोहभ्रमाम्लोद्गारदाहवत् ॥ २६ ॥
लङ्घनं कार्यमामे तु विष्टब्धे स्वेदनं भृशम् ।
विदग्धे वमनं यद्वा यथावस्थं हितं भवेत् ॥ २७ ॥
गरीयसो भवेल्लीनादामादेव विलम्बिका ।
कफवातानुबद्धामलिङ्गा तत्समसाधना ॥ २८ ॥
अश्रद्दधा हृद्व्यथा शुद्धेऽप्युद्गारे रसशेषतः ।
शयीत किञ्चिदेवात्र सर्वथानाश्रितो दिवा ॥ २९ ॥
स्वप्यादजीर्णी सञ्जातबुभुक्षोऽव्याश्नितं लघु ।
विबन्धोऽतिप्रवृत्तिर्वा ग्लानिर्मारुतमूढ़ता ॥ ३० ॥
अजीर्णलिङ्गं सामान्यं विष्टब्धो गौरवं भ्रमः ।
न चातिमात्रमेवान्नमामदोषाय केवलम् ॥ ३१ ॥

दिष्टविष्टम्भिदग्धामगुरूच्चहिमाशुचि।
विदाहि शुष्कमत्यम्बुमुतं वाद्यं न जीर्यति ॥ ३२ ॥
उपतप्तेन भुक्तं च शोककोधक्षुधादिभिः।
मिथ्या पथ्यमपथ्यं च भुक्तं समशनं मतम् ॥ ३३ ॥
विद्याद्ध्यशनं भूयो भुक्तस्योपरिभोजनम्।
अकाले बहु चाल्पं वा भुक्तं तु विषमाशनम् ॥ ३४ ॥
द्वीष्यप्येतानि सृत्युं वा घोरान् व्याधीन् सृजन्ति वा।
काले सात्म्यं शुचि हितं स्निग्धोष्णं लघु तन्मनाः ॥३५॥
षड्रसं मधुरप्राय नातिद्रुतविलम्बितम्।
स्नातः क्षुद्वान् विविक्तस्थो धौतपादकराननः ॥ ३६॥
तर्पयित्वा पितॄन् देवानतिथीन् बालकान् गुरून्।
प्रत्यवेक्ष्य तिरश्चोऽपि प्रतिपन्नपरिग्रहान् ॥ ३७ ॥
समीक्ष्य सम्यगात्मानमनिन्द्यब्रुवन् द्रवम्।
इष्टमिष्टैः सहाश्नीयाच्छुचिभक्तजनाहृतम् ॥ ३८ ॥
भोजनं व्यणकेशादिजुष्टमुष्णीकृत पुनः।
शाकावरान्नभूयिष्ठमत्युष्णलवणं त्यजेत् ॥ ३९ ॥
किलाटदधिकूर्चीकाक्षारशुक्तामसूलकम्।
क्षशशुष्कवराहाविगोमत्स्यमहिषामिषम् ॥ ४० ॥
माषनिष्पावशालूकविसपिष्टविरूढकम्।
शुष्कशाकानि यवकान् फाणितं च न शीलयेत् ॥४१॥
शीलयेच्छालिगोधूमयवषष्टिकजाङ्गलम्।
पथ्यामलकमृद्वीकापटोलीमुद्गशर्कराः ॥ ४२ ॥
घृतदिव्योदकक्षीरक्षौद्रदाडिमसैन्धवम्।
त्रिफलां मधुसर्पिर्भ्यां निशि नेत्रबलाय च ॥ ४३ ॥
स्वास्थ्यानुवृत्तिकृद् यच्च रोगोच्छेदकरं च यत्।
विसेक्षुमोचचोचाम्रमोदकोत्कारिकादिकम् ॥ ४४ ॥

अद्याद् द्रव्यं गुरु स्निग्धं स्वादु मन्द स्थिरं पुरः ।
विपरीतमतश्चान्ते मध्येऽम्ललवणोत्कटम् ॥४५॥
अन्नेन कुक्षेर्द्वावंशौ पानेनैकं प्रपूरयेत् ।
आश्रयं पवनादीनां चतुर्थमवशेषयेत् ॥ ४६ ॥
अनुपान हिम वारि यवगोधूमयोर्हितम् ।
दध्नि मद्ये विषे क्षौद्रे कोष्ण पिष्टमयेषु तु ॥ ४७ ॥
शाकमुद्गादिविकृतौ मस्तुतक्रान्लकाञ्जिकम् ।
सुरा क्लशानां पुष्ट्यर्थं स्थूलानां तु मधूदकम् ॥ ४८ ॥
शोषे मांसरसो मद्य मांसे स्वल्पे च पावके ।
व्याध्यौषधाध्वभाष्यस्त्रीलङ्घनातपकर्मभिः ॥ ४९ ॥
क्षीणे वृद्धे च बाले च पयः पथ्यं यथामृतम् ।
विपरीतं यदन्नस्य गुणैः स्यादविरोधि च ॥ ५० ॥
अनुपान समासेन सर्वदा तत् प्रशस्यते ।
अनुपानं करोत्यूर्जां तृप्तिं व्याप्तिं दृढाङ्गताम् ॥ ५१ ॥
अन्नसङ्घातशैथिल्यविक्लित्तिजरणानि च ।
ऊर्ध्वजत्रुगदश्वासकासोरःक्षतपीनसे ॥ ५२ ॥
गीतभाष्यप्रसङ्गे च स्वरभेदे च तद्धितम् ।
प्रक्लिन्नदेहमेहाक्षिगलरोगव्रणातुराः ॥ ५३ ॥
पानं त्यजेयुः
सर्वं च भाष्याध्वशयनं त्यजेत् ।
पीत्वा भुक्ताऽऽतपं वह्निं यान प्लवनवाहनम् ॥ ५४ ॥
प्रसृष्टे विण्मूत्रे हृदि सुविमले दोषे स्वपथगे
विशुद्धे चोद्गारे क्षुदुपगमने वातेऽनुसरति ।
तथात्मावुद्रिक्ते विशदकरणे देहे च सुलघौ
प्रयुञ्जीताहारं विधिनियमितः कालः स हि मतः ॥५५॥

नवमोऽध्यायः।

अथातो द्रव्यादिविज्ञानीयमध्यायं व्याख्यास्यामः॥
द्रव्यमेव रसादीनां श्रेष्ठं तै हि तदाश्रयाः।
पञ्चभूतात्मकं तत्तु
क्ष्मामधिष्ठाय जायते॥ १॥
अम्बुयोन्यग्निपवननभसां समवायतः।
तन्निवृत्तिर्विशेषश्च व्यपदेशस्तु भूयसा॥ २॥
तस्मान्नैकरसं द्रव्यं भूतसङ्घातसम्भवात्।
नैकदोषास्ततो रोगास्तत्र व्यक्तो रसः स्मृतः॥ ३॥
अव्यक्तोऽनुरसः किञ्चिदन्ते व्यक्तोऽपि चेष्यते।
गुर्वादयो गुणा द्रव्ये पृथिव्यादौ रसाश्रये॥ ४॥
रसेषु व्यपदिश्यन्ते साहचर्य्योपचारतः।
तत्र द्रव्यं गुरुस्थूलस्थिरगन्धगुणोल्बणम्॥ ५॥
पार्थिवं गौरवस्थैर्य्यसङ्घातोपचयावहम्।
द्रवशीतगुरुस्निग्धमन्दसान्द्ररसोल्बणम्॥ ६॥
आप्यं स्नेहनविष्यन्दक्लेदप्रह्लादबन्धकृत्।
रूक्षतीक्ष्णोष्णविशदसूक्ष्मरूपगुणोल्बणम्॥ ७॥
आग्नेयं दाहभावर्णप्रकाशपचनात्मकम्।
वायव्यं रूक्षविशदं लघुस्पर्शगुणोल्बणम्॥ ८॥
रौक्ष्यलाघववैशद्यविचारग्लानिकारकम्।
नाभसं सूक्ष्मविशदलघुशब्दगुणोल्बणम्॥ ९॥
सौषिर्य्यलाघवकरं
जगत्येवमनौषधम्।
न किञ्चिद्विद्यते द्रव्यं वशात्कालार्थयोगयोः॥ १०॥
द्रव्यमूर्द्धगमं तत्र प्रायोऽग्निपवनोत्कटम्।

अधोगामि च भूयिष्ठं भूमितोयगुणाधिकम् ॥ ११ ॥
इति द्रव्य रसान् भेदैरुत्तरत्रोपदेक्ष्यते।
वीर्य्यं पुनर्वदन्त्येके गुरुस्निग्धहिमं मृदु ॥ १२ ॥
मधुरञ्चोष्णतीक्ष्णञ्च तदेवं मतमष्टधा।
चरकस्त्वाह वीर्य्यं तद् येन या क्रियते क्रिया ॥१३॥
नावीर्य्यं कुरुते किञ्चित् सर्वा वीर्य्यकृता हि सा।
मुर्वादिष्वेव वीर्य्याख्या तेनान्वर्थेति वर्ण्यते ॥ १४ ॥
समग्रगुणसारेषु शक्त्युत्कर्षविवर्त्तिषु।
व्यवहाराय मुख्यत्वाद् बह्वग्यग्रहणादपि ॥ १५ ॥
अतश्च विपरीतत्वात्सम्भवन्त्यपि नैव सा।
विवक्ष्यते रसाद्येषु वीर्य्यं गुर्वादयो ह्यतः ॥ १६ ॥
उष्ण शीतं द्विधैवान्ये वीर्य्यमाचक्षतेऽपि च।
नानात्मकमपि द्रव्यमग्नीषोमौ महाबलौ ॥ १७ ॥
व्यक्ताव्यक्तं जगदिव नातिक्रामति जातुचित्।
तत्रोष्णं भ्रमतृड्ग्लानिस्वेददाहाशुपाकिताः ॥ १८ ॥
शमञ्च वातकफयोः करोति शिशिरं पुनः।
ह्लादनं जीवनं स्तम्भ प्रसादं रक्तपित्तयोः ॥ १९ ॥
जठरेणाग्निना योगाद् यद् यदेति रसान्तरम्।
रसानां परिणामान्ते स विपाकः इति स्मृतः ॥ २० ॥
स्वादुः पटुश्च मधुरमम्लोऽम्लं पच्यते रसः।
तिक्तोष्णकषायाणां विपाकः प्रायशः कटुः ॥ २१ ॥
रसैरसौ तुल्यफलस्तत्र द्रव्यं शुभाशुभम्।
किञ्चिद्रसेन कुरुते कर्म पाकेन वापरम् ॥ २२ ॥
गुणान्तरेण वीर्य्येण प्रभावेणैव किञ्चन।
यद्यद्द्रव्ये रसादीनां बलवत्त्वेन वर्त्तते ॥ २३ ॥
अभिभूयेतरांस्तत्तत्कारणत्वं प्रपद्यते।

विरुद्धगुणसंयोगे भूयसाल्पं हि जीयते ॥ २४ ॥
रसं विपाकस्तौ वीर्यं प्रभावस्तान्यपोहति।
बलसाम्ये रसादीनामिति नैसर्गिकं बलम् ॥ २५ ॥
रसादिसाम्ये यत्कर्म विशिष्टं तत्प्रभावजम्।
दन्ती रसाद्यैस्तुल्यापि चित्रकस्य विरेचनी ॥ २६ ॥
मधुकस्य च मृद्वीका घृतं क्षीरस्य दीपनम्।
इति सामान्यतः कर्म द्रव्यादीनां पुनश्च तत् ॥ २७ ॥
विचित्रप्रत्ययारब्धद्रव्यभेदेन भिद्यते।
स्वादुर्गुरुश्च गोधूमो वातजिद्वातकृद् यवः।
उष्णा मत्स्याः पयः शीतं कटुः सिंहो न शूकरः ॥ २८ ॥

दशमोऽध्यायः।

अथातो रसभेदीयमध्यायं व्याख्यास्यामः ॥
क्ष्माम्भोऽग्निक्ष्माम्बुतेजःखवायुर्म्यन्निलगोऽनिलैः।
द्वयोल्बणैः क्रमाद्भूतैर्मधुरादिरसोद्भवः ॥ १ ॥
तेषां विद्याद्रसं स्वादुं यो वक्त्रमनुलिम्पति।
आस्वाद्यमानो देहस्य ह्लादनोऽक्षप्रसादनः ॥ २ ॥
प्रियः पिपीलिकादीनाम्
अस्रः स्रावयते मुखम्।
हर्षणो रोमदन्तानामक्षिभ्रुवनिकोचनः ॥ ३ ॥
लवणः स्यन्दयत्यास्यं कपोलगलदाहकृत्।
तिक्तो विशदयत्यास्यं रसनं प्रतिहन्ति च ॥ ४ ॥
उद्वेजयति जिह्वाग्रं कुर्वन्निमिचिमां कटुः।
स्रावयत्यक्षिनासास्यं कपोलौ दहतीव च ॥ ५ ॥
कषायो जड़येज्जिह्वां कण्ठस्रोतोविबन्धकृत्।

रसानामिति रूपाणि कर्माणि

मधुरो रसः ॥ ६ ॥

आजन्मसात्म्यात् कुरुते धातूनां प्रबलं बलम् ।
बालवृद्धक्षतक्षीणवर्णकेशेन्द्रियौजसम् ॥ ७ ॥
प्रशस्तो बृंहणः कण्ठ्यः स्तन्यसन्धानकृद् गुरुः ।
आयुष्यो जीवनः स्निग्धः पित्तानिलविषापहः ॥ ८ ॥
कुरुतेऽत्युपयोगेन समेदःकफजान् गदान् ।
स्थौल्याग्निसादसंन्यासमेहगण्डार्बुदादिकान् ॥ ९ ॥
अम्लोऽग्निदीप्तिकृत् स्निग्धो हृद्यः पाचनरोचनः ।
उष्णवीर्यो हिमस्पर्शः प्रीणनः क्लेदनो लघुः ॥ १० ॥
करोति कफपित्तासृं मूढ़वातानुलोमनम् ।
सोऽत्यभ्यस्तस्तनोः कुर्याच्छैथिल्यं तिमिरं भ्रमम् ॥११॥
कण्डूपाण्डुत्ववीसर्पशोफविस्फोटदाह्ज्वरान् ।
लवणः स्रोभसङ्घातबन्धविधापनोऽग्निकृत् ॥ १२ ॥
स्नेहनः स्वेदनस्तीक्ष्णो रोचनश्छेदभेदकृत् ।
सोऽतियुक्तोऽक्षपवनं खलतिं पलितं वलिम् ॥ १३ ॥
त्वग्दुष्टविषवीसर्पान् जनयेत् क्षपयेद् बलम् ।
तिक्तः स्वयमरोचिष्णुररुचिं कृमिदाह्विषम् ॥ १४ ॥
कुष्ठमूर्च्छाज्वरोत्क्लेशदाहपित्तकफान् जयेत् ।
क्लेदमेदोवसामज्जशुक्रमूत्रोपशोषणः ॥ १५ ॥
लघुर्मेध्यो हिमो रूक्षः स्तन्यकण्ठविशोधनः ।
धातुक्षयानिलव्याधीनतियोगात् करोति सः ॥१६॥
कटुर्गुल्मार्शोदर्दकुष्ठालसकशोफजित् ।
व्रणावसादनस्नेहमेदःक्लेदोपशोषणः ॥ १७ ॥
दीपनः पाचनो रूक्षः शोधनोऽस्रस्य शोषणः ।
छिनत्ति बन्धान् स्रोतांसि विवृणोति कफापहः ॥१८॥

कुरुते सोऽतियोगेन तृष्णां शुक्रबलक्षयम्।
मूर्च्छामाकुञ्चनं कम्पं कटिपृष्ठादिषु व्यथाम् ॥१८॥
कषायः पित्तकफहा गुरुरस्रविशोधनः।
पीडनो रोपणः शीतः क्लेदमेदोविशोषणः ॥ १९ ॥
आमसंस्तम्भनो ग्राही रूक्षोऽतित्वक्प्रसादनः।
करोति शीलितः सोऽतिविष्टम्भाध्मानहृद्रुजः ॥२०॥
लट्वार्श्वपौरुषभ्रंशस्रोतोरोधमलग्रहान्।
घृतक्षैमगुडाक्षौडमोचचोचपरूषकम् ॥ २२ ॥
अभीरुवीरापनसराजादनबलाक्षयम् ॥ २३ ॥
मेदे चतस्रः पर्ण्यौ जीवन्ती जीवकर्षभौ।
मधूकं मधुकं विम्बी विदारी श्रावणीयुगम् ॥२४॥
क्षीरशुक्ला तुगाक्षीरी क्षीरिण्यौ काश्मरी सहे।
क्षीरेक्षुगोक्षुरक्षौद्रद्राक्षादिर्मधुरो गणः ॥ २५ ॥
अक्षो धात्रीफलाम्लीकामातुलुङ्गास्ववेतसम्।
दाडिमं रजतं तक्रं चुक्रं पालेवतं दधि ॥ २६ ॥
आम्रमाम्रातकं भव्य कपित्थं करमर्दकम्।
वरं सौवर्चलं क्षारं विड् सामुद्रमौद्भिदम् ॥ २७ ॥
रोमक पांसुजं शीर्षं चारश्च लवणो गणः।
तिक्तः पटोली क्षायन्ती बालकोशीरचन्दनम् ॥२८॥
मूर्निम्बनिम्बकटुकातगरागुरुवल्लकम्।
नक्तमालहरिद्रानीमुस्तमूर्वाटरूषकम् ॥ २९ ॥
पाठापामार्गकांस्यायो गुडूची धन्वयासकम्।
पद्ममूलं महाश्वाश्रौ विशालातिविषा वचा ॥३०॥
कटुको हिङ्गुमरिचं क्रमिजित् पञ्चकोलकम्।
कुठेराद्या हरितकाः पित्तं मूत्रमरुष्करम् ॥ ३१ ॥
वर्गः कषायः पथ्याद्यं शिरीषः खदिरो मधु।

कदम्बोदुम्बरं मुक्ताप्रवालाञ्जनगैरिकम् ॥ ३२ ॥
बालं कपित्थं खर्जूरं विसपद्मोत्पलादि च ।
मधुरं श्लेष्मलं प्रायो जीर्णाच्छालियवाद्ऋते ॥ ३३ ॥
मुद्गाद्धोधूमतः क्षौद्रात् सिताया जाङ्गलामिषात् ।
प्रायोऽम्ल पित्तजनन दाड़िमामलकाद्ऋते ॥ ३४ ॥
अपथ्यं लवणं प्रायश्चक्षुषोऽन्यत्र सैन्धवात् ।
तिक्त कटु च भूयिष्ठमद्रव्य वातकोपनम् ॥ ३५ ॥
ऋतेऽमृतापटोलीभ्यां गुडूचीक्षुक्षारसोनतः ।
कषाय प्रायशः शीतं स्तम्भनं चाभयाऋते ॥ ३६ ॥
रसाः कटुम्ललवणा वीर्य्येणोष्णा यथोत्तरम् ।
तिक्तः कषायो मधुरस्तद्वदेव च शीतलः ॥ ३७ ॥
तिक्तः कटुः कषायश्च रूक्षा बह्वमलास्तथा ।
पटूम्लमधुराः स्निग्धाः सृष्टविण्मूत्रमारुताः ॥ ३८ ॥
घटो. कषायस्तस्माच्च मधुरः परमं गुरुः ।
लघुरम्लः कटुस्तस्मात्तस्मादपि च तिक्तकः ॥ ३९ ॥
सयोगाः सप्तपञ्चाशत् कल्पना तु त्रिषष्टिधा ।
रसानां यौगिकत्वेन यथास्थूलं विभज्यते ॥ ४० ॥
एकैकहीनांस्तान् पञ्च पञ्च यान्ति रसा द्विके ।
त्रिके स्वादुर्दमाम्लः षट् त्रीन् पटुस्तिक्त एककम् ॥४१॥
चतुष्केषु दश स्वादुश्चतुरोऽम्लः पटुः सकृत् ।
पञ्चकेष्वेकमेवाम्लो मधुरः पञ्च सेवते ।
द्रव्यमेकं षड़ास्वादमसंयुक्ताश्च षड्रसाः ॥ ४२ ॥
षट्पञ्चकाः षट् च पृथग्रसास्युश्चतुर्द्विकौ पञ्चदशप्रकारौ ।
भेदास्त्रिकाविंशतिरेकमेकं द्रव्यं षडास्वादमिति त्रिषष्टिः ॥४३॥
ते रसानुरसतो रसभेदास्तारतम्यपरिकल्पनया च ।
संभवन्ति गणनां समतीता दोषभेषजवशादुपयोज्याः ॥४४॥

एकादशोऽध्यायः।

अथातो दोषादिविज्ञानीयमध्यायं व्याख्यास्यामः॥
दोषधातुमला मूलं सदा देहस्य ते चलाः।
उत्साहोच्छ्वासनिःश्वासचेष्टावेगप्रवर्त्तनैः॥ १॥
सम्यग् गत्या च धातूनामक्षाणां पाटवेन च।
अनुग्रहात्यविकृतः पित्त पक्त्यूष्मदर्शनैः॥ २॥
क्षुत्तृड्रुचिप्रभामेधाधीशौर्य्यतनुमार्दवैः।
श्लेष्मास्थिरत्वस्निग्धत्वसन्धिबन्धक्षमादिभिः॥ ३॥
प्रीणनं जीवनं लेपः स्नेहो धारणपूरणे।
गर्भोत्पादश्च धातूनां श्रेष्ठं कर्म क्रमात् स्मृतम्॥ ४॥
अवष्टम्भः पुरीषस्य मूत्रस्य क्लेदवाहनम्।
स्वेदस्य क्लेदविधृतिः

हृद्स्तु कुरुतेऽनिलः॥ ५॥
कार्श्यकार्ष्ण्यशैषिरकामित्वकम्पानाहशूलदुर्ग्रहान्।
बलनिद्रेन्द्रियभ्रंशप्रलापभ्रमदीनताः॥ ६॥
पीतविण्मूत्रनेत्रत्वक्क्षुत्तृड्दाहाल्पनिद्रताः।
पित्तं

श्लेष्माग्निसदनप्रसेकालस्यगौरवम्॥ ७॥
श्वैत्यशैत्यस्रथाङ्गत्वं श्वासकासातिनिद्रताः।
रसोऽपि श्लेष्मवद्रक्त विसर्पप्लीहविद्रधीन्॥ ८॥
कुष्ठवातासपित्तासगुल्मोपकुशकामलाः।
व्यङ्गाग्निनाशसम्मोहरक्तत्वङ्मूत्रताः॥ ९॥
मांसं गण्डार्बुदग्रन्थिगण्डोरूदरदृढताः।
कण्ठादिष्वधिमांसं च

तद्मेदस्तथा श्रमम्॥ १०॥

अल्पेऽपि चेष्टिते श्वास स्फिक्स्तनोदरलम्बनम्।
अस्थ्यधस्थ्यधिदन्तांश्च
मज्जानेत्राङ्गगौरवम् ॥ ११ ॥
पर्वसु स्थूलमूलानि कुर्य्यात् कृच्छ्राण्यरूंषि च।
अतिस्त्रीकामता वृद्ध शुक्र शुक्राश्मरीमपि ॥ १२ ॥
कुक्षावाध्मानमाटोपं गौरव वेदना शकृत्।
मूत्रन्तु वस्तिनिस्तोद कृतेऽप्यकृतसञ्ज्ञताम् ॥ १३ ॥
स्वेदोऽतिस्वेददौर्गन्ध्यकण्डूः
एवं च लक्षयेत्।
दूषिकादीनपि मलान् बाहुल्यगुरुतादिभिः ॥ १४ ॥
लिङ्गं क्षीणेऽनिलेऽङ्गस्य सादोऽल्प भाषिते हितम्।
संज्ञामोहस्तथा श्लेष्मवृद्धक्लामयसम्भवः ॥ १५ ॥
पित्ते मन्दोऽनलः शीत प्रभाहानिः
कफे भ्रमः।
श्लेष्माशयानां शून्यत्वं हृदुद्भवश्रथसन्धिता ॥ १६ ॥
रसे रौक्ष्यं श्रमः शोषो ग्लानिः शब्दासहिष्णुता।
रक्तेऽक्षिशिरप्रीतिशिराग्रैथिल्यरूक्षता ॥ १७ ॥
मांसेऽच्यङ्गानिगण्डस्फिक्शुष्कतासन्धिवेदनाः।
मेदसि स्वपनं कट्याः प्लीह्नो वृद्धिः कृशाङ्गता ॥ १८ ॥
अस्थ्यस्थितोदः शदनं दन्तकेशनखादिषु।
अस्थ्नां मज्जनि सौषिर्य्यं भ्रमस्तिमिरदर्शनम् ॥ १९ ॥
शुक्रे चिरात् प्रसिच्येत शुक्रं शोणितमेव वा।
तोदोऽत्यर्थं हर्षणयोर्मेढ्रं धूमायतीव च ॥ २० ॥
पुरीषे वायुरन्त्राणि सशब्दो वेष्टयन्निव।
कुक्षौ भ्रमति यात्यूर्द्धं हृत्पार्श्वे पीडयन् भृशम् ॥ २१ ॥
मूत्रेऽल्प मूत्रयेत् कृच्छ्रादिवर्णं सासमेव वा।

स्वेदे रोमच्युतिः स्तब्धरोमता स्फुटनं त्वचः ॥ २२ ॥
मलानामतिसूक्ष्माणां दुर्लक्ष्य लक्षयेत् क्षयम्।
श्रमलायनशोषतोदशून्यत्वलाघवैः ॥ २३ ॥
दोषादीनां यथास्वं च विद्याद् वृद्धिक्षयौ भिषक्।
क्षयेण विपरीतानां गुणानां वर्द्धनेन च ॥ २४ ॥
वृद्धि मलानां सङ्गाच्च क्षय चातिविसर्गतः।
मलोपचयतत्वाद् देहस्य क्षयो वृद्धेषु पीडनः ॥ २५ ॥
तत्राऽस्थनि स्थितो वायुः पित्तं तु स्वेदरक्तयोः।
श्लेष्मा शेषेषु तैर्नैषामाश्रयाश्रयिणां मिथः ॥ २६ ॥
यदेकस्य तदन्यस्य वर्द्धनक्षपणौषधम्।
अस्थिमारुतयोर्नैव प्रायो वृद्धिर्हि तर्पणात् ॥ २७ ॥
श्लेष्मणानुगता तस्मात् सक्षयस्तद्विपर्य्ययात्।
वायुनानुगतो-

ऽस्माच्च वृद्धिक्षयमसृग्वान् ॥ २८ ॥
विकारान् साधयेच्छीघ्रं क्रमाल्लङ्घनबृंहणैः।
वायोरन्यत्र तज्ज्ञांस्तु तैरेवोत्क्रमयोजितैः ॥ २९ ॥
विशेषाद्रक्तवृद्ध्युत्थान् रक्तसृतिविरेचनैः।
मांसवृद्धिभवान् रोगान् शस्त्रक्षाराग्निकर्मभिः ॥ ३० ॥
स्थौल्यकार्श्योपचारेण मेदोजानस्थिसंक्षयात्।
जातान् क्षीरघृतैस्तिक्तसंयुतैर्वस्तिभिस्तथा ॥ ३१ ॥
विड्वृद्धिजानतीसारक्रियया विट्क्षयोद्भवान्।
मेषाजमध्यकुल्माषयवमाषदयादिभिः ॥ ३२ ॥
मूत्रवृद्धिक्षयोत्थांश्च मेहक्रुच्छ्रचिकित्सया।
व्यायामाभ्यञ्जनस्वेदमद्यैः स्वेदक्षयोद्भवान् ॥ ३३ ॥
स्वस्थानस्थस्य कायाग्नेरंशा धातुषु संश्रिताः।
तेषां सादातिदीप्तिभ्यां धातुवृद्धिक्षयोद्भवः ॥ ३४ ॥

पूर्वो धातुः परं कुर्य्याद् वृद्धः क्षीणश्च तद्विधम् ।
दोषा दुष्टा रसैर्धातून् दूषयन्त्युभये मलान् ॥ ३५ ॥
अधो द्वे सप्त शिरसि खानि स्वेदवहानि च ।
मला मलायनानि स्युर्यथास्वं तेष्वतो गदाः ॥ ३६ ॥
ओजस्तु तेजो धातूनां शुक्रान्तानां परं स्मृतम् ।
हृदयस्थमपि व्यापि देहस्थितिनिबन्धनम् ॥ ३७ ॥
स्निग्धं सोमात्मकं शुद्धमीषल्लोहितपीतकम् ।
यन्नाशे नियतं नाशो यस्मिन् स्तिष्ठति तिष्ठति ॥ ३८ ॥
निष्पद्यन्ते यतो भावा विविधा देहसञ्ज्ञयाः ।
ओजः क्षीयेत कोपक्षुत्ध्यानशोकश्रमादिभिः ॥ ३९ ॥
विभेति दुर्बलोऽभीक्ष्णं ध्यायति व्यथितेन्द्रियः ।
विच्छायो दुर्मना रूक्षो भवेत् क्षामश्च तत्क्षये ॥४०॥
जीवनीयौषधक्षीररसाद्यास्तत्र भेषजम् ।
ओजोविवृद्धौ देहस्य तुष्टिपुष्टिबलोदयः ॥ ४१ ॥
यदन्न हेष्टि यदपि प्रार्थयेताविरोधि तु ।
तत्तत्स्वजन् समश्नंश्च तौ तौ वृद्धिक्षयौ जयेत् ॥ ४२ ॥
कुर्वते हि रुचिं दोषा विपरीतसमानयोः ।
वृद्धाः क्षीणाश्च भूयिष्ठं लक्षयन्त्यबुधास्तु न ॥ ४३ ॥
यथाबलं यथास्वं च दोषा वृद्धा वितन्वते ।
रूपाणि जहति क्षीणाः समाः स्वं कर्म कुर्वते ॥ ४४ ॥
य एव देहस्य समा विवृद्धैस्त एव दोषा विषमा बधाय ।
यस्मादतस्ते हितचर्य्ययैव क्षयादिवृद्धेरिव रक्षणीयाः ॥४५॥

द्वादशोऽध्यायः।

अथातो दोषभेदीयमध्याय व्याख्यास्यामः॥
पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियम्।
स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः॥ १॥
नाभिरामाशयः स्वेदो लसीका रुधिरं रसः।
दृक् स्पर्शन च पित्तस्य नाभिरत्र विशेषतः॥ २॥
उरःकण्ठशिरःक्लोमपर्वाण्यामाशयो रसः।
मेदो घ्राणं च जिह्वा च कफस्य सुतरामुरः॥ ३॥
प्राणादिभेदात् पञ्चात्मा वायुः
प्राणोऽत्र मूर्धगः।
उरःकण्ठचरो बुद्धिहृदयेन्द्रियचित्तधृक्॥ ४॥
क्षीवनक्षवथूद्गारनिःश्वासान्नप्रवेशकृत्।
उरः स्थानमुदानस्य नासानाभिगलांश्चरेत्॥ ५॥
वाक्प्रवृत्तिप्रयत्नोर्जाबलवर्णस्मृतिक्रियः।
व्यानो हृदि स्थितः कृत्स्नदेहचारी महाजवः॥ ६॥
मत्यप्रक्षेपणोत्क्षेपनिमेषोन्मेषणादिकाः।
प्रायः सर्वाः क्रियास्तस्मिन् प्रतिबद्धाः शरीरिणाम्॥७॥
समानोऽग्निसमीपस्थः कोष्ठे चरति सर्वतः।
अन्न गृह्णाति पचति विवेचयति मुञ्चति॥ ८॥
अपानोऽपानयः श्रोणिवस्तिमेढ्रोरुगोचरः।
शुक्रार्तवशकृन्मूत्रगर्भनिष्क्रमणक्रियः॥ ९॥
पित्तं पञ्चात्मक तत्र पक्वामाशयमध्यगम्।
पञ्चभूतात्मकत्वेऽपि यत्तैजसगुणोदयात्॥ १०॥
व्यपदेशत्वं पाकादिकर्मण्यानलशब्दितम्।
पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा॥ ११॥

तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम् ।
करोति बलदानेन पाचकं नाम तत् स्मृतम् ॥ १२ ॥
आमाशयाश्रयं पित्तं रञ्जकं रसरञ्जनात् ।
बुद्धिमेधाभिमानार्थैरभिप्रेतार्थसाधनात् ॥ १३ ॥
साधकं हृदि तत् पित्तं
रूपालोचनतः स्मृतम् ।
दृक्स्थमालोचकं
त्वक्स्थं भ्राजकं भ्राजनात् त्वचः ॥ १४ ॥
श्लेष्मा तु पञ्चधो-
रक्षः स त्रिकस्य स्ववीर्य्यतः ।
हृदयस्याम्बुवीर्य्याच्च तत्स्थ एवाम्बुकर्मणा ॥ १५ ॥
कफधात्वा च शेषाणां यत् करोत्यवलम्बनम् ।
अतोऽवलम्बकः श्लेष्मा
यस्त्वामाशयसंस्थितः ॥ १६ ॥
क्लेदकः सोऽन्नसङ्घातक्लेदनात्
रसबोधनात् ।
बोधको रसनास्थायी
शिरःसंस्थोऽन्नतर्पणात् ॥ १७ ॥
तर्पकः
सन्धिसंश्लेषात् श्लेषकः सन्धिषु स्थितः ।
इति प्रायेण दोषाणां स्थानान्यविकृतात्मनाम् ॥ १८ ॥
व्यापिनामपि जानीयात् कर्माणि च पृथक् पृथक् ।
उष्णेन युक्ता रूक्षाद्या वायोः कुर्वन्ति सञ्चयम् ॥ १९ ॥
शीतेन कोपमुष्णेन शमं स्निग्धादयो गुणाः ।
शीतेन युक्तास्तीक्ष्णाद्याश्चयं पित्तस्य कुर्वते ॥ २० ॥
उष्णेन कोपं मन्दाद्याः शमं शीतोपसंहिताः ।

शीतेन युक्ताः स्निग्धाद्याः कुर्वते श्लेष्मसञ्चयम् ॥ २१ ॥
उष्णेन कोपं तेनैव गुणा रूक्षादयः गमम् ।
चयो वृद्धिः स्वधाम्न्येव प्रद्वेषो वृद्धिहेतुषु ॥ २२ ॥
विपरीतगुणेच्छा च
कोपस्तून्मार्गगामिता ।
लिङ्गानां दर्शनं तेषामस्थान्य रोगसम्भवः ॥ २३ ॥
चयप्रकोपप्रशमा वायोर्ग्रीष्मादिषु त्रिषु ।
वर्षादिषु तु पित्तस्य श्लेष्मणः शिशिरादिषु ॥ २४ ॥
चीयते लघुरूक्षाभिरोषधीभिः समीरणः ।
तद्विधस्तद्विधे देहे कालस्यौष्ण्यात्र कुप्यति ॥ २५ ॥
अङ्गिरस्त्वविपाकाभिरोषधीभिश्च तादृशम् ।
पित्तं याति चय कोप न तु कालस्य शैत्यतः ॥ २६ ॥
चीयते स्निग्धशीताभिरुदकौषधिभिः कफः ।
तुल्येऽपि काले देहे च स्वत्वलात्र प्रकुप्यति ॥ २७ ॥
इति कालस्वभावोऽयम्
आहारादिवशात् पुनः ।
चयादीन् यान्ति सद्योऽपि दोषाः कालेऽपि वा न तु ॥२८
व्याप्नोति सहसा देहमापादतलमस्तकम् ।
निवर्त्तते तु कुपितो मलोऽल्पाल्पं जलौघवत् ॥ २९ ॥
नानारूपैरसंख्येयैर्विकारैः कुपिता मलाः ।
तापयन्ति तनु तस्मात्तद्वैलाक्षतिसाधनम् ॥३०॥
शक्यं नैकैकशो वक्तुमतः सामान्यमुच्यते ।
दोषा एव हि सर्वेषां रोगाणामेककारणम् ॥ ३१ ॥
यथा पक्षी परिपतन् सर्वतः सर्वमश्नुते ।
छायामल्पेति नाल्पीयां यथा वा क्षत्स्नमश्नुते ॥ ३२ ॥
विकारजात्र विविधं त्रीन् गुणान् नातिवर्त्तते ।

तथा स्वधातुवैषम्यनिमित्तमपि सर्वदा ॥ ३३ ॥
विकारजातं त्रेधा तु दोषान्
तेषां कोपे तु कारणम्।
अर्थैरसात्म्यैः संयोगः कालः कर्म च दुष्कृतम् ॥ ३४ ॥
हीनातिमिथ्यायोगेन भिद्यते तत् पुनस्त्रिधा।
हीनोऽर्थनेन्द्रियस्याल्पः संयोगः खेन नैव वा ॥ ३५ ॥
अतियोगोऽतिसंसर्गः सूक्ष्मभास्वरभैरवम्।
अत्यासन्नातिदूरस्थं विप्रियं विकृतादि च ॥ ३६ ॥
यदक्ष्णा वीक्ष्यते रूपं मिथ्यायोगः स दारुणः।
एवमन्यच्च पूत्यादीनिन्द्रियार्थान् यथायथम् ॥ ३७ ॥
विद्यात्
कालस्तु शीतोष्णवर्षभेदात् त्रिधा मतः।
स हीनो हीनशीतादिरतियोगोऽतिलक्षणः ॥ ३८ ॥
मिथ्यायोगस्तु निर्दिष्टो विपरीतस्वलक्षणः।
कायवाक्चित्तभेदेन कर्मापि विभजेत् त्रिधा ॥ ३९ ॥
कायादिकर्मणां हीना प्रवृत्तिर्हीनसंज्ञिका।
अतियोगोऽतिवृत्तिस्तु वेगोदीरणधारणम् ॥ ४० ॥
विषमाङ्गक्रियारम्भः पतनस्खलनादिकम्।
भाषणं सामिभुक्तस्य रागद्वेषभयादि च ॥ ४१ ॥
कर्म प्राणातिपातादि दशधा यच्च निन्दितम्।
मिथ्यायोगः समस्तोऽत्राविह चामुत्र वा कृतम् ॥४२॥
निदानमेतद्दोषाणां कुपितास्तेन नैकधा।
कुर्वन्ति विविधान् व्याधीन् शाखाकोष्ठास्थिसन्धिषु ॥४३॥
शाखारक्तादयस्त्वक् च बाह्यरोगायनं हि तत्।
तदाश्रया मुखव्यङ्गगण्डालज्यर्बुदादयः ॥ ४४ ॥
बहिर्भागाश्च दुर्नामगुल्मश्लीपादयो गदाः।

अन्तःकोष्ठो महास्रोत आमपक्वाशयाश्रय. ॥ ४५ ॥
तत्स्थानान्यूर्ध्वतीसारकासश्वासोदरज्वराः ।
अन्तर्भागं च शोफार्शो गुल्मवीसर्पविद्रधि ॥ ४६ ॥
शिरोहृदयवस्त्यादिमर्मोरुस्थां च सन्धयः ।
तन्निबद्धाः शिरास्नायुकण्डराद्याश्च मध्यमाः ॥ ४७ ॥
रोगमार्गः स्थितास्तत्र यक्ष्मपक्षबधार्दिताः ।
मूर्धादिरोगाः सन्ध्यस्थित्रिकशूलग्रहादयः ॥ ४८ ॥
संसव्यासव्यधस्वापसादरुक्तोदभेदनम् ।
सङ्गाङ्गभङ्गसङ्कोचवर्त्तहर्षणतर्षणम् ॥ ४९ ॥
कम्पपारुष्यसौषिर्य्यशोषस्यन्दनवेष्टनम् ।
स्तब्धः कषायरसता वर्णः श्यावोऽरुणोऽपि वा ॥ ५० ॥
कर्माणि वायोः
पित्तस्य दाहरागोष्मपाकिताः ।
स्वेदः क्लेदः स्रुतिः कोथः सदनं मूर्च्छनं मदः ॥ ५१ ॥
कटुकाम्लौ रसौ वर्णः पाण्डुरारुणवर्जितः ।
श्लेष्मणः स्नेहकाठिन्यकण्डूशीतत्वगौरवम् ॥ ५२ ॥
बन्धोपलेपस्तैमित्यशोफापक्त्यतिनिद्रताः ।
वर्णः श्वेतो रसौ स्वादुलवणौ चिरकारिता ॥ ५३ ॥
इत्यशेषामयव्यापि यदुक्तं दोषलक्षणम् ।
दर्शनाद्यैरवहितस्तत्सम्यगुपलक्षयेत् ॥ ५४ ॥
व्याध्यवस्थाविभागज्ञः पश्यन्नार्त्तान् प्रतिक्षणम् ।
अभ्यासात् प्राप्यते दृष्टिः कर्मसिद्धिप्रकाशिनी ॥ ५५ ॥
रत्नादिसदृशज्ञानं न शास्त्रादेव जायते ।
दृष्टोपचारश्च: कश्चित् कश्चित् पूर्वापगधजः ॥ ५६ ॥
तद्वद्राङ्कवत्यन्यो व्याधिरेवं त्रिधा स्मृतः ।
यथानिदानं दोषोत्थः कर्मजो हेतुभिर्विना ॥ ५७ ॥

महारम्भोऽल्पके हेतावान्तको दोषकर्मजः ।
विपक्वशीलनात् पूर्वः कर्मजः कर्मसंचयात् ॥ ५८ ॥
गच्छत्युभयजश्चा तु दोषकर्मचयात् क्षयम् ।
द्विधा स्वपरतन्त्रत्वाद् व्याधयो-
ऽन्त्याः पुनर्द्विधा ॥ ५९ ॥
पूर्वजाः पूर्वरूपाख्या जाताः पश्चादुपद्रवाः ।
यथास्वजन्मोपशयाः स्वतन्त्राः सृष्टलक्षणाः ॥ ६० ॥
विपरीतास्ततोऽन्ये तु
विद्यादेवं मलानपि ।
तान् लक्षयेदवहितो विकुर्वाणान् प्रतिक्षरम् ॥ ६१ ॥
तेषां प्रधानप्रशमे प्रशमो शाम्यतस्तथा ।
पश्चाच्चिकित्सेत् तूर्णं वा बलवन्तमुपद्रवम् ॥ ६२ ॥
व्याधिक्लिष्टशरीरस्य पीडाकरतरो हि सः ।
विकारनामाकुशलो न जिह्रीयात् कदाचन ॥ ६३ ॥
न हि सर्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः ।
स एव कुपितो दोषः समुत्थानविशेषतः ॥ ६४ ॥
स्थानान्तराणि च प्राप्य विकारान् कुरुते बहून् ।
तस्माद्विकारप्रकृतीरधिष्ठानान्तराणि च ॥ ६५ ॥
बुद्ध्वा हेतुविशेषांश्च शीघ्रं कुर्यादुपक्रमम् ।
दूष्यं देशं बलं कालमनलं प्रकृतिं वयः ॥ ६६ ॥
सत्त्वं सात्म्यं तथाहारमवस्थाश्च पृथग्विधाः ।
सूक्ष्मसूक्ष्माः समीक्ष्यैषां दोषौषधनिरूपणे ॥ ६७ ॥
यो वर्त्तते चिकित्सायां न स स्खलति जातुचित् ।
गुर्वल्पव्याधिसंस्थानं मत्वदेहबलाबलात् ॥ ६८ ॥
दृश्यतेऽप्यन्यथाकारं तस्मिन्नवहितो भवेत् ।
गुरुं लघुमिति व्याधिं कल्पयंस्तु भिषग्ध्रुवः ॥ ६९ ॥

अल्पदोषाकलनया यथ्ये विप्रतिपद्यते।
ततोऽल्पमल्पवीर्यं वा गुरुव्याधौ प्रयोजितम्॥ ७०॥
उदीरयेत्तरां रोगान् संशोधनमयोगतः।
शोधनं त्वतियोगेन विपरीतं विपर्ययेः॥ ७१॥
क्षिणुयान्नमलानेव केवलं वपुरश्नति।
अतोऽभियुक्तः सततं सर्वमालोच्य सर्वथा॥ ७२॥
तथा युञ्जीत भैषज्यमारोग्याय यथा ध्रुवम्।
वक्ष्यन्तेऽतःपरं दोषा हृद्धिक्षयविभेदतः॥ ७३॥
पृथक् त्रीन् हृद्धिसंसर्गक्षिधा तत्र तु तान्नव।
त्रीनेव समया हृद्धा षड्डैकस्यातिशायने॥ ७४॥
त्रयोदश समस्तेषु
षट् द्वेकातिशयेन तु।
एकं तुल्याधिकैः
षट् च तारतम्यविकल्पनात्॥ ७५॥
पञ्चविंशतिमित्येवं हृद्धैः
क्षीणैश्च तावतः।
एकैकहृद्धिसमताक्षयैः षट् ते
पुनश्च षट्॥ ७६॥
एकक्षयद्वन्द्वहृद्धा सविपर्ययया पि ते।
भेदा द्विषष्टिर्निर्दिष्टाः
त्रिषष्टिः स्वास्थ्यकारणम्॥ ७७॥
संसर्गात्सरुधिरादिभिस्त्रयैषां
दोषांस्तु क्षयसमताविहृद्धिभेदैः।
आनन्त्यतरतमयोगतश्च यातान्
जानीयादवहितमानसो यथास्वम्॥ ७८॥

त्रयोदशोऽध्यायः ।

अथातो दोषोपक्रमणीयमध्यायं व्याख्यास्यामः ॥
वातस्योपक्रमः स्नेहः स्वेदः संशोधनं मृदु ।
स्वाद्वम्ललवणान्नानि भोज्यान्यभ्यङ्गमर्दनम् ॥ १ ॥
वेष्टनं वासनं सेको मद्यं पैष्टिकगौड़िकम् ।
स्निग्धोष्णा वस्तयो वस्तिनियमः सुखशीलता ॥ २ ॥
दीपनैः पाचनैः सिद्धाः स्नेहास्त्रानेकयोनयः ।
विशेषान्मेध्यपिशितरसतैलानुवासनम् ॥ ३ ॥
पित्तस्य सर्पिषः पानं स्वादुशीतैर्विरेचनम् ।
स्वादुतिक्तकषायाणि भोजनान्यौषधानि च ॥ ४ ॥
सुगन्धशीतच्छायानां गन्धानामुपसेवनम् ।
कण्ठे गुणानां हाराणां मणीनामुरसा धृतिः ॥ ५ ॥
कर्पूरचन्दनोशीरैरनुलेपः क्षणे क्षणे ।
प्रदोषश्चन्द्रमाः सौधं हारि गीतं हिमोऽनिलः ॥ ६ ॥
अयत्नजं सुखं मित्रं पुत्रः सन्दिग्धमुग्धवाक् ।
छन्दानुवर्त्तिनी दाराः प्रियाः शीलविभूषिताः ॥ ७ ॥
शीताम्बुधारागर्भाणि गृहाण्युद्यानदीर्घिकाः ।
सुतीर्थविपुलस्वच्छसलिलाश्रयसैकते ॥ ८ ॥
साम्भोजजलतीरान्ते कायमाने द्रुमाकुले ।
सौम्या भावाः पयः सर्पिर्विरेकश्च विशेषतः ॥ ९ ॥
श्लेष्मणो विधिना युक्तं तीक्ष्णं वमनरेचनम् ।
अन्नं रूक्षाल्पतीक्ष्णोष्णं कटुतिक्तकषायकम् ॥ १० ॥
दीर्घकालस्थितं मद्यं रतिप्रीतिप्रजागरः ।
अनेकरूपो व्यायामश्चिन्ता रूक्षं विमर्दनम् ॥ ११ ॥
विशेषाद्वमनं यूषः क्षौद्रं मेदोघ्नमौषधम् ।

धूमोपवासगण्डूषा निःसुखत्वं सुखाय च ॥ १२ ॥
उपक्रमः पृथग् दोषान् योऽयमुद्दिश्य कीर्त्तितः।
संसर्गसन्निपातेषु तं यथास्वं विकल्पयेत् ॥ १३ ॥
श्लेष्मः प्रायो मरुत्पित्ते वासन्तः कफमारुते।
मरुतो योगवाहित्वात् कफपित्ते तु शारदः ॥ १४ ॥
चय एव जयेद्दोषं कुपितं त्वविरोधयन्।
सर्वकोपे बलीयांसं श्लेष्मदोषाविरोधतः ॥ १५ ॥
प्रयोगः शमयेद् व्याधिं योऽन्यमन्यमुदीरयेत्।
नासौ विशुद्धः शुद्धस्तु शमयेद् यो न कोपयेत् ॥ १६ ॥
व्यायामाद्भूषणस्नैग्ध्यादहिताचरणादपि।
कोष्ठाच्छाखास्थिमर्माणि द्रुतत्वान्मारुतस्य च ॥ १७ ॥
दोषा यान्ति

तथा तेभ्यः स्रोतो सुखविशोधनात्।
हृद्याभिष्यन्दनात्पाकात्कोष्ठं वायोश्च निग्रहात् ॥१८॥
तत्रस्थाश्च विलम्बेरन् भूयो हेतुप्रतीक्षिणः।
ते कालादिबलं लब्ध्वा कुप्यन्त्यन्यान्यथेष्वपि ॥ १९ ॥
तत्रान्यस्थानसंस्थेषु तदीयामबलेषु च।
कुर्य्याच्चिकित्सां स्वामेव बलेनान्याभिभाविषु ॥ २० ॥
आगन्तुं शमयेद्दोषं स्थानिनं प्रतिकृत्य वा।
प्रायस्तिर्य्यग्गता दोषाः क्लेशयन्त्यातुरांश्चिरम् ॥ २१ ॥
कुर्य्यान्न तेषु त्वरया देहाग्निबलविक्रियाम्।
शमयेत्तान् प्रयोगेण सुखं वा कोष्ठमानयेत् ॥ २२ ॥
आत्मा कोष्ठप्रपन्नांश्च यथासन्नं विनिर्हरेत्।
स्रोतोरोधबलभ्रंशगौरवानिलमूढताः ॥ २३ ॥
आलस्यापक्तिनिष्ठीवमलसङ्गारुचिक्लमाः।
लिङ्गं सलानां सामानां निरामाणां विपर्य्ययः ॥२४॥

ऊष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितम् ।
दुष्टमामाशयगतं रसमाम प्रचक्षते ॥ २५ ॥
अन्ये दोषेभ्य एवातिदुष्टेभ्योऽन्योन्यमूर्च्छनात् ।
को द्रवैभ्यो विषस्येव वदन्त्यामस्य सम्भवम् ॥ २६ ॥
आमेन तेन सम्पृक्ता दोषा दूष्याश्च दूषिताः ।
सामा इत्युपदिश्यन्ते ये च रोगास्तदुद्भवाः ॥ २७ ॥
सर्वदेहप्रविष्टान् सामान् दोषान्न निर्हरेत् ।
लीनान् धातुष्वनुत्क्लिष्टान् फलादामाद्रसानिव ॥ २८ ॥
आशयस्थ हि नाशाय ते स्युर्निर्हरतः ।
पाचनैर्दीपनैः स्नेहैस्तान् स्वेदैश्च परिष्कृतान् ॥ २९ ॥
शोधयेत् शोधनैः काले यथासन्न यथाबलम् ।
हन्त्याशु युक्त वक्ष्यंश्च द्रव्यमामाशयान्मलान् ॥ ३० ॥
घ्राणेन चोर्ध्वजत्रूत्थान् पक्वाधानाद्गुदेन च ।
उत्क्लिष्टानध ऊर्ध्वं वा न चामान् वहतः स्वयम् ॥३१॥
धारयेदौषधैर्दीप्तान् विष्टब्धास्ते हि रोगदाः ।
प्रवृत्तान् प्रागतो दोषानुपेक्षेत हिताशिनः ॥ ३२ ॥
विबद्धान् पाचनैस्तैस्तैः पाचयेन्निर्हरेत वा ।
श्रावणे कार्त्तिके चैत्रे मासि साधारणे क्रमात् ॥ ३३ ॥
ग्रीष्मवर्षाहिमचितान् वायादीनाशु निर्हरेत् ।
अत्युष्णवर्षशीता हि ग्रीष्मवर्षाहिमागमाः ॥ ३४ ॥
सन्धौ साधारणे तेषां दुष्टान् दोषान् विशोधयेत् ।
स्वस्थवृत्तमभिप्रेत्य व्याधौ व्याधिवशेन तु ॥ ३५ ॥
ज्ञात्वा शीतोष्णवृष्टीनां प्रतीकारं यथायथम् ।
प्रयोजयेत् क्रियां प्राप्तां क्रियाकालं न चापयेत् ॥ ३६ ॥
युञ्जादनन्नमन्नादौ मध्येऽन्ते कवलान्तरे ।
ग्रासे ग्रासे सुहृ स्नात्रं समुद्गं निशि चौषधम् ॥ ३७ ॥

कफोद्रेके गदे नाद्यं बलिनो रोगरोगिणोः।
अन्यादौ त्रिगुणेऽपाने समाने मध्य इष्यते ॥ ३८ ॥
व्यानेऽन्ते प्रातराशस्य सायमाशस्य तूत्तरे।
प्राणप्रासान्तयोः प्राणे प्रदुष्टे मातरिश्वनि ॥ ३९ ॥
सुहुर्मुहुर्विषच्छर्दिहिक्काष्ठीवश्वासकासिषु।
योज्य सभोज्यं भैषज्यं भोज्यैश्चित्रैररोचके ॥ ४० ॥
कम्पाक्षेपकहिक्कासु समुद्गं लघुभोजिनाम्।
ऊर्ध्वमारुतविकारेषु स्वप्नकाले प्रशस्यते ॥ ४१ ॥

चतुर्दशोऽध्यायः।

अथातो द्विविधोपक्रमणीयमध्यायं व्याख्यास्यामः ॥
उपक्रमस्य हि द्वित्वाद् द्विधैवोपक्रमो मतः।
एकः सन्तर्पणस्तत्र द्वितीयश्चापतर्पणः ॥ १ ॥
बृंहणो लङ्घनश्चेति तत्पर्य्यायावुदाहृतौ।
बृंहणं यद् बृहत्त्वाय लङ्घनं लाघवाय यत् ॥ २ ॥
देहस्य
भवतः प्रायो भौमापमितरच्च ते।
स्नेहनं रूक्षणं कर्म स्वेदन स्तम्भन च यत् ॥ ३ ॥
भूतानां तदपि द्वैध्याद् द्वितयं नातिवर्त्तते।
शोधनं शमनं चेति द्विधा तत्रापि लङ्घनम् ॥ ४ ॥
यदीरयेद् बहिर्दोषान् पञ्चधा शोधनञ्च तत्।
निरूहो वमनं कायशिरोरेकोऽसृग्विसुतिः ॥ ५ ॥
न शोधयति यद्दोषान् समान्नोदीरयत्यपि।
समीकरोति विषमान् शमनं तच्च सप्तधा ॥ ६ ॥
पाचनं दीपन क्षुत्तृड्व्यायामातपमारुताः।
बृंहणं शमनं स्नेह वायोः पित्तानिलस्य च ॥ ७ ॥

हृंहयेद् व्याधिभैषज्यमद्यस्त्रीशोककर्शितान् ।
भाराध्वोरःक्षतक्षीणरूक्षदुर्बलवातलान् ॥ ८ ॥
गर्भिणीसूतिकावासवृद्धान् श्रीष्मेऽपरानपि ।
मांसक्षीरसितासर्पिर्मधुरस्निग्धबस्तिभिः ॥ ९ ॥
स्वप्नशय्यासुखाभ्यङ्गस्नाननिर्वृतिहर्षणैः ।
मेहामदोषातिस्निग्धज्वरोरुस्तम्भकुष्ठिनः ॥ १० ॥
विसर्पविद्रधिप्लीहगिरःकण्ठाक्षिरोगिणः ।
स्थूलांश्च लङ्घयेच्चित्यं शिशिरे त्वपरानपि ॥ ११ ॥
तत्र संशोधनैः स्नौल्यबलपित्तकफाधिकान् ।
आमदोषज्वरच्छर्दिरतीसारहृदामयैः ॥ १२ ॥
विबन्धगौरवोद्गारहृल्लासादिभिरातुरान् ।
मध्यस्नौल्यादिकान् प्रायः पूर्वं पाचनदीपनैः ॥ १३ ॥
एभिरेवामयैरार्त्तान् हीनस्नौल्यबलादिकान् ।
क्षुत्तृष्णानिग्रहैर्दोषैस्त्वार्त्तान्मध्यबलेष्टढान् ॥ १४ ॥
समीरणात्पायासैः किमुताल्पबलैर्नरान् ।
न हृंहयेल्लङ्घनीयान्
वृद्धांस्तु मृदु लङ्घयेत् ॥ १५ ॥
युक्त्या वा देशकालादिबलतस्तानुपाचरेत् ।
हृंहिते स्याद् बलं पुष्टिस्तत्साध्यामयसंक्षयः ॥ १६ ॥
विमलेन्द्रियता सर्गो मलानां लाघवं रुचिः ।
क्षुत्तृट्सहोदयः शुद्धहृदयोद्गारकण्ठता ॥ १७ ॥
व्याधिमार्दवमुत्साहस्तन्द्रानाशश्च लङ्घिते ।
अनपेक्षितमात्रादिसेविते कुरुतस्तु ते ॥ १८ ॥
अतिस्नौल्यातिकार्श्यादीन् वक्ष्यन्ते ते च सौषधाः ॥
रूपं तैरेव च ज्ञेयमतिहृंहितलङ्घिते ॥ १९ ॥
अतिस्नौल्यापचीमेहज्वरोदरभगन्दरान् ।

कासमंन्यासकृच्छ्रामकुष्ठादीनतिदारुणान् ॥ २० ॥
तत्र मेदोऽनिलश्लेष्मनाशनं सर्वमिष्यते।
कुलत्थचूर्णश्यामाकयवमुद्गमधूदकम् ॥ २१ ॥
मस्तुदण्डाहतारिष्टचिन्ताशोधनजागरम्।
मधुना त्रिफलां लिह्याद् गुडूचीमभयां घनम् ॥ २२ ॥
रसाञ्जनस्य महतः पञ्चमूलस्य गुग्गुलोः।
शिलाजतुप्रयोगश्च साग्निमन्थरसौ हितः ॥ २३ ॥
विडङ्गं नागरं क्षारः काललोहरजो मधु।
यवामलकचूर्णश्च योगोऽतिस्थौल्यदोषजित् ॥ २४ ॥
व्योषकट्वीवराग्निवृविडङ्गातिविषास्थिराः।
हिङ्गुसौवर्चलाजाजीयवानीधान्यचित्रकाः ॥ २५ ॥
निशे बृहत्यौ हपुषा पाठामूलञ्च कैम्बुकात्।
एषां चूर्णं मधु घृतं तैलञ्च सदृशांशकम् ॥ २६ ॥
यक्तुभिः षोडशगुणैर्युक्तं पीतं निहन्ति तत्।
अतिस्थौल्यादिकान् सर्वान् रोगानन्यांश्च तद्विधान् ॥२७॥
हृद्रोगकामलाश्लित्रश्वासकासगलग्रहान्।
बुद्धिमेधास्मृतिकरं सन्धस्याग्नेश्च दीपनम् ॥ २८ ॥
अतिकार्श्यं भ्रमः कासस्तृष्णाधिक्यमरोचकः।
स्नेहाग्निनिद्राहृक्श्रोत्रशुक्रौजःक्षुत्स्वरक्षयः ॥ २९ ॥
वस्तिहृन्मूर्द्धजङ्घोरुत्रिकपार्श्वरुजा ज्वरः।
प्रलापोर्ध्वानिलग्लानिच्छर्दिःपर्वास्थिभेदनम् ॥ ३० ॥
विषमूत्रादिग्रहाद्याश्च जायन्तेऽतिविलङ्घनात्।
कार्श्यमेव वरं स्थौल्यात्
न हि स्थूलस्य भेषजम् ॥३१॥
लंघनं लङ्घनं नालमतिमेदोऽग्निवातजित्।
मधुरस्निग्धसौहित्यैर्बृंहणं सौख्यं न विनश्यति ॥ ३२ ॥

क्रमिमा स्थविमात्यन्तविपरीतनिषेवणैः ।
योजयेद् बृंहणं तत्र सर्वं पानान्नभेषजम् ॥ ३३ ॥
अचिन्तया हर्षणेन भुवं सन्तर्पणेन च ।
स्वप्नप्रसङ्गाच्च क्रमो वराह इव पुष्यति ॥ ३४ ॥
न हि मांससमं किञ्चिदन्यद् बृंहणवस्तुकृत् ।
मांसादमांसं मांसेन सम्भृतत्वाद्विशेषतः ॥ ३५ ॥
गुरु चातर्पणं स्थूले विपरीतं हितं कृशे ।
यवगोधूममुभयोस्तद्योग्याहितकल्पनम् ॥ ३६ ॥
दोषगत्यातिरिच्यन्ते ग्राहिभेद्यादिभेदतः ।
उपक्रमा न ते हित्वाङ्क्रिया अपि गदा इव ॥ ३७ ॥

पञ्चदशोऽध्यायः ।

अथातः शोधनादिगणसंग्रहमध्यायं व्याख्यास्यामः ॥
मदनमधुकलम्बानिम्बविम्बीविशाला-
त्रपुषकुटजमूर्वादेवदालीक्रमिघ्नम् ।
विदुलदहनचित्राः कोशवत्यौ करञ्जः
कणलवणवचैलासर्षपास्फूर्दनानि ॥ १ ॥
निकुम्भकुम्भत्रिफलागवाचीस्नुक्क्षुद्विनीनीलिनितिक्तकानि ।
श्यामाककम्पिल्लकहेमदुग्धादुग्धं च मूत्रं च विरेचनानि ॥२॥
मदनकुटजकुष्ठदेवदालीमधुकवचादशमूलदारुराम्नाः ।
यवमिश्रितवेधन कुलत्थो मधुलवणं विहिता निरूहणानि ॥३॥
वेल्लापामार्गव्योषदार्वीसुराला
बीजं शैरीषं वार्हत शैग्रव च ।
सार्षो माक्षूकः सैन्धवं तार्क्ष्यशैलं
त्र्यूषी पृथ्वीका शोधयन्त्युत्तमाङ्गम् ॥ ४ ॥

भद्रदारु नतं कुष्ठं दशमूलं बलाद्वयम्।
वायु वीरतरादिश्च विदार्य्यादिश्च नाशयेत् ॥ ५ ॥
दूर्वानन्तानिम्बवासात्मगुप्ता
गुन्द्राऽभीरुः शीतपाको प्रियङ्गुः।
न्यग्रोधादिः पद्मकादिः स्थिरे द्वे
पद्मं वन्द्यं सारिवादिश्च पित्तम् ॥ ६ ॥
आरग्वधादिरर्कादिर्मुष्ककाद्योसनादिकः।
सुरसादिः ससुस्तादिर्वत्सकादिर्बलासजित् ॥ ७ ॥
जीवन्ती काकोल्यौ मेदे द्वे मुद्गमाषपर्ण्यौ च।
ऋषभकजीवकमधुकं चेति गणो जीवनीयाख्यः ॥ ८ ॥
विदारिपद्माङ्गुलहृच्छिकाली हंसीकदेवाह्वयशूर्पपर्ण्यः।
कण्डूकरीजीवनङ्खसंज्ञे द्वे पञ्चके गोपसुताद्विपादी ॥ ९ ॥
विदार्य्यादिरयं क्षय्यो हृद्यो वातपित्तहा।
शोषगुल्माङ्गमर्दोर्ध्वश्वासकासहरो गणः ॥ १० ॥
सारिवोशीरकाश्मर्य्यमधूकाग्निशिरद्वयम्।
यष्टी परूषकं हन्ति दाहपित्तास्रषट्ज्वरान् ॥ ११ ॥
पद्मकपुण्ड्रौ वृद्धितुगक्षीरः शृङ्गाटतादृगजीवनसंज्ञाः।
स्तन्यकराग्नीरणपित्तं प्रीणनजीवनवृंहणवृष्याः ॥ १२ ॥
परूषक वरा द्राक्षा कट्फल कतकाफलम्।
राजाङ्गं दाडिमं शाक त्वगमूत्रामयवातजित् ॥ १३ ॥
अञ्जनं फलिनी मांसी पद्मोत्पलरसाञ्जनम्।
सैलामधुकनामाङ्गं विषान्तर्दाहपित्तनुत् ॥ १४ ॥
पटोलकटुरोहिणी चन्दनं मधुस्रवगुडूचिपाठान्वितम्।
निहन्ति कफपित्तकुष्ठज्वरान् विषं वमिमरोचकं कामलाम् १५
गुडूचीपद्मकारिष्टधानका रक्तचन्दनम्।
पित्तश्लेष्मज्वरच्छर्दिदाहतृष्णाघ्नमग्निकृत् ॥ १६ ॥

आरग्वधेन्द्रयवपाटलिकाकुटिञ्जा
निम्बा सुताम्बुरसासुवहृच्चपाठाः ।
भूनिम्बसैर्यकपटोलकरञ्जयुग्मं
सप्तच्छदाग्निसुषवीफलबाणधोण्टाः ॥ १७ ॥
आरग्वधादिर्जयति छर्दिकुष्ठविषज्वरान् ।
कफ कण्डूं प्रमेह च दुष्टव्रणविशोधनः । १८ ॥
असनतिनिशभूर्जखेतवाहप्रकीर्य्या
खदिरकदरभण्डी शिंशपामेषशृङ्गाः ।
त्रिहिमतलपलाशा जोङ्गकः शाकशाली-
क्रमुकधवकुलिङ्गच्छामकर्णाश्वकर्णाः ॥ १९ ॥
असनादिर्विजयते श्वित्रकुष्ठकफक्रिमीन् ।
पाण्डुरोगं प्रमेहं च मेदोदोषनिबर्हणः ॥ २० ॥
वरणसैर्य्यकयुग्मशतावरीदहनमोरटबिल्वविषाणिकाः ।
हिहतोहिकरञ्जजयाद्वयं वहलपल्लवदर्भरुजाकराः ॥२१॥
वरणादिः कफ मेदो मन्दाग्नित्वं नियच्छति ।
अधोवातं शिरःशूलं गुल्मं चान्त्रः सविद्रधिम् ॥२२॥
जपकस्तुत्थकं हिङ्गुकासीसद्वयसैन्धवम् ।
सशिलाजतुकक्षाश्मगुल्ममेद कफापहम् ॥ २३ ॥
वेल्लन्तरारणिकबूकवृषाश्ममेद-
गोकण्ठकेत्कटसहाचरबाणकाशाः ।
वृक्षादनीनलकुशद्वयगुण्ठगुन्द्रा-
भल्लूकमोरटकुरण्टकरम्भपार्थाः ॥ २४ ॥
वर्गो वीरतराख्योऽयं हन्ति वातकृतान् गदान् ।
अश्मरीशर्करामूत्रकृच्छ्राघातरुजाहरः ॥२५॥
रोध्रशावरकरोध्रपलाशालिङ्गिनीसरलकट्फलयुक्ताः ।
कुत्सिताम्रकदलीगतशोकाः सैलवारुपरिपेलवमोचाः ॥२६॥

एष श्लेष्मादिको नाम मेदःकफहरो गणः ।
योनिदोषहरः स्तम्भी वर्ष्यो विषविनाशनः ॥ २७ ॥

अर्कालर्कौ नागदन्ती विशल्या
भार्गी राम्ना वृश्चिकाली प्रकीर्य्या
प्रत्यक्पुष्पी पीततैलोदकीर्य्या
श्वेतायुग्मं तापसानां च वृक्षः ॥ २८ ॥

अयमर्कादिको वर्गः कफमेदोविषापहः ।
कृमिकुष्ठप्रशमनो विशेषाद् व्रणशोधनः ॥२९॥

सुरसयुगफणिञ्झं कालमालाविडङ्ग-
खरवुसहषकर्णीकट्फलं कासमर्दः ।
चवकसरसिभार्गी कासुका काकमाची-
कुलहलविषमुष्टी भूस्तृणो भूतकेशी ॥ ३० ॥

सुरसादिगणः श्लेष्ममेदःकृमिनिषूदनः ।
प्रतिश्यायारुचिश्वासकासघ्नो व्रणशोधनः ॥ ३१ ॥

मुष्ककसुग्वराहीपिप्पलाग्रवचिंगणाः ।
गुल्ममेहाश्मरीपाण्डुमेदोऽर्शःकफशुक्रजित् ॥ ३२ ॥

वल्लकमूर्वाभार्गीकटुकामरिचं घृणप्रिया च मण्डीरम् ।
एलापाठाजाजीकृष्णफलाजमोदसिद्धार्थवचाः ॥ ३३ ॥

क्षीरकहिङ्गुविडङ्गं पशुगन्धा पञ्चकोलक हन्ति ।
चलकफमेदःपीनसगुल्मज्वरशूलदुर्नाम्नः ॥ ३४ ॥

वचाजलददेवाह्वनागरातिविषाभयाः ।
हरिद्राद्वययष्ट्याह्वकलशीकुटजोद्भवाः ॥ ३५ ॥

वचाहरिद्रादिगणो वामातीसारनाशनः ।
मेदःकफाव्यपवनस्तन्यदोषनिबर्हणः ॥ ३६ ॥

प्रियङ्गुपुष्पाञ्जनयुग्मपद्मोपलाद्रजो योजनवल्लभाख्या ।
भागद्वयं मीचरसः समङ्गा पुन्नागगीतं मदनीयहेतुः ॥३७॥

अम्बष्ठा मधुकं नमस्करोनन्दीवृक्षपलाशकच्छुराः ।
रोध्रं घातकिविल्वपेशिके कट्वङ्गः कमलोत्पवं रजः ॥ ३८ ॥
वर्षो प्रियङ्गुम्बष्ठादी पक्वातीसारनाशनौ ।
सन्धानीयौ हितौ पित्ते व्रणानामपि रोपणौ ॥ ३८ ॥

मुस्तावचाग्निहरिद्राहरितिक्ता
भल्लातपाठाबिल्वविषाख्याः ।
कुष्ठं त्रुटी हैमवती च योनि-
स्त्वामयघ्ना मलपाचनाश्च ॥ ४० ॥
न्यग्रोधपिप्पलसदाफलरोध्रयुग्मं
जम्बूद्वयार्जुनकपीतनसोमवल्काः ।
मूर्वाम्रवच्चुलपियालपलाशनन्दी-
कोलीकदम्बविरलामधुक मधूकम् ॥ ४१ ॥
न्यग्रोधादिर्गणो व्रण्यः सन्धाही भग्नसाधनः ।
मेदःपित्तासृदट्दाहयोनिरोगनिबर्हणः ॥ ४२ ॥
एलायुग्मतुरुष्ककुष्ठफलिनीमांसीजलध्यामकं
स्पृक्काचौरकचोचपत्रतगरस्थौणेयजातीरसाः ।
शुक्तिर्व्याघ्रनखो मराङ्गमगुरुः श्रीवासकं कुङ्कुमं
चण्डागुरुलुदेवधूपसपुराः पुन्नागनागाह्वयम् ॥ ४३ ॥
एलादिको वातकफौ विषञ्च विनियच्छति ।
वर्षप्रसादनः कण्डूपिटिकाकोठनाशनः ॥ ४४ ॥
श्यामा दन्ती द्रवन्तीक्रमुककुटरची शङ्खिनी चर्मसाह्वा
स्वर्णक्षीरी गवाक्षी गिरिरिजनकच्छिन्नरोहाकरञ्जाः ।
वस्त्रान्वी व्याधिघातो बहुलबहुरसस्नीग्धतिक्तात् फलानि
श्यामाद्यो हन्ति गुल्मं विषमरुचिकफौ हृद्रुजं मूत्रकृच्छ्रम्॥४५॥
वयस्थितिरिति प्रोक्ता वर्गास्तेषु स्वलाभतः ।
गुणप्राप्तहिधमन्यच्च द्रव्यं जङ्गादयौगिकम् ॥ ४६ ॥

एते वर्गा कोषदूष्याद्यपेक्ष-
कल्ककाथस्नेहलेहादियुक्ताः।
पाने नस्येऽन्वासनेऽन्तर्बहिर्वा
लेपाभ्यङ्गैर्घ्नन्ति रोगान् सुकृच्छ्रान् ॥ ४७ ॥

षोड़शोऽध्यायः।

अथातः स्नेहविधिमध्यायं व्याख्यास्यामः ॥
गुरुशीतसरस्निग्धमन्दसूक्ष्मसृदुद्रवम्।
औषधं स्नेहनं प्रायो विपरीत विरूक्षणम् ॥ १ ॥
सर्पिर्मज्जा वसा तैल स्नेहेषु प्रवर मतम्।
तत्रापि चोत्तम सर्पिः संस्कारस्यानुवर्त्तनात् ॥ २ ॥
पित्तघ्नास्ते यथापूर्वमितरघ्ना यथोत्तरम्।
घृतात्तैलं गुरु वसा तैलान् मज्जा ततोऽपि च ॥ ३ ॥
द्वाभ्यां त्रिभिश्चतुर्भिस्तैर्यमकस्निह्यतो महान्।
स्नेद्यमस्नोध्यमस्नोव्यायामासक्तचिन्तकाः ॥ ४ ॥
बृद्धबालाबलकृशा रूक्षाः क्षीणास्रेतसः।
वातार्त्तस्यन्दतिमिरदारुणप्रतिबोधिनः ॥ ५ ॥
स्नेह्याः
न त्वतिमन्दाग्नितीक्ष्णाग्निस्थूलदुर्बलाः।
ऊरुस्तम्भातिसारामगलरोगगरोदरैः ॥ ६ ॥
मूर्च्छाच्छर्यरुचिश्लेष्मतृष्णामदैश्च पीडिताः।
अपप्रसूता युक्ते च नस्ये वस्तौ विरेचने ॥ ७ ॥
तत्र धीस्मृतिमेधाग्निकाङ्क्षिणां शस्यते घृतम्।
ग्रन्थिनाडीकृमिश्लेष्मदोषमारुतरोगिषु ॥ ८ ॥
तैल लाघवदार्ढ्यार्थिक्रूरकोष्ठेषु देहिषु।
वातातपाध्वभारस्त्रीव्यायामक्षीणधातुषु ॥ ९ ॥

रूक्षक्लेशक्षमात्यग्निवाताढ्यतपस्विषु च ।
शेषौ
वसा तु सन्ध्यस्थिमर्मकोष्ठरुजासु च ॥ १० ॥
तथा दग्धाहतभ्रष्टयोनिकर्णशिरोरुजि ।
तैलं प्रावृषि वर्षान्ते सर्पिरन्यौ तु माधवे ॥ ११ ॥
मृदौ साधारणे स्नेहः शस्तोऽब्धि विमले रवौ ।
तैल त्वरायां शीतेऽपि
घर्मेऽपि च घृतं निशि ॥ १२ ॥
नित्यैव पित्ते पवने संसर्गे पित्तवत्यपि ।
नित्यन्यथा वातकफाद्रोगाः स्युः पित्ततो दिवा ॥ १३ ॥
शुद्धावचारयेत् स्नेह भक्ष्याद्यन्नेन वस्तिभिः ।
शस्याद्यञ्जनगण्डूषमूर्ध्वकर्णोचितर्पणैः ॥ १४ ॥
रसभेदैककालाभ्या चतुःषष्टिर्विचारणाः ।
स्नेहस्याद्याभिभूतत्वादल्पत्वाच्च क्रमात् स्मृताः ॥ १५ ॥
अद्योक्तहेत्वभावाच्च नाच्छपेयो विचारणा ।
स्नेहस्य कालाः स श्रेष्ठः स्नेहकर्मसु साधनात् ॥१६॥
द्वाभ्यां चतुर्भिरष्टाभिर्यामैर्जीर्यन्ति याः क्रमात् ।
क्रूरमध्योत्तमा मात्रास्तास्त्र्यभ्यक्ष क्रसीयसीम् ॥१७॥
कल्पयेद्दीप्ते दोषादीन् प्रागेव तु क्रसीयसीम् ।
ह्यस्तने जीर्ण एवाह्ने स्नेहोऽच्छः शुद्धये बहुः ॥ १८ ॥
श्रमनः क्षुद्वतोऽनह्नो मध्यमात्रश्च शस्यते ।
क्षुण्णो रसमद्याद्यैः सभक्तोऽल्पः
हितः स च ॥ १९ ॥
बालवृद्धपिपासार्त्तस्नेहद्विष्मद्यशीलिषु ।
स्नीक्ष्णे चानित्यमन्दाग्निसुखितक्लेशभीरुषु ॥ २० ॥
मृदुकोष्ठाल्पदोषेषु काले चोष्णे क्रमेषु च ।

प्राङ्मध्योत्तरभक्तोऽसावधोमध्योर्ध्वदेहजान् ॥ २१ ॥
व्याधीन् जयेद् बलं कुर्यादङ्गानां च यथाक्रमम्।
वार्युष्णमच्छेऽनुपिबेत् स्नेहे तत्सुखपक्तये ॥ २२ ॥
आस्योपलेपगुण्डूषे च तौवरारुष्करे न तु।
जीर्णाजीर्णविशङ्कायां पुनरुष्णोदकं पिबेत् ॥ २३ ॥
तेनोद्गारविशुद्धिः स्यात्ततश्च लघुता रुचिः।
भोज्योऽन्नं मात्रया पाश्यन् श्नः पिबन् पीतवानपि ॥२४॥
द्रवोष्णमनभिष्यन्दि नातिस्निग्धमसङ्करम्।
उष्णोदकोपचारी स्याद् ब्रह्मचारी क्षपाशयः ॥ २५ ॥
न वेगरोधी व्यायामक्रोधशोकहिमातपान्।
प्रवाहयानयानाध्वभाष्याभ्यासनसंस्थितिः ॥ २६ ॥
नीचात्युच्चोपधानाङ्घ्रिः स्वप्नधूमरजांसि च।
यान्यहानि पिबेत् तानि तावन्त्यन्यान्यपि त्यजेत् ॥२७॥
सर्वकर्मक्षये प्रायो व्याधिच्छेदेषु च क्रमः।
उपचारस्तु शमने कार्यः स्नेहे विरिक्तवत् ॥ २८ ॥
व्यूहमच्छं मृदौ कोष्ठे क्रूरे सप्तदिनं पिबेत्।
सम्यक्स्निग्धोऽथवा यावदतः साम्यो भवेत् परम् ॥ २९ ॥
वातानुलोम्य दीप्तोऽग्निर्वर्चः स्निग्धमसंहतम्।
स्नेहोद्वेगः क्लमः सम्यक् स्निग्धे रूक्षे विपर्ययः ॥३०॥
अतिस्निग्धे तु पाण्डुत्वं प्राणवक्त्रगुदस्रवाः।
अमात्रयाऽहितोऽकाले मिथ्याहारविहारतः ॥ ३१ ॥
स्नेहः करोति योपार्श्वस्तन्द्रास्तम्भविसंज्ञताः।
कण्डूकुष्ठज्वरोत्क्लेशशूलानाहभ्रमादिकान् ॥ ३२ ॥
तृट्तृष्णालेखनस्वेदरूक्षपानान्नभेषजम्।
तक्कारिष्टखलोदालयवश्यामाकोद्दवाः ॥ ३३ ॥
पिप्पलीव्रफलाचौद्रपथ्यागोमूत्रगुग्गुलुः।

यथास्वं प्रतिरोगं च स्नेहव्यापदि साधनम् ॥ ३४ ॥
विरूक्षणे लङ्घनवत् कृतातिस्निग्धलक्षणम् ।
स्निग्धद्रवोष्णधन्वोत्थरसभुक् स्वेदमाचरेत् ॥ ३५ ॥
स्निग्धस्त्र्यहं स्थितः कुर्याद्विरेकं वमनं पुनः ।
एकाह्नं दिनमन्यच्च कफमुत्क्लेश्य तत्करैः ॥ ३६ ॥
मांसला मेदुरा भूरिस्नेहाक्तेषु विषमाग्नयः ।
स्नेहोचिताश्च ये स्नेहास्तान् पूर्वं रूक्षयेत्ततः ॥ ३७ ॥
सस्नेहं शोधयेदेव स्नेहव्यापन्न जायते ।
अल्पं मलानीरयितुं स्नेहश्लक्ष्णात्मतां गतः ॥ ३८ ॥
बालवृद्धादिषु स्नेहपरिहारासहिष्णुषु ।
योगानिमाननुद्वेगान् सद्यः स्नेहान् प्रयोजयेत् ॥ ३९ ॥
प्राच्यमांसरसास्तेषु पेया वा स्नेहभर्जिताः ।
तिलचूर्णश्च सस्नेहक्षारितः क्षपरा तथा ॥ ४० ॥
क्षीरपेया घृताढ्योष्णा दध्नो वा सगुडः सरः ।
पेया च पञ्चप्रकृता स्नेहैस्तण्डुलपञ्चमैः ॥ ४१ ॥
मसैते स्नेहनाः सद्यः स्नेहाश्च लवणोल्बणाः ।
तद्वदभिष्यन्दरूक्षं च सूक्ष्ममुष्णं व्यवायि च ॥ ४२ ॥
गुडानूपामिषक्षीरतिलमाषसुरा दधि ।
कुष्ठशोफप्रमेहेषु स्नेहार्थं न प्रकल्पयेत् ॥ ४३ ॥
त्रिफला पिप्पली पथ्या गुग्गुल्वादि विपाचितान् ।
स्नेहान् यथास्वमेतेषां योजयेदविकारिणः ।
क्षीणानां स्नेहयेरग्निदेहसन्धुक्षणक्षमान् ॥ ४४ ॥
दोषान्तराग्निः परिशुद्धकोष्ठः प्रत्यग्रधातुर्बलवर्णयुक्तः ।
दृढेन्द्रियो मन्दजरः शतायुः स्नेहोपसेवी पुरुषः प्रदिष्टः ॥ ४५ ॥

सप्तदशोऽध्यायः।

अथातः स्वेदविधिमध्यायं व्याख्यास्यामः॥

स्वेदस्तापोपनाहोष्मद्रवभेदाच्चतुर्विधः।
तापोऽग्नितप्तवसनफालहस्ततलादिभिः॥ १॥
उपनाहो वचा किण्वशताह्वादेवदारुभिः।
धान्यैः समस्तैर्गन्धैश्च राज्ञैरण्डजटामिषैः॥ २॥
उद्दिल्लवर्षैः स्नेहक्षुक्रतक्रपयःसुतैः।
केवले पवने श्लेष्मसृष्टे सुरसादिभिः॥ ३॥
पित्तेन पद्मकाद्यैस्तु साल्वणाद्यैः पुनः पुनः।
स्निग्धोष्णवीर्यैर्मृदुभिश्चर्मपट्टैरपूतिभिः॥ ४॥
बलाभे वातजित् पचकौशेयाविकशाटकैः।
रात्रौ बद्धं दिवा सुञ्चेच्छुञ्चेद्वावौ दिवाक्रतम्॥ ५॥
ऊष्मा तूत्कारिकालोष्टकपालोपलपांसुभिः।
पत्रभङ्गेन धान्येन करीषसिकतातुषैः॥ ६॥
अनेकोपायसन्तप्तैः प्रयोज्यो देशकालतः।
शिग्रुवीरणकैरण्डकारञ्जसुरसार्जकात्॥ ७॥
शिरोषवासावल्गार्कमालतीदीर्घवृन्ततः।
पत्रभङ्गैर्वचाद्यैश्च सासैन्धानूपवारिजैः॥ ८॥
दशमूलेन च पृथक् सहितैर्वा यथामलम्।
स्नेहवद्भिः सुराशुक्तवारिक्षीरादिसाधितैः॥ ९॥
कुम्भीर्गलन्तीर्नाडीर्वा पूरयित्वा रुजार्दितम्।
यावसाच्छादितं गात्रं स्निग्धं सिञ्चेद् यथासुखम्॥ १०॥
तैरेव वा द्रवैः पूर्णं कुण्डं सर्वाङ्गगेऽनिले॥ ११॥
अवगाह्यातुरस्तिष्ठेदर्शःक्षच्छादिरुक्षु च।
निवातेऽन्तर्बहिः स्निग्धो जीर्णान्नः स्वेदमाचरेत्॥ १२॥
व्याधिव्याधितदेशर्तुवयान् मध्यवरावरम्।

कफार्त्तौ रूक्षणं रूक्षो रूक्षस्निग्धं कफानिले ॥ १३ ॥
आमाशयगते वायौ कफे पक्वाशयाश्रिते ।
रूक्षपूर्वं तथा स्नेहपूर्वं स्थानानुरोधतः ॥ १४ ॥
अल्पबङ्गणयोः स्वल्पं दृग्मूत्रक्लेदयोर्न वा ।
शीतशूलक्षये स्विन्नो जातेऽङ्गानां च मार्दवे ॥ १५ ॥
स्याच्छनैस्तोदितः स्नातस्ततः स्नेहविधिं भजेत् ।
पित्तासृक्कोपतमूर्च्छाज्वराङ्गसदनभ्रमाः ॥ १६ ॥
सन्धिपीडाज्वरश्यावरक्तमण्डलदर्शनम् ।
स्वेदातियोगाच्छर्दिश्च तत्र स्तम्भनभेषजम् ॥ १७ ॥
विषक्षाराग्न्यतीसारच्छर्दिमोहातुरेषु च ।
स्वेदनं गुरुतीक्ष्णोष्णं प्रायः स्तम्भनमन्यथा ॥ १८ ॥
द्रवस्थिरसरस्निग्धरूक्षसूक्ष्मं च भेषजम् ।
स्वेदनं स्तम्भनं श्लक्ष्णं रूक्षसूक्ष्मसरद्रवम् ॥ १९ ॥
प्रायस्तिक्तं कषायं च मधुरं च समासतः ।
स्तम्भितः स्याद् बले लब्धे यथोक्तामयसङ्क्षयात् ॥ २० ॥
स्तम्भत्वक्स्नायुसङ्कोचकम्पहृद्ग्रहनुग्रहैः ।
पादोष्ठत्वक्करैः श्यावैरतिस्तम्भितमादिशेत् ॥ २१ ॥
न स्वेदयेदतिशूलरूक्षदुर्बलमूर्च्छितान् ।
स्तम्भनीयक्षतक्षीणक्षाममद्यविकारिणः ॥ २२ ॥
तिमिरोदरवीसर्पकुष्ठशोषाश्मरीगिणः ।
पीतदुग्धदधिस्नेहमधून् कृतविरेचनान् ॥ २३ ॥
भ्रष्टदग्धगुदभ्रान्तिक्रोधशोकभयान्वितान् ।
क्षुत्तृष्णाकामलापाण्डुमेहिनः पित्तपीडितान् ॥ २४ ॥
गर्भिणीं सूतिकां सूतां मृदु चाल्पयिके गदे ।
श्वासकासप्रतिश्यायहिध्माध्मानविबन्धिषु ॥ २५ ॥
स्वरभेदानिलव्याधिश्लेष्मस्तम्भगौरवे ।

अङ्गमर्दकटीपार्श्वपृष्ठकुक्षिहनुग्रहे ॥ २६ ॥
मन्यास्तम्भे मुष्कयोः खल्लामायामे वातकण्टके।
मूत्रकृच्छ्रार्बुदग्रन्थिशुक्राघाताश्मरीषु ते ॥ २७ ॥
स्वेदं यथायथं कुर्यात् तदौषधविभागतः।
स्वेदो हितस्त्वनाग्नेयो वाते मेदःकफाहते ॥ २८ ॥
निवातं गृहमायासो गुरूष्णावरणं भयम्।
उपानाहाहयक्रोधभूरिपानं क्षुधातपः ॥ २९ ॥

ये श्लक्ष्णाः कोष्ठगा धातुगा वा
स्रोतोलीना ये च शाखास्थिसंस्थाः।
दोषाः स्वेदैस्ते द्रवीकृत्य कोष्ठं
नीताः सम्यक् शुद्धिभिर्निर्हरन्ते ॥ ३० ॥

अष्टादशोऽध्यायः।

अथातो वमनविरेचनविधिमध्यायं व्याख्यास्यामः ॥
कफे विदध्याद्वमनं संयोगे वा कफोल्वणे।
तद्वद्विरेचनं पित्ते
विशेषेण तु वामयेत् ॥ १ ॥
गलव्वरातिसाराधःपित्तासृग् राजयक्ष्मिणः।
कुष्ठमेहापचीग्रन्थिश्लीपदोन्मादकासिनः ॥ २ ॥
श्वासहृल्लासवीसर्पस्तन्यदोषार्हरोगिणः।
अकस्मा गर्भिणी रूक्षः क्षुधितो नित्यदुःखितः ॥ ३ ॥
बालवृद्धक्षयश्लीपहृद्रोगिक्षतदुर्बलाः।
प्रसक्तवमथुक्लीहतिमिरक्रिमिकोष्ठिनः ॥ ४ ॥
ऊर्ध्वप्रवृत्तवायूष्मदत्तबस्तिहृतस्वराः।
मूत्राघात्यु दरी गुल्मी दुर्वमोऽल्पाग्निरर्शसः ॥ ५ ॥
उदावर्त्तभ्रमाष्ठीलापार्श्वरुग्वातरोगिणः।

ऋते विषमरात्रीर्णविरुद्धाभ्यवहारतः ॥ ६ ॥
प्रसक्तवमथोः पूर्वं प्रायेणामज्वरोऽपि च।
धूमान्तैः कर्मभिर्वर्ज्यैः सर्वैरेव त्वजीर्णिनः ॥ ७ ॥
विरेकसाध्या गुल्मार्शोविस्फोटव्यङ्गकामलाः।
जीर्णज्वरोदरगरच्छर्दिप्लीहहलीमकाः ॥ ८ ॥
विद्रधिस्तिमिरं काचः स्यन्दः पक्वाशयव्यथा।
योनिशुक्राशया रोगाः कोष्ठगाः कृमयो व्रणाः ॥ ९ ॥
वाताष्ठनूर्ध्वगं रक्तं मूत्राघातः शकृद्ग्रहः।
वस्त्याश्च कुक्षिमेहाद्याः
न तु रेच्यो नवज्वरी ॥ १० ॥
अल्पाग्न्यधोगपित्तास्रक्षतपायुतिसारिणः।
सशूलाध्मापितक्रूरकोष्ठातिस्निग्धशोषिणः ॥ ११ ॥
अथ साधारणे काले स्निग्धस्विन्नं यथाविधि।
स्नेहव्यसुत्क्लिष्टकफं मध्यमाषतिलादिभिः ॥ १२ ॥
निशां सुप्तं सुजीर्णाञ्च पूर्वाह्णे कृतमङ्गलम्।
निरन्नमौषत्स्निग्धं वा पेयया पीतसर्पिषम् ॥ १३ ॥
बृद्धबालाबलक्लीवभीरून् रोगानुरोधतः।
आकण्ठं पायितान्नाद्यं घोरमिक्षुरसं रसम् ॥ १४ ॥
यथाविकारविहितां मद्यसैन्धवसंयुताम्।
कोष्ठं विमथ्य भैषज्यमात्रां मन्त्राभिमन्त्रिताम् ॥ १५ ॥
ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः।
ऋषयः सौषधिग्रामा भूतसङ्घाश्च पान्तु वः ॥ १६ ॥
रसायनमिवर्षीणाममराणामिवामृतम्।
सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते ॥ १७ ॥
ॐ नमो भगवते भैषज्यगुरवे वैदूर्यप्रभराजाय
तथागतायार्हते सम्यक् सम्बुद्धाय। तद्यथा। ॐ भैषज्ये

भैषज्ये महाभैषज्ये समुद्धते स्वाहा। प्राङ्मुखं पाय-
येत्

पीतं मुहूर्त्तमनुपालयेत्।

तन्मना:

जातहृल्लासप्रसेकस्तर्दयेत्ततः॥ १८॥
अङ्गुलिभ्यामनायस्तो नालेन मृदुनाथवा।
गलतालुस्वरजन् वेगानप्रवृत्तान् प्रवर्त्तयन्॥ १९॥
प्रवर्त्तयन् प्रवृत्तांश्च जानुतुल्यासने स्थितः।
उमे पार्श्वे ललाटञ्च वमतश्चास्य धारयेत्॥ २०॥
प्रपीडयेत् तथा नाभिं पृष्ठञ्च प्रतिलोमतः।
कफे तीक्ष्णोष्णकटुकैः पित्ते स्वादुहिमैरिति॥ २१॥
वमेत् स्निग्धाम्ललवणैः सम्सृष्टे मरुता कफे।
पित्तस्य दर्शनं यावच्छेदो वा श्लेष्मणो भवेत्॥ २२॥
हीनवेगः कणाधात्रीसिद्धार्थलवणोदकैः।
वमेत् पुनः पुनः

तत्र वेगानामप्रवर्त्तनम्॥ २३॥

प्रवृत्तिः सविबन्धा वा केवलस्यौषधस्य वा।
अयोगस्तेन निष्ठीवकण्डूकोठज्वरादयः॥ २४॥
निर्विबन्धं प्रवर्त्तन्ते कफपित्तानिलाः क्रमात्।
सम्यग् योगे-

ऽतियोगे तु फेनचन्द्रकरक्तवत्॥ २५॥

वमितं श्यामता दाहः कण्ठशोषस्तमो भ्रमः।
घोरा वाय्वामया मृत्युर्जीवशोणितनिर्गमात्॥ २६॥
सम्यग् योगेन वमितं क्षणमाश्वास्य पाययेत्।
धूमत्रयस्यान्यतमं स्नेहाचारमथादिशेत्॥ २७॥
ततः सायं प्रभाते वा क्षुद्वान् स्नातः सुखाम्बुना।

भुञ्जानो रक्तशाल्यन्नं भजेत् पेयादिकं क्रमम् ॥ २८ ॥
पेयां विलेपीमकृतं कृतञ्च यूष रस क्षीनुभयं तयैकम्।
क्रमेण सेवेत नरोऽन्नकालान् प्रधानमध्यावरशुद्धिशुद्धः ॥२९॥
यथाणुरग्निस्तृणगोमयाद्यैः सन्धुक्षमाणो भवति क्रमेण।
महान् स्थिरः सर्वपचस्तथैव शुद्धस्य पेयादिभिरन्तराग्निः ॥३०॥
जघन्यमध्यप्रवरे तु वेगाश्चत्वार इष्टा वमने षडष्टौ।
दशैव ते द्विस्त्रिगुणा विरेके प्रख्यस्तथा स्याद् द्विचतुर्गुणश्च ॥३१॥

पित्तावसानं वमन विरेकात्
अर्द्धं कफान्तञ्च विरेकमाहुः।
विद्वान् सविट्कानपनीय वेगान्
मेयं विरेके वमने तु पीतम् ॥ ३२ ॥

अथैनं वामित भूयः स्नेहस्वेदोपपादितम्।
श्लेष्मकाले गते ज्ञात्वा कोष्ठ सम्यग् विरेचयेत् ॥ ३३ ॥
बहुपित्तो मृदुः कोष्ठः क्षीरेणापि विरेच्यते।
प्रभूतमारुतः क्रूर. कृच्छ्राच्छ्यामादिकैरपि ॥ ३४ ॥
कषायमधुरैः पित्ते विरेकः कटुकैः कफे।
स्निग्धोष्णलवणैर्वायौ
अप्रवृत्तौ तु पाययेत् ॥ ३५ ॥
उष्णाम्बु स्वेदयेदस्य पाणितापेन चोदरम्।
उत्थानेऽल्पे दिने तस्मिन् भुञ्जाथेद्युः पुनः पिबेत् ॥३६॥
अदृढस्नेहकोष्ठस्तु पिबेदूर्द्धं दशाहतः।
भूयोऽभ्युपस्कृततनुः स्वेदस्नेहैर्विरेचनम् ॥ ३७ ॥
यौगिकं सम्यगालोच्य स्मरन् पूर्वमनुक्रमम्।
हृत्कुक्ष्यशुद्धिरुचिरुत्क्लेशः श्लेष्मपित्तयोः ॥ ३८ ॥
कण्डूर्विदाहः पिटिका पीनसो वातविड्ग्रहः।
अयोगलक्षणं

योगो वैपरीत्ये यथोदितात् ॥ ३९ ॥
विट्पित्तकफवातेषु निःसृतेषु क्रमात् स्रवेत्।
निःस्नेहपित्तमुदकं श्वेतं कृष्णं सलोहितम् ॥ ४० ॥
मांसधावनतुल्यं वा मेदःखण्डाभमेव वा।
गुदनिःसरणं तृष्णा भ्रमो नेत्रप्रवेशनम् ॥ ४१ ॥
भवन्त्यतिविरिक्तस्य तथातिवमनाम्यां।
सम्यग्विरिक्तमेनं च वमनोक्तेन योजयेत् ॥ ४२ ॥
धूमवर्ज्येन विधिना

ततो वमितवानिव।
क्रमेणान्नानि भुञ्जानो भजेत् प्रकृतिभोजनम् ॥ ४३ ॥
मन्दवह्निमसम्यङ्मामदोषदुर्बलम्।
अदृष्टजीर्णलिङ्गं च लङ्घयेत् पीतभेषजम् ॥४४॥
स्नेहस्वेदौषधोत्क्लेशसङ्गैरिति न बाध्यते।
सशोधनास्रविस्रावस्नेहयोजनलङ्घनैः ॥ ४५ ॥
याव्यग्निर्मन्दतां तस्मात् क्रमं पेयादिमाचरेत्।
सुतीव्रपित्तश्लेष्माणं मद्यपं वातपैत्तिकम् ॥ ४६ ॥
पेयां न पाययेत् तेषां तर्पणादिक्रमो हितः।
अपक्वं वमनं दोषात् पच्यमानं विरेचनम् ॥ ४७ ॥
निर्हरेद्वमनस्थातः पाकं न प्रतिपालयेत्।
दुर्बलो बहुदोषश्च दोषपाकेन यः स्वयम् ॥ ४८ ॥
विरिच्यते भेदनीयैर्भोज्यैस्तमुपपादयेत्।
दुर्बलः शोधितः पूर्वमल्पदोषः कृशो नरः ॥ ४९ ॥
अपरिज्ञातकोष्ठश्च पिबेन्मृदल्पमौषधम्।
वरं तदकृतं पीतमन्यथा संशयावहम् ॥ ५० ॥
हरेद् बह्वंश्चलान् दोषानल्पानल्पान् पुनः पुनः।
दुर्बलस्य मृदुद्रव्यैरल्पान् संशमयेत् तु तान् ॥ ५१ ॥

क्लेशयन्ति चिरं ते हि हन्युर्वैनमनिर्हृताः।
मन्दाग्निं क्रूरकोष्ठं च सक्षारलवणैर्घृतैः॥ ५२॥
सन्धुक्षिताग्नि विजितकफवातं च शोधयेत्।
रूक्षबद्धनिलक्रूरकोष्ठव्यायामशीलिनाम्॥ ५३॥
दीप्ताग्नीना च भैषज्यमविरेच्यैव जीर्य्यति।
तेभ्यो वस्तिं पुरा दद्यात् ततः स्निग्धं विरेचनम्॥५४॥
शक्त्यनिर्हृत्य वा किञ्चित् तीक्ष्णाभिः फलवर्त्तिभिः।
प्रवृत्तं हि मलं स्निग्धो विरेको निर्हरेत् सुखम्॥५५॥
विषाभिघातपिटिकाकुष्ठशोकविसर्पिणः।
कामलायाण्डमेहार्त्तान्नातिस्निग्धान् विरेचयेत्॥५६॥
सर्वान् स्नेहविरेकेषु रूक्षेस्तु स्नेहभावितान्।
कर्मणां वमनादीनां पुनरप्यन्तरेऽन्तरे॥ ५७॥
स्नेहस्वेदौ प्रयुञ्जीत स्नेहमन्ते बलाय च।
मलो हि देहादुत्क्लेश्य क्षिपते वाससो यथा॥ ५८॥
स्नेहस्वेदैस्तथोत्क्लेश्य क्षिपते शोधनैर्मलः।
स्नेहस्वेदावनभ्यस्य कुर्य्यात् संशोधनं तु यः।
दारु शुष्कमिवाराभे शरीरं तस्य दीर्य्यते॥ ५९॥
बुद्धिप्रसाद बलमिन्द्रियाणां धातुस्थिरत्वं ज्वलनस्य दीप्तिम्।
चिरात्च पाकं वयसः करोति संशोधनं सम्यगुपास्यमानम्॥६०॥

एकोनविंशोऽध्यायः।

अथातो वस्तिविधिमध्यायं व्याख्यास्यामः॥
वातोल्वणेषु दोषेषु वाते वा वस्तिरिष्यते।
उपक्रमाणां सर्वेषां सोऽग्रणीस्त्रिविधश्च सः॥ १॥
निरूहोऽन्वासनो वस्तिरुत्तर-
स्तेन साधयेत्।

गुल्मानाहक्षुदग्नीहशुद्धातीसारशूलिनः ॥ २ ॥
जीर्णज्वरप्रतिश्यायशुक्रानिलमलग्रहान्।
वर्षाश्मरीरजोनाशान् दारुणांश्चानिलामयान् ॥ ३ ॥
अनास्थाप्यास्त्वतिस्निग्धः क्षतोरस्को भृशं क्षयः।
आमातिसारी वमिमान् संशुद्धो दत्तनावनः ॥ ४ ॥
कासश्वासप्रमेहार्शोहिध्माध्मानाल्पवर्चसः।
शूनपायुः कृताहारो बद्धच्छिद्रोदकोदरी ॥ ५ ॥
कुष्ठी च मधुमेही च मासान् सप्त च गर्भिणी।
अस्थाप्या एव चान्वास्या विशेषादतिवृद्धयः ॥ ६ ॥
रूक्षाः केवलवातार्त्ताः
नानुवास्यास्त एव च।
श्वेनास्थाप्यास्तथा पाण्डुकामलामेहपीनसाः ॥ ७ ॥
निरन्नग्नीहविड्भेदिगुरुकोष्ठकफोदराः।
अभिष्यन्दिक्षतश्लथ्लक्रमिकोष्ठाध्यमारुताः ॥ ८ ॥
पीते विषे गरेऽपथ्यं श्लीपदी गलगण्डवान्।
तयोस्तु नेत्रं हैमादिधातुदार्वस्थिवेणुजम् ॥ ९ ॥
गोपुच्छाकारमच्छिद्रं श्लक्ष्णर्जु गुलिकामुखम्।
ऊनेऽब्दे पञ्च पूर्णेऽस्मिन्नासप्तभ्योऽङ्गुलानि षट् ॥ १० ॥
सप्तमे सप्त तान्यष्टौ द्वादशे षोडशे नव।
द्वादशैव परं विंशात्
वीक्ष्य वर्षान्तरेषु च ॥ ११ ॥
वयोबलशरीराणि प्रमाणमभिवर्धयेत्।
स्वाङ्गुष्ठेन समं मूले स्रोत्रे नाग्रेकनिष्ठया ॥ १२ ॥
पूर्णेऽब्दे ऽङ्गुलमादाय तदार्द्धार्द्धप्रवर्द्धितम्।
त्र्यङ्गुलं परमं छिद्रं मूलेऽग्रे वहते तु यत् ॥ १३ ॥
मुद्गं माषं कलायञ्च क्षिप्रं कर्कन्धुकं क्रमात्।

मूलच्छिद्रप्रमाणेन प्रान्ते घटितकर्णिकम् ॥ १४ ॥
वर्त्त्याग्रे पिहितं मूले यथास्वं द्वयङ्गुलान्तरम् ।
कर्णिकाद्वितये नेत्रे कुर्य्यात्
तत्र च योजयेत् ॥ १५ ॥
अजाविमहिषादीनां वस्तिं सुमृदितं दृढम् ।
कषायरक्तं निश्छिद्रग्रन्थिगन्धशिरं तनुम् ॥ १६ ॥
ग्रन्थितं साधुसूत्रेण सुखसंस्थाप्यभेषजम् ।
वस्त्यभावेऽङ्गपाद वा न्यसेद्वा सोऽथवा घनम् ॥ १७ ॥
निरूहमाद्यं प्रथमे प्रकुर्य्याद्वत्सरात् परम् ।
प्रकुर्य्याद्वर्द्धि प्रत्यब्दं यावत् षट् प्रसृतास्ततः ॥ १८ ॥
प्रसृतं वर्द्धयेदूर्द्धं द्वादशाष्टादशस्य च ।
आसप्ततेरिदं मान दशैव प्रसृता: परम् ॥ १९ ॥
यथायथं निरूहस्य पादो मात्रानुवासने ।
आख्याप्यं स्नेहित स्विन्नं शुद्धं लब्धबलं पुनः ॥ २० ॥
अनुवासनार्हं विज्ञाय पूर्वमेवानुवासयेत् ।
शीते वसन्ते च दिवा रात्रौ केचित् ततोऽन्यदा ॥ २१ ॥
अभ्यक्तस्नातसुचितात् पादहीनं हितं लघु ।
अस्निग्धरूक्षमशितं सानुपानं द्रवादि च ॥ २२ ॥
कृतचक्रमणं मुक्तविण्मूत्रं शयने सुखे ।
नात्युच्छ्रिते न चोच्छीर्षे संविष्टं वामपार्श्वतः ॥ २३ ॥
सङ्कोच्य दक्षिणं सक्थि प्रसार्य्य च ततोऽपरम् ।
अथास्य नेत्रं प्रणयेत् स्निग्धे स्निग्धसुखं गुदे ॥ २४ ॥
उच्छ्रास्य वस्तेर्वदने बद्धे हस्तमकम्पयन् ।
पृष्ठवंश्यं प्रति ततो नातिद्रुतविलम्बितम् ॥ २५ ॥
नातिवेगं न वा मन्दं सकृदेव प्रपीडयेत् ।
सावशेषं च कुर्वीत वायुः शेषे हि तिष्ठति ॥ २६ ॥

दत्ते तूत्तानदेहस्य पाणिना ताडयेत् स्फिजौ।
तत् पार्ष्णिभ्यां तथा श्रोण्यां पादतश्च विरुत्क्षिपेत् ॥२७॥
ततः प्रसारिताङ्गस्य सोपधानस्य पार्ष्णिके।
आहन्यान् मुष्टिनाङ्गुष्ठं स्नेहेनाभ्यज्य मर्दयेत् ॥ २८ ॥
वेदनार्त्तमिति स्नेहो न हि शीघ्रं निवर्त्तते।
योज्यः शीघ्रं निवृत्तेऽन्यः स्नेहोऽतिष्ठन्नकार्य्यकृत् ॥२९॥
दीप्ताग्निं त्वागतस्नेहं सायाह्ने भोजयेल्लघु।
निवृत्तिकालः परमस्त्रयो यामास्ततः परम् ॥ ३० ॥
अहोरात्रमुपेक्षेत परतः फलवर्त्तिभिः।
तीक्ष्णैर्वा वस्तिभिः कुर्य्याद् यत्नं स्नेहनिवृत्तये ॥ ३१॥
अतिरौक्ष्यादनागच्छन्न चेज्जाड्यादिदोषकृत्।
उपेक्षेतैव हि ततोऽध्युषितश्च निशां पिबेत् ॥ ३२ ॥
प्रातर्नागरधान्याम्भः कोष्ण केवलमेव वा।
अन्वासयेत् तृतीयेऽह्नि पञ्चमे वा पुनश्च तत् ॥ ३३॥
यथा वा स्नेहपक्तिः स्यादतोऽत्युल्बणमारुतान्।
व्यायामनित्यान् दीप्ताग्नीन् रूक्षांश्च प्रतिवासरम् ॥३४॥
इति स्नेहैस्त्रिचतुरैः स्निग्धे स्रोतोविशुद्धये।
निरूहं शोधनं युञ्जात्स्निग्धे स्नेहनं तनोः ॥ ३५ ॥
पञ्चमेऽथ तृतीये वा दिवसे साधके शुभे।
मध्याह्ने किञ्चिदादृत्ते प्रयुक्ते बलिमङ्गले ॥ ३६ ॥
अभ्यक्तस्नेदितोत्सृष्टमलं नातिबुभुक्षितम्।
अवेक्ष्य पुरुषं दोषभेषजादीनि चादरात् ॥ ३७ ॥
वस्तिं प्रकल्पयेद्वैद्यस्तद्विद्यैर्बहुभिः सह।
क्वाथयेद्विंशतिपलं द्रव्यस्याष्टौ फलानि च ॥ ३८ ॥
ततः क्वाथाच्चतुर्थांशं स्नेहं वाते प्रकल्पयेत्।
पित्ते स्वस्थे च षष्ठांशमष्टमांशं कफाधिके ॥ ३९ ॥

सर्वत्र चाष्टमं भागं कल्काद्भवति वा यथा ।
नात्यच्छसान्द्रता वस्तेः
पलमात्रं गुड़स्य च ॥४०॥
मधुपट्वादिशेषञ्च युक्त्या
सर्वं तदेकतः ।
उष्णाम्बु कुम्भीवाष्पेण तप्त खजसमाहतम् ॥ ४१ ॥
प्रक्षिप्य वस्तौ प्रणयेत्सायौ नात्युष्णशीतलम् ।
नातिस्निग्धं नवा रूक्षं नातितीक्ष्णं नवा मृदु ॥ ४२ ॥
नात्यच्छसान्द्रं नोनातिमात्र नापटु नाति च ।
लवण तद्वदक्षं च
पठन्त्यन्ये तु तद्विदः ॥ ४३ ॥
मात्रां त्रिपलिकां कुर्य्यात् स्नेहमाक्षिकयोः पृथक् ।
कर्षार्द्धं माक्षिमन्यस्य स्नस्ये कल्कपलद्वयम् ॥ ४४ ॥
सर्वद्रव्याणां शेषाणां पलानि दश कल्पयेत् ।
माक्षिकं लवणं स्नेहं कल्कं क्वाथमिति क्रमात् ॥४५॥
आवपेत निरूहाणामेष संयोजने विधिः ।
उत्तानि दत्तमात्रे तु निरूहे तन्मना भवेत् ॥ ४६ ॥
क्षतोपधानः सञ्जातवेगश्चोत्कटकः सृजेत् ।
आगतौ परमः कालो मुहूर्त्तौ मृत्यवे परम् ॥ ४७ ॥
तत्रानुलोमिकं स्नेहचारमूत्राग्निकल्पितम् ।
त्वरित स्निग्धतीक्ष्णोष्णं वस्तिमन्यं प्रपीडयेत् ॥ ४८ ॥
विदद्यात् फलवर्त्तिं वा स्वेदनोच्चासनादि च ।
स्वयमेव निहत्ते तु द्वितीयो वस्तिरिष्यते ॥ ४९ ॥
तृतीयोऽपि चतुर्थोऽपि यावद्वा सुनिरूढ़ता ।
विरिक्तवच्च योगादीन् विद्यात्
योगे तु भोजयेत् ॥ ५० ॥

कोष्णेन वारिणा स्नातं तनु धन्वरसौदनम्।
विकारा ये निरूहस्य भवन्ति प्रचलैर्मलैः ॥ ५१ ॥
ते सुखोष्णाम्बुसिक्तस्य यान्ति भुक्तवतः शमम्।
अथ वातार्दितं भूयः सद्य एवानुवासयेत् ॥ ५२ ॥
सम्यग्घीनातियोगाश्च तस्य स्युः स्नेहपीतवत्।
किञ्चित्कालं स्थितो यश्च सपुरीषो निवर्त्तते ॥ ५३ ॥
सानुलोमानिलः स्नेहस्तत्सिद्धमनुवासनम्।
एक त्रीन् वा बलासे तु स्नेहवस्तीन् प्रकल्पयेत् ॥ ५४ ॥
पञ्च वा सप्त वा पित्ते नवैकादश वानिले।
पुनस्ततोऽप्ययुग्मांस्तु पुनरास्थापनं ततः ॥ ५५ ॥
कफपित्तानिलेष्वन्नं यूषक्षीररसैः क्रमात्।
वातघ्नौषधनिःक्वाथस्निग्धाम्लैर्लवणैर्युतः ॥ ५६ ॥
वस्तिरेकोऽनिले स्निग्धः स्वादुस्निग्धोष्णसान्वितः।
न्यग्रोधादिगणक्वाथौ पत्रकादिसितायुतौ ॥ ५७ ॥
पित्ते स्वादुहिमौ साज्यक्षीरेक्षुरसमाक्षिकौ।
आरग्वधादिनिःक्वाथवत्सकादियुतास्त्रयः ॥ ५८ ॥
रूक्षाः सक्षौद्रगोमूत्रास्तीक्ष्णोष्णकटुकाः कफे।
त्रयश्च सन्निपातेऽपि दोषान् घ्नन्ति यतः क्रमात् ॥ ५९ ॥
त्रिभ्यः परं वस्तिमतो नेच्छन्त्यन्ये चिकित्सकाः।
न हि दोषश्चतुर्थोऽस्ति पुनर्दीयेत यं प्रति ॥ ६० ॥
तत्क्लेशनं शुद्धिकरं दोषाणां शमनं क्रमात्।
त्रिधैवं कल्पयेद् वस्तिमित्यन्येऽपि प्रचक्षते ॥ ६१ ॥
दोषौषधादिबलतः सर्वमेतत् प्रमाणयेत्।
सम्यक् निरूढलिङ्गं तु नासम्भाव्य निवर्त्तयेत् ॥ ६२ ॥
प्राक् स्नेह एकः पश्चान्ते द्वादशास्थापनानि च।
सान्वासनानि कर्मैवं वस्तयस्त्रि शदीरिताः ॥ ६३ ॥

कालः पञ्चदशैकोऽत्र प्राक् स्नेहान्ते त्रयस्तथा ।
षट् पञ्च वस्त्यन्तरिताः
योगोऽष्टौ वस्तयोऽत्र तु ॥६४॥
त्रयो निरूहाः स्नेहाश्च स्नेहावाद्यन्तयोरुभौ ।
स्नेहवस्तिं निरूहं वा नैकमेवातिशीलयेत् ॥ ६५ ॥
उत्क्लेशाग्निवधौ स्नेहान्निरूहान्मरुतो भयम् ।
तस्मान्निरूढः स्नेह्यः स्यान्निरूह्यश्चानुवासितः ॥ ६६ ॥
स्नेहशोधनयुक्त्यैव वस्तिकर्म त्रिदोषजित् ।
क्षत्रया स्नेहपानस्य मात्रया योजितः समः ॥ ६७ ॥
मात्रावस्तिः स्मृतः स्नेहः
शीलनीयः सदा च सः ।
बालवृद्धाध्वभारस्त्रीव्यायामासक्तचिन्तकैः ॥ ६८ ॥
वातभग्नबलाल्पाग्निनृपेश्वरसुखात्मभिः ।
दोषघ्नो निष्परीहारो बल्यः सृष्टमलः सुखः ॥ ६९ ॥
वस्तौ रोगेषु नारीणां योनिगर्भाशयेषु च ।
द्वित्रास्थापनशुद्धेभ्यो विदध्याद् वस्तिमुत्तरम् ॥ ७० ॥
आतुराङ्गुलमानेन तन्नेत्रं द्वादशाङ्गुलम् ।
वृत्तं गोपुच्छवन्मूलमध्ययोः कृतकर्णिकम् ॥ ७१ ॥
सिद्धार्थकप्रवेशाय श्लक्ष्णं श्लेष्मादिसम्भवम् ।
कुन्दाश्वमारसुमनःपुष्पवृन्तोपमं दृढम् ॥ ७२ ॥
तस्य वस्तिर्मृदुलघुर्मात्रा शुक्तिर्विकल्पः वा ।
अथ स्नाताग्नितस्यास्य स्नेहवस्तिविधानवत् ॥ ७३ ॥
ऋजोः सुखोपविष्टस्य पीठे जानुसमे भृदौ ।
वृष्टे मेढ्रे स्थिते चर्ज्यौ गवेः स्रोतोविशुद्धये ॥ ७४ ॥
सूक्ष्मां शलाकां प्रणयेत् तया शुद्धेऽनुसेवनीम् ।
आमेहनान्तं नेत्रं च निष्कम्पं गुदवत्ततः ॥ ७५ ॥

पीडितेऽन्तर्गते स्नेहे स्नेहवस्तिक्रमो हितः।
वस्तीननेन विधिना दद्यात् त्रींश्चतुरोऽपि वा ॥ ७६ ॥
अनुवासनवत् शेषं सर्वमेवास्य चिन्तयेत्।
क्षीणमार्त्तवकाले तु योनिर्गृह्णात्यपावृतेः ॥ ७७ ॥
विदधीत तदा तस्मादन्तावपि चात्यये।
योनिविभ्रंशगुल्मेषु योनिव्यापदसृग्दरे ॥ ७८ ॥
नेत्रं दद्याङ्गुल मुष्टप्रवेशं चतुरङ्गुलम्।
अपत्यमार्गे योज्यं स्याद् द्व्यङ्गुलं मूत्रवर्त्मनि ॥ ७९ ॥
मूत्रक्षच्छ्रविकारेषु बालानां त्वेकमङ्गुलम्।
प्रकुर्च्चो मध्यमा मात्रा बालानां गुदिरेव तु ॥ ८० ॥
उत्तानायाः शयानायाः सम्यक् सङ्कोच्य सक्थिनी।
ऊर्ध्वजान्वास्त्रिचतुरानहोरात्रेण योजयेत् ॥ ८१ ॥
वस्तौस्त्रिरात्रमेवञ्च स्नेहमात्रां विवर्द्धयेत्।
त्र्यहमेव च विश्रम्य प्रणिदध्यात् पुनस्त्र्यहम् ॥ ८२ ॥
पञ्चाद्विरेको वमितं ततः पञ्चान्निरूहणम्।
सद्यो निरूढश्चान्वास्यः सप्तरात्राद्विरेचितः ॥ ८३ ॥
यथा कुसुम्भादियुतात् तोयात् रागं हरेत् पटः।
तथा द्रवीकृताद्देहाद् वस्तिर्निर्हरते मलान् ॥ ८४ ॥
शाखागताः कोष्ठगताश्च रोगा मर्मोर्ध्वसर्वावयवाङ्गजाश्च।
ये सन्ति तेषां न तु कश्चिदन्यो वायोः परं जन्मनि हेतुरस्ति ॥८५॥
विट्श्लेष्मपित्तादिमलाचयानां विक्षेपसंहारकरः स यस्मात्।
तस्मात्तद्वस्य शमाय नान्यद्वस्तेर्विना भेषजमस्ति किञ्चित् ८६
तस्माच्चिकित्सार्द्ध इतिप्रदिष्टः कृत्स्ना चिकित्सापि च वस्तिरेकैः।
तथा निजागन्तुविकारकारी रक्षौषधत्वेन शिराव्यधोऽपि ॥८७॥

विंशोऽध्यायः ।

अथातो नस्यविधिमध्याय व्याख्यास्यामः ॥
ऊर्ध्वजत्रुविकारेषु विशेषान्नस्यमिष्यते ।
नासा हि शिरसो द्वारं तेन तद् व्याप्य हन्ति तान् ॥१॥
विरेचनं बृंहणं च शमनं च त्रिधापि तत् ।
विरेचनं शिरःशूलजाड्यस्यन्दगलामये ॥ २ ॥
शोफगण्डकृमिग्रन्थिकुष्ठापस्मारपीनसे ।
बृंहणं वातजे शूले सूर्य्यावर्त्ते स्वरक्षये ॥ ३ ॥
नासास्यशोषे वाक्सङ्गे क्लच्छ्रबोधेऽवबाहुके ।
शमनं नीलिकाव्यङ्गकेशदोषाक्षिराजिषु ॥ ४ ॥
यथास्वं यौगिकैः सूक्ष्मैर्यथास्वं च प्रसाधितैः ।
कल्ककाथादिभिश्चाद्यं मधुपट्टासवैरपि ॥ ५ ॥
बृंहणं धन्वमांसोत्थरसासृक्क्षपुरैरपि ।
शमनं योजयेत् पूर्वैः क्षीरेण च जलेन च ॥ ६ ॥
मर्शश्च प्रतिमर्शश्च द्विधा सूक्ष्मोऽत्र मात्रया ।
कल्कादैरवपीड़स्तु तीक्ष्णैर्मूर्द्धविरेचनैः ॥ ७ ॥
ध्मानं विरेचनचूर्णो
युञ्जात् तं मुखवायुना ।
षडङ्गुलद्विमुखया नाड्या भेषजगर्भया ॥ ८ ॥
स हि भूरितरं दोषं चूर्णत्वादपकर्षति ।
प्रदेशिन्यङ्गुलोपर्वद्वयान्मग्नसमुद्धृतात् ॥ ९ ॥
यावत् पतत्यसौ विन्दुर्दशार्द्धौ षट् क्रमेण ते ।
मर्शस्योक्तमधोना मात्रास्ता एव च क्रमात् ॥१०॥
विन्दुद्वयोनाः कल्कादे-
र्योजयेच्च तु नावनम् ।

तोयमद्यगरस्नेहपीतानां पातुमिच्छताम् ॥ ११ ॥
भुक्तभक्तशिरःस्नातस्नातुकामसुतास्पृजाम् ।
नवपीनसवेगार्त्तसूतिकाखासकासिनाम् ॥ १२ ॥
शुद्धानां दत्तवस्तीनां तथा नार्त्तं बदुर्दिने ।
अन्यत्रात्ययिकाद् व्याधे-
रथ नस्यं प्रयोजयेत् ॥१३॥
प्रातः श्लेष्मणि मध्याह्ने पित्ते सायं निशोच्चले ।
स्वस्थवृत्ते तु पूर्वाह्णे शरत्कालवसन्तयोः ॥ १४ ॥
शीते मध्यन्दिने ग्रीष्मे सायं वर्षासु सातपे ।
वाताभिभूते शिरसि हिध्मायामपतानके ॥ १५ ॥
मन्यास्तम्भे स्वरभ्रंशे सायं प्रातर्दिने दिने ।
एकाहान्तरमन्यत्र सप्ताहे च तदाचरेत् ॥ १६ ॥
स्निग्धस्विन्नोत्तमाङ्गस्य प्राक् कृतावश्यकस्य च ।
निवातशयनस्थस्य जत्रूर्ध्वं स्वेदयेत् पुनः ॥ १७ ॥
अथोत्तानजुदेहस्य पाणिपादे प्रसारिते ।
किञ्चिदुन्नतपादस्य किञ्चित् मूर्द्धनि नामिते ॥ १८ ॥
नासापुटं पिधायैकं पर्य्यायेण निषेचयेत् ।
उष्णाम्बुतप्तं भैषज्यं प्रनाड्या पिचुनाथवा ॥ १९ ॥
दत्ते पादतलस्कन्धहस्तकर्णादि मर्दयेत् ।
शनैरुच्छ्रिद्य निष्ठीवेत् पार्श्वयोरुभयोस्ततः ॥ २० ॥
आमेषजक्षयादेवं हिक्खिर्वा नस्यमाचरेत् ।
मूर्च्छायां शीततोयेन सिञ्चेत् परिहरन् शिरः ॥ २१ ॥
स्नेहं विरेचनस्यान्ते दद्याद्दोषाद्यपेक्षया ।
नस्यान्ते वाक्शतं तिष्ठेदुत्तानो
धारयेत् ततः ॥ २२ ॥
धूमं पीत्वा कफोष्णाम्बु कवलान् कण्ठशुद्धये ।

सम्यक् स्निग्धे सुखोच्छासस्वप्नबोधाच्चपाटवम् ॥ २३ ॥
रूक्षेऽस्निग्धव्यता शोषो नासास्ये मूर्द्धशून्यता।
स्निग्धेऽतिकण्डूर्गुरुताप्रसेकारुचिपीनसाः ॥ २४ ॥
सुविरिक्तेऽस्निग्धसुतास्वरवक्त्रविशुद्धयः।
दुर्विरिक्ते गदोद्रेकः क्षामतातिविरेचिते ॥ २५ ॥
प्रतिमर्शः क्षतक्षामबालवृद्धसुखात्मसु।
प्रयोज्योऽकालवर्षेऽपि
न त्विष्टो दुष्टपीनसे ॥ २६ ॥
मद्यपीतेऽबलस्त्रीचे क्रिमिदूषितमूर्द्धनि।
शुक्तक्षौद्रलिप्तदोषे च
हीनमात्रतया हि सः ॥ २७ ॥
निशाहर्भुक्तवान्ताहःस्नप्राध्वश्रमरेतसाम्।
शिरोऽभ्यञ्जनगण्डूषप्रसावाञ्जनवर्चसाम् ॥ २८ ॥
दन्तकाष्ठस्य हासस्य योज्योऽन्ते सौ द्विबिन्दुकः।
पञ्चसु स्रोतसां शुद्धिः क्रमनाशस्त्रिषु क्रमात् ॥ २९ ॥
दृग्बलं पञ्चसु ततो दन्तद्रार्ढ्यं मरुच्छमः।
न नस्यमूनसप्ताब्दे नातीताशीतिवत्सरे ॥ ३० ॥
न चोनाष्टादशे धूमः कवलो नोनपञ्चमे।
न शुद्धिरूनदशमे न चातिक्रान्तसप्ततौ ॥ ३१ ॥
आजन्ममरणं शस्तः प्रतिमर्शस्तु वस्तिवत्।
मर्शवच्च गुणान् कुर्य्यात् स हि नित्योपसेवनात् ॥ ३२ ॥
न चाच यत्नणा नापि व्यापन्नो मर्शवज्जयम्।
तैलमेव च नस्यार्थे नित्याभ्यासेन शस्यते ॥ ३३ ॥
शिरसः श्लेष्मधामत्वात् स्नेहाः स्वस्थस्य नेतरे।
आशुकारित्वं गुणोत्कर्षापकृष्टता ॥ ३४ ॥
मर्शे च प्रतिमर्शे च विशेषो न भवेद् यदि।

को मर्शं सपरीहारं सापदं च भजेत्ततः ॥ ३५ ॥
अच्छपानविकाराख्यौ कुटीवातातपस्थितौ।
अन्नासमात्रावस्थौ च तद्वदेव च निर्दिशेत् ॥ ३६ ॥
जीवन्ती जलदेवदारुजलदत्वक्सैव्यगोपोहिमं
दार्वीत्वक्षधुकप्लवागुरुवरापुण्ड्राह्वविल्वोत्पलम्।
धावन्यौ सुरभिः स्थिरे क्षमिहरं पत्रं त्रुटिं रेणुकं
किञ्चल्कं कमलाह्वयं शतगुणे दिव्येऽभसि क्वाथयेत् ॥३७॥

तैलाद्रसं दशगुणं परिशेष्य तेन
तैलं पचेच्च सलिलेन दशैव वारान्।
पाके क्षिपेच्च दशमे सममाजदुग्ध
नस्यं महागुणमुशन्त्यणुतैलमेतत् ॥ ३८ ॥
घनोन्नतप्रसन्नत्वक्स्कन्धग्रीवास्यवक्षसः।
दृढेन्द्रियास्त्वपलिता भवेयुर्नस्यशीलिनः ॥ ३९ ॥

एकविंशतितमोऽध्यायः।

अथातो धूमपानविधिमध्यायं व्याख्यास्यामः ॥
जत्रूर्ध्वं कफवातोत्थविकाराणामजन्मने।
उच्छेदाय च जातानां भिषेङ्मुं सदात्मवान् ॥ १ ॥
स्निग्धो मध्यः स तीक्ष्णश्च वाते वातकफे कफे।
योज्यः

न रक्तपित्तार्त्तिविरिक्तोदरमेहिषु ॥२॥
तिमिरोर्ध्वानिलाध्मानरोहिणीदत्तवस्तिषु।
मस्त्यमद्यदधिक्षीरक्षौद्रस्नेहविषाग्निषु ॥ ३ ॥
शिरस्यभिहते प्राग्रुरोगे जागरिते निशि।
रक्तपित्तान्यवाधिर्यशिरःशूलार्दितभ्रममूर्च्छामदमोहजित् ॥ ४ ॥

धूमोऽकालेऽतिपीतो वा

तत्र शीतो विधिर्हितः ।

क्षुतजृम्भितविण्मूत्रक्षीवाशस्त्रकर्मणाम् ॥ ५ ॥
ह्रासस्य दन्तकाष्ठस्य धूममन्ते पिबेन् मृदुम् ।
कालेष्वेषु निशाहारनावनान्ते च मध्यमम् ॥ ६ ॥
निद्रानस्याञ्जनस्नानच्छर्दितान्ते विरेचनम् ।
वस्तिनेत्रसमद्रव्य विकोशं कारयेत् ऋजु ॥ ७ ॥
मूलाग्रेऽङ्गुष्ठकोलास्थिप्रवेशं धूमनेत्रकम् ।
तीक्ष्णस्नेहनमध्येषु त्रीणि चत्वारि पञ्च च ॥ ८ ॥
अङ्गुलानां क्रमात् पातुः प्रमाणेनाष्टकानि तत् ।
ऋजूपविष्टस्तच्चेता विहृतास्यस्त्रिपर्व्ययम् ॥ ९ ॥
पिधाय छिद्रमेकैकं धूमं नासिकया पिबेत् ।
प्राक् पिबेन्नासयोत्क्लिष्टे दोषे घ्राणशिरोगते ॥ १० ॥
उत्क्लेशनार्थं वक्त्रेण विपरीतं तु कण्ठगे ।
मुखेनैव वमेद्धूमं नासया हृन्विघातकृत् ॥ ११ ॥
आक्षेपमोक्षैः पातव्यो धूमस्तु त्रिभिस्त्रिभिः ।
अङ्गैः पिबेत् सकृत् स्निग्ध स्त्रिर्मध्यं शोधनं परम् ॥ १२ ॥
त्रिशतुर्वा

मृदौ तत्र द्रव्याण्यगुरुगुग्गुलुः ।
मुस्तस्थौणेयशैलेयनलदोशीरबालकम् ॥ १३ ॥
वराङ्गकौन्तीमधुकविल्वमज्जैलवालुकम् ।
श्रीवेष्टकं सर्जरसौ ध्यामकं मदनं प्लवम् ॥ १४ ॥
शल्लकी कुङ्कुमं माषा यवाः कुन्दुरुकं तिलाः ।
स्नेहः फलानां सारार्णां मेदोमज्जावसाधृतम् ॥ १५ ॥
शमने शल्लकी लाक्षा पृथ्वीका कमलोत्पलम् ।
न्यग्रोधोदुम्बराश्वत्थप्लक्षरोध्रत्वचः सिता ॥ १६ ॥

यष्टी मधु सुवर्णत्वक् पद्मकं रक्तयष्टिका।
गन्धाश्वाकुष्ठतगराः
तीक्ष्णे ज्योतिष्मती निशा ॥ १७ ॥
दशमूलमनोह्वालं लाक्षा श्वेता फलत्रयम्।
गन्धद्रव्याणि तीक्ष्णानि गणो मूर्वविरेचनः ॥ १८ ॥
जले स्थितामहोरात्रमिषीका द्वादशाङ्गुलाम्।
पिष्टैर्धूपौषधैरेवं पञ्चकृत्वः प्रलेपयेत् ॥ १९ ॥
वर्त्तिरङ्गुष्ठवत् स्थूला यवमध्या यथा भवेत्।
छायाशुष्कां विगर्भां तां स्नेहाभ्यक्तां यथायथम् ॥ २० ॥
धूमनेत्रार्पितां पातुमग्निमुष्टां प्रयोजयेत्।
शरावसम्पुटच्छिद्रे नाडीं न्यस्य दशाङ्गुलाम्।
अष्टाङ्गुलां वा वक्त्रेण कासवान् धूममापिबेत् ॥ २१ ॥

कासः श्वासः पीनसो विस्वरत्वं पूतिगन्धः पाण्डुता केशदोषः।
कर्णस्रावश्चिस्रावकण्डूर्त्तिजाड्यं तन्द्रा हिक्मा धूमपं न स्पृशन्ति २२

द्वाविंशतितमोऽध्यायः।

अथातो गण्डूषादिविधिमध्यायं व्याख्यास्यामः ॥
चतुष्प्रकारो गण्डूषः स्निग्धः शमनशोधनौ।
रोपणश्च
त्रयस्त्रय स्त्रिषु योज्याश्चलादिषु ॥ १ ॥
अन्त्यो व्रणघ्नः
स्निग्धोऽत्र स्याद्वसपटुसाधितैः।
स्नेहैः
संशमनस्तिक्तकषायमधुरौषधैः ॥ २ ॥
शोधनस्तिक्तकटुक्षपटूषणैः
रोपणः पुनः।

कषायतिक्तकैः-

स्तन्य स्नेहः क्षीरं मधूदकम् ॥ ३ ॥
शुक्तं मद्यं रसो मूत्रं धान्याम्ल च यथायथम् ।
कल्कैर्युक्तं विपक्वं वा यथास्वर्शं प्रयोजयेत् ॥ ४ ॥
दन्तहर्षे दन्तचाले मुखरोगे च वातिके ।
सुखोष्णमथवा शीतं तिलकल्कोदकं हितम् ॥ ५ ॥
गण्डूषधारणे नित्यं तैलं मांसरसोऽथवा ।
ऊषादाहान्विते पाके क्षते वागन्तुसम्भवे ॥ ६ ॥
विषक्षाराग्निदग्धे च सर्पिर्धार्य्यं पयोऽथवा ।
वैशद्य जनयत्यास्ये सन्दधाति सुखव्रणान् ॥ ७ ॥
दाहतृष्णाप्रशमनं मधुगण्डूषधारणम् ।
धान्याम्लमास्यवैरस्यमलदौर्गन्ध्यनाशनम् ॥ ८ ॥
तदेवालवणं शीतं सुखशोषहरं परम् ।
आशु क्षाराम्बुगण्डूषो भिनत्ति श्लेष्मणश्चयम् ॥ ९ ॥
सुखोष्णोदकगण्डूषैर्जायते वक्त्रलाघवम् ।
निवाते सातपे स्निग्धमृदितस्कन्धकन्धरः ॥ १० ॥
गण्डूषमपिबन् किञ्चिदुन्नतास्यो विधारयेत् ।
कफपूर्णास्यता यावत् स्रवद्घ्राणाक्षताथवा ।
असञ्चार्य्यो मुखे पूर्णे गण्डूषः कवलोऽन्यथा ॥ ११ ॥
मन्या शिरःकर्णमुखाक्षिरोगाः प्रसेककण्ठामयवक्त्रशोषाः ।
हृल्लासतन्द्रारुचिपीनसाश्च साध्या विशेषात्कवलग्रहेण ॥ १२ ॥
कल्को रसक्रिया चूर्णस्त्रिविधं प्रतिसारणम् ।
युञ्जयात् तत् कफरोगेषु गण्डूषविहितौषधैः ॥ १३ ॥
मुखालेपस्त्रिधा दोषविषहा वर्णकृच्च सः ।
उष्णो वातकफे शस्तः शीतोऽत्यर्थं शीतलः ॥ १४ ॥
त्रिप्रमाणश्चतुर्भागत्रिभागार्द्धाङ्गुलोन्नतिः ।

अशुष्कस्य स्थितिस्तस्य शुष्को दूषयति क्रविम् ॥ १५ ॥
तमार्द्रयित्वापनयेत् तदन्तेऽभ्यङ्गमाचरेत्।
विवर्जयेद् दिवास्वप्नभाष्याग्न्यातपशुक्रकृधः ॥ १६ ॥
न योज्यः पीनसेऽजीर्णे दत्तनस्ये हनुग्रहे।
अरोचके जागरिते
स च हन्ति सुयोजितः ॥ १७ ॥
अकालपलितव्यङ्गबलीतिमिरनीलिकाः।
कोलमज्जाहरिद्रामूलशावरं गौरसर्षपाः ॥ १८ ॥
सिंहीमूलं तिलाः कृष्णा दार्वी त्वङ्निस्तुषा यवाः।
दर्भमूलहिमोशीरशिरीषमिश्रितण्डुलाः ॥ १९ ॥
कुमुदोत्पलकल्हारदूर्वामधुकचन्दनम्।
कालीयकतिलोशीरमांसीतगरपद्मकम् ॥ २० ॥
तालीसगुन्द्रापुण्ड्राह्वयष्टीकाञ्जनतागुरुः।
इत्यर्द्धार्द्धादिता लेपा हेमन्तादिषु षट् स्मृताः ॥ २१ ॥
मुखालेपनशीलानां दृढं भवति दर्शनम्।
वदनं चापरिम्लानं स्निग्धं तामरसोपमम् ॥ २२ ॥
अभ्यङ्गसेकपिचवो वस्तिश्चेति चतुर्विधम्।
मूर्द्धतैलं
बहुगुणं तद्विद्यादुत्तरोत्तरम् ॥ २३ ॥
तत्राभ्यङ्गः प्रयोक्तव्यो रौक्षकण्डूमलादिषु।
अरूषिकाग्निरस्रोददाहपाकव्रणेषु तु ॥ २४ ॥
परिषेकः
पित्तः केशशातसुप्तनष्टधूपने।
नेत्रस्तम्भे च
वस्तिस्तु प्रसृत्यर्दितजागरे ॥ २५ ॥
नाशास्यशोषे तिमिरे शिरोरोगे च दारुणे।

विधिस्तस्य निषण्णस्य पीठे जानुसमे शुभे ॥ २६ ॥
शुद्धाक्षिस्निग्धदेहस्य दिनान्ते गव्यमाहिषम् ।
द्वादशाङ्गुलविस्तीर्णं चर्मपट्टं शिरःसमम् ॥ २७ ॥
आकर्णबन्धनस्थानं ललाटे वस्त्रवेष्टिते ।
चैलवेणिकया बद्ध्वा माषकल्केन लेपयेत् ॥ २८ ॥
ततो यथाव्याधि शृतं स्नेहं कोष्णं निषेचयेत् ।
जह्वोः केशभुवो यावद् द्वाङ्गुलं
धारयेच्च तम् ॥२९॥
आवल्गनासिकोत्क्लेदाद्
दशाष्टौ षट चलादिषु ।
मात्रास्तस्यास्य-
ऽल्पे लेकं
स्कन्धादि मर्दयेत् ॥ ३० ॥
मुक्तस्नेहस्य
परमं सप्ताहं तस्य सेवनम् ।
धारयेत् पूरणं कर्णे कर्णमूलं विमर्दयन् ॥ ३१ ॥
रुजः स्नान्तार्दवं यावन्मात्राशतमवेदने ।
यावत् पर्येति हस्ताग्रं दक्षिणं जानुमण्डलम् ॥ ३२ ॥
निमेषोन्मेषकालेन समं मात्रा तु सा स्मृता ।
कचसदनसितत्वपिञ्जरत्व परिस्फुटन शिरसः समीररोगान् ।
जयति जनयतीन्द्रियप्रसादं स्वरहनुमूर्धबलं च मूर्धतैलम् ॥३३॥

चतुर्विंशतितमोऽध्यायः ।

अथातः आश्चोतनाञ्जनविधिमध्यायं व्याख्यास्यामः ॥
सर्वेषामक्षिरोगाणामादावाश्चोतनं हितम् ।
रक्तोदकण्डूवर्षाश्रुदाहरोगनिवर्हणम् ॥ १ ॥

उष्णं वाते कफे कोष्णं तच्छीतं रक्तपित्तयोः ।
निवातस्थस्य वामेन पाणिनोन्मील्य लोचनम् ॥ २ ॥
शुक्त्वा प्रलम्बयान्येन पिचुवर्त्म्या कनीनिके ।
दश द्वादश वा बिन्दून् द्व्यङ्गुलादवसेचयेत् ॥ ३ ॥
ततः प्रमृज्य मृदुना चैलेन कफवातयोः ।
अन्येन कोष्णपानीयप्लुतेन स्वेदयेन्मृदु ॥ ४ ॥
अत्युष्णतीक्ष्ण रुग्रागष्टङ्नाशायाक्षिसेचनम् ।
अतिशीतं तु कुरुते निस्तोदस्तब्धवेदनाः ॥ ५ ॥
कषायवर्त्मतां घर्षं रूक्षाद्रुक्षेषण बहु ।
विकारवृद्धिमत्यल्प संरम्भमपरिस्रुतम् ॥ ६ ॥
मत्वा सन्धिशिरोघ्राणमुखस्रोतांसि भेषजम् ।
ऊर्ध्वगात्रयने न्यस्तमपवर्त्तयते मलान् ॥ ७ ॥
यथाञ्जनं शुक्तननोर्नेत्रमात्राश्रये सले ।
पक्ष्मलिङ्गेऽल्पशोफातिकण्डूपैच्छिल्यलक्षिते ॥ ८ ॥
मन्दघर्माशुरोगेऽक्षि प्रयोज्यं घनदूषिके ।
आर्त्ते पित्तकफास्रघ्निर्मारुतेन विशेषतः ॥ ९ ॥
लेखनं रोपणं दृष्टिप्रसादनमिति त्रिधा ।
अञ्जन

लेखन तत्र कषायाम्लपटूषणैः ॥ १० ॥
रोपणं तिक्तकैर्द्रव्यैः

स्वादुशीतैः प्रसादनम् ।
दशाङ्गुला तनुर्मध्ये शलाका मुकुलानना ॥ ११ ॥
प्रशस्ता लेखने ताम्री रोपणे काललोहजा ।
अङ्गुली च सुवर्णोत्था रूप्यजा च प्रसादने ॥ १२ ॥
पिण्डो रसक्रिया चूर्णस्त्रिधैवाञ्जनकल्पना ।
गुरौ मध्ये लघौ दोषे ताः क्रमेण प्रयोजयेत् ॥ १३ ॥

हरेणुमात्रं पिण्डस्य वेल्लमात्रा रसक्रिया ।
तीक्ष्णस्य द्विगुण तस्य मृदुन-
स्नूर्णितस्य च ॥ १४ ॥
हे शलाके तु तीक्ष्णस्य तिस्रः स्फुरितस्य च ।
निशि स्वप्ने न मध्याह्ने पानान्नोष्णगभस्तिभिः ॥१५॥
अचिरोगाय दोषाः स्युर्वर्द्धितोत्क्लेडितद्रुताः ।
प्रातःसायं च तच्छान्त्यै व्यभ्रेऽर्केऽतोऽञ्जयेत् सदा ॥१६॥
वदन्त्यन्ये तु न दिवा प्रयोज्य तीक्ष्णमञ्जनम् ।
विरेकदुर्बल चक्षुरादित्यं प्राप्य मोदति ॥ १७ ॥
सप्नेन रात्रौ कालस्य सौम्यत्वेन च तर्पिता ।
शीतसात्म्याद्गागन्तेयी स्थिरतां लभते पुनः ॥ १८ ॥
अत्युद्रिक्ते बलासे तु लेखनीयेऽथवा गदे ।
काममक्ष्णयपि नाव्युष्णे तीक्ष्णमञ्जि प्रयोजयेत् ॥१९॥
अश्मनो जन्म लोहस्य तत एव च तीक्ष्णता ।
उपघातोऽपि तेनैव तथा नेत्रस्य तेजसः ॥ २० ॥
न रात्रावपि शीतेऽति नेत्रे तीक्ष्णाञ्जनं हितम् ।
दोषमस्रावयत् स्तम्भकण्डूजाड्यादिकारि तत् ॥ २१ ॥
नाञ्जयेच्छीतवमितविरिक्ताग्नितवेगिते ।
क्षुद्ज्वरिततान्ताक्षिशिरोरुक्शोकजागरे ॥ २२ ॥
अदृष्टेऽर्के शिरःस्नाते पीतयोर्धूममद्ययोः ।
अजीर्णेऽग्न्यर्कसन्तप्ते दिवा सुप्ते पिपासिते ॥ २३ ॥
अतितीक्ष्णमृदुश्लोकवङ्कच्छघनकर्कशम् ।
अत्यर्थशीतल तप्तमञ्जनं नावचारयेत् ॥ २४ ॥
अधानुन्मीलयन् दृष्टिमन्तः सञ्चारयेत् शनैः ।
अक्षिते वर्त्मनो किञ्चित् चालयेच्चैवमञ्जनम् ॥ २५ ॥
शीघ्रं व्याप्नोति सहसा न चोन्मेषनिमेषणम् ।

निष्पीडनं च वर्त्मभ्यां चालनं वा समाचरेत् ॥ २६ ॥
अपेतौषधसरम्भं निर्हृतं नयनं यदा।
व्याधिदोषर्तुयोग्याभिरद्भिः प्रक्षालयेत् तदा ॥२७॥
दक्षिणाङ्गुष्ठकेनाक्ष्णि ततो वामं सवाससा।
ऊर्ध्ववर्त्मनि सङ्गृह्य ग्रीवाध्य वामेन चेतरत् ॥ २८ ॥
वर्त्मप्राप्ताञ्जनाद् दोषो रोगान् कुर्यादतोऽन्यथा।
कण्डूजाड्येऽञ्जनं तीक्ष्णं धूमं वा योजयेत् पुनः।
तीक्ष्णाञ्जनाभितप्ते तु पूर्णं प्रत्यञ्जनं हितम् ॥ २९ ॥

चतुर्विंशतितमोऽध्यायः।

अथातस्तर्पणपुटपाकविधिमध्यायं व्याख्यास्यामः ॥
नयने ताम्यति स्तब्धे शुष्के रूक्षेऽभिघातिते।
वातपित्तातुरे जिह्मे शीर्णपक्ष्माविलेक्षणे ॥ १ ॥
क्लिष्टोन्मीलशिराहर्षशिरोत्पाततमोऽर्जुनैः।
स्यन्दमन्थान्यतो वातवातपर्य्यायशुक्लकैः ॥ २ ॥
आतुरे शान्तरागाश्रुशूलसंरम्भदूषिके।
निवाते तर्पणं योज्यं शुद्धयोर्मूर्द्धकाययोः ॥ ३ ॥
काले साधारणे प्रातः सायं चोत्तानशायिनः।
यवमाषमयीं पालीं नेत्रकोशाद् बहिः समाम् ॥ ४ ॥
द्वयङ्गुलोच्चां दृढां कृत्वा यथास्वं सिद्धमावपेत्।
सर्पिर्निमीलिते नेत्रे तप्ताम्बुप्रविलापितम् ॥ ५ ॥
नक्तान्ध्यवाततिमिरक्लिष्टबोधादिके वसाम्।
आपक्ष्मायादथोन्मेषं शनकैस्तस्य कुर्वतः ॥ ६ ॥
मात्रां विगणयेत् तत्र वर्त्मसन्धिसितासिते।
दृष्टौ च क्रमशो व्याधौ शतं त्रीणि च पञ्च च ॥ ७ ॥

शतानि सप्त चाष्टौ च दश मन्थे दशानिले।
पित्ते षट् स्वस्थवृत्ते च बलासे पञ्च धारयेत्॥ ८॥
क्षालयाङ्गे ततो द्वारं स्नेहं पात्रे तु गालयेत्।
पिबेच्च धूमं नेत्रेत व्योमरूपं च भास्करम्॥ ९॥
इत्थं प्रतिदिनं वायौ पित्ते त्वेकान्तरं कफे।
स्वस्थे च द्व्यन्तरं दद्यादाढ्ये रिति योजयेत्॥ १०॥
प्रकाशक्षमता स्वास्थ्य विशद लघु लोचनम्।
क्षये विपर्ययोऽक्षेऽतिक्षये स्नेयजा रुजः॥ ११॥
स्नेहपोता तनुरिव क्लान्ता दृष्टिर्हि सीदति।
तर्पणानन्तर तस्माद् दृग्बलाधानकारिणम्॥ १२॥
पुटपाकं प्रयुञ्जीत पूर्वोक्तेष्वेव यत्नसु।
स वाते स्नेहनः श्लेष्मसहिते लेखनो हितः॥ १३॥
दृग्दौर्बल्येऽनिले पित्ते रक्ते स्वस्थे प्रसादनः।
भूशयप्रसहानूपमेदोमज्जावसामिषैः॥ १४॥
स्नेहेन पयसा पिष्टैर्जीवनीयैश्च कल्पयेत्।
मृगपक्षियकृन्मांसमुक्तायस्ताम्रसैन्धवैः॥ १५॥
स्रोतोजगड्फेनालेलेखन मस्तुकल्पितैः।
मृगपक्षियकृन्मज्जावसान्वहृदयामिषैः॥ १६॥
मधुरैः सघृतैस्तन्यक्षीरपिष्टैः प्रसादनम्।
विल्वमात्रं पृथक् पिण्डं मांसभेषजकल्कयोः॥ १७॥
चरुबूकवटाम्भोजपत्रैः स्नेहादिषु क्रमात्।
वेष्टयित्वा मृदालिप्तं धवधन्वनगोमयैः॥ १८॥
पचेत् प्रदीप्तैरग्न्याभं पक्वं निष्पीड्य तद्रसम्।
नेत्रे तर्पणवत् युञ्जात्
शतं द्वे त्रीणि धारयेत्॥ १९॥
लेखनस्नेहनान्त्येषु

पूर्वौ कोष्णौ हिमोऽपरः।
धूमपोऽन्ते तयोरेव
योगास्तत्र च तद्विधैः ॥ २० ॥
तर्पणं पुटपाकञ्च नस्यानर्हे न योजयेत्।
यावन्त्यहानि युञ्जीत हिस्रतो हितभाग् भवेत्।
मालतीमल्लिकापुष्पैर्वद्धाञ्जो निवसेन्निशि ॥ २१ ॥
सर्वात्मना नेत्रबलाय यत्नं कुर्वीत नस्याञ्जनतर्पणाद्यैः।
दृष्टिश्च नष्टा विविधं जगच्च तमोमयं जायत एकरूपम् ॥ २२ ॥

पञ्चविंशतितमोऽध्यायः।

अथातो यन्त्रविधिमध्यायं व्याख्यास्यामः ॥
नानाविधानां शल्यानां नानादेशप्रबाधिनाम्।
आहर्त्तुमभ्युपायो यस्तद् यन्त्रं यच्च दर्शने ॥ १ ॥
अर्शोभगन्दरादीनां शस्त्रक्षाराग्नियोजने।
शेषाङ्गपरिरक्षायां तथा वस्त्यादि कर्मणि ॥ २ ॥
घटिकालाबुशृङ्गञ्च जाम्बवोष्ठादिकानि च।
अनेकरूपकार्य्याणि यन्त्राणि विविधान्यतः ॥ ३ ॥
विकल्प्य कल्पयेद् बुद्ध्या
यथा स्थूलन्तु वक्ष्यते।
तुल्यानि कङ्कसिंहर्क्षकाकादिमृगपक्षिणाम् ॥ ४ ॥
मुखैर्मुखानि यन्त्राणां कुर्य्यात्तत्संज्ञकानि च।
अष्टादशाङ्गुलायामान्यायसानि च भूरिशः ॥ ५ ॥
मसूराकारपर्य्यन्तैः कण्ठे बद्धानि कीलकैः।
विद्यात् स्वस्तिकयन्त्राणि मूलेऽङ्गुलनतानि च ॥ ६ ॥
तैर्दृढैरस्थिसंलग्नशल्याहरणमिष्यते।
कीलबद्धविमुक्ताग्रौ सन्दंशौ षोड़शाङ्गुलौ ॥ ७ ॥

त्वक्शिरास्नायुपिशितलग्नशल्यापकर्षणी ।
षड़ङ्गुलोऽन्यो हरणे सूक्ष्मशल्योपलब्धये ॥ ८ ॥
सुत्तुण्डीसूक्ष्मदन्तर्जुमूले रुचकभूषणा ।
गम्भीरव्रणमांसानां मर्मणः शोधितस्य च ॥ ९ ॥
द्वे द्वादशाङ्गुले मल्लतालवद् द्वेऽकतालके ।
तालयन्त्रे स्मृते कर्णनाड़ीशल्यापहारिणी ॥ १० ॥
नाडीयन्त्राणि शुषिराण्येकानेकसुखानि च ।
स्रोतोगतानां शल्यानामाशयानाञ्च दर्शने ॥ ११ ॥
क्रियाणां सुकरत्वाय कुर्य्यादाचूषणाय च ।
तद्विस्तारपरीणाहदैर्घ्यं स्रोतोऽनुरोधतः ॥ १२ ॥
दशाङ्गुलार्द्धनाहान्तःकण्ठशल्यावलोकने ।
नाडी

पञ्चमुखच्छिद्रा चतुष्कर्णस्य सग्रहे ॥ १३ ॥
वारङ्गस्य द्विकर्णस्य द्विच्छिद्रा तत्प्रमाणतः ।
वारङ्गकर्णसंस्थानानाहदैर्घ्यानुरोधतः ॥ १४ ॥
नाडीरेवंविधाश्चान्या द्रष्टुं शल्यानि कारयेत् ।
पद्मकर्णिकया मूर्ध्नि सदृशी द्वादशाङ्गुला ॥ १५ ॥
चतुर्थसुषिरा नाडी शल्यनिर्घातिनी मता ।
अर्शसां गोस्तनाकारं यन्त्रकं चतुरङ्गुलम् ॥ १६ ॥
नाहे पञ्चाङ्गुलं पुंसां प्रमदानां षडङ्गुलम् ।
द्विच्छिद्रं दर्शने व्याधेरेकच्छिद्रन्तु कर्मणि ॥ १७ ॥
मध्येऽस्य त्र्याङ्गुलं छिद्रमङ्गुष्ठोदरविस्तृतम् ।
अर्द्धाङ्गुलोच्छ्रितोद्वृत्तकर्णिकन्तु तदूर्ध्वतः ॥ १८ ॥
शम्याख्यं तादृगच्छिद्रं यन्त्रमर्शःप्रपीडनम् ।
सर्वथापनयेदोषं छिद्रादूर्द्धं भगन्दरे ॥ १९ ॥
घ्राणार्बुदार्शसामेकच्छिद्रा नाड्यङ्गुलद्वया ।

प्रदेशिनीपरीणाहा स्याद् भगन्दरयन्त्रवत् ॥ २० ॥
अङ्गुलित्राणकं दान्तं वार्क्षं वा चतुरङ्गुलम् ।
द्विच्छिद्रं गोस्तनाकारं तद्वक्त्रविवृतौ सुखम् ॥ २१ ॥
योनिव्रणेक्षणं मध्ये सुषिरं षोडशाङ्गुलम् ।
मुद्राबद्ध चतुर्भित्तमम्भोजमुकुलाननम् ॥ २२ ॥
चतुःशलाकमाक्रान्तं मूले तद्विकसेन्मुखे ।
यन्त्रं नाडीव्रणाभ्यङ्गस्नालनाय षडङ्गुलं ॥ २३ ॥
वस्तियन्त्राकृतौ मूले मुखेऽङ्गुष्ठकलायखे ।
अग्रतोऽकर्णिके मूले निबद्धमृदुचर्मणी ॥ २४ ॥
द्विद्वारा नलिका पिच्छनलिका वोदकोदरे ।
धूमवस्त्यादियन्त्राणि निर्दिष्टानि यथायथम् ॥ २५ ॥
त्राङ्गुलास्यं भवेच्छृङ्गं चूषणेऽष्टादशाङ्गुलम् ।
अग्रे सिद्धार्थकच्छिद्रं सुनद्धं चूचुकाकृति ॥ २६ ॥
स्याद् द्वादशाङ्गुलोऽलाबुर्नाहे त्वष्टादशाङ्गुलः ।
चतुरस्यङ्गुलवक्त्रास्यो दीर्घोऽन्तःश्लेष्मरक्तहृत् ॥ २७ ॥
तद्वद् घटी हिता गुल्मविलयोन्नमने च सा ।
शलाकाख्यानि यन्त्राणि नानाकर्माकृतीनि च ॥ २८ ॥
यथायोगप्रमाणानि
तेषामेषणकर्मणी ।
उभे गण्डूपदमुखे
स्रोतोभ्यः शल्यहारिणी ॥ २८ ॥
मसूरदलवक्त्रे हे स्यातामष्टनवाङ्गुले ।
शङ्खवः षट्
उभौ तेषां षोड़शद्वादशाङ्गुलौ ॥ ३० ॥
व्यूहनेऽहिफणावक्त्रौ
द्वौ दशद्वादशाङ्गुलौ ।

चालने शरपुङ्खास्त्रौ
आहार्ये वडिशाकृती ॥ ३१ ॥
ततोऽग्रे शङ्कुना तुल्यो गर्भशङ्कुरिति स्मृतः ।
अष्टाङ्गुलायतस्तेन मूढगर्भं हरेत् स्त्रियाः ॥ ३२ ॥
अश्मर्यां हरणे सर्पफणावद्वक्त्रमग्रतः ।
शरपुङ्खमुखं दन्तपातनं चतुरङ्गुलम् ॥ ३३ ॥
कार्पासविहितोष्णीषाः शलाकाः षट् प्रमार्जने ।
पायावास्यन्तदूरार्थे द्वे दशद्वादशाङ्गुले ॥ ३४ ॥
द्वे षट्सप्ताङ्गुले घ्राणे द्वे कर्णेऽष्टनवाङ्गुले ।
कर्णशोधनमग्रत्यपत्रप्रान्तं सुवाननम् ॥ ३५ ॥
शलाकाजाम्बवोष्ठानां चारेऽग्नौ च पृथक् त्रयम् ।
युञ्जयात् स्थूलाणुदीर्घाणां
शलाकामन्त्रवर्त्मनि ॥ ३६ ॥
मध्योर्ध्ववृत्तदण्डां च मूले चार्द्धेन्दुसन्निभाम् ।
कोलास्थिदलतुल्यास्यां नासार्शोऽर्बुददाहृताम् ॥ ३७ ॥
अष्टाङ्गुला निम्नमुखास्त्रिस्रः क्षारौषधक्रमे ।
कनीनोमध्यमानामिनखमानसमैर्मुखैः ॥ ३८ ॥
खंसमुक्तानि यन्त्राणि मेदुशस्त्रक्षनादिषु ।
धनुयन्त्राण्ययस्कान्तरज्जुवस्त्राश्ममुद्गराः ॥ ३९ ॥
बभ्रान्तजिह्वाबालास्त्र शाखानखमुखद्विजाः ।
कालः पाकः करः पादो भयं हर्षश्च तत्क्रियाः ।
उपायवित् प्रविभजेदालोच्य निपुणं धिया ॥ ४० ॥
निर्घातनोन्मथनपूरणमार्गशुद्धि-
सव्यूहनाहरणबन्धनपीड़नानि ।
आचूषणोन्नमननामनचालभङ्ग-
व्यावर्त्तनर्जुकरणानि च यन्त्रकर्म ॥ ४१ ॥

निवर्त्तते साध्ववगाहते च
ग्राह्यं गृहीत्वोद्धरते च यस्मात्।
यस्मेष्यतः कङ्कमुखं प्रधानं
स्थानेषु सर्वेष्वधिकारि यच्च ॥ ४२ ॥

षड्विंशतितमोऽध्यायः।

अथातः शस्त्रविधिमध्याय व्याख्यास्यामः।
षड्विंशतिः सुकर्मारैर्घटितानि यथाविधि।
शस्त्राणि रोमवाहीनि बाहुल्येनाङ्गुलानि षट् ॥ १ ॥
सुरूपाणि सुधाराणि सुग्रहाणि च कारयेत्।
अकरालानि सुश्लातसुतीक्ष्णावर्त्ति तैर्यसि ॥ २ ॥
समाहितमुखाग्राणि नीलाभोजच्छवीनि च।
नामानुगतरूपाणि सदा सन्निहितानि च ॥ ३ ॥
स्रोन्मानार्द्धचतुर्थांशफलान्येकैकशोऽपि च।
प्रायो द्वित्राणि युञ्जीत तानि स्थानविशेषतः ॥ ४ ॥
मण्डलाग्रं फले तेषां तर्जन्यन्तर्नखाकृति।
लेखने छेदने योज्यं पोथकोशखण्डकादिषु ॥ ५ ॥
वृद्धिपत्रं क्षुराकारं छेदभेदनपाटने।
ऋज्वग्रमुन्नते शोफे गम्भीरे च तदन्यथा ॥ ६ ॥
नताग्रं पृष्ठतो
दीर्घह्रस्ववक्त्रं यथाग्रयम्।
उत्पलाधर्द्धधाराख्ये छेदने भेदने
तथा ॥ ७ ॥
सर्पास्य ग्राणकर्णाग्रसंस्थे दन्तेऽर्द्धाङ्गुलं फले।
गतेरन्वेषणे ज्ञेया गण्डूपदमुखैषिणी ॥ ८ ॥

भेदनार्थेऽपरा सूचीमुखा मूलनिविष्टखा।
वेतसव्यधने

स्राव्ये शरार्य्यास्यं त्रिकूर्चके ॥ ८ ॥

कुशाटा वदने स्राव्ये द्व्यङ्गुल स्यात्तयोः फलम्।
तद्दन्तर्मुखं तस्य फलमध्यर्द्धमङ्गुलम् ॥ १० ॥

अर्द्धचन्द्राननं चैतत्तथा

ऽध्यर्द्धाङ्गुलं फले।

व्रीहिवक्त्रं प्रयोज्यञ्च तच्छिरोदरयोर्व्यधे ॥ ११ ॥

पृथुः कुठारी गोदन्तसदृशार्द्धाङ्गुलानना।
तयोर्द्वदण्डया विध्येदुपर्य्यस्थां स्थितां शिराम् ॥ १२ ॥

ताम्री शलाका द्विमुखी मुखे कुरुवकाकृतिः।
लिङ्गनाशं तया विध्येत्

कुर्य्यादङ्गुलिमस्तकम् ॥ १३ ॥

मुद्रिकानिर्गतमुखं फले त्वर्द्धाङ्गुलायतम्।
योगतो द्व्यङ्गिपत्रेण मण्डलाग्रेण वा समम् ॥ १४ ॥

तत् प्रदेशिन्यग्रपर्वप्रमाणार्पणमुद्रिकम्।
सूत्रवद्वं गलस्रोतोरोगच्छेदन भेदने ॥ १५ ॥

ग्रहणे शुण्डिकामर्दिवंडिश सुनताननम्।
छेदेऽस्थां करपत्रन्तु खरधारं दशाङ्गुलम् ॥ १६ ॥

विस्तारे द्व्यङ्गुल सूक्ष्मदन्त सुत्सरुबन्धनम्।
स्नायुसूत्रकचच्छेदे कर्त्तरी कर्त्तरीनिभा ॥ १७ ॥

वक्रर्जुधारं द्विमुखं नखशस्त्र नवाङ्गुलम्।
सूक्ष्मशस्त्रोद्धृतिच्छेदभेदप्रच्छन्नलेखने ॥ १८ ॥

एकधारं चतुष्कोणं प्रबद्धाकृति चैकतः।
दन्तलेखनकं तेन शोधयेद् दन्तशर्करान् ॥ १९ ॥

दृत्ता गूढदृढा पार्श्वे तिस्रः सूचोऽत्र सीवने।

मांसलानां प्रदेशानां त्र्यस्रा व्यङ्गुलमायता ॥ २० ॥
अल्पमांसास्थिसन्धिस्नायुव्रणानां द्व्यङ्गुलायता ।
व्रीहिवक्त्रा धनुर्वक्त्रा पक्वामाशयमर्मसु ॥ २१ ॥
सार्धाङ्गुलायता

सर्ववृत्तास्त्र्यश्रचतुरङ्गुलाः ।

कूर्चौ वृत्तैकपीठस्थाः सप्ताष्टौ वा सुबन्धनाः ॥ २२ ॥
संयोज्यो नीलिकाव्यङ्गकेशशातनकुट्टने ।
अर्धाङ्गुलैर्मुखैर्वृत्तैरष्टाभिः कण्टकैः खजः ॥ २३ ॥
पाणिभ्यां मथ्यमानेन घ्राणात् तेन हरेदसृक् ।
व्यधने कर्णपालीनां यूथिका सुकुलानना ॥ २४ ॥
आरार्द्धाङ्गुलवृत्तास्या तत्प्रवेशा तथोर्द्धतः ।
चतुरस्रा तया विध्येच्छोफं पक्वामसंश्रये ॥ २५ ॥
कर्णपालीञ्च बहुलां

बहुलायाञ्च शस्यते ।

सूची त्रिभागसुषिरा त्र्यङ्गुला कर्णवेधनी ॥ २६ ॥
जलौकःचारदहनकाचोपलनखादयः ।
अलौहान्यनुशस्त्राणि तान्येवं च विकल्पयेत् ॥ २७ ॥
अपराण्यपि यन्त्रादीन्युपयोगञ्च यौगिकम् ।
उत्पाट्यपाट्यसीव्यैषलेख्यप्रच्छनकुट्टनम् ॥ २८ ॥
छेद्यं भेद्यं व्यधो मन्थो ग्रहो दाहश्च तत्क्रियाः ।
कुण्ठखण्डतनुस्थूलह्रस्वदीर्घत्ववक्रताः ॥ २९ ॥
शस्त्राणां खरधारत्वमष्टौ दोषाः प्रकीर्त्तिताः ।
छेदभेदनलेख्यार्थं शस्त्रं वृन्तफलान्तरे ॥ ३० ॥
तर्जनीमध्यमाङ्गुष्ठैर्गृह्णीयात् सुसमाहितः ॥३१॥
विस्रावणानि वृन्ताग्रे ग्राह्यं व्रीहिमुखं मुखे ।
मूलेष्वाहरणार्थं तु क्रियासौकर्य्यतोऽपरम् ॥ ३२ ॥

स्यान्नवाङ्गुलविस्तारः सुघनो द्वादशाङ्गुलः ।
क्षौमपत्रोर्णकौशेयदुकूलमृदुचर्मजः ॥ ३३ ॥
विन्यस्तपाश्वः सुस्यूतः सान्तरोर्णास्थशस्त्रकः ।
शलाकापिहितास्यश्च शस्त्रकोशः सुसञ्चयः ॥ ३४ ॥
जलौकसस्तु सुखिनां रक्तस्रावाय योजयेत् ॥ ३५ ॥
दुष्टाम्बुमत्स्यभेकाहिशवकोऽयमलोद्भवाः ।
रक्ताः श्वेता भृशं कृष्णाश्चपलाः स्थूलपिच्छिलाः ॥ ३६ ॥
इन्द्रायुधविचित्रोर्ध्वराजयो रोमशाश्च ताः ।
सविषा वर्जयेत्

ताभिः कण्डूपाकज्वरभ्रमाः ॥ ३७ ॥

विषपित्तासनुत् कार्य्यं तत्र

शुद्धाम्बुजाः पुनः ।
निर्विषाः शैवलश्यावा वृत्ता नीलोर्ध्वराजयः ॥ ३८ ॥
कषायपृष्ठास्तन्वग्र्याः किञ्चित् पीतोदराश्च याः ।
ता अप्यसम्यग् वमनात् प्रतत च निपातनात् ॥ ३९ ॥
भीदन्तीः सलिलं प्राप्य रक्तमत्ता इति त्यजेत् ।
अथेतरा निशाकल्कयुक्तेऽम्भसि परिप्लुताः ॥ ४० ॥
अवन्तिसोमे तक्रे वा पुनश्चाश्वासिता जले ।
लागयेद् घृतमृत्साङ्गशस्त्ररक्तनिपातनैः ॥ ४१ ॥
पिबन्तीरचतस्कन्धाम्छादयेन्मृदुवाससा ।
सम्पृक्ताद् दुष्टशुद्धासाज्जलौका दुष्टशोणितम् ॥ ४२ ॥
आदत्ते प्रथमं हंसः क्षीरं क्षीरोदकादिव ।
दंशस्य तोदे कण्डूं वा मोक्षयेद्दाहयेच्च ताम् ॥ ४३ ॥
घटुतैलाक्तवदनां श्लक्ष्णकण्डनरूक्षिताम् ।
रक्तं रक्तमदाङ्गेयः सप्ताहं ता न पातयेत् ॥ ४४ ॥
पूर्ववत् पटुता दार्ढ्यं सम्यग्वान्ते जलौकसाम् ।

क्षमोऽतियोगान्मृदुर्वा
दुर्वान्ते स्तब्धता मदः ॥ ४५ ॥
अन्यत्रान्यत्र ताः स्थाप्या घटे मृत्स्नाम्बुगर्भिणि ।
लालादिक्लेदनाशार्थं सविषाः स्युस्तदन्ययात् ॥ ४६ ॥
अशुद्धौ स्रावयेद् दंशान् हरिद्रागुडमाक्षिकैः ।
शतधौताज्यपिचवस्ततो लेपाश्च शीतलाः ॥ ४७ ॥
दुष्टरक्तापगमनात् सद्योरोगरुजां शमः ।
अशुद्धं चलितं स्थानात् स्थितं रक्तं व्रणाशये ॥ ४८ ॥
अम्लीभवेत् पर्य्युषितं तस्मात्तत् स्रावयेत् पुनः ।
युञ्जाद्वालाबुवटिका रक्ते पित्तेन दूषिते ॥ ४९ ॥
तासामनलसंयोगात्
युञ्जाच्च कफवायुना ।
कफेन दुष्टं रुधिरं न शृङ्गेण विनिर्हरेत् ॥ ५० ॥
स्वल्पत्वाद्
वातपित्ताभ्यां दुष्टं शृङ्गेण निर्हरेत् ।
गात्रं वस्त्रोपरि दृढं रज्ज्वा पट्टेन वा समम् ॥ ५१ ॥
स्नायुसन्ध्यस्थिमर्माणि व्यजन् प्रच्छानमाचरेत् ।
अधोदेशप्रविसृतैः पदैरुपरिगामिभिः ॥ ५२ ॥
न गाढघनतिर्य्यग्भिर्न पदे पदमाचरेत् ।
प्रच्छानेनैकदेशस्थं ग्रन्थितं जलजन्मभिः ॥ ५३ ॥
हरेत् शृङ्गादिभिः सुप्तमसृग्व्यापिशिराव्यधैः ।
प्रच्छानं पिण्डिते वा स्यात्
अवगाढे जलौकसः ॥ ५४ ॥
स्वक्स्थेऽलाबुघटीशृङ्ग-
शिरैव व्यापकेऽन्यजि ।
वातादिधाम वास्रृङ्जलौकोलाबुभिः क्रमात् ॥ ५५ ॥

सुताङ्गजः प्रदेहाद्यैः शीतैः स्याद्वायुकोपतः ।
सतोदकण्डूशोफस्तं सर्पिसोष्णेन सेचयेत् ॥ ५६ ॥

सप्तविंशतितमोऽध्यायः ।

अथातः शिराव्यधविधिमध्यायं व्याख्यास्यामः ॥
मधुरं लवणं किञ्चिदशीतोष्णमसंहतम् ।
पद्मेन्द्रगोपहेमाविशशलोहितलोहितम् ॥ १ ॥
लोहितं प्रवदेत् सृङ्गं तनोस्तेनैव च स्थितिः ।
तत्पित्तश्लेष्मलैः प्रायो दूष्यते
कुरुते ततः ॥ २ ॥
विसर्पविद्रधिप्लीहगुल्माग्निसदनज्वरान् ।
मुखनेत्रशिरोरोगमदष्टदलवाग्व्यथाः ॥ ३ ॥
कुष्ठवातासृपित्तासृक्कट्वम्लोद्गीरणभ्रमान् ।
शीतोष्णस्निग्धरूक्षाद्यैरुपक्रान्ताश्च ये गदाः ॥ ४ ॥
सम्यक् साध्या न सिध्यन्ति ते च रक्तप्रकोपजाः ।
तेषु स्रावयितुं रक्तमुद्दिष्टं व्यधयेत् शिराम् ॥५॥
न नूनषोडशातीतसप्तत्यब्दसुताङ्गजाम् ।
अस्निग्धास्वेदितात्यर्थस्वेदितानिलरोगिणाम् ॥ ६ ॥
गर्भिणीसूतिकाजीर्णपिपासाश्वासकासिनाम् ।
अतीसारोदरच्छर्दिपाण्डुसर्वाङ्गशोफिनाम् ॥ ७ ॥
स्नेहपीते प्रयुक्तेषु तथा पञ्चसु कर्मसु ।
नायन्त्रिता शिरां विध्यत्तिर्यङ्नाप्यनुत्थिताम् ॥८॥
नातिशीतोष्णवाताभ्रेष्वन्यत्रात्ययिकाद्गदात् ।
शिरोनेत्रविकारेषु ललाट्यां मोक्षयेत् शिराम् ॥ ९ ॥
अपाङ्ग्यामुपनास्यां वा
कर्णरोगेषु कर्णजाम् ।

नासारोगेषु नासाग्रे स्थितां
नासाललाटयोः ॥ १० ॥
पीनसे
मुखरोगेषु जिह्वौष्ठहनुतालुगाः।
जत्रूर्ध्वं ग्रन्थिषु ग्रीवाकर्णग्रङ्गशिरःस्थिताः ॥ ११ ॥
उरोऽपाङ्गललाटस्था उन्मादे-
ऽपस्मृतौ पुनः।
हनुसन्धौ समस्ते वा शिरां भ्रूमध्यगामिनीम् ॥ १२ ॥
विद्रधौ पार्श्वशूले च पार्श्वकक्षास्तनान्तरे।
तृतीयकेऽंसयोर्मध्ये
स्कन्धस्याधश्चतुर्थके ॥ १३ ॥
प्रवाहिकायां शूलिन्यां श्रोणितो ह्यङ्गुले स्थिताम्।
शुक्रमेढ्रामये मेढ्रे
ऊरुगां गलगण्डयोः ॥ १४ ॥
गुह्यस्यां जानुनोऽधस्तादूर्ध्वं वा चतुरङ्गुले।
इन्द्रवस्तेरधोऽपच्यां ह्यङ्गुले
चतुरङ्गुले ॥ १५ ॥
जङ्घागुल्फस्य सक्थ्यर्त्तौ
तथा क्रोष्टुकशीर्षके।
पाददाहे खुडे हर्षे विपाद्यां वातकण्टके ॥ १६ ॥
चिप्पे च ह्यङ्गुले विध्येदुपरि क्षिप्रमर्मणः।
गुह्यस्यामिव विद्धायां
यथोक्तानामदर्शने ॥ १७ ॥
मर्महीने यथासन्ने देशेऽन्यां व्यधयेत् शिराम्।
अथ स्निग्धतनुः सज्जसर्वोपकरणो बली ॥ १८ ॥
कृतस्वस्त्ययनः स्निग्धरसान्नप्रतिभोजितः।

अग्नितापातपस्विन्नो जानूच्चासनसंस्थितः ॥ १९ ॥
मृदुपट्टात्तकेशान्तो जानुस्थापितकूर्परः ।
मुष्टिभ्यां वस्त्रगर्भाभ्यां मन्थे गाढं निपीडयेत् ॥ २० ॥
दन्तप्रपीड़नोत्कासगण्डध्मानानि चाचरेत् ।
पृष्ठतो यन्त्रयेच्चैनं वस्त्रमाविष्टयन्नरः ॥ २१ ॥
कम्बरायां परिक्षिप्य न्यस्यान्तर्वामतर्जनीम् ।
एषोऽन्तर्मुखवर्जानां शिराणां यन्त्रणे विधिः ॥ २२ ॥
तथा मध्यमयाङ्गुल्या वैद्योऽङ्गुष्ठविमुक्तया ।
ताडयेत्
उत्थितां ज्ञात्वा स्पर्शाङ्गुष्ठप्रपीडनैः ॥२३॥
कुठार्य्यां लक्षयेन्मध्ये वामहस्तगृहीतया ।
फलोद्वेगे सुनिष्कम्पं सिरां तद्वच्च मोक्षयेत् ॥ २४ ॥
ताडयन् पीडयेच्चैनां विध्येद् व्रीहिमुखेन तु ।
अङ्गुष्ठेनोन्नमय्याग्रे नासिकामुपनासिकाम् ॥ २५ ॥
अभ्युन्नतविदष्टाग्रजिह्वास्याधस्तदाश्रयाम् ।
यन्त्रयेत् स्तनयोरूर्ध्वं ग्रीवास्थितशिराव्यधे ॥ २६ ॥
पाषाणगर्भहस्तस्य जानुस्थे प्रसृते भुजे ।
कुक्षेरारभ्य मृदिते विध्येद् बद्धोर्ध्वपट्टके ॥ २७ ॥
विध्येत् हस्तशिरां बाहावनाकुञ्चितकूर्परे ।
बद्ध्वा सुखोपविष्टस्य मुष्टिमङ्गुष्ठगर्भिणीम् ॥ २८ ॥
ऊर्ध्वं वेध्यप्रदेशाच्च पट्टिका चतुरङ्गुले ।
विध्येदालम्बमानस्य बाहुभ्यां पार्श्वयोः शिराम् ॥२९॥
प्रच्छृष्टे मेहने
जङ्घासिरां जानून्यकुञ्चिते ।
पादे तु सुस्थितेऽधस्ताज्जानुसन्धेर्निपीड़िते ॥ ३० ॥
गाढं कराभ्यामागुल्फं चरणे तस्य चोपरि ।

द्वितीये कुक्षिते किञ्चिदारूढे हस्तवत् ततः ॥ ३१ ॥
वद्धा विध्येत् शिराम्
इत्यमनुक्तेष्वपि कल्पयेत्।
तेषु तेषु प्रदेशेषु तत्तद् यन्त्रमुपायवित् ॥ ३२ ॥
मासले निचिपेद् देशे व्रीह्यास्य व्रीहिमात्रकम्।
यवाद्देमस्थ्नामुपरि शिरां विध्यन् कुठारिकाम् ॥ ३३ ॥
सम्यग्विद्धे स्रवेद्वारां यन्त्रे मुक्ते तु न स्रवेत्।
अल्पकालं वहत्यल्पं दुर्विद्धा तैलचूर्णनैः ॥ ३४ ॥
सशब्दमतिविद्धा तु स्रवेद् दुःखेन धार्यते।
भीमूर्च्छायन्त्रशैथिल्यकुण्ठशस्त्रातिलक्षयः ॥ ३५ ॥
श्यामलवेगिताः स्वेदा रक्तस्याऽऽसृतिहेतवः।
असम्यगसृे स्रवति वैद्यव्योषनिशानतैः ॥ ३६ ॥
सागारधूमलवणतैर्दिह्याच्छिरामुखम्।
सम्यक् प्रवृत्ते कोष्णेन तैलेन लवणेन च ॥ ३७ ॥
अग्रे स्रवति दुष्टासृं कुसुम्भादिव पोतिका।
सम्यक् सृत्वा स्वयं तिष्ठेत् शुद्धं तदिति नाहरेत् ॥ ३८ ॥
यन्त्रं विमुच्य मूर्च्छायां वीजिते व्यजनैः पुनः।
स्रावयेन्मूर्च्छति पुनस्त्वपरेद्युरथेऽपि वा ॥ ३९ ॥
वातात् श्यावारुणं रूक्षं वेगस्राव्यच्छफेनिलम्।
पित्तात्पीतासितं विस्रमस्कन्धोष्णात् सचन्द्रकम् ॥ ४० ॥
कफात् स्निग्धमसृक् पाण्डु तन्तुमत् पिच्छिलं घनम्।
ससृष्टलिङ्गं संसर्गात्
त्रिदोषं मलिनाविलम् ॥ ४१ ॥
अशुद्धौ बलिनोऽप्यसृं न प्रस्थात् स्रावयेत् परम्।
अतिसृतौ हि मृत्युः स्याद् दारुणा वा चलामयाः ॥ ४२ ॥
तत्राभ्यङ्गरसक्षीररक्तपानानि भेषजम्।

स्रुते रक्ते व्रणैर्यन्त्रमपनीय हिमाम्बुना ॥ ४३ ॥
प्रक्षाल्य तैलप्लोताक्त बन्धनीय शिरामुखम्।
अशुद्ध स्रावयेद्भूयः सायमह्नःपरेऽपि वा ॥ ४४ ॥
स्नेहोपस्कृतदेहस्य पक्षाहा शृङ्गदूषितम्।
किञ्चिद्धि शेषे दुष्टास्रे नैव रोगोऽतिवर्त्तते ॥ ४५ ॥
सशेषमप्यतो धार्य्यं न चातिस्रुतिमाचरेत्।
हरेत् शृङ्गादिभिः शेष प्रसादमथवा नयेत् ॥ ४६ ॥
शीतोपचारपित्तास्रक्रियाशुद्धिविशोषणैः।
दुष्टं रक्तमनुद्रिक्तमेवमेव प्रसादयेत् ॥ ४७ ॥
रक्ते त्वतिष्ठति क्षिप्रं स्रुतभ्रमीमाचरेत् क्रियाम्।
रोध्रप्रियङ्गुपत्तङ्गमाषयष्ट्याह्वगैरिकैः ॥ ४८ ॥
मृत्कपालाञ्जनचौममषीचोरीत्वगङ्कुरैः।
विचूर्णयेद् व्रणमुख पद्मकादिहिम पिबेत् ॥ ४९ ॥
तामेव वा शिरां विध्येद् व्यधात् तस्मादनन्तरम्।
शिरामुख च त्वरित दहेत्तप्तशलाकया ॥ ५० ॥

उन्मार्गगा यन्त्रनिपीडनेन
स्वस्थानमायान्ति पुनर्न यावत्।
दोषाः प्रदुष्टा रुधिरं प्रपन्नाः
तावद्धिताहारविहारभाक् स्यात् ॥ ५१ ॥

नात्युष्णशीतं लघु दीपनीयं रक्तेऽपनीते हितमन्नपानम्।
तदा शरीरं ह्यनवस्थितास्रमग्निर्विशेषादिति रक्षणीयः ॥५२॥
प्रसन्नवर्णेन्द्रियमिन्द्रियार्थानिच्छन्तमव्याहतपक्तृवेगम्।
सुखान्वितं पुष्टिबलोपपन्नं विशुद्धरक्तं पुरुषं वदन्ति ॥५३॥

अष्टाविंशतितमोऽध्यायः।

अथातः शल्याहरणविधिमध्याय व्याख्यास्यामः॥
वक्रर्जुतिर्यग्गूर्ध्वाधः शल्यानां पञ्चधा गतिः।
ध्यामं शोफं रुजावन्तं स्रवन्तं मांसितं मुहुः॥ १॥
अभ्युन्नतं बुद्बुदवत् पिटिकोपचितं व्रणम्।
मृदुमांसं विजानीयादन्तःशल्यं समासतः॥ २॥
विशेषात् त्वग्गते शल्ये विवर्णः कठिनायतः।
शोफो भवति
मांसस्थे चोषः शोफो विवर्धते॥ ३॥
पीडनाच्चमता पाकः शल्यमार्गो न रोहति।
पेश्यन्तरगते मांसप्राप्तवत् क्षयथु विना॥ ४॥
आक्षेपः स्नायुजालस्य सरुग्स्तब्धवेदनः।
स्नायुगे दुर्हरं चैतत्
शिराध्मानं शिराश्रिते॥ ५॥
स्वकर्मगुणहानिः स्यात् स्रोतसां स्रोतसि स्थिते।
धमनिस्थेऽनिलो रक्तं फेनयुक्तमुदीरयेत्॥ ६॥
निर्याति शब्दवान् स्याच्च श्वासः साङ्गवेदनः।
सघर्षो बलवानस्थिसन्धिप्राप्तेऽस्थिपूर्णता॥ ७॥
नैकरूपा रुजोऽस्थिस्थे शोफ-
स्तद्वच्च सन्धिगे।
चेष्टानिवृत्तिश्च भवे-
दाटोपः कोष्ठसंश्रिते॥ ८॥
आनाहोऽन्नस्य चाजीर्णं दर्शनं च व्रणानने।
विद्यादन्त्रगतं शल्यं मर्मविद्योपलक्षणैः॥ ९॥
यथास्वं च परिस्रावैस्त्वगादिषु विभावयेत्।

रुद्यते गूढदेहानामनुलोमस्थितं तु तत् ।
दोषकोपाभिघातादिक्षोभाद्भूयोऽपि बाधते । १० ॥
त्वङ्नष्टे यत्र तत्र स्युरभ्यङ्क्तं दमदंनैः ।
रागरुग्दाहसरम्भा यत्र चाज्य विनीयते ॥ ११ ॥
मांसं शुष्यति लेपो वा तत्स्थानं शल्यवद् वदेत् ।
मांसप्रनष्टं सशुद्धा कर्णनात् क्षयता गतम् ॥ १२ ॥
क्षोभाद्रागादिभिः शल्य लक्षयेत्
तद्वदेव च ।
पेश्यस्थिसन्धिकोष्ठेषु नष्टम्
अस्थिषु लक्षयेत् ॥ १३ ॥
अस्थ्यामभ्यञ्जनस्वेदबन्धपीडनमर्दनैः ।
प्रसारणाकुञ्चनतः सन्धिनष्टं तथास्थिवत् ॥ १४ ॥
नष्टे स्नायुशिरास्रोतोधमनिष्वममे पथि ।
अश्वयुक्तं रथं खड्गचक्रमारोप्य रोगिणम् ॥ १५ ॥
शीघ्रं नयेत्ततस्तस्य संरम्भाच्छल्यमादिशेत् ।
मर्मनष्टं पृथङ्नोक्तं तेषां मांसादिसञ्चयात् ॥ १६ ॥
सामान्येन सशल्य तु क्षोभिण्या क्रियया सकृत् ।
वृत्त पृथु चतुष्कोणं त्रिपुट च समासतः ॥ १७ ॥
अदृश्यशल्यसंस्थानं व्रणाकृत्या विभावयेत् ।
तेषामाहरणोपायौ प्रतिलोमानुलोमकौ ॥ १८ ॥
अर्वाचीनपराचीने निर्हरेत्तद्विपर्ययात् ।
सुखाहार्यं यतस्छित्त्वा ततस्तिर्य्यगतं हरेत् ॥ १९ ॥
शल्यं न निर्घात्यमुरःकक्षावङ्क्षणपार्श्वगम् ।
प्रतिलोममनुत्तुण्डं छेद्य पृथुमुखं च यत् ॥ २० ॥
नैवाहरेद् विशल्यघ्नं नष्टं वा निरुपद्रवम् ।
अयाहरेत्करप्राप्यं करणैर्वे-

तरत् पुनः ॥ २१ ॥
दृश्यं सिंहाहिमकरवर्मिकर्कटकाननैः।
अदृश्यं व्रणसंस्थानाद् ग्रहीतुं शक्यते यतः ॥ २२ ॥
कङ्कभृङ्गाङ्गकुररशरारीवायसाननैः।
संदंशाभ्यां त्वगादिस्थं
तालाभ्यां शुषिरं हरेत् ॥ २३ ॥
शुषिरस्थं तु नलकैः
शेषं शेषैर्यथायथम्।
शस्त्रेण वा विशस्यादौ ततो निर्लोहितं व्रणम् ॥ २४ ॥
क्षात्वा घृतेन संस्वेद्य बद्ध्वाऽऽचारिकमादिशेत्।
शिरास्नायुविलग्नं तु चालयित्वा शलाकया ॥ २५ ॥
हृदये सक्थित शल्यं त्रासितस्य हिमाम्बुना।
ततः स्थानान्तरं प्राप्तमाहरेत् तद् यथायथम् ॥ २६ ॥
यथामार्गं दुराकर्षमन्यतोऽप्येवमाहरेत्।
अस्थिदुष्टे नरं पक्षां पीडयित्वा विनिर्हरेत् ॥ २७ ॥
दृढशस्त्रे सुबलिभिः सुगृहीतस्य किङ्करैः।
तथाप्यशक्ये वारङ्गं वक्रीकृत्य धनुर्ज्यया ॥ २८ ॥
सुबद्धं वङ्क्षकटके बध्नीयात् सुसमाहितः।
सुसंयतस्य पश्चाङ्गा वाजिनः कशयाथ तम् ॥ २९ ॥
ताड़येदिति मूर्छानं वेगेनोद्वमयन् यथा।
उद्धरेत् शल्य-
मेवं वा शाखायां कल्पयेत्तरोः ॥ ३० ॥
बद्ध्वा दुर्बलवारङ्गं कुशाभिः शल्यमाहरेत्।
अथयुग्यस्तवारङ्गं शोफमुत्पीड्य युक्तितः ॥ ३१ ॥
मुहुराहतया नाड्या निर्वात्योत्तुण्डितं हरेत्।
तैरेव चानयेन्मार्गममार्गोत्तुण्डितं तु यत् ॥ ३२ ॥

मृदित्वा कर्णिना कर्णं नाड्यास्येन निगृह्य वा।
अयस्कान्तेन निष्कृष्टं निहताख्यमुदाहृतम् ॥ ३३ ॥
यक्ष्माशयगतं शल्यं विरेकेण विनिर्हरेत्।
दुष्टवातविषस्तन्यरक्तश्लेष्मादिचूषणैः ॥ ३४ ॥
कण्ठस्रोतो गते शल्ये सूत्रं कण्ठे प्रवेशयेत्।
विसेनान्ते ततः शल्ये विद्धं सूत्रं समं हरेत् ॥ ३५ ॥
नाड्याग्निनातापिता क्षिप्ता शलाकामस्थिरोद्धृताम्।
आनयेज्जातुषं कण्ठा-
ज्जतुदिग्धामजातुषम् ॥ ३६ ॥
केशोन्दुकेन पीतेन द्रवैः कण्ठकमाक्षिपेत्।
सहसा सूत्रबद्धेन वमतः
स्तेन चेतरत् ॥ ३७ ॥
अशक्यं मुखनासाभ्यामाहर्तुं परतो नुदेत्।
अभ्यानस्कन्धघाताभ्यां ग्रासशल्यं प्रवेशयेत् ॥ ३८ ॥
सूक्ष्माक्षिग्रहणशल्यानि क्षौमबालजलैर्हरेत्।
अपां पूर्णं विधुनुयादवाक्शिरसमायतम् ॥ ३९ ॥
वामयेद्वाऽऽमुखं भस्मरागौ वा निखनेन्नरम्।
कर्णेऽम्बुपूर्णे हस्तेन मथित्वा तैलवारिणी ॥ ४० ॥
क्षिपेदधोमुखं कर्णं हन्याद्वा चूषयेत वा।
कीटे स्रोतोगते कर्णं पूरयेल्लवणाम्बुना ॥ ४१ ॥
शुक्तेन वा सुखोष्णेन मृते क्लेदहरो विधिः।
जातुषं हैमरूप्यादिधातुजं च चिरस्थितम् ॥ ४२ ॥
उष्णा प्रायशः शल्यं देहजैन विलीयते।
मृद्वेणुदारुशृङ्गास्थिदन्तबालोपलानि च ॥ ४३ ॥
शल्यानि न विशीर्यन्ते शरीरे मृण्मयानि वा।
विषाणवेणुवृक्षालदारुशल्यं चिरादपि ॥ ४४ ॥

प्रायो निर्भुज्यते तद्धि पचत्याशु पलाशजी।
शल्ये मांसावगाढे च सदेशे न विदह्यते ॥ ४५ ॥
ततस्तं मर्दनस्वेदशुद्धिकर्षणहर्षणैः।
तीक्ष्णोपनाहपानान्नघनशस्त्रपदाङ्कनैः ॥ ४६ ॥
पाचयित्वा हरेत् शल्यं पाटनैषणभेदनैः।
शल्यप्रदेशयन्त्राणामवेक्ष्य बहुरूपताम्।
तैस्तैरुपायैर्मतिमान् शल्यं विद्यात्तथा हरेत् ॥ ४७ ॥

एकोनत्रिंशोऽध्यायः।

अथातः शस्त्रकर्मविधिमध्याय व्याख्यास्यामः ॥
व्रणः सञ्जायते प्रायः पाकात् क्षयथुपूर्वकात्।
तमेवोपचरेत्तस्माद्रक्षन् पाकं प्रयत्नतः ॥ १ ॥
सुशीतलेपसेकास्रमोक्षसंशोधनादिभिः।
शोफोऽल्पोऽल्पोष्णरुक् चामः सवर्णः कठिनः स्थिरः ॥ २ ॥
पच्यमानो विवर्णस्तु रोगी वस्तिरिवातत।
स्फुटतीव सनिस्तोदः साङ्गमर्दविजृम्भिक ॥ ३ ॥
संरम्भारुचिदाहोषाछड्ज्वरानिद्रतान्वितः।
स्थानं विष्यन्दयत्याज्य व्रणवत् स्पर्शनासहः ॥ ४ ॥
पक्वेऽल्पवेगता स्तानिः पाण्डुता वलिसम्भवः।
नामोऽन्ते पृथुतिर्मध्ये कण्डूशोफादिमार्दवम् ॥ ५ ॥
स्रुष्टे पूयस्य सञ्चारो भवेद् वस्ताविवाश्मसः।
शूल नर्त्तेऽनिलाद्दाहः पित्ताच्छोफः कफोदयात् ॥ ६ ॥
रागो रक्ताच्च पाकः स्यादतो दोषैः सशोणितैः।
पाकेऽतिवृत्ते सुषिरस्तनुत्वग्दोषभक्षितः ॥ ७ ॥
वलीभिराचितः श्यावः शीर्य्यमाणतनूरुहः।
कफजेषु तु शोफेषु गम्भीर पाकमेत्यसृक् ॥ ८ ॥

पक्वलिङ्गं ततोऽस्पष्टं यत्र स्यात् शीतशोफता ।
त्वक्सावर्णं रुजोऽल्पत्वं घनस्पर्शत्वमश्मवत् ॥ ९ ॥
रक्तपाकमिति ब्रूयात्तं प्राज्ञो मुक्तसंशयः ।
अल्पसंश्लेऽबले बाले पाके चात्ययमुद्धते ॥ १० ॥
दारणं मर्मसन्ध्यादिस्थिते चान्यत्र पाटनम् ।
आमच्छेदे शिरास्नायुव्यापदोऽस्रगतिस्रुतिः ॥ ११ ॥
रुजोऽतिवृद्धिर्दरणं विसर्पो वा क्षतोद्भवः ।
तिष्ठन्त्यत्र पुनः पूयः शिरास्नायुक्षयागमिषम् ॥ १२ ॥
विवृद्धो दहति क्षिप्रं तृणोलपमिवानलः ।
यस्त्विनत्त्यामसंज्ञानाद् यश्च पक्वमुपेक्षते ॥ १३ ॥
क्षपचाविव विज्ञेयौ तावनिश्चितकारिणौ ।
प्राक्शस्त्रकर्मणश्चेष्टं भोजयेदन्नमातुरम् ॥ १४ ॥
पानपं पाययेच्चास्य तीक्ष्णं यो वेदनाक्षमः ।
न मूर्च्छत्यन्नसंयोगान्मत्तः शस्त्रं न बुध्यते ॥ १५ ॥
अन्यत्र मूढगर्भाश्मशुखरोगोदरातुरात् ।
अथाहृतोपकरणं वैद्यः प्राङ्मुखमातुरम् ॥ १६ ॥
सम्मुखो यन्त्रयित्वाशु न्यस्येत् मर्मादि वर्जयन् ।
अनुलोमं सुनिशितं शस्त्रमापूयदर्शनात् ॥ १७ ॥
सकृदेवाहरेत्तच्च

पाके तु सुमहत्यपि ।

पाटयेद् द्व्यङ्गुलं सम्यग्द्व्यङ्गुलत्र्यङ्गुलान्तरम् ॥ १८ ॥
एषित्वा सम्यगेषिण्या परितः सुनिरूपितम् ।
अङ्गुलीनालबालैर्वा यथादेशं यथाशयम् ॥ १९ ॥
यतो गता गतिं विद्यादुत्सङ्गो यत्र यत्र च ।
तत्र तत्र व्रणं कुर्याद्विभक्तं निराशयम् ॥ २० ॥
आयतं च विशालं च यथा दोषो न तिष्ठति ।

शौर्यमाशुक्रिया तोक्ष्णं शस्त्रपत्रैरवेक्षयुः ॥ २१ ॥
असम्मोहश्च वैद्यस्य शस्त्रकर्मणि शस्यते।
तिर्यक् छिन्द्यात्ललाटभ्रूदन्तवेष्टकजत्रुणि ॥ २२ ॥
कुक्षिकक्षाक्षिकूटोष्ठकपालगलवङ्क्षणे।
अन्यत्र छेदनात्तिर्यक् शिरःस्नायुविपाटनम् ॥ २३ ॥
शस्त्रेऽविचारिते वान्नं शीताम्भोभिश्च रोगिणम्।
आश्वास्य परिताड्यार्द्रया परिपोष्य व्रणं ततः ॥ २४ ॥
क्षालयित्वा कषायैश्च म्लानिमाशीऽपनीय च।
गुग्गुलुगुडसिद्धार्थैः सङ्गैर्जरमाचितैः ॥ २५ ॥
धूपयेत् षट्पदाग्र्यानन्यवक्त्रैर्घृतप्लुतैः।
तिक्तकक्षाज्यमधुभिर्व्रणवास्त्रं भेषजं च ॥ २६ ॥
दिग्धां वर्त्तिं ततो दद्यात् तैरेवाच्छादयेच्च तम्।
घृताक्तैः कट्वम्लघोर्द्वं
घनां कवलिकां ततः ॥ २७ ॥
निधाय युञ्ज्याद्बन्धं यात् पट्टेन सुसमाहितम्।
पार्श्वं मध्येऽग्रमध्ये वा नाधस्तान्नव चोपरि ॥ २८ ॥
शुचिभूक्षाढ्या पट्टाः कवल्यः सविकेशिकाः।
धूपिता मृदवः स्निग्धा निर्वलीका व्रणे हिताः ॥ २९ ॥
कुर्वीतानन्तरं तत्र रक्षां रक्षोनिषिद्धये।
बलिं चोपहरेत्तेभ्यः
सदा सूर्ध्नावधारयेत् ॥ ३० ॥
लक्ष्मीं गुडामतिगुदां जटिलां ब्रह्मचारिणीम्।
वचां कुष्ठामतिच्छत्रां दूर्वां सिद्धार्थकानपि ॥ ३१ ॥
ततः खेहादिनेहोक्तं तस्याचारं समादिशेत्।
दिवास्वप्नं व्रणे कण्डूरागरुक्शोफपूयकृत् ॥ ३२ ॥
क्षीणान्नु स्मृतिसत्त्वेन्द्रियैश्चलितसुते।

शुक्रे व्यवायजान् दोषानसंसर्गेऽप्यवाप्नुयात् ॥ ३३ ॥
भोजनं तु यथासात्म्यं यवगोधूमषष्टिकाः ।
मसूरमुद्गतुवरीजीवन्तीसुनिषण्णकाः ॥ ३४ ॥
बालमूलकवार्त्ताकवल्गुलीयकवास्तुकम् ।
कारवेल्लककर्कोटपटोलकटुकाफलम् ॥ ३५ ॥
सैन्धवं दाडिमं धात्री घृतं तप्तहिमं जलम् ।
जीर्णशाल्योदनं स्निग्धमल्पमुष्णं द्रवोत्तरम् ॥ ३६ ॥
भुञ्जानो जाङ्गलैर्मांसैः शीघ्रं व्रणमपोहति ।
अग्नितो मात्रया काले पथ्यं याति जरां सुखम् ॥३७॥
अजीर्णे त्वनिलादीना विभ्रमो बलवान् भवेत् ।
ततः शीघ्रुजापाकदाहानाहानवाप्नुयात् ॥ ३८ ॥
नवधान्यं तिलान् माषान् मद्यं मांसं त्वजाङ्गलम् ।
क्षीरेक्षुविकृतीरम्लं लवणं कटुकं त्यजेत् ॥ ३९ ॥
यच्चान्यदपि विष्टम्भि विदाहि गुरुशीतलम् ।
वर्गोऽयं नवधान्यादिर्व्रणिनः सर्वदोषकृत् ॥ ४० ॥
मद्यं तीक्ष्णोष्णरूक्षाम्लमाशु व्यापादयेद् व्रणम् ।
बालोशीरैश्च वीज्येत न चैनं परिघट्टयेत् ॥ ४१ ॥
न तुदेन्न च कण्डूयेत् चेष्टमानञ्च दालयेत् ।
स्निग्धवृद्धद्विजातीनां कथाः शृण्वन् मनःप्रियाः ॥४२॥
आशावान् व्याधिमोक्षाय क्षिप्रं व्रणमपोहति ।
तृतीयेऽह्नि पुनः कुर्याद् व्रणकर्म च पूर्ववत् ॥ ४३ ॥
प्रक्षालनादि दिवसे द्वितीये नाचरेत्

तथा ।

तीव्रव्यथो विग्रथितश्चिरात् संरोहति व्रणः ॥ ४४ ॥
स्निग्धां रूक्षां व्यथां गाढां दुर्न्यस्ताञ्च विकेशिकाम् ।
व्रणे न दद्यात् कल्कञ्च

स्नेहात् क्लेदो विवर्धते ॥ ४५ ॥
मांसच्छेदोऽतिरुग्रौक्ष्यादरणं शोणितागमः।
क्षयातिगाढदुर्न्यासैर्व्रणवर्त्मावषर्षणम् ॥ ४६ ॥
सपूतिमांस सोत्सङ्गं सगति पूयगर्भिणम्।
व्रणं विशोधयेत् शीघ्र स्थिता ह्यत्रविकेशिका ॥ ४७ ॥
व्यस्यन्तु पुटित शोफ पाचनैः समुपाचरेत्।
भोजनैरुपनाहैश्च नातिव्रणविरोधिभिः ॥ ४८ ॥
सद्यः सद्यो व्रणान् सीव्येद् विच्छिन्नानभिघातजान्।
मेदोजान् लिखितान् ग्रन्थीन् ज्ञात्वा पालीश्च कर्णयोः ॥४९॥
शिरोऽक्षिकूटनासौष्ठगण्डकर्णोरुबाहुषु।
ग्रीवाललाटमुष्कस्फिङ्मेढ्रपायूदरादिषु ॥ ५० ॥
गम्भीरेषु प्रदेशेषु मांसलेष्वचलेषु च।
न तु वङ्क्षणकक्षादावल्पमांसचले व्रणान् ॥ ५१ ॥
वायुनिर्वाहिणः शल्यगर्भान् क्षारविषाग्निजान्।
सीव्येच्चलास्थि शुष्कास्रक्षणरोमापनीय तु ॥ ५२ ॥
प्रलम्बि मांस विच्छिन्न निवेश्य स्वनिवेशने।
सन्ध्यस्थ्यवस्थिते रक्ते स्नायुं सूत्रेण वल्कजे: ॥ ५३ ॥
सीव्येन्न दूरे नासन्ने गाढनाल्प न वा बहु।
सान्त्वयित्वा ततश्चार्त्तं व्रणे मधुघृतद्रुतैः ॥ ५४ ॥
अञ्जनचौमजमधूकफलिनीशङ्खकीफलं।
सरोध्रमधुकैर्दिग्धे युञ्जयाद् बन्धादि पूर्ववत् ॥ ५५ ॥
व्रणो निःशोणितौष्ठो य. किञ्चिदेवावलिख्य तम्।
सञ्जातरुधिरं सीव्येत् सन्धान ह्यस्य शोणितम् ॥ ५६ ॥
बन्धनानि तु देशादीन् वीक्ष्य युञ्जीत तेषु च।
आविकाजिनकौशेयमुष्ण क्षौम तु शीतलम् ॥ ५७ ॥
शीतोष्णं तूलसन्तानैकार्पासस्नायुवल्कजम्।

तास्नायखपुरीषाणि व्रणे मेदःकफाधिके ॥ ५८ ॥
भङ्गे च युञ्जात् फलक चर्मवल्कतुषादि च ।
स्वनामानुगताकारा बन्धास्तु दश पञ्च च ॥ ५९ ॥
कोशस्वस्तिकमुक्तोलोचीनदामानुवेल्लितम् ।
खट्टाविबन्धस्थगिकार्वितानोत्सङ्गशीर्षाणाः ॥ ६० ॥
यमकं मण्डलाख्य च पञ्चाङ्गी चेति योजयेत् ।
यो यत्र सुनिविष्टः स्यात् त तेषां तत्र बुद्धिमान् ॥ ६१ ॥
बध्नीयाद्गाढमूरुस्फिक्कक्षावङ्क्षणमूर्द्धसु ।
शाखावदनकर्णोरःपृष्ठपार्श्वगलोदरे ॥ ६२ ॥
समं मेहनमुष्के च
नेत्रे सन्धिषु च श्लथम् ।
बध्नीयाच्छिथिलस्थाने वातश्लेष्मव्रणे समम् ॥ ६३ ॥
गाढमेव समस्थाने श्लथं गाढं तदाश्रये ।
शीते वसन्ते च तथा मोक्षणेषौ व्रजेत् व्रजेत्॥ ६४ ॥
पित्तरक्तोत्थयोर्बन्धो गाढस्थाने समो मतः ।
समस्थाने श्लथो नैव शिथिलस्याश्रये तथा ॥ ६५ ॥
साय प्रातस्तयोर्मोक्षो ग्रीष्मे शरदि चेष्यते ।
अबद्धो दशमञ्चक्रीतवातादिपीडितः ॥ ६६ ॥
दुष्टो भवेत् चिर चात्र न तिष्ठेत् स्नेहभेषजम् ।
कृच्छ्रेण याति रूढिं वा याति रूढो विवर्णताम् ॥६७॥
बद्धस्तु चाशितो भग्नो विश्लिष्टः पाटितोऽपि वा ।
छिन्नस्नायुःशरोऽप्याशु सुख संरोहति व्रणः ॥ ६८ ॥
उत्थानशयनाद्यासु सर्वचेष्टासु न पीडयेत् ।
चेष्टतोष्टः समुत्पन्नो विषमः कठिनोऽतिरुक् ॥ ६९ ॥
समो मृदुरुक् शीघ्रं व्रणः शुध्यति रोहति ।
स्थिराणामल्पमांसानां रौक्ष्यादनुपरोहताम् ॥ ७० ॥

प्रच्छाद्यमौषधं पत्रैर्यथादोषं यथर्त्तु च ।
अजीर्णतरुणाच्छिद्रैः समन्तात् सुनिवेशितैः ॥ ७१ ॥
धौतैरकर्कशैः क्षीरीभूर्जार्जुनकदम्बजैः ।
कुष्ठिनामग्निदग्धानां पिटिका मधुमेहिनाम् ॥ ७२ ॥
कर्णिकाश्चेन्दुरुविषे क्षारदग्धा विषान्विताः ।
न मासपाके बध्नीयाद् गुदपाके च दारुणे ॥ ७३ ॥
शीर्य्यमाणाः सरुग्दाहाः शोफावस्रावितर्पिणः ।
अरुचया व्रणे यस्मिन् मक्षिका निक्षिपेत् कृमीन् ॥७४॥
ते भक्षयन्तः कुर्वन्ति रुजा शोफास्रसंस्रवान् ।
सुरसादि प्रयुञ्जीत तत्र धावनपूरणे ॥७५॥
सप्तपर्णकरञ्जार्कनिम्बराजादनत्वचः ।
गोमूत्रकल्कितो लेपः सेकः क्षाराम्बुना हितः ॥ ७६ ॥
प्रच्छाद्य मांसपेश्या वा व्रणं तानासु निर्हरेत् ।
न चैनं त्वरमाणोऽन्तःसदोषमुपरोहयेत् ॥७७॥
सोऽल्पेनाप्यपचारेण भूयो विकुरुते यतः ।
रूढेऽप्यजीर्णव्यायामव्यवायादीन् विवर्जयेत् ॥ ७८ ॥
हर्षं क्रोधं भयं वापि यावदास्थैर्य्यसम्भवात् ।
आदरेणानुवर्त्तोऽयं मासान् षट् सप्त वा विधिः ॥७९॥
उत्पद्यमानासु च तासु तासु वार्त्तासु दोषादिबलानुसारी ।
स्वैरुपायैः प्रयतश्चिकित्सेदालोचयन् विस्तरमुत्तरोक्तम् ॥८०॥

त्रिंशोऽध्यायः ।

अथातः क्षाराग्निकर्मविधिमध्यायं व्याख्यास्यामः ॥
सर्वशस्त्रानुशस्त्राणां क्षारः श्रेष्ठो
बह्वनि यत् ।
छेद्यभेद्यादिकर्माणि कुरुते विषमेष्वपि ॥ १ ॥

दुःखावचार्य्यशस्त्रेषु तेन सिद्धिमयात्सु च ।
अतिकृच्छ्रेषु रोगेषु यच्च पानेऽपि युज्यते ॥ २ ॥
स पेयोऽर्शोऽग्निसादाश्मगुल्मोदरगरादिषु ।
योज्यः साज्ञामषश्चित्रवाह्याग्नि कुष्ठसुमिषु ॥ ३ ॥
भगन्दरार्बुदग्रन्थिदुष्टनाडीव्रणादिषु ।
न तूभयोऽपि योक्तव्यः पित्ते रक्ते बलेऽबले ॥ ४ ॥
ज्वरेऽतिसारे क्षुन्मूर्छारोगे पाण्डामयेऽरुचौ ।
तिमिरे क्षतसशुद्धौ क्षयथौ सर्वगात्रगे ॥ ५ ॥
भीरुगर्भिण्यृतुमतीप्रोदुक्तफलयोनिषु ।
अजीर्णेऽन्ने शिशौ वृद्धे धमनीसन्धिमर्मसु ॥ ६ ॥
तरुणास्थिशिराक्षायुसेवनी गलनाभिषु ।
देशेऽल्पमांसे वृषणमेढ्रस्रोतोनखान्तरे ॥ ७ ॥
वर्त्मरोगाक्षितेऽक्ष्णोश्च शीतवर्षोष्णदुर्दिने ।
कालमुष्ककशम्याककदलीपारिभद्रकान् ॥ ८ ॥
अश्वकर्णमहाबल्वपलाशास्फोतवृक्षकान् ।
इन्द्रवृक्षार्कपूतीकनक्तमालाक्षमारकान् ॥ ९ ॥
काकजङ्घामपामार्गमग्निमन्थाग्नितिल्वकान् ।
आर्द्रान् समूलशाखादीन् खण्डशः परिकल्पितान् ॥१०॥
कोशातकीशतस्रश्च शूकनाल यवस्य च ।
निवाते निचयीकृत्य पृथक् तानि शिलातले ॥ ११ ॥
प्रचिप्य मुष्ककचये सुधाश्मानि च दीपयेत् ।
ततस्तिलानां कुम्भालैर्दग्ध्वाऽग्नौ विगते पृथक् ॥१२॥
कृत्वा सुधाश्मनां भस्म द्रोणं क्षितरभस्मनः ।
मुष्ककोत्तरमादाय प्रत्येकं जलमूचयोः ॥ १३ ॥
गालयेदर्द्धभारेण महता वाससा च तत् ।
यावत् पिच्छिलरक्ताच्छस्तोक्ष्णो जातस्तदा च तम् ॥१४॥

गृहीत्वा क्षारनिष्यन्दं पचेल्लौह्यां विघट्टयन्।
पच्यमाने ततस्तस्मिंस्ताः सुधाभस्मशर्कराः ॥ १५ ॥
शुक्तिक्षारपङ्कशङ्खनाभीश्मायसभाजने।
कृत्वाग्निवर्णान् बहुशः क्षारोत्थे कुडवोन्मिते ॥ १६ ॥
निर्वाप्य पिष्टा तेनैव प्रतीवापं विनिक्षिपेत्।
श्लक्ष्णं शङ्खं दग्धशिखिगटभ्रकङ्कपोतजम् ॥ १७ ॥
चतुष्पात्पक्षिपित्तालमनोह्वालवणानि च।
परिस्रुतरां चातो दर्व्या तमवघट्टयेत् ॥ १८ ॥
सबाष्पे च यदोत्तिष्ठेद् बुद्बुदैर्लेहवद्घनः।
अवतार्यं ततः शीतो यवराशावयोमये ॥ १९ ॥
स्थाप्योऽयं मध्यमः क्षारो
न तु पिष्टा क्षिपेन्मृदौ।
निर्वाप्यापनयेत्
तीक्ष्णे पूर्ववत् प्रतिवापनम् ॥ २० ॥
तथा लाङ्गलिकादन्तिचित्रकातिविषावचाः।
स्वर्जिकाकनकाक्षीरिहिङ्गुपूतीकपल्लवाः ॥ २१ ॥
तालपत्री विडङ्गेति सप्तरात्रात् परन्तु सः।
योज्यः
तीक्ष्णोऽनिलश्लेष्ममेदोजेष्वर्बुदादिषु ॥ २२ ॥
मध्येष्वेव च मध्यो-
ऽन्यः पित्तासृगुदजन्मसु।
बलार्थं क्षीरपानीये क्षारांस्तु पुनरावपेत् ॥ २३ ॥
नातितीक्ष्णो मृदुः श्लक्ष्णः पिच्छिलः शीघ्रगः सितः।
शिखरी सुखनिर्वाप्यो न विष्यन्दी न चातिरुक् ॥२४॥
क्षारो दशगुणः श्लक्ष्णतेजसोरपि कर्मकृत्।
आचषाणव सरभाद् गात्रमापीडयन्निव ॥ २५ ॥

सर्वतोऽनुसरन् दोषानुन्मूलयति मूलतः।
कर्म कृत्वा गतरुजः स्वयमेवोपशाम्यति ॥ २६ ॥
क्षारसाध्ये गदे क्षिप्ते लिखिते स्रावितेऽथवा।
क्षारं शलाकया दत्वा स्रोतःप्रावृतदेहया ॥ २७ ॥
मात्राशतमुपेक्षेत
तत्रार्थः स्रावृताननम्।
हस्तेन यन्त्रं कुर्वीत
वर्त्मरोगेषु वर्त्मनो ॥ २८ ॥
निर्भुज्य पिचुनाच्छाद्य क्षणभागं विनिक्षिपेत्।
पक्ष्मपत्रतनुः क्षारलेपो घ्राणार्बुदेषु च ॥ २९ ॥
प्रत्यादित्यं निषण्णस्य समुन्नम्याग्रनासिकाम्।
मात्रा विधार्यः पक्षाग्यत्
तद्दर्शसि कर्णजे ॥ ३० ॥
क्षारं प्रमार्जनेनानु परिमृज्यावगम्य च।
सुदग्धं घृतमध्यक्तं तत् पयोमस्तुकाञ्जिकैः ॥ ३१ ॥
निर्वापयेत् ततः साज्यैः स्वादुशीतैः प्रदेहयेत्।
अभिष्यन्दीनि भोज्यानि भोज्यानि क्लेदनाय च ॥ ३२ ॥
यदि च स्थिरमूलत्वात् क्षारदग्धं न शीर्य्यते।
धान्याम्लवीजयष्याह्वतिलैरालेपयेत् ततः ॥ ३३ ॥
तिलकल्कः समधुको घृताक्तो व्रणरोपणः।
पक्वजम्बूसित सत्वं सम्यक् दग्धं
विपर्य्यये ॥ ३४ ॥
ताम्रतातोदकाङ्गाद्यैर्दुर्दग्धं
तं पुनर्दहेत्।
अतिदग्धे सवैदृक्षं मूर्च्छादाहज्वरादयः ॥ ३५ ॥
गुदे विशेषादिक्ष्वाकुवसंरोधोऽतिप्रवर्त्तनम्।

पुंस्त्वोपघातो मृत्युर्वा गुदस्य पातनाद् ध्रुवम् ॥ ३६ ॥
नासायां नासिकावशदरणाकुञ्चनोद्भवः ।
भवेच्च विषयाज्ञानं
तद्वच्छ्रोत्रादिकेष्वपि ॥ ३७ ॥
विशेषादत्र सेकोऽम्लैर्लेपो मधुघृत तिलाः ।
वातपित्तहरा चेष्टा सर्वैव शिशिरा क्रिया ॥ ३८ ॥
अम्लो हि शीतः स्पर्शेन क्षारस्तेनोपसंहितः ।
यात्याशु स्रादुतां तस्मादत्र निर्वापयेत्तराम् ॥ ३९ ॥
अग्निः क्षारादपि श्रेष्ठस्तद् दग्धानामसम्भवात् ।
भेषजक्षारशस्त्रैश्च न सिद्धाना प्रसाधनात् ॥ ४० ॥
त्वचि मांसे शिरास्नायुमन्यास्थिषु स युज्यते ।
सृष्टाङ्गस्थानिमूर्द्धार्त्तिमन्थकीलतिलादिषु ॥ ४१ ॥
त्वग्दाहौ वर्त्तिगोदन्तसूर्य्यकान्तशरादिभिः ।
अर्शोभिगन्दरग्रन्थिनाडीदुष्टव्रणादिषु ॥ ४२ ॥
मांसदाहौ मधुस्नेहजाम्बवोष्ठगुडादिभिः ।
स्निष्टवर्त्मन्यसृक्स्रावनीलसम्यग्व्यधादिषु ॥ ४३ ॥
शिरादिदाहस्तैरेव
न दहेत् क्षारवारितान् ।
अन्तःशल्यास्रुजो भिन्नकोष्ठान् भूरिव्रणातुरान् ॥ ४४ ॥
सुदग्धं घृतमध्वक्तं स्निग्धशीतैः प्रदेहयेत् ।
तस्य लिङ्गं स्थिते रक्ते शब्दवल्लसिकान्वितम् ॥ ४५ ॥
पक्वतालफलाभं सुरोहं नातिवेदनम् ।
प्रमाददग्धवत् सर्वं दुर्दग्धात्यर्थदग्धयोः ॥ ४६ ॥
चतुर्धा तत्तु तुल्येन सह
तुल्यस्य लक्षणम् ।
त्वग् विवर्णीभवेत्यर्थं न च स्फोटसमुद्भवः ॥ ४७ ॥

सस्फोटदाहतीव्रोषं दुर्दग्धम्
अतिदाहतः ।
मांसलम्बनसङ्कोचदाहधूपनवेदनाः ॥ ४८ ॥
शिरादिनाशस्तृण्मूर्च्छाव्रणगाम्भीर्यमृत्यवः ।
तुल्यस्याग्निप्रतपनं कार्यमुष्णं च भेषजम् ॥ ४९ ॥
स्थानेऽल्पे वेदनात्यर्थं विलीने मन्दता रुजः ।
दुर्दग्धे शीतमुष्णं च युञ्जादादौ ततो हितम् ॥ ५० ॥
सम्यग् दग्धे तुगाक्षीरीशुक्लचन्दनगैरिकैः ।
लिम्पेत् साज्यामृतैरूर्ध्वं पित्तविद्रधिवत् क्रिया ॥ ५१ ॥
अतिदग्धे द्रुतं कुर्यात् सर्वं पित्तविसर्पवत् ।
स्नेहदग्धे भृशतरं रूक्षं तत्र तु योजयेत् ॥ ५२ ॥
समाप्यते स्थानमिदं हृदयस्य रहस्यवत् ।
अचार्याः सूत्रिता सूक्ष्माः प्रतन्यन्ते हि सर्वतः ॥ ५३ ॥

इति वैद्यपतिसिंहगुप्तसूनुवाग्भटविरचितायामष्टाङ्गहृदय-संहितायां प्रथम सूत्रस्थानं सम्पूर्णम् ॥

शारीरस्थानम्।

प्रथमोऽध्यायः।

अथातो गर्भावक्रान्तिशारीरं व्याख्यास्यामः ॥ १ ॥

इति ह स्माहुरात्रेयादयो महर्षयः।

शुद्धे शुक्रार्त्तवे सत्त्व. स्वकर्मक्लेशचोदितः।
गर्भः सम्पद्यते युक्तिवशादग्निरिवारणौ ॥ २ ॥
बीजात्मकैर्महाभूतैः सूक्ष्मैः सत्त्वानुगैश्च सः।
मातुश्चाहाररसजैः क्रमात् कुक्षौ विवर्द्धते ॥ ३ ॥
तेजो यथार्करश्मीनां स्फटिकेन विरञ्जितम्।
वेष्ट्यमानं दृश्यते गच्छत्सत्त्वो गर्भाशयं तथा ॥ ४ ॥
कारणानुविधायित्वात्कार्य्याणां तत्स्वभावता।
नानायोन्याकृतीः सत्त्वो धत्तेऽतो द्रुतलोहवत् ॥ ५ ॥
अतएव च शुक्रस्य बाहुल्याज्जायते पुमान्।
रक्तस्य स्त्री तयोः साम्ये क्लीवः
शुक्रार्त्तवे पुनः ॥ ६ ॥
वायुना बहुशो भिन्ने यथास्वं बद्धपत्यता।
त्रियोनिविकृताकारा जायन्ते विकृतैर्मलैः ॥ ७ ॥
मासि मासि रजः स्त्रीणां रसजं स्रवति त्र्यहम्।
वत्सराद् द्वादशाद्ऊर्द्धं याति पञ्चाशतः क्षयम् ॥ ८ ॥
पूर्णषोड़शवर्षा स्त्री पूर्णविंशेन सङ्गता।
शुद्धे गर्भाशये मार्गे रक्ते शुक्रेऽनिले हृदि ॥ ९ ॥
वीर्य्यवन्तं सुतं सूते
ततो न्यूनाब्दयोः पुनः।

रोग्यल्पायुरधन्यो वा गर्भो भवति नैव वा ॥ ८ ॥
वातादिकुणपग्रन्थिपूयचीणमलाङ्गयम् ।
बीजासमर्थं रेतोऽसृं
सलिङ्गैर्दोषजं वदेत् ॥ १० ॥
रक्तेन कुणपं श्लेष्मवाताभ्यां ग्रन्थिसन्निभम् ।
पूयाभं रक्तपित्ताभ्यां चीणं मारुतपित्ततः ॥ ११ ॥
अच्छाख्यं तान्त्रसाख्यं तु विदाहि मूत्रविट्प्रभम् ।
कुर्याद्वातादिभिर्दुष्टे स्वौषधं
कुणपे पुनः ॥ १२ ॥
धातकीपुष्पखदिरदाडिमार्जुनसाधितम् ।
पाययेत् सर्पिरथवा विपक्वमसनादिभिः ॥ १३ ॥
श्लक्ष्णमश्मशकलाभिदा ग्रन्थ्याभे
पूयरेतसि ।
परूषकवटादिभ्यां
चीणे शुक्रकरी क्रिया ॥ १४ ॥
स्निग्धं वान्तं विरिक्तं च निरूढमनुवासितम् ।
योजयेच्छुक्रदोषार्त्तं सम्यगुत्तरवस्तिभिः ॥ १५ ॥
सशुक्लो विट्प्रभे सर्पिर्हविषेव्यादिसाधितम् ।
पिबेत्
ग्रन्थ्यार्त्तवे पाठाव्योषहृच्चकजं जलम् ॥ १६ ॥
पेयं कुणपपूयास्रे चन्दनं वच्यते तु यत् ।
गुह्यरोगे च तत्सर्वं कार्यं सोत्तरवस्तिकम् ॥ १७ ॥
शुक्लं शुक्लं गुरु स्निग्धं मधुरं बहुलं बहु ।
घृतमाक्षिकतैलाभं सन्नभोया
आर्त्तवं पुनः ॥ १८ ॥
क्षाररक्तशशासाभं धौतं यच्च विरज्यते ।

शुद्धशुक्रार्त्तवं स्वच्छं सरक्तं मिथुनं मिथः ॥ १९ ॥
स्नेहैः पुंसवनैः स्निग्धं शुद्धं शीलितवास्तिकम् ।
नरं विशेषात् क्षीराज्यैर्मधुरौषधसंस्कृतैः ॥ २० ॥
नारीं तैलेन माषैश्च पित्तलैः समुपाचरेत् ।
श्यामप्रसन्नवदनां स्फुरच्छ्रोणिपयोधराम् ॥ २१ ॥
सस्नाद्यिकुचिं पुस्कामा विद्याद्दुमतीं स्त्रियम् ।
पद्मं सङ्कोचमायाति दिनेऽतीते यथा तथा ॥ २२ ॥
ऋतावतीते योनिः सा शुक्रं नातः प्रतीच्छति ।
मासेनोपचितं रक्तं धमनीभ्यामृतौ पुनः ॥ २३ ॥
ईषत्कृष्णं विगन्धं च वायुर्योनिमुखान्नुदेत् ।
ततः पुष्पं चयादेव कल्याणध्यायिनो ग्रहम् ॥२४॥
मृजालङ्काररहिता दर्भसंस्तरशायिनी ।
त्रैरेयं यावकं स्तोकं कोष्ठशोधनकर्षणम् ॥ २५ ॥
पर्णे शरावे हस्ते वा भुञ्जीत ब्रह्मचारिणी ।
चतुर्थेऽह्नि ततः स्नात्वा शुक्लमाल्याम्बरा शुचिः ॥ २६ ॥
इच्छन्ती भर्तृसदृशं पुत्रं पश्येत् पुरः पतिम् ।
ऋतुस्तु द्वादशनिशाः पूर्वास्तिस्रश्च निन्दिताः ॥ २७ ॥
एकादशी च युग्मासु स्यात् पुत्रोऽन्यासु कन्यका ।
उपाध्यायोऽथ पुत्रीयं कुर्वीत विधिवद्विधिम् ॥ २८ ॥
नमस्कारपरायास्तु शूद्राया मन्त्रवर्जितम् ।
अवश्य एवं संयोगः स्यादपत्यं च कामतः ॥ २९ ॥
सन्तोऽप्याहुरपत्यार्थं दम्पत्योः सङ्गतं रहः ।
दुरपत्यं कुलाङ्गारो गोत्रे जातं मृत्यपि ॥ ३० ॥
इच्छतां यादृशं पुत्रं तदूपचरितौ च तौ ।
चिन्तयेतां जनपदांस्तदाचारपरिच्छदौ ॥ ३१ ॥
कर्मान्ते च पुमान् सर्पिःक्षीरशाल्योदनाशितः ।

प्राग्दक्षिणेन पादेन शय्यां मौञ्जीत्तिकाञ्चया ॥ ३२ ॥
आरोहेत् स्त्री तु वामेन तस्य दक्षिणपार्श्वतः।
तैलमाषोत्तराहारा तत्र मन्त्रं प्रयोजयेत् ॥ ३३ ॥
अङ्गिरसि आयुरसि सर्वतः प्रतिष्ठासि धाता त्वां दधातु विधाता त्वा दधातु ब्रह्मवर्चसा भवेति।
ब्रह्मा बृहस्पतिर्विष्णुः सोमः सूर्य्यस्तथाश्विनौ।
भगोऽथ मित्रावरुणौ वीरं ददतु मे सुतम् ॥ ३४ ॥
सान्त्वयित्वा ततोऽन्योन्यं संविशेतां मुदान्वितौ।
उत्ताना तन्मना योषित् तिष्ठेदङ्गैः सुसंस्थितैः ॥३५॥
तथा हि वीजं गृह्णाति दोषैः स्वस्थानमास्थितैः।
लिङ्गन्तु सयोगभीया योन्यां वीजस्य संग्रहः ॥ ३६ ॥
बृंहिर्गुरुत्वं स्फुरणं शुक्रास्रानुबन्धनम्।
हृदयस्पन्दनं तन्द्रा बृंह्लानिर्लोमहर्षणम् ॥ ३७ ॥
अव्यक्तः प्रथमे मासि सप्ताहात् कललो भवेत्।
गर्भः पुंसवनान्यत्र पूर्वं व्यक्तः प्रयोजयेत् ॥ ३८ ॥
बली पुरुषकारो हि दैवमप्यतिवर्त्तते।
पुष्ये पुरुषकं हैम राजतं वाथ वायसम् ॥ ३९ ॥
कृत्वाऽग्निवर्णं निर्वाप्य क्षीरे तस्याञ्जलिं पिबेत्।
गोरदण्डमपामार्गं जीवकर्षभसैर्यकान् ॥ ४० ॥
पिबेत्पुष्ये जले पिष्टानेकद्वित्रिसमस्तशः।
क्षीरेण श्वेतवृहतीमूलं नासापुटे स्वयम् ॥ ४१ ॥
पुत्रार्थं दक्षिणे सिञ्चेद्वामे दुहितृवाञ्छया।
पयसा लक्ष्मणामूलं पुत्रोत्पादस्थितिप्रदम् ॥ ४२ ॥
नासयास्येन वा पीतं वटशृङ्गाष्टकं तथा।
ओषधीर्जीवनीयाश्च बाह्यान्तरुपयोजयेत् ॥ ४३ ॥
उपचारः प्रियहितैर्भर्त्रा भृत्यैश्च गर्भभृत्।

नवनीतघृतक्षीरैः सदा चैनामुपाचरेत् ॥ ४४ ॥
अतिव्यवायमायास भारं प्रावरणं गुरु।
अकालजागरस्वप्नकठिनोत्कटकासनम् ॥ ४५ ॥
शोकक्रोधभयोद्वेगविरुद्धविधारणम्।
उपवासाध्वतीक्ष्णोष्णगुरुविष्टम्भिभोजनम् ॥ ४६ ॥
रक्तं निवसनं स्वभ्रकूपेक्षां मद्यमामिषम्।
उत्तानशयनं यच्च स्त्रियो नेच्छन्ति तत्त्यजेत् ॥ ४७ ॥
तया रक्तसुतिं गर्भिं वस्तिमामासतोऽष्टमात्।
एभिर्गर्भः सवेदाभः कुक्षौ शुष्येन्म्रियेत वा ॥ ४८ ॥
वातलैश्च भवेद्गर्भः कुब्जान्धजड़वामनः।
पित्तलैः खलतिः पिङ्गः क्षिप्रो पाण्डुः कफात्मभिः ॥ ४९ ॥
व्याधींश्चास्या मृदुसुखैरतीक्ष्णैरौषधैर्जयेत्।
द्वितीये मासि कललाद्घन. पेश्यथवार्बुदम् ॥ ५० ॥
पुंस्त्रीक्लीवाः क्रमात्तेभ्यः

तत्र व्यक्तस्य लक्षणम्।

श्यामता गरिमा कुक्षौ मूर्च्छाच्छर्दिररोचकः ॥ ५१ ॥
तृष्णा प्रसेकः सदन रोमराज्या. प्रकाशनम्।
अग्नेष्टता स्तनौ पीनौ सस्तन्यौ कृष्णचूचकौ ॥ ५२ ॥
पादशोफो विदाहोऽन्ये श्रद्धाश्च विविधास्त्रिकाः।
मात्रजं ह्यस्य हृदयं मातुश्च हृदयेन तत् ॥ ५३ ॥
सम्बद्धं तेन गर्भिण्या नेष्टं श्रद्धाविधारणम्।
देयमप्यहितं तस्यै हितोपहितमल्पकम् ॥ ५४ ॥
श्रद्धाविघातादृभस्य विकृतिर्युतिरेव वा।
व्यतीतभवति मासेऽस्य तृतीये मातृपञ्चकम् ॥ ५५ ॥
मूर्धा हृदे सक्थिनो बाहू सर्वसूक्ष्माङ्गजन्म च।
समसेव हि मूर्धाद्यैर्ज्ञानं च सुखदुःखयोः ॥ ५६ ॥

गर्भस्य नाभौ मातुश्च हृदि नाडी निबध्यते।
तया स पुष्टिमाप्नोति केदार इव कुल्यया ॥ ५७ ॥
चतुर्थे व्यक्तताङ्गानां चेतनायाश्च पञ्चमे।
षष्ठे स्नायुशिरारोमबलवर्णनखत्वचाम् ॥ ५८ ॥
सर्वैः सर्वाङ्गसम्पूर्णो भावैः पुष्यति सप्तमे।
गर्भेणोत्पीडिता दोषास्तस्मिन् हृदयमाश्रिताः।
कण्ठं विदाहं कुर्वन्ति गर्भिण्याः किल्बिषाणि च ॥ ५९ ॥
नवनीतं हितं तत्र कोलाम्बुमधुरौषधैः।
सिद्धमल्पपटुस्नेहं लघु स्वादु च भोजनम् ॥ ६० ॥
चन्दनोशीरकल्केन लिम्पेदूरुस्तनोदरम्।
श्वेतया चैणहरिणशशशोणितयुक्तया ॥ ६१ ॥
अश्वघ्नपत्रसिद्धेन तैलेनाभ्यज्य मर्दयेत्।
पटोलनिम्बमञ्जिष्ठासुरसैः सेचयेत् पुनः ॥ ६२ ॥
दार्वीमधुकतोयेन सृजां च परिषेचयेत्।
ओजोऽष्टमे सञ्चरति मातापुत्रौ सुखैः क्रमात् ॥ ६३ ॥
तेन तौ स्वानमुदितौ तत्र जातौ न जीवतः।
शिशुरोजोऽनवस्थानान्नारी सशयिता भवेत् ॥ ६४ ॥
क्षीरपेया च पेयात्र सघृतान्वासन घृतम्।
मधुरैः साधितं शुद्धैः पुराणशकृतस्तथा ॥ ६५ ॥
शुष्कमूलककोलाम्लकषायेण प्रशस्यते।
शताह्वकल्कितो वस्तिः सतैलघृतसैन्धवः ॥ ६६ ॥
तस्मिन्स्वे काङ्क्षयातेऽपि काले सूतेरतः परम्।
वर्षाद्विकारकारी स्यात् कुक्षौ वातेन धारितः ॥ ६७ ॥
शस्तश्च नवमे मासि स्निग्धो मासरसौदनः।
बहुस्नेहा यवागूर्वा पूर्वोक्तं चानुवासनम् ॥ ६८ ॥
तत एव पिचुं वास्या योनौ नित्यं निधापयेत्।

वातघ्नपवभङ्गाभ्रः शीतं स्नानेऽन्वहं हितम् ॥ ६९ ॥
निःस्नेहाङ्गीं न नवमान्मासात् प्रभृति वासयेत्।
प्राग्दक्षिणस्तनस्तन्या पूर्वं तत्पार्श्वचेष्टिनी ॥ ७० ॥
पुत्रामदौहृदप्रश्नरता पुंस्त्वप्रदर्शिनी।
उन्नते दक्षिणे कुक्षौ गर्भे च परिमण्डले ॥ ७१ ॥
पुत्रं सूतेऽन्यथा कन्यां या चेच्छति नृसङ्गतिम्।
नृत्यवादित्रगान्धर्वगन्धमाल्यप्रिया च या ॥ ७२ ॥
क्लीवं तत्सङ्करे तत्र मध्यं कुक्षेः समुन्नतम्।
यमौ पार्श्वद्वयोन्नामात् कुक्षौ द्रोण्यामिव स्थिते ॥ ७३ ॥
प्राक् चैव नवमान्मासात्सूतिकागृहमाश्रयेत्।
देशे प्रशस्ते सम्भारैः सम्पन्नं साधकेऽहनि ॥ ७४ ॥
तत्रोदीचेत सा सूतिं सूतिका परिवारिता।
अत्यर्थः प्रसवे ग्लानिः कुक्ष्यश्लिश्लथता क्लमः ॥ ७५ ॥
अधोगुरुत्वमरुचिः प्रसेको बहुमूत्रता।
वेदनोरूदरकटीपृष्ठहृद्वस्तिवङ्क्षणे ॥ ७६ ॥
योनिभेदरुजातोदस्फुरणस्रवणानि च।
आवीनामनुजन्मातस्ततो गर्भोदकस्रुतिः ॥ ७७ ॥
अथोपस्थितगर्भां तां कृतकौतुकमङ्गलाम्।
हस्तस्थपुत्रामफलां स्नेह्यक्षौद्राम्बुसेचिताम् ॥ ७८ ॥
पाययेत्सद्दृतां पेया तनौ भूशयने स्थिताम्।
आभुग्नसक्थिमुत्तानामभ्यक्ताङ्गीं पुनः पुनः ॥ ७९ ॥
अधोनाभेर्विमृद्नीयात्कारयेज्जृम्भचङ्क्रमम्।
गर्भः प्रयात्यवागेवं तद्भिङ्गं हृद्विमोचतः ॥ ८० ॥
आविश्य जठरं गर्भो वस्तेरुपरि तिष्ठति।
आध्मो हि त्वरयन्त्येनां खट्टामारोपतेत्ततः ॥ ८१ ॥
अथ सम्पीड़िते गर्भे योनिमस्याः प्रसाधयेत्।

मृदुपूर्वं प्रवाहेत वाढमाप्रसवाच्च सा ॥ ८२ ॥
हर्षयेत् तां मुहुः पुत्रजन्मशब्दजलादिभिः।
प्रत्यायान्ति तथा प्राणाः सूतिक्लेशावसादिताः ॥८३॥
धूपयेद्गर्भसङ्गे तु योनिं क्षौद्राहिकच्छुकैः।
हिरण्यपुष्पीमूलं च पाणिपादेन धारयेत् ॥ ८४ ॥
सुवर्चला विशल्यां वा जरायुपतनेऽपि च।
कार्य्यमेतत् तथोत्क्षिप्य बाह्वोरेनां विकम्पयेत् ॥८५॥
कटीमाकोटयेत् पार्श्वौ स्फिजौ गाढं निपीड़येत्।
तालुकण्ठं स्पृशेद्रेखां मूर्ध्नि दद्यात् सुहीपयः ॥८६॥
भूर्जलाङ्गलिकीतुम्बीमर्षत्वक्कुष्ठसर्षपैः।
पृथग् द्वाभ्यां समस्तैर्वा योनिलेपनधूपनम् ॥८७॥
कुष्ठतालीसकल्कं वा सुरामण्डेन पाययेत्।
यूषेण वा कुलत्थानां विल्वजेनासवेन वा ॥ ८८ ॥
शताह्वासर्षपाजाजीशिग्रुतीक्ष्णकचित्रकैः।
सहिङ्गुकुष्ठमदनैर्मूत्रे क्षीरे च सार्षपम् ॥ ८९ ॥
तैलं सिद्धं हितं पायौ योन्या वाप्यनुवासनम्।
शतपुष्पावचाकुष्ठकणासर्षपकल्कितः ॥ ९० ॥
निरूहः पातयत्याशु सशेफलवणोऽपराम्।
तत्सङ्गे ह्यनिलो हेतुः सा निर्य्यात्याशु तज्जयात् ॥९१॥
कुशला पाणिनाऽङ्केन हरेत् क्षौमनखेन वा।
सूक्ष्मगर्भापरां योनिं तैलेनाङ्क्त्वा मर्दयेत् ॥ ९२ ॥
मरुल्लाख्ये शिरोवस्तिकोष्ठशूले तु पाययेत्।
सुचूर्णितं यवक्षारं घृतेनोष्णजलेन वा ॥ ९३ ॥
धान्याम्बु वा गुडव्योषविजातकरजोऽन्वितम्।
अथ बालोपचारेण बालं योषिदुपाचरेत् ॥ ९४ ॥
सूतिका क्षुद्वती तैलाद् घृताद्वा मद्यतीं पिबेत्।

पञ्चकोलकिनीं माचामनु चोष्णं गुडोदकम् ॥ ९५ ॥
वातघ्नौषधतोयं वा तथा वायुर्न कुप्यति।
विशुध्यति च दुष्टास्रं द्विविराजमयं क्रमः ॥ ९६ ॥
स्नेहायोग्या तु निःस्नेहमनुमेव विधिं भजेत्।
पीतवत्याश्च जठरं यमकाक्ष विवेष्टयेत् ॥ ९७ ॥
जीर्णे स्नाता पिबेत् पेयां पूर्वोक्तौषधसाधिताम्।
त्रायन्तीदुर्लभादार्य्यादिवर्गकाथेन साधिता ॥ ९८ ॥
हिता यवागूः स्नेहाढ्या सात्म्यतः पयसाऽथवा।
सप्तरात्रात् परं चास्यै क्रमशो बृंहणं हितम् ॥ ९९ ॥
द्वादशाहेऽनतिक्रान्ते पिप्पलिं नोपयोजयेत्।
यत्ने नोपचरेत् सूतां दुःसाध्या हि तदामयाः ॥१००॥
गर्भद्वड्विप्रसवरुक् क्लमे दास्रसुतिपीडनैः।
एवञ्च मासादध्वर्ङ्मुक्ताहारादियत्नवान्।
गतसूताभिधाना स्यात् पुनरार्त्तवदर्शनात् ॥१०१॥

द्वितीयोऽध्यायः।

अथातो गर्भव्यापदं शारीरं व्याख्यास्यामः ॥
गर्भिण्याः परिहार्य्याणां सेवया रोगतोऽपि वा।
पुष्पे दुष्टेऽथवा शूले वाह्यान्तः स्निग्धशीतलम् ॥ १ ॥
सेव्याम्भोजहिमक्षीरीवल्ककल्काज्यलेपितान्।
धारयेद् योनिवस्तिभ्यामार्द्रार्द्रान् पिचुनक्तकान् ॥ २ ॥
शतधौतघृताक्तां स्त्रीं तदम्भस्यवगाहयेत्।
सशिताक्षौद्रकुमुदकमलोत्पलकेसरम् ॥ ३ ॥
लिह्यात् क्षीरघृत खादेच्छृङ्गाटककसेरुकम्।
पिबेत् कान्ताजशालूकबालोदुम्बरवत् पयः ॥ ४ ॥
घृतेन शालिकाकोलीद्विबलामधुकेक्षुभिः।

पयसा रक्तशाल्यन्नमश्नात् समधुशर्करम् ॥ ५ ॥
रसैर्वा जाङ्गलैः
गुरुवर्जं चाप्योक्तमाचरेत् ।
असम्पूर्णत्रिमासायाः प्रत्याख्याय प्रसाधयेत् ॥ ६ ॥
आमान्वये च
तत्रेष्टं शीतं रूक्षोपसंहितम् ।
उपवासो घनोशीरगुडूच्यरलुधान्यकाः ॥ ७ ॥
दुरालभापर्पटकचन्दनातिविषाबलाः ।
क्वथिताः सलिले पानं हृणधान्यादिभोजनम् ॥ ८ ॥
मुद्गादियूषैरामे तु जिते स्निग्धादि पूर्ववत् ।
गर्भे निपतिते तोक्ष्णं मद्यं सामर्थ्यतः पिबेत् ॥ ९ ॥
गर्भकोष्ठविशुद्ध्यर्थमर्त्तिविस्मरणाय च ।
लघुना पञ्चमूलेन रूक्षां पेयां ततः पिबेत् ॥ १० ॥
पेयाममद्यपा कल्के साधिता पाञ्चकौलिके ।
बिल्वादिपञ्चकक्वाथे तिलोद्दालकतण्डुलैः ॥ ११ ॥
मासतुल्यदिनान्येव पेयादिः पतिते क्रमः ।
लघुरस्नेहलवणो दीपनोपयुतो हितः ॥ १२ ॥
दोषधातुपरिक्लेदशोषार्थं विधिरित्ययम् ।
स्नेहान्नवस्तयश्चोर्ध्वं बल्यजीवनदीपनाः ॥ १३ ॥
सञ्जातसारे महति गर्भे योनिपरिस्रवात् ।
हृद्विमप्राप्नुवन् गर्भः कोष्ठे तिष्ठति सस्फुरः ॥ १४ ॥
उपविष्टकमाहुस्तं वर्द्धते तेन नोदरम् ।
शोकोपवासरूक्षाद्यैरथवा योन्यतिस्रवात् ॥ १५ ॥
वाते क्रुद्धे क्रमः शुष्येद् गर्भो नागोदरं तु तत् ।
उदरं हृद्विमप्राप्य क्षीयते स्फुरणं चिरात् ॥ १६ ॥
तयोर्हृद्विमवातघ्नमधुरद्रव्यसंस्कृतैः ।

घृतक्षीररसैस्तृप्तिरामगर्भांश्च खादयेत् ॥ १७ ॥
तैरेव च सुखोष्णायाः क्षोभणं यानवाहनैः।
लोनाख्ये निस्फुरे क्षेत्रगोमल्यौत्क्रोशवर्हिजाः ॥१८॥
रसा बहुघृता देया माषमूलकजा अपि।
बालबिल्वं तिलान् माषान् सक्तूंश्च पयसा पिबेत् ॥१९॥
समेद्यमांस मधु वा कल्यभ्यङ्गश्च शीलयेत्।
हर्षयेत् सततं चैनामेवं गर्भः प्रवर्द्धते ॥ २० ॥
पुष्टोऽन्यथा वर्षगणैः कृच्छ्राज्जायेत नैव वा।
उदावर्त्तन्तु गर्भिण्याः स्नेहैराशुतरं जयेत् ॥ २१ ॥
योन्यै च वस्तिभिर्हन्यात् सगर्भां स हि गर्भिणीम्।
गर्भेऽतिदोषोपचयादपथ्यैर्दैवतोऽपि वा ॥ २२ ॥
मृतेऽन्तरुदरं शीतं स्तब्धं भ्रातं भृशव्यथम्।
गर्भाशयो भ्रमस्तृष्णा कृच्छ्रादुच्छ्वसनं क्लमः ॥ २३ ॥
अरतिः सस्तनेचत्वमाद्योनामसमुद्भवः।
तस्याः कोष्णाम्बुसिक्तायाः पिष्ट्वा योनिं प्रलेपयेत् ॥२४॥
गुडं किण्वं सलवणं तथान्तः पूरयेन्मुहुः।
घृतेन कल्कीकृतया शाल्मल्यतनिर्यच्छया ॥ २५ ॥
मन्थैर्योग्यैर्जरायुस्तैर्मूढगर्भो न चेत् पतेत्।
अथापृच्छ्यं क्षरं वैद्यो यत्नेनाशु तमाहरेत् ॥ २६ ॥
हस्तमभ्युज्य योनिञ्च साज्यशाल्मलियिच्छया।
हस्तेन शक्यं तेनैव गात्रं च विषमं स्थितम् ॥ २७ ॥
आच्छिनोत्पीडसंपीडविक्षेपोत्क्षेपणादिभिः।
अनुलोम्य समाकर्षेद् योनिं प्रत्याजवागतम् ॥ २८ ॥
हस्तपादशिरोभिर्यो योनिं भुग्नः प्रपद्यते।
पादेन योनिमिक्ष्वेन भुग्नेऽन्येन गुदं च यः ॥ २९ ॥
विष्कम्भी नाम तौ मूढौ शस्त्रदारणमर्हतः।

मण्डलाङ्गुलिशस्त्राभ्यां तत्र कर्म प्रशस्यते ॥ ३० ॥
वृद्धिपत्रं हि तीक्ष्णाग्रं न योनावववचारयेत् ।
पूर्वं शिरः कपालानि दारयित्वा विशोधयेत् ॥ ३१ ॥
कक्षोरस्तालुचिबुके प्रदेशेऽन्यतमे ततः ।
समालम्ब्य दृढं कर्षेत् कुशलो गर्भशङ्कुना ॥ ३२ ॥
अभिन्नशिरसं त्वक्षिकूटयोर्गण्डयोरपि ।
बाहुं क्षित्वाससक्तस्य वाताध्मातोदरस्य तु ॥ ३३ ॥
विदार्य कोष्ठमन्त्राणि बहिर्वास निरस्य च ।
कटीसक्तस्य तद्वच्च तत् कपालानि दारयेत् ॥ ३४ ॥
यद्यदायुवशादङ्गं सज्जेद्गर्भस्य खण्डशः ।
तत्तत् क्षित्वा हरेत् सम्यग् रक्षेन्नारीं च यत्नतः ॥ ३५ ॥
गर्भस्य हि गतिं चित्रां करोति विगुणोऽनिलः ।
तत्रानल्पमतिस्तस्मादवक्षापेक्षमाचरेत् ॥ ३६ ॥
छिन्द्याद्गर्भं न जीवन्तं मातरं स हि मारयेत् ।
सहात्मना न चोपेक्ष्य क्षणमप्यस्तजीवितः ॥ ३७ ॥
योनिसंवरणभ्रंशमकल्पश्वासपीडिताम् ।
मृत्युद्वारां हिमाङ्गीं च मूढगर्भां परित्यजेत् ॥ ३८ ॥
अथापतन्तीमपरां पातयेत् पूर्ववद्भिषक् ।
एवं निर्हृतशल्यां तु सिञ्चेदुष्णेन वारिणा ॥ ३९ ॥
दद्यादभ्यक्तदेहायै योनौ स्नेहपिचुं ततः ।
योनिर्मृदुर्भवेत् तेन शूलं चास्याः प्रशाम्यति ॥ ४० ॥
दीप्यकातिविषाराम्राहिङ्गुलापक्वकोलकान् ।
चूर्णं स्नेहेन कल्कं वा क्वाथं वा पाययेत् ततः ॥ ४१ ॥
कटुकातिविषापाठाशाकत्वग्घिङ्गुतेजिनीः ।
तद्वच्च दोषस्यन्दार्थं वेदनोपशमाय च ॥ ४२ ॥
त्रिरात्रमेवं सप्ताह स्नेहमेव ततः पिबेत् ।

साय पिबेदरिष्टं वा तथा सुकृतमासवम् ॥ ४३ ॥
शिरीषकक्कुभक्काथपिचून् योनौ विनिक्षिपेत्।
उपद्रवाय योन्यै स्युस्तान् यथास्वमुपाचरेत् ॥ ४४ ॥
पयो वातहरैः सिद्धं दशाह भोजने हितम्।
रसौ दशाह च पर लघुपथ्यान्नभोजना ॥ ४५ ॥
स्वेदाभ्यङ्गपरा स्नेहान् बलातैलादिकान् भजेत्।
ऊर्ध्वं चतुर्थ्यो मासेभ्य सा क्रमेण सुखानि च ॥ ४६ ॥
बलामूलकषायस्य भागाः षट् पयसस्तथा।
यवकोलकुलत्थानां दशमूलस्य चैकतः ॥ ४७ ॥
निःक्काथभागो भागश्च तैलस्य च चतुर्दश।
द्विमेदादारुमञ्जिष्ठाकाकोलीद्वयचन्दनैः ॥ ४८ ॥
सारिवाकुष्ठतगरजीवकर्षभसैन्धवैः।
कालानुसार्याशैलेयवचागुरुपुनर्नवैः ॥ ४९ ॥
अश्वगन्धावरीक्षीरशुक्लायष्टीवरासैः।
शताह्वाशूर्पपर्ण्यैलात्वक्पत्रैः श्लक्ष्णकल्कितैः ॥ ५० ॥
पक्वं मृदग्निना तैल सर्ववातविकारजित्।
सूतिकाबालमर्मास्थिक्षतक्षीणेषु पूजितम् ॥ ५१ ॥
ज्वरगुल्मयहोन्मादमूत्राघातान्त्रवृद्धिजित्।
धन्वन्तरेरभिमत योनिरोगक्षयापहम् ॥ ५२ ॥
वस्तिद्वारि विपन्नायाः कुक्षिः प्रस्यन्दते यदि।
जन्मकाले ततः शीघ्रं पाटयित्वोद्धरेत् शिशुम् ॥ ५३ ॥
मधुक शाकबीजं च पयस्या सुरदारु च।
अश्मन्तकः कृष्णतिलास्तास्रवल्ली शतावरी ॥ ५४ ॥
वृक्षादनी पयस्या च लता चोत्पलसारिवा।
अनन्ता सारिवा रास्ना पद्मा च मधुयष्टिका ॥ ५५ ॥
वृहतीद्वयकाश्मर्य्यः क्षीरोदुम्बरजो घृतम्।

पृश्निपर्णी बला शिग्रुः स्वदंष्ट्रा मधुपर्णिका ॥ ५६ ॥
शृङ्गाटक विस द्राक्षा कसेरु मधुक सिता ।
सर्पींषि तान् पयसा योगानर्द्धश्लोकसमापनान् ॥ ५७ ॥
क्रमात् सप्तसु मासेषु गर्भे स्रवति योजयेत् ।
कपित्थविल्वबृहती पटोलेक्षुनिदिग्धजैः ॥ ५८ ॥
मूलैः सृत प्रयुञ्जीत क्षीरे मासे तथाऽष्टमे ।
नवमे सारिवाऽनन्ता पयस्या मधुयष्टिभिः ॥ ५९ ॥
योजयेद् दशमे मासि सिद्धं क्षीरे पयस्यया ।
अथवा यष्टिमधुकनागराम्बरदारुभिः ॥ ६० ॥
अवस्थितं लोहितमङ्गनाया वातेन गर्भं स्रवतेऽभिघाताः ।
गर्भाकृतित्वात् कटुकोष्णतोक्ष्णैः स्रुते पुनः केवल एव रक्ते ॥ ६१
गर्भं जडा भूतहृतं वदन्ति मूर्त्तेर्न दृष्टेः हरणं यतस्तैः ।
ओजोऽशनत्वादथवाऽव्यवस्थैर्भूतैरुपेक्ष्येत न गर्भमाता ॥ ६२

तृतीयोऽध्यायः ।

अथातोऽङ्गविभागं शारीरं व्याख्यास्यामः ॥
शिरोऽन्तराधिर्द्वौ बाहू सक्थिनौ च समासतः ।
षडङ्गमङ्गं प्रत्यङ्गं तस्माच्छिरहृदयादिकम् ॥ १ ॥
शब्दः स्पर्शश्च रूपं च रसो गन्धः क्रमादमी गुणाः ।
खाऽनिलाऽग्न्यब्भुवा-
मेकगुणवृद्धान्वयः परे ॥ २ ॥
तत्र खात् खानि देहेऽस्मिन् श्रोत्रं शब्दो विविक्तता ।
वातात् स्पर्शत्वक् उच्छ्वासा वक्त्रेर्द्धूपपक्तयः ॥ ३ ॥
आप्या जिह्वा रसक्लेदा घ्राणगन्धास्थि पार्थिवम् ।
अहत्व मांसज रक्तमांसमज्जगुदादिकम् ॥ ४ ॥
पैत्तकं तु स्मिर शुक्र धमन्यस्रिकवादिकम् ।

चैतनं चित्तमप्यपि नानायोनिषु जन्म च ॥ ५ ॥
साम्भस्त्वायुरारोग्यमनालस्य प्रभा बलम् ।
रसज वपुषो जन्म वृत्तिर्हर्षिरलोलता ॥ ६ ॥
सात्त्विक शौचमास्तिक्यं शुक्लधर्मरुचिर्मति: ।
राजसं बहुभाषित्व मानक्रुद्धमत्सरा: ॥ ७ ॥
तामस भयमज्ञान निद्राऽऽलस्यं विषादिता ।
इति भूतमयो देह:
तत्र सप्त त्वचोऽब्रुज: ॥ ८ ॥
पच्यमानात् प्रजायन्ते चीरात् सन्तानिका इव ।
धात्वाशयान्तरक्लेदो विपक्व: स्व स्वमूष्मणा ॥ ९ ॥
श्लेष्मस्नायुपराच्छन्न: कलाख्य. काष्ठसारवत् ।
ता: सप्त सप्त चाधारा रक्तस्याद्य: क्रमात् परे ॥१०॥
कफामपित्तपक्वाना वायोर्मूत्रस्य च स्मृता: ।
गर्भाशयोऽष्टम: स्त्रीणा पित्तपक्वाशयान्तरे ॥११॥
कोष्ठाङ्गानि स्थितान्येषु हृदय क्लोमफुप्फुसम् ।
यकृत् प्लीहान्त्रक वृक्कौ नाभिर्डिम्भान्त्रवस्तय: ॥१२॥
दश जीवितधामानि शिरोरसनबन्धनम् ।
कण्ठोऽस्र हृदय नाभिर्बस्ति: शुक्रौजसो गुदम् ॥ १३ ॥
जालानि कण्डराश्चान्ये पृथक् षोडश निर्दिशेत् ।
षट् कूर्चा: सप्त सेवन्यो मेढ्रजिह्वाशिरोगता: ॥ १४ ॥
ग्रन्थयस्तैता: परिहरेच्चतस्रो मांसरज्जव: ।
चतुर्दशास्थिसघाता: सीमन्ता द्विगुणा नव ॥ १५ ॥
अस्थ्नां शतानि षष्टिश्च त्रीणि दन्तनखै: सह ।
धन्वन्तरिस्तु त्रीण्याह सन्धीना च शतद्वयम् ॥ १६ ॥
दशोत्तरं
सहस्रे द्वे निजगादाऽत्रिनन्दन: ।

स्रावा नवशती पञ्च पुमां पेशीशतानि च ॥ १७ ॥
अधिका विंशतिः स्त्रीणां योनिस्तनसमाश्रिताः ।
दश मूलशिरा हृत्स्थास्ताः सर्वं सर्वतो वपुः ॥ १८ ॥
रसात्मक वहन्त्यं जस्तन्निबद्धं हि चेष्टितम् ।
स्थूलमूलाः सुसूक्ष्माग्राः पत्ररेखाप्रतानवत् ॥ १९ ॥
भिद्यन्ते तास्ततः सप्तशतान्यासां भवन्ति तु ।
तत्रैकैक च शाखायां शत तस्मिन्न वेधयेत् ॥ २० ॥
शिरां जालन्धरां नाम तिस्रश्चाभ्यन्तराश्रिताः ।
षोड़शद्विगुणा. श्रोण्यां तासां द्वे द्वे तु वङ्क्षणे ॥ २१ ॥
द्वे द्वे कटीकतरुणे शस्त्रेणाष्टौ स्पृशेन्न ता. ।
पार्श्वयोः षोडशैकैकामूर्ध्वगां वर्जयेत् शिराम् ॥ २२ ॥
द्वादशद्विगुणाः पृष्ठे पृष्ठवंशस्य पार्श्वगे ।
द्वे द्वे तत्रोर्ध्वगामिन्यौ न शस्त्रेण परामृशेत् ॥ २३ ॥
पृष्ठवज्जठरे तासा मेहनस्योपरि स्थिते ।
रोमराजीमुभयतो द्वे द्वे शस्त्रेण न स्पृशेत् ॥ २४ ॥
चत्वारिंशदुरस्यासां चतुर्दश न वेधयेत् ।
स्तनरोहिततन्मूलहृदये तु पृथग्द्वयम् ॥ २५ ॥
अपस्तम्भाख्ययोरेकां तथा पालापयोरपि ।
ग्रीवायां पृष्ठवत्तासां नीले मन्ये कृकाटिके ॥ २६ ॥
विधुरे मातृकाश्चाष्टौ षोड़शेति परित्यजेत् ।
हन्वोः षोडश तासां द्वे सन्धिबन्धनकर्मणी ॥ २७ ॥
जिह्वायां हनुवत्तासामधो द्वे रसबोधने ।
द्वे च वाचः प्रवर्त्तिन्यौ
नासायां चतुरुत्तरा ॥ २८ ॥
विंशतिर्गन्धवेदिन्यौ तासामेकां च तालुगाम् ।
षट्पञ्चाशन्नयनयोर्निमेषोन्मेषकर्मणी ॥ २९ ॥

द्वे द्वे अपाङ्ग्योर्द्वे च तासां षडिति वर्जयेत्।
नासानेत्रान्विताः षष्टिर्ललाटे स्वपनोन्विताम् ॥ ३० ॥
तत्रैकां द्वौ तथाऽऽवर्त्तौ चतस्रश्च कचान्तगाः।
सप्तैवं वर्जयेत् तासां
कर्णयोः षोडशाव तु ॥ ३१ ॥
द्वे शब्दबोधने शङ्खौ शिरास्ता एव चान्विताः।
द्वे शङ्खसन्धिगे तासां
मूर्ध्नि द्वादश तत्र तु ॥ ३२ ॥
एकैकां पृथगुत्क्षेपसीमन्ताधिपतिस्थिताम्।
इत्यवेध्यविभागार्थं प्रत्यङ्गं वर्णिताः शिराः ॥ ३३ ॥
अवेध्यास्तत्र कात्स्न्र्येन देहेऽष्टानवतिस्तथा।
सकीर्णा ग्रथिताः क्षुद्रा वक्राः सन्धिषु चान्विताः ॥३४॥
तासां शतानां सप्तानां पादोऽसृक् वहते पृथक्।
वातपित्तकफैर्जुष्टं शुद्धं चैव स्थिता मलाः ॥ ३५ ॥
शरीरमनुगृह्णन्ति पीडयन्त्यन्यथा पुनः।
तत्र श्यावारुणाः सूक्ष्माः पूर्णरिक्ताः क्षणात् सिराः ॥३६॥
प्रस्यन्दिन्यश्च वातास्र वहन्ते
पित्तशोणितम्।
स्पर्शोष्णाः शीघ्रवाहिन्यो नीलपीताः कफं पुनः ॥३७॥
गौर्य्यः स्निग्धाः स्थिराः शीताः सस्रष्टं लिङ्गसङ्करे।
गूढाः समस्थिताः स्निग्धा रोहिण्यः शुद्धशोणितम् ॥३८॥
धमन्यो नाभिसम्बद्धा विंशतिश्चतुरुत्तराः।
ताभिः परिवृतो नाभिश्चक्रनाभिरिवारकैः ॥ ३९ ॥
ताभिश्चोर्ध्वमधस्तिर्य्यग्देहोऽयमनुगृह्यते।
स्रोतांसि नासिके कर्णौ नेत्रे पायुस्त्वमेहनम् ॥ ४० ॥
स्तनौ रक्तपथश्चेति नारीणामधिकं त्रयम्।

जीवितायतनान्यन्तः स्रोतांस्याहुरृषयोदश ॥ ४१ ॥
प्राणधातुमलानोऽन्नवाहीन्य-
हितसेवनात् ।
तानि दुष्टानि रोगाय विशुद्धानि सुखाय च ॥ ४२ ॥
स्वधातुसमवर्णानि वृत्तस्थूलान्यणूनि च ।
स्रोतांसि दीर्घाण्याकृत्या प्रतानसदृशानि च ॥ ४३ ॥
आहारश्च विहारश्च यः स्याद् दोषगुणैः समः ।
धातुभिर्विगुणो यश्च स्रोतसां स प्रदूषकः ॥ ४४ ॥
अतिप्रवृत्तिः सङ्गो वा शिराणां ग्रन्थयोऽपि वा ।
विमार्गगतो वा गमनं स्रोतसां दुष्टिलक्षणम् ॥ ४५ ॥
विसानामिव सूक्ष्माणि दूरं प्रावृतानि च ।
द्वाराणि स्रोतसां देहे रसो यैरुपचीयते ॥ ४६ ॥
व्यधे तु स्रोतसां मोहकम्पाध्मानवमिज्वराः ।
प्रलापशूलविण्मूत्ररोधो मरणमेव वा ॥ ४७ ॥
स्रोतोविद्धमतो वैद्यः प्रत्याख्याय प्रसाधयेत् ।
उद्धृत्य शल्यं यत्नेन सद्यःक्षतविधानतः ॥ ४८ ॥
अन्नस्य पक्ता पित्तं तु पाचकाख्यं पुरेरितम् ।
दोषधातुमलादीनामूष्मेत्यादेर्यशासनम् ॥ ४९ ॥
तदधिष्ठानमन्नस्य ग्रहणाद् ग्रहणी मता ।
सैव धन्वन्तरिमते कला पित्तधराह्वया ॥ ५० ॥
आयुरारोग्यवीर्य्यौजोभूतधात्वग्निपुष्टये ।
स्थिता पक्वाशयद्वारि भुक्तमार्गार्गलेव सा ॥ ५१ ॥
भुक्तमामाशये रुद्धा सा विपाच्य नयत्यधः ।
बलवत्यबला त्वन्नमाममेव विमुञ्चति ॥ ५२ ॥
ग्रहण्या बलमग्निर्हि स चापि ग्रहणीबलः ।
दूषितेऽग्नावतो दुष्टा ग्रहणी रोगकारिणी ॥ ५३ ॥

यदन्नं देहधात्वोजोबलवर्णादिपोषणम्।
तत्राग्निर्हेतुराहाराद्रसाद्यपक्वात्प्रसादयः ॥ ५४ ॥
अन्न कालेऽभ्यवहृतं कोष्ठ प्राणानिलाहृतम्।
द्रवैर्विभिन्नसङ्घातं नीतं स्नेहेन मार्दवम् ॥ ५५ ॥
सन्धुक्षितः समानेन पचत्यामाशयस्थितम्।
पौदर्योऽग्निर्यथा बाह्यः स्थालीस्थ तोयतण्डुलम् ॥ ५६ ॥
आदौ षड्रसमप्यन्नं मधुरीभूतमीरयेत्।
फेनीभूतं कफ याति विदाहादम्लतां ततः ॥ ५७ ॥
पित्तमामाशयात्कुर्याच्चयवमान च्युत पुनः।
अग्निना शोषितं पक्वं पिण्डित कटुमारुतम् ॥ ५८ ॥
भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः।
पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्त्यनु ॥५९॥
यथास्वं ते च पुष्णन्ति पक्वा भूतगुणान् पृथक्।
पार्थिवाः पार्थिवानेव शेषाः शेषांश्च देहगान् ॥ ६० ॥
किट्टं सारश्च तत्पक्वमन्नं सम्भवति द्विधा।
तत्राच्छ किट्टमन्नस्य मूत्रं विद्याद्घन शकृत् ॥ ६१ ॥
सारस्तु सप्तभिर्भूयो यथास्वं पच्यतेऽग्निभिः।
रसाद्रक्तं ततो मांस मासान्मेदस्ततोऽस्थि च ॥ ६२ ॥
अस्थ्नो मज्जा ततः शुक्रं शुक्राद्गर्भः प्रजायते।
कफः पित्तं मलः खेषु प्रस्वेदो नखरोम च ॥ ६३ ॥
स्नेहोऽस्थिलग्नविशामोजोधातूनां क्रमशो मलाः।
प्रसादकिट्टौ धातूनां पाकादेव द्विधर्च्छतः ॥ ६४ ॥
परस्परोपसम्भाद्धातुस्थैर्यपरम्परा।
केचिदाहुरहोरात्रात् षडहादपरे परे ॥ ६५ ॥
मासेन याति शुक्रत्वमन्न पाकक्रमादिभिः।
सन्ततं भोज्यधातूनां परिवृत्तिस्तु चक्रवत् ॥ ६६ ॥

हृत्यादीनि प्रभावेण सद्यः शुक्रादि कुर्वते ।
प्रायः करोत्यहोरात्रात्कर्मान्यदपि भेषजम् ॥ ६७ ॥
व्यानेन रसधातुर्हि विक्षेपोचितकर्मणा ।
युगपत्सर्वतोऽजस्रं देहे विक्षिप्यते सदा ॥ ६८ ॥
क्षिप्यमाणः स्ववैगुण्याद्रसः सज्जति यत्र सः ।
तस्मिन् विकारं कुरुते खे वर्षमिव तोयदः ॥ ६९ ॥
दोषाणामपि चैव स्यादेकदेशप्रकोपणम् ।
अन्नभौतिकधात्वग्निकर्मेति परिभाषितम् ॥ ७० ॥
अन्नस्य पक्ता सर्वेषां पक्तृणामधिको मतः ।
तन्मूलास्ते हि तद्वृद्धिक्षयवृद्धिक्षयात्मकाः ॥ ७१ ॥
तस्मात्त विधिवद्युक्तैरन्नपानेन्धनैर्हितैः ।
पालयेन्नयतस्तस्य स्थिती ह्यायुर्बलस्थितिः ॥ ७२ ॥
समः समाने स्थानस्थे विषमोऽग्निर्विमार्गगे ।
पित्ताभिमूर्च्छिते तीक्ष्णो मन्दोऽस्मिन् कफपीडिते ॥७३॥
समोऽग्निर्विषमस्तीक्ष्णो मन्दश्चैवं चतुर्विधः ।
यः पचेत् सम्यगेवान्नं भुक्तं सम्यक् समस्वसौ ॥ ७४ ॥
विषमोऽसम्यगप्यान्नं सम्यक् क्वापि चिरात् पचेत् ।
तीक्ष्णो वह्निः पचेत् शीघ्रमसम्यगपि भोजनम् ॥७५॥
मन्दस्तु सम्यगप्यन्नमुपयुक्तं चिरात् पचेत् ।
कृत्वाऽस्य शोषाटोपान्त्रकूजनाऽध्मानगौरवम् ॥ ७६ ॥
सहजं कालजं युक्तिकृतं देहबलं त्रिधा ।
तत्र सत्त्वशरीरोत्थं प्राकृतं सहजं बलम् ॥ ७७ ॥
वयस्कृतमृतूत्थं च कालजं युक्तिजं पुनः ।
विहाराहारजनितं तथोर्जस्करयोगजम् ॥ ७८ ॥
देशोऽल्पवारिद्रुनगो जाङ्गलः स्वल्परोगदः ।
आनूपो विपरीतोऽस्मात् समः साधारणः स्मृतः ॥७९॥

मज्जमेदोवसामूत्रपित्तश्लेष्मशुक्रान्त्यसृक् ॥ ८० ॥
रसो जलं च देहेऽस्मिन्नेकैकाञ्जलिवर्द्धितम्।
पृथक् स्वप्रकृतं प्रोक्तमोजो मस्तिष्करेतसाम् ॥ ८१ ॥
द्वावञ्जली तु स्त्रन्यस्य चत्वारो रजसः स्त्रियाः।
समधातोरिदं मानं विद्याद् वृद्धिक्षयावतः ॥ ८२ ॥
शुक्रासृग्गर्भिणीभोज्यचेष्टागर्भाशयर्त्तुषु।
यः स्याद्दोषोऽधिकस्तेन प्रकृतिः समधोदिता ॥ ८३ ॥
विभुत्वादाशुकारित्वाद् बलित्वादन्यकोपनात्।
स्रोतोन्ध्राब्दहुरोगत्वाद्दोषाणां प्रबलोऽनिलः ॥ ८४ ॥

प्रायो त एव पवनाध्युषिता मनुष्याः
दोषात्मकाः स्फुटितधूसरकेशगात्राः।
शीतद्विषश्चलधृतिस्मृतिबुद्धिचेष्टाः
सौहार्ददृष्टिगतयोऽतिबहुप्रलापाः ॥ ८५ ॥

अल्पपित्तबलजीवितनिद्राः सन्नसक्तचलजर्जरवाचः।
नास्तिका बहुभुजः सविलासा गीतहासरुगयाकलिलोलाः॥८६॥

मधुराम्लपटूष्णसात्म्याकाङ्क्षाः
ह्रस्वदीर्घाकृतयः सश्मश्रुयाताः।
न दृढा न जितेन्द्रिया न चार्य्या
न च कान्ताद्रयिता बहुप्रजा वा ॥ ८७ ॥

नेत्राणि चैषां खरधूसराणि हस्तान्यचारूणि मृतोपमानि।
ऊष्मोल्बितानीव भवन्ति सुप्ते शैलद्रुमांस्ते गगनं च यान्ति ॥८८॥

अधन्या मत्सरा ध्वाताः स्तेनाः प्रोद्बद्धपिण्डिकाः।
खरशृगालोष्ट्रभल्लुकाकोलूकाश्च वातिकाः ॥ ८९ ॥

पित्तं वह्निर्वह्निजं वा यदस्मात्
पित्तोद्रिक्तस्तीक्ष्णतृष्णाबुभुक्षुः।
गौरोष्णाङ्गस्ताम्रहस्ताङ्घ्रिवक्त्रः

शूरो मानी पिङ्गकेशोऽल्परोमा ॥ ९० ॥
दयितमाल्यविलेपनमण्डनः सुचरितः शुचिरान्वितवल्लभः।
विभवसाहसबुद्धिबलान्वितो भवति भोषुगतिर्द्विषतामपि ॥९१॥
मेधावी प्रग्रथिलसन्धिबन्धमांसः
नारीणामनोभिमतोऽल्पशुक्रकामः।
आवास. पतिततरङ्गनीलिकानां
भुङ्क्तेऽन्नं मधुरकषायतिक्तशोतम् ॥ ९२ ॥
धर्मद्वेषी स्वेदनः पूतिगन्धिः
भूर्युच्चारक्रोधपानाशनेर्थः।
सुप्त पश्येत् कर्णिकारान् पलाशान्
दिग्दाहोल्काविद्युदर्कानलांश्च ॥ ९३ ॥
तनूनि पिङ्गानि चलानि चैषां तन्वल्पपक्ष्माणि हिमप्रियाणि।
क्रोधेन मद्येन रवेश्च भासा रागं व्रजन्त्याशु विलोचनानि ॥९४॥
मध्यायुषो मध्यबलाः पण्डिताः क्लेशभीरवः।
व्याघ्रर्क्षकपिमार्जारयक्षानूकाश्च पैत्तिकाः ॥ ९५ ॥
श्लेष्मा सोमः श्लेष्मलस्तेन सोम्यो गूढस्निग्धश्लिष्टसन्ध्यस्थिमांसः।
सुप्तक्षुद्दुःखक्लेशधर्मैरतप्तो बुद्ध्या युक्तः सात्विकः सत्यसन्धः ॥९६॥
प्रियङ्गुदूर्वाशरकाण्डशल्लगोरोचनापद्मसुवर्णवर्णः।
प्रलम्बबाहुः पृथुपीनवक्षा महाललाटो घननीलकेशः ॥९७॥
सुदृङ्नः समसुविभक्तचारुवर्त्मा
बह्वोजोरतिरसशुक्रपुत्रभृत्यः।
धर्मात्मा वदति न निष्ठुरं च जातु
प्रच्छन्नं वहति दृढं चिरं च वैरम् ॥ ९८ ॥
समदहिरदेन्द्रतुल्ययातो
जलदाभोऽधिरूढदृङ्सिंहघोषः।
स्मृतिमानभियोगवान् विनीतो

न च वाल्येऽप्यतिरोदनो न लोलः ॥ ९९ ॥
तिक्तं कषायं कटुकोष्णरूक्षमल्पं स भुङ्क्ते बलवांस्तथापि।
रक्तान्तसुस्निग्धविशालदीर्घसुव्यक्तशुक्लासितपक्ष्मलाक्षः ॥१००॥
अल्पाहारक्रोधपानाग्रनेर्ष्यः
प्राज्ञायुर्वित्तो दीर्घदर्शी वदान्यः।
आढ्यो मन्योः स्थूलवक्षः क्षमावान्
आर्य्यो निद्रालुर्दीर्घसूत्रः कृतज्ञः ॥ १०१ ॥
ऋजुर्विपश्चित् सुभगः सलज्जो भक्तो गुरूणां स्थिरसौहृदश्च।
स्वप्ने सपद्मान् सविहङ्गमालांस्तोयाशयान् पश्यति तोयदांश्च१०२
ब्रह्मरुद्रेन्द्रवरुणतार्क्ष्यहंसगजाधिपैः।
श्लेष्मप्रकृतयस्तुल्यास्तथा सिंहाऽक्षगोवृषैः ॥ १०३ ॥
प्रकृतीर्द्वयसर्वोत्था इन्द्वमर्वगुणोदये।
शौचास्तिक्यादिभिश्चैव गुणैर्गुणमयोर्वदेत् ॥ १०४ ॥
वयस्त्वाषोडशाद् बालं तत्र धात्विन्द्रियौजसाम्।
वृद्धिरासप्ततेर्मध्यं तत्वाहुर्वृद्धिं परं क्षयं ॥ १०५ ॥
स्व स्व हस्तत्रयं मात्रं वपुः पात्रं सुखायुषोः।
न च यदुक्तमुद्दिष्टैरष्टाभिर्निन्दितैर्निजैः ॥ १०६ ॥
अरोमशासितस्थूलदीर्घत्वैः सविपर्ययैः।
सुस्निग्धाः मृदवः सूक्ष्मा नैकमूलाः स्थिराः कचाः ॥१०७॥
ललाटमुन्नतं स्निष्टयङ्गमर्द्धेन्दुसन्निभम्।
कर्णौ नीचोन्नतौ पश्चान्मध्यान्तौ स्निष्टमांसलौ ॥१०८॥
नेत्रे व्यक्तासितसिते सुवृत्ते घनपक्ष्मणी।
उन्नताग्रा महोच्छ्वासा पीनर्जुर्नासिका समा ॥१०९॥
ओष्ठौ रक्तावनुद्वृत्तौ महत्यौ नोल्वणे हनू।
महदास्यं घना दन्ताः स्निग्धाः श्लक्ष्णाः सिताः समाः ॥११०
जिह्वा रक्तायता तन्वी मांसलं चिबुकं महत्।

ग्रीवा ह्रस्वा घना वृत्ता स्कन्धावुन्नतपीवरौ ॥ १११ ॥
उदरं दक्षिणावर्त्तं गूढनाभि समुन्नतम्।
तनुरक्तोन्नतनख स्निग्धमाताम्रमांसलम् ॥११२॥
दीर्घाच्छिद्राङ्गुलि महत्पाणिपादं प्रतिष्ठितम्।
गूढवङ्क्षणसन्धिदृढनिगूढाः सन्धयो दृढाः ॥ ११३ ॥
घोरः स्वरोऽनुनादी च वर्णः स्निग्धः स्थिरप्रभः।
स्वभावजः स्थिरः सत्वमविकारि विपत्स्वपि ॥ ११४ ॥
उत्तरोत्तरसुखैश्च वपुर्गर्भादिनीरुजम्।
आयामज्ञानविज्ञानैर्वर्द्धमानं शनैः शुभम् ॥ ११५ ॥
इति सर्वगुणोपेतं शरीरं शरदां शतम्।
आयुरैश्वर्य्यमिष्टाश्च सर्वे भावाः प्रतिष्ठिताः ॥ ११६ ॥
व्यङ्गादीनि सत्वान्त्याद्यास्थाद्यौ यथोत्तरम्।
बलप्रमाणज्ञानार्थं साराण्युक्तानि देहिनाम् ॥ ११७ ॥
सारैरुपेतः सर्वैः स्यात् परं गौरवसंयुतः।
सर्वारम्भेषु चाशावान् सहिष्णुः सन्ततिः स्थिरः ॥११८॥
अनुत्सेकमदैन्यं च सुखं दुःखं च सेवते।
सत्ववास्थ्यमानस्तु राजसो नैव तामसः ॥ ११९ ॥
दानशीलदयासत्यब्रह्मचर्य्यकृतज्ञताः।
रसायनानि मैत्री च पुण्यायुर्बुद्धिवृद्धिकृद् गुणः ॥ १२० ॥

चतुर्थोऽध्यायः।

अथातो मर्मविभागं शारीरं व्याख्यास्यामः ॥

सप्तोत्तर मर्मशतं

तेषामेकादशादिशेत्।

पृथक् सक्थ्नोस्तथा बाह्वोस्त्रीणि कोष्ठे नवोरसि ॥ १ ॥
पृष्ठे चतुर्दशोर्ध्वं तु जत्रोस्त्रिंशच्च सप्त च।

मध्ये पादतलस्याङ्गुरभितो मध्यमाङ्गुलिम् ॥ २ ॥
तलहृन्नामरुजया तत्र विद्धस्य पञ्चता।
अङ्गुष्ठाङ्गुलिमध्यस्थं क्षिप्रमाक्षेपमारणम् ॥ ३ ॥
तस्योर्ध्वं द्वाङ्गुले कूर्चः पादभ्रमणकम्पकृत्।
गुल्फसन्धेरधः कूर्चशिरःशोफरुजाकरम् ॥ ४ ॥
जङ्घाचरणयोः सन्धौ गुल्फौ रुक्स्तम्भमान्द्यकृत्।
जङ्घान्तरे क्षिन्द्रवस्तिर्मारयत्यसृजः क्षयात् ॥ ५ ॥
जङ्घोर्वोः सङ्गमे जानु खञ्जता तत्र जीवतः।
जानुनस्त्राङ्क्षादूर्ध्वं माक्षूरुस्तम्भशोफकृत् ॥ ६ ॥
उर्व्यूरुमध्ये तद्वेधात्कथिशोषोऽसृसङ्क्षयात्।
ऊरुमूले लोहिताख्य हन्ति पञ्चमसृक्क्षयात् ॥ ७ ॥
मुष्कवङ्क्षणयोर्मध्ये विटपं षण्ढताकरम्।
इति सक्थ्योस्तथा बाह्वोर्मणिबन्धोऽत्र गुल्फवत् ॥ ८ ॥
कूर्परं जानुवत् कौक्षं तयोर्विटपवत् पुनः।
कक्षाचमर्ध्वं कक्षाधृक् कुणित्वं तत्र जायते ॥ ९ ॥
स्थूलान्त्रवङ्क्षणः सद्योघ्नो विड्वातवमनो गुदः।
मूत्राशयो धनुर्वक्रो वस्तिरस्रासमांसगः ॥ १० ॥
एकाधोवदनो मर्म्ये कक्षा सद्यो निहन्त्यसून्।
कट्यैश्मरीव्रणाहिद्धस्तलाभ्युभयतश्च सः ॥ ११ ॥
मूत्रसाक्ष्यं कतो भिन्नो व्रणो रोढ्रेच यत्नतः।
देहामपक्वस्थानानां मर्म्ये सर्वशिराश्रयः ॥ १२ ॥
नाभिः सोऽपि हि सद्योघ्नो
द्वारमामाशयस्य च।
सत्वादिधाम हृदयं स्तनोरःकोष्ठमध्यगम् ॥ १३ ॥
स्तनरोहितमूलाख्ये द्वाङ्गुले स्तनयोर्वदेत्।
ऊर्ध्वाधोऽसृक्कफापूर्णकोष्ठौ नश्येत्तयोः क्रमात् ॥ १४ ॥

अपस्तम्भावुरःपार्श्वे नाड्यावनिलवाहिनी।
रक्तेन पूर्णकोष्ठोऽत्र श्वासात्कासाच्च नश्यति ॥ १५ ॥
पृष्ठवंशोरसोर्मध्ये तयोरेव च पार्श्वयोः।
अधोऽसकूटयोर्विद्यादपालापाख्यमर्मणी ॥ १६ ॥
तयोः कोष्ठोऽसृजा पूर्णे नश्येद् यातेन यूयताम्।
पार्श्वयो पृष्ठवंशस्य श्रोणीकर्णौ प्रतिष्ठिते ॥ १७ ॥
वंशाश्रिते स्रिजोरूर्ध्वं कटीकतरुणे स्मृते।
तत्र रक्तक्षयात् पाण्डुर्हीनरूपो विनश्यति ॥ १८ ॥
पृष्ठवंश ह्युभयतो यौ सन्धी कटिपार्श्वयोः।
जघनस्य बहिर्भागे मर्मणी तौ कुकुन्दरौ ॥ १९ ॥
चेष्टाहानिरधःकाये स्पर्शज्ञानं च तद् व्यधात्।
पार्श्वान्तरनिबद्धौ यावुपरि श्रोणिकर्णयोः ॥ २० ॥
आशयच्छादनौ तौ तु नितम्बौ तरुणास्थिगौ।
अधःशरीरे शोफोऽत्र दौर्बल्यं मरणं ततः ॥ २१ ॥
पार्श्वान्तरनिबद्धौ च मध्ये जघनपार्श्वयोः।
तिर्यगूर्ध्वं च निर्दिष्टौ पार्श्वसन्धी तयोर्व्यधात् ॥ २२ ॥
रक्तपूरितकोष्ठस्य शरीरान्तरसम्भवः।
स्तनमूलार्जवे भागे पृष्ठवंशाश्रये शिरे ॥ २३ ॥
हृद्धत्तौ तत्र विद्धस्य मरणं रक्तसंक्षयात्।
बाहुमूलाभिसम्बद्धे पृष्ठवंशस्य पार्श्वयोः ॥ २४ ॥
असयोः फलके बाहुस्थापशोषौ तयोर्व्यधात्।
ग्रीवामुभयतः स्नावू ग्रीवाबाहुशिरोऽन्तरे ॥ २५ ॥
स्कन्धांसपीठसम्बन्धावंसौ बाहुक्रियाहरौ।
कण्ठनाड्यौ उभयतः शिरा हनुसमाश्रिताः ॥ २६ ॥
चतस्रस्तासु नीले द्वे मन्ये द्वे मर्मणी स्मृते।
स्वरप्रणाशवैक्लव्यं रसाज्ञानं च तद्व्यधे ॥ २७ ॥

कण्ठनाडीमुभयतो जिह्वानासागताः शिराः।
पृथक् चतस्रस्ताः सद्यो घ्नन्त्यसृङ्मांसकाश्रयाः॥ २८॥
ककाटिके शिरोग्रीवासन्धी तत्र चलं शिरः।
अधस्तात्कर्णयोर्निम्ने विधुरे श्रुतिहारिणी॥ २९॥
फणावुभयतो घ्राणमार्गं श्रोत्रपथानुगौ।
अन्तर्गलास्थितौ वेधाद् गन्धविज्ञानहारिणौ॥ ३०॥
नेत्रयोर्बाह्यतोऽपाङ्गौ भ्रुवोः पुच्छान्तयोरधः।
तयोपरि भ्रुवोर्निम्नावावर्त्तावाभ्यमेषु तु॥ ३१॥
अनुकर्णं ललाटान्ते शङ्खौ सद्योविनाशनौ।
केशान्ते शङ्खयोरूर्ध्वमुत्क्षेपौ क्षपनौ पुनः॥ ३२॥
भ्रुवोर्मध्ये त्रयेऽप्यत्र शस्त्रे जीवेदनुद्धृते।
क्षय वा पतिते पाकात् सद्यो नश्यति तूद्धृते॥ ३३॥
जिह्वाचिबुकनासिकाश्रोत्रक्षचतुष्टयसङ्गमे।
तालुन्यास्यानि चत्वारि स्रोतसां तेषु मर्मसु॥ ३४॥
विद्धः शृङ्गाटकाख्येषु सद्यस्त्यजति जीवितम्।
कपाले सन्धयः पञ्च सीमन्तास्त्रिर्यगूर्ध्वगाः॥ ३५॥
भ्रमोन्मादतमोनाशैस्तेषु विद्धेषु नश्यति।
आस्तरो मस्तकस्योर्ध्वं शिरासन्धिसमागमः॥ ३६॥
रोमावर्त्तोऽधिपो नाम मर्म सद्यो हरत्यसून्।
विषमं स्फुरन यत्र पीडिते रुक् च मर्म तत्॥ ३७॥
मांसास्थिस्नायुधमनीशिरासन्धिसमागमः।
स्थानमेति च तेनात्र सुतरां जीवितं स्थितम्॥ ३८॥
बाहुल्येन तु निर्देशः षोढैव मर्मकल्पना।
प्राणायतनसामान्यादैक्यं वा मर्मणां मतम्॥ ३९॥
मांसजानि दशेन्द्राख्यतलहृत्स्तनरोहिताः।
शङ्खौ कटीकतरुणे नितम्बावंसयोः फले॥ ४०॥

अस्थ्यष्टौ

स्नावमर्माणि त्रयोविंशतिराशयः ।
कूर्चकूर्चशिरोऽपाङ्गचिप्रोत्क्षेपांसवस्तयः ॥ ४१ ॥
गुदोपस्तम्भविधुरशृङ्गाटानि नवादिशेत् ।
मर्माणि धमनीस्थानि
सप्तविंशत् शिराश्रयाः ॥ ४२ ॥
हृदयौ मातृकानीले मन्ये कक्षाधरौ क्षणौ ।
विटपे हृदय नाभिः पार्श्वसन्धी स्तनान्तरे ॥ ४३ ॥
अपालापौ स्थपन्यूर्व्यश्वतसो लोहितानि च ।
सन्धी विंशतिरावर्त्तौ मणिबन्धौ कुन्दरौ ॥ ४४ ॥
सीमन्ताः कूर्परौ गुल्फौ कृकाट्यौ जानुनी पतिः ।
मांसमर्मगुदोऽन्येषा स्नावी कक्षाधरौ तथा ॥ ४५ ॥
विटपौ विधुराख्ये च शृङ्गाटानि शिरासु तु ।
अपस्तम्भावपाङ्गौ च धमनीस्थ न तैः स्मृतम् ॥ ४६ ॥
विद्धेऽजस्रमसृक्स्रावो मांसधावनवत्तनुः ।
पाण्डुत्वमिन्द्रियाज्ञान मरणं चाशु मांसजे ॥ ४७ ॥
मज्जान्वितोऽच्छो विच्छिन्नस्रावो रुक् चास्थिमर्मणि ।
आयामाक्षेपकस्तम्भाः स्नावजेऽभ्यधिक रुजा ॥ ४८ ॥
यानस्थानासनाशक्तिर्वैकल्यमथवान्तकः ।
रक्तं सफेनोष्ण धमनीस्थे विचेतसः ॥ ४९ ॥
शिरामर्मव्यधे सान्द्रमजस्रं बहुसृक् स्रवेत् ।
तत्क्षयात्तृड्भ्रमश्वासमोहहिक्काभिरन्तकः ॥ ५० ॥
वस्तु शूकैरिवाकीर्णं रूढे च कुणिखञ्जता ।
बलचेष्टाक्षयः शेष. पर्वशोफश्च सन्धिजे ॥ ५१ ॥
नाभिशङ्खाधिपापानहृच्छृङ्गाटकवस्तयः ।
अष्टौ च मातृकाः सद्यो निघ्नन्त्येकादशविंशतिः ॥५२॥

सप्ताहः परमस्तेषां कालः कालस्य कर्षणे।
त्रयस्त्रिंशदपस्तम्भतलहृत्पार्श्वसन्धयः।
कटीतरुणसीमन्तस्तनमूलेन्द्रवस्तयः।
क्षिप्रापालापबृहतीनितम्बस्तनरोहिताः॥ ५४॥
कालान्तरप्राणहरा मासमासार्द्धजीविताः।
उत्क्षेपौ स्थपनी द्वौणि विश्वघ्नानि
तत्र हि॥ ५५॥
वायुर्मांसवसामज्जमस्तुलुङ्गानि शोषयन्।
ग्रस्यापाये विनिर्गच्छन् श्वासात्कासाच्च हन्त्यसून्॥५६॥
फणावपाङ्गौ विधुरौ नीले मन्ये ककाटिके।
असांसफलकावर्त्तविटपोर्वीकुकुन्दराः॥ ५७॥
सजानुहोहिताख्याऽऽणिकक्षाधृक्कूर्चकूर्पराः।
वैकल्यमिति चत्वारि चत्वारिंशच्च कुर्वते॥ ५८॥
हरन्ति तान्यपि प्राणान् कदाचिदभिघातजः।
अष्टौ कूर्चशिरोगुल्फमणिबन्धा रुजाकराः॥ ५९॥
तेषां विटपकक्षाधृगूर्व्यः कूर्चशिरांसि च।
द्वादशाङ्गुलमानानि द्वाङ्गुले मणिबन्धने॥ ६०॥
गुल्फौ च स्तनमूले च त्र्याङ्गुलौ जानुकूर्परौ।
अपानवस्तिहृन्नाभिनीलाः सीमन्तमाटकाः॥ ६१॥
कूर्चशृङ्गाटमन्याश्च त्रि प्रदेशेन वर्जिताः।
आत्मप्रमाणतो ज्ञेयाः
शेषास्त्वर्द्धाङ्गुलं वदेत्॥६२॥
षष्ट्यधिकं षट च मर्माणि तिलत्रीहिसमान्यपि।
दृष्टानि मर्माण्यन्येषां
चतुर्दशोक्ताः शिरास्तु याः॥६३॥
तर्पयन्ति वपुः कृत्स्नं ता मर्माण्याश्रितास्ततः।

तत्क्षतात् क्षतजात्यर्थप्रवृत्तेर्धातुसंक्षये ॥ ६४ ॥
दुश्चर्मलोमनखोष्ठाः प्रतनोति समीरयन् ।
तेनस्तुदुद्भृतं धत्ते दृष्णाशोषमदभ्रमान् ॥ ६५ ॥
क्षिप्रसस्तम्भयतनुं हरत्येन ततोऽन्तकः ।
वह्नेयेस्मन्वितो गात्रं मर्मस्वभिहतं द्रुतम् ॥ ६६ ॥
छेदनाक्षन्विदेशस्य सङ्कुचन्ति शिरा क्षतः ।
जीवितं प्राणिनां तत्र रक्षे तिष्ठति तिष्ठति ॥ ६७ ॥
सुविक्षतोऽप्यतो जीवेदमर्मण्यि न मर्मणि ।
प्राणघातिनि जीवेत्तु कश्चिद्व्यगुणेन चेत् ॥ ६८ ॥
असम्यगभिघाताच्च सोऽपि वैकल्यमश्नुते ।
तस्मात् क्षारविषाग्न्यादीन् यत्नान्मर्मसु वर्जयेत् ॥६९॥
मर्माभिघातः खल्वोऽपि प्रायशो बाधतेतराम् ।
रोगा मर्माश्रितास्त्वद्य प्रक्रान्ता यत्नतोऽपि च ॥७०॥

पञ्चमोऽध्यायः ।

अथातो विकृतिविज्ञानीयं शारीरं व्याख्यास्यामः ॥
पुष्पं फलस्य धूमोऽग्नेर्वर्षस्य जलदोदयः ।
यथा भविष्यतो लिङ्गं रिष्टं मृत्योस्तथा ध्रुवम् ॥ १ ॥
अरिष्टं नास्ति मरणं दृष्टरिष्टं च जीवितम् ।
अरिष्टे रिष्टविज्ञानं न च रिष्टेऽप्यनैपुणात् ॥ २ ॥
केचित्तु तद् द्विधेत्याहुः स्थाय्यस्थायिविभेदतः ।
दोषाणामपि बाहुल्याद्रिष्टाभासः समुद्भवेत् ॥ ३ ॥
स दोषाणां शमे शाम्येत् स्थाय्यवश्यन्तु मृत्यवे ।
रूपेन्द्रियस्वरच्छायाप्रतिच्छायाक्रियादिषु ॥ ४ ॥
अन्येष्वपि च भावेषु प्राकृतेष्वनिमित्ततः ।
विकृतिर्या समासेन रिष्टं तदिति लक्षयेत् ॥ ५ ॥

केशरोम निरभ्यङ्गं यस्याऽभ्यक्तमिवेक्ष्यते।
यस्यात्यर्थं चले नेत्रे स्वब्यान्तर्गतनिर्गते ॥ ६ ॥
जिह्मे विस्तृतसंक्षिप्ते सक्षिप्तविनतभ्रुणी।
उद्भ्रान्तदर्शने हीनदर्शने नकुलोपमे ॥ ७ ॥
कपोताभे अलाताभे सुप्ते लुलितपक्ष्मणी।
नासिकाऽत्यर्थविवृता संवृता पिटिकाचिता ॥ ८ ॥
उच्छ्वना स्फुटिता म्लाना
यस्यौष्ठौ यात्यधोऽधरः।
ऊर्ध्वं द्वियोयः स्यातां वा पङ्कजम्बूनिभावुभौ ॥ ९ ॥
दन्ताः सशर्कराः श्यावास्ताम्राः पुष्पितपङ्क्तिताः।
सहसैव पतेयुर्वा जिह्वा जिह्मा विसर्पिणी ॥ १० ॥
खेता शुष्का गुरुः श्यावा लिप्ता सुप्ता सकण्टका।
शिरः शिरोधरा वोढुं पृष्ठं वा भारमात्मनः ॥ ११ ॥
हनू वा पिण्डमास्यस्थं शक्नुवन्ति न यस्य च।
यस्यानिमित्तमङ्गानि गुरूण्यलतिघूनि वा ॥ १२ ॥
विषदोषाहिना यस्य खेभ्यो रक्तं प्रवर्त्तते।
उत्सिक्तं मेहनं यस्य हुषणावतिनिःसृतौ ॥१३॥
अतोऽन्यथा वा यस्य स्यात् सर्वे ते कालचोदिताः।
यस्याऽपूर्वाः शिरालेखा बालेन्द्वाकृतयोऽपि वा ॥ १४ ॥
ललाटे वस्तिशीर्षे वा षण्मासान्न स जीवति।
पद्मिनीपत्रवत् तोयं शरीरे यस्य देहिनः ॥ १५ ॥
प्लवते प्लवमानस्य षण्मासं तस्य जीवितम्।
हरिताभाः शिरा यस्य रोमकूपाश्च संहताः ॥ १६ ॥
सोऽन्नाभिलाषी पुरुषः पित्तान्नं मरणमश्नुते।
यस्य गोमयचूर्णाभं चूर्णं मूर्ध्नि मुखेऽपि वा ॥ १७ ॥
सस्नेहं मूर्ध्नि धूमो वा मासान्तं तस्य जीवितम्।

मूर्ध्नि भ्रुवोर्वा कुर्वन्ति सीमन्तावर्त्तका नवाः ॥ १८ ॥
मृत्यु स्वप्नस्य षड्रात्रात् त्रिरात्रादातुरस्य तु।
जिह्वा श्यावा मुखं पूति सद्यमक्षि निमज्जति ॥ १९ ॥
खगा वा मूर्ध्नि लीयन्ते यस्य तं परिवर्जयेत्।
यस्य स्नातानुलिप्तस्य पूर्वं शुष्यत्युरो भृशम् ॥ २० ॥
आर्द्रेषु सर्वगात्रेषु सोऽर्द्धमास न जीवति।
अकस्माद् युगपद् गात्रे वर्णौ प्राक्तनवैकृतौ ॥ २१ ॥
तथैवोपचयग्लानिरीक्ष्यस्नेहादि मृत्यवे।
तस्य स्फुटेयुरङ्गुल्यो नाकृष्टा न स जीवति ॥ २२ ॥
क्ष्वेडकासादिषु तथा यस्याऽपूर्वो ध्वनिर्भवेत्।
क्षीणो दीर्घोऽति वोच्छ्वासः पूतिः सुरभिरेव वा ॥ २३ ॥
आप्लुतानाप्लुते काये यस्य गन्धोऽतिमानुषः।
मलवस्त्रव्रणादौ वा वर्षान्तं तस्य जीवितम् ॥ २४ ॥
भजन्तेऽत्यङ्गसौरभ्याद्य यूकामक्षिकादयः।
त्यजन्ति वाऽतिवैरस्यात् सोऽपि वर्षं न जीवति ॥ २५ ॥
सततोष्मसु गात्रेषु शैत्यं यस्योपलक्ष्यते।
शीतेषु भृशमौष्ण्यं वा स्वेदःस्रावोऽप्यहेतुकः ॥ २६ ॥
यो जातशीतपिटिकः शीताङ्गो वा विदह्यते।
उष्णद्वेषी च शीतार्त्तः स प्रेताधिपगोचरः ॥ २७ ॥
उरस्यूष्मा भवेद् यस्य जठरे चातिशीतता।
भिन्नं पुरीषं तृष्णा च यथा प्रेतस्तथैव सः ॥ २८ ॥
मूत्रं पुरीषं निष्ठ्यूतं शुक्रं वाप्सु निमज्जति।
निष्ठ्यूतं बहुवर्णं वा यस्य मासात् स नश्यति ॥ २९ ॥
घनीभूतमिवाकाशमाकाशमिव यो घनम्।
अमूर्त्तमिव मूर्त्तञ्च मूर्त्तं चाऽमूर्त्तवत् स्थितम् ॥ ३० ॥
तेमस्यतेजस्तद्वच्च शुक्लं कृष्णमसच्च सत्।

अनेत्ररोगसन्दर्शं च बहुरूपमलाञ्छनम् ॥ ३१ ॥
जाग्रद् रक्षांसि गन्धर्वान् प्रेतानन्यांश्च तद्विधान्।
रूपं व्याकृति तद्वच्च यः पश्यति स नश्यति ॥ ३२ ॥
सप्तर्षीणां समीपस्थां यो न पश्यत्यरुन्धतीम्।
ध्रुवमाकाशगङ्गां वा स न पश्यति तां समाम् ॥ ३३ ॥
मेघतोयौघनिर्घोषवीणापणववेणुजान्।
शृणोत्यन्यांश्च यः शब्दानसतो न सतोऽपि वा ॥३४॥
निष्पीड्य कर्णौ शृणुयान्न यो धुकधुकस्वनम्।
तद्वन्मधुरसस्पर्शान् मन्यते यो विपर्ययात् ॥ ३५ ॥
सर्वज्ञो वा न यो यच्च दीपगन्धं न जिघ्रति।
विधिना यस्य दोषाय स्नास्थ्यायाविधिना रसाः ॥३६॥
यः पाणिनेव कीर्णाङ्गो योऽङ्गघातं न वेत्ति वा।
अन्तरेण तपस्तीव्रं योगं वा विधिपूर्वकम् ॥ ३७ ॥
जानात्यतीन्द्रियं यश्च तेषां मरणमादिशेत्।
हीनो दीनः स्वरोऽव्यक्तो यस्य स्याद् गद्गदोऽपि वा ॥३८॥
सहसा यो विमुह्येद् वा विवक्षुर्न स जीवति।
स्वरस्य दुर्बलीभाव हानिं वा बलवर्णयोः ॥ ३९ ॥
रोगहेत्विमयुक्त्या च दृष्ट्वा मरणमादिशेत्।
अपस्वर भाषमाणं प्राप्तं मरणमात्मनः ॥ ४० ॥
श्रोतारं चास्य शब्दस्य दूरतः परिवर्जयेत्।
सस्थानेन प्रमाणेन वर्णेन प्रभयाऽपि वा ॥ ४१ ॥
छाया विवर्त्तते यस्य स्वप्नेऽपि प्रेत एव सः।
आतपादर्शतोयादौ या सस्थानप्रमाणतः ॥ ४२ ॥
छायाऽङ्गात् सम्भवत्युक्ता प्रतिच्छायेति सा पुनः।
वर्णप्रभाश्रया या तु सा छायैव शरीरगा ॥ ४३ ॥
भवेद् यस्य प्रतिच्छाया छिन्ना भिन्नाऽधिकाऽऽकुला।

विशिरा दिशिरा जिह्वा विकृता यदि वाऽन्यथा ॥४४॥
तं समाप्तायुष विद्यान्नचेच्छ्वनिमित्तजा ।
प्रतिच्छायामयी यस्य न चाक्ष्णीच्येत कन्यका ॥ ४५ ॥
खादीनां पञ्च पञ्चानां छाया विविधलक्षणाः ।
नाभसी निर्मलाऽऽनोला सन्ध्या सप्रभेव च ॥ ४६ ॥
वाताद्रजोऽरुणा श्यावा भस्मरूक्षा हतप्रभा ।
विशुद्धरक्ता त्वाग्नेयी दीप्ताभा दर्शनप्रिया ॥ ४७ ॥
शुद्धवैदूर्यविमला सुस्निग्धा तोयजा सुखा ।
स्थिरा स्निग्धा घना शुद्धा श्यामा खेता च पार्थिवी ॥४८॥
वायवो रोगमरणक्लेशायान्याः सुखोदयाः ।
प्रभोक्ता तैजसी सर्वा सा तु सप्तविधा स्मृता ॥४९॥
रक्ता पीता सिता श्यामा हरिता पाण्डुरा सिता ।
तासां याः स्युर्विकासिन्यः स्निग्धाश्च विमलाश्च याः ॥५०॥
ताः शुभा मलिना रूक्षाः सच्छिन्नाश्चासुखोदयाः ।
वर्णमाक्रामति छाया प्रभा वर्णप्रकाशिनी ॥५१॥
आसन्ने लक्ष्यते छाया विकृष्टे भा प्रकाशते ।
नाऽच्छायो नाऽप्रभः कश्चिद्विशेषाश्चिन्तयन्ति तु ॥ ५२ ॥
नृणां शुभाशुभोत्पत्ति काले छाया समाश्रयाः ।
निकषश्चिव यः पादौ च्युतांसः परिसर्पति ॥ ५३ ॥
हीयते बलत. शश्वद्योऽन्नमश्नन् हित बहु ।
योऽल्पाशी बहुविण्मूत्रो बह्वाशी चाल्पमूत्रविट् ॥५४॥
योऽल्पाशी वा कफेनार्त्तो दीर्घं श्वसिति चेष्टते ।
दीर्घमुच्छ्वस्य यो ह्रस्व निःश्वस्य परिताम्यति ॥ ५५ ॥
ह्रस्वश्च यः प्रश्वसिति व्याविद्धं स्पन्दते भृशम् ।
शिरो विक्षिपते कृच्छ्राद्योऽवयित्वा प्रपाणिकौ ॥५६॥
यो ललाटात् स्रुतस्वेदः स्रवसन्धानबन्धनः ।

उत्थाप्यमानः संमुह्येद् यो बली दुर्बलोऽपि वा ॥ ५७ ॥
उत्तान एव स्वपिति यः पादौ विकरोति च।
शयनासनकुड्यादौ योऽसदेव जिघृक्षति ॥ ५८ ॥
अहास्यहासी संमुह्यन् यो लेढि दशनच्छदौ।
उत्तरोष्ठं परिलिहन् फूत्काराश्च करोति यः ॥ ५९ ॥
यमभिद्रवति छाया कृष्णा पीताऽरुणाऽपि वा।
भिषग् भेषजपानान्नगुरुमित्रद्विषश्च ये ॥ ६० ॥
वश्यगाः सर्व एवैते विज्ञेयाः समवर्त्तिनः।
ग्रीवाललाटहृदयं यस्य स्विद्यति शीतलम् ॥ ६१ ॥
उष्णोऽपरः प्रदेशश्च शरण तस्य देवता।
योऽणुज्योतिरनेकाग्रो दुश्छायो दुर्मनाः सदा ॥ ६२ ॥
बलि बलिभृतो यस्य प्रणीत नोपभुञ्जते।
निर्निमित्तच्च यो मेधां श्रीभामुपचय श्रियम् ॥ ६३ ॥
प्राप्नोत्यतो वा विभ्रश्च स प्राप्नोति यमक्षयम्।
गुणदोषमयी यस्य स्वस्थस्य व्याधितस्य वा ॥ ६४ ॥
यात्यन्यथात्व प्रकृतिः षण्मासान्न स जीवति।
भक्तिः शीलं स्मृतिस्त्यागो बुद्धिर्बलमहेतुकम् ॥ ६५ ॥
षड्ङ्गानि निवर्त्तन्ते षड्भिर्मासैर्भरिष्यतः।
मत्तवद् गतिवाक्कर्म्ममोहा मासान् मरिष्यतः ॥६६॥
नश्यत्यजानन् षडहात् केशलुञ्चनवेदनाम्।
न याति यस्य चाहारः कण्ठं कण्ठामयार्दिते ॥ ६७ ॥
प्रेषा. प्रतीपतां यान्ति प्रेताकृतिरुदीर्य्यते।
यस्य निद्रा भवेन्नित्य नैव वा न स जीवति ॥ ६८ ॥
वक्त्रमापूर्य्यतेऽश्रूणां स्विद्यतश्चरणौ भृशम्।
चक्षुश्चाकुलतां याति यमराज्यं गमिष्यतः ॥ ६९ ॥
यैः पुरा रमते भावैररतिस्तैर्न जीवति।

सहसा जायते यस्य विकारः सर्वलक्षणः ॥ ७० ॥
निवर्त्तते वा सहसा सहसा स विनश्यति ।
ज्वरो निहन्ति बलवान् गम्भीरो दैवरात्रिकः ॥ ७१ ॥
स प्रलापभ्रमश्वासक्षीण शूनं हृतानलम् ।
अक्षामं सक्तवचनं रक्ताक्षं हृदि शूलिनम् ॥ ७२ ॥
सशुष्ककासः पूर्वाह्णे योऽपराह्णेऽपि वा भवेत् ।
बलमांसविहीनस्य श्लेष्मकाससमन्वितः ॥ ७३ ॥
रक्तपित्त भृश रक्त क्षणमिन्द्रधनु प्रभम् ।
ताम्रहारिद्रहरित रूप रक्त प्रदर्शयेत् ॥ ७४ ॥
रोमकूपप्रविसृत कण्ठास्यहृदये सजत् ।
वाससो रञ्जन पूति वेगवच्चातिभूरि च ॥ ७५ ॥
हृद्ग पाण्डुज्वरच्छर्दिकासशोफातिसारिणम् ।
कासश्वासौ ज्वरच्छर्दितृष्णातीसारशोफिनम् ॥ ७६ ॥
यक्ष्मा पार्श्वरुजालाहरक्तच्छर्दिसतापिनम् ।
छर्दिर्वेगवती मूत्रशकृद्गन्धिः सचन्द्रिका ॥ ७७ ॥
सास्रविट्पूयरुक् कासश्वासवत्यनुषङ्गिणी ।
तृष्णान्यरोगचयितं बहिर्जिह्वं विचेतनम् ॥ ७८ ॥
मदात्ययोऽतिशीतार्त्तं क्षीण तैलप्रभाननम् ।
अर्शांसि पाणिपन्नाभिगुदमुष्कास्यशोफिनम् ॥ ७९ ॥
हृत्पार्श्वाङ्गरुजाच्छर्दिपायुपाकज्वरातुरम् ।
अतीसारी यकृत्पिण्डमांसधावनमेचकैः ॥ ८० ॥
तुल्यस्तैलघृतक्षीरदधिमज्जवसासवैः ।
मस्तुलुङ्गमधूपूयवेसवारास्रुमाक्षिकैः ॥ ८१ ॥
अतिरिक्तासितस्निग्धपूत्यच्छघनवेदनः ।
कर्बुरः प्रस्रवन् धातून् निष्पुरीषोऽथवाऽतिविट् ॥८२॥
तन्तुमान् मक्षिकाक्रान्तो राजीमांश्चन्द्रकैर्युतः ।

शीर्णपायुबलिं मुक्तनालं पर्वास्थिशूलिनम् ॥ ८३ ॥
सस्रपायुं बलक्षीणमन्नमेवोपवेशयेत्।
सदृट्श्वासज्वरच्छर्दिदाहानाहप्रवाहिकः ॥ ८४ ॥
अश्मरीशूनवृषणं बद्धमूत्रं रुजार्दितम्।
मेहस्तृड्दाहपिटिकामांसकोथातिसारिणम् ॥ ८५ ॥
पिटिकामर्महृत्पृष्ठस्तनांसगुदमूर्धगाः।
पर्वपाटकरुग्ा वा मदोत्साह प्रमेहिणम् ॥ ८६ ॥
सर्वेषु मांससङ्कोचदाहतृष्णामदज्वरैः।
विसर्पमर्मसंरोधहिक्काश्वासभ्रमक्लमैः ॥ ८७ ॥
गुल्मः पृथुपरीणाहो घनः कूर्म इवोन्नतः।
शिरानद्धो ज्वरच्छर्दिहिक्काध्मानरुजान्वितः ॥ ८८ ॥
कासपीनसहृल्लासश्वासातीसारशोफवान्।
क्लिन्नमूत्रसंग्रहश्वासशोफहिक्काज्वरभ्रमैः ॥ ८९ ॥
मूर्च्छाच्छर्यतिसारैश्च जठरं हन्ति दुर्बलम्।
शूनाक्ष कुटिलोपस्थमुपक्लिन्नतनुत्वचम् ॥ ९० ॥
विरेचनहृतानाहमानाह्यन्तं पुनः पुनः।
पाण्डुरोगः क्षयथुमान् पीताक्षिनखदर्शनम् ॥ ९१ ॥
तन्द्रादाहारुचिच्छर्दिमूर्च्छाध्मानातिसारवान्।
अनेकोपद्रवयुतः पादाभ्यां प्रसृतो नरम् ॥ ९२ ॥
नारीं शोफो मुखाज्जन्ति कुक्षिगुह्यादुभावपि।
राजीचितः सवम्छर्दिज्वरश्वासातिसारिणम् ॥ ९३ ॥
ज्वरातिसारौ शोफान्ते क्षयथुर्वातयोः क्षये।
दुर्बलस्य विशेषेण जायन्तेऽन्ताय देहिनः ॥ ९४ ॥
क्षयथुर्यस्य पादस्थः परिसर्पे च पिण्डिकं।
सीदतः सक्थिनी चैव त भिषक् परिवर्जयेत् ॥ ९५ ॥
आनन हस्तपादं च विशेषाद् यस्य शुष्यतः।

शूयेते वा विना देहात् स मासाद् याति पञ्चताम् ॥९६॥
विसर्पकासवैवर्ण्यज्वरमूर्च्छाङ्गभङ्गवान्।
भ्रमास्यशोषहृल्लासदेहसादातिसारवान् ॥ ९७ ॥
कुष्ठं विशीर्यमाणाङ्ग रक्तनेत्र हतस्वरम्।
मन्दाग्निं जन्तुभिर्जुष्ट हन्ति तृष्णातिसारिणम् ॥९८॥
वायुः सुप्तत्वच भग्नं कफशोफरुजातुरम्।
वातास्रमोहमूर्च्छायमदस्वप्नज्वरान्वितम् ॥ ९९ ॥
शिरोग्रहारुचिश्वासस्तङ्कोचस्फोटकोथवत्।
शिरोरोगारुचिश्वासमोहविड्भेदहृद्भ्रमैः ॥ १०० ॥
घ्नन्ति सर्वामयाः क्षीणस्वधातुबलानलम्।
वातव्याधिरपस्मारी कुष्ठी रक्त्युदरी क्षयी ॥ १०१ ॥
गुल्मी मेही च तान् क्षीणान् विकारेऽल्पेऽपि वर्जयेत्।
बलमांसक्षयस्तीव्रो रोगहृद्विररोचकः ॥ १०२ ॥
यस्यातुरस्य लक्ष्यन्ते त्रीन् पक्षान्न स जीवति।
वाताऽष्ठीलाऽतिसङ्का तिष्ठन्ती दारुणा हृदि ॥ १०३ ॥
तृष्णया तु परीतस्य सद्यो मुष्णाति जीवितम्।
शैथिल्य पिण्डिके वायुर्नीत्वा नासां च जिह्मताम् ॥१०४॥
क्षीणस्यायस्य मन्ये वा सद्यो मुष्णाति जीवितम्।
नाभीगुदान्तर गत्वा वङ्क्षणौ वा समाश्रयन् ॥ १०५ ॥
गृहीत्वा पायुहृदये क्षीणदेहस्य वा बली।
मलान् वस्तिशिरो नाभि विबध्य जनयन् रुजम् ॥१०६॥
कुर्वन् वङ्क्षणयोः शूल तृष्णां भिन्नपुरीषताम्।
श्वास वा जनयन् वायुर्गृहीत्वा गुदवङ्क्षणम् ॥ १०७ ॥
वितत्य पर्शुकाग्राणि गृहीत्वोरस्य मारुतः।
स्तिमितस्याततात्यस्य सद्यो मुष्णाति जीवितम् ॥१०८॥
सहसा ज्वरसन्तापस्तृष्णा मूर्च्छा बलक्षयः ॥

विश्लेषणं च सन्धीनां सुमूर्छोपजायते ॥ १०९ ॥
गोसर्गं वदनाद् यस्य स्वेदः प्रच्यवते भृशम्।
क्षेपज्वरोपतप्तस्य दुर्लभं तस्य जीवितम् ॥ ११० ॥
प्रवालगुलिकाभासा यस्य गण्डे मसूरिकाः।
त्वग्यद्याश्च विनश्यन्ति न चिरात् स विनश्यति ॥ १११ ॥
मसूरदलप्रख्यास्तथा विद्रुमसन्निभाः।
अन्तर्वक्त्राः किणाभाश्च विस्फोटा देहनाशनाः ॥ ११२ ॥
कामलाऽक्ष्णोर्मुखे पूर्णं शङ्खयोर्मुक्तमासता।
सन्त्रासश्चोष्णताऽङ्गे च यस्य तं परिवर्जयेत् ॥ ११३ ॥
अकस्मादनुधावच्च विष्टब्धं त्वक्समाश्रयम्।
यो वातजो न शूलाय स्याच्च दाहाय पित्तजः ॥ ११४ ॥
कफजो न च पूयाय मर्मजश्च रुजे न यः।
अचूर्णधूर्णकोर्णाभो यश्चाऽकस्माच्च दृश्यते ॥ ११५ ॥
रूपं शक्तिध्वजादीनां सर्वांस्तान् वर्जयेद्व्रणान्।
विषमं त्वमारुतवह क्रमिणं च भगन्दरम् ॥ ११६ ॥
घट्टयन् जानुना जानु पादावुद्यम्य पातयन्।
योऽपास्यति मुहुर्वक्त्रमारुतो न स जीवति ॥ ११७ ॥
दन्तैश्छिन्दन्नखाग्राणि तैश्च केशांस्तृणानि च।
भूमिं काष्ठेन विलिखन् लोष्ट लोष्टेन ताड़यन् ॥ ११८ ॥
हृष्टरोमा सान्द्रमूत्रः शुष्ककासी ज्वरी च यः।
मुहुर्हसन् मुहुः क्ष्वेडन् शय्यां पादेन हन्ति यः ॥११९॥
मुहुश्छिद्राणि विमृशन्नातुरो न स जीवति।
मृत्यवे सहसार्त्तस्य तिलकव्यङ्गविप्लवः ॥ १२० ॥
मुखे दन्तनखे पुष्पं जठरे विविधाः शिराः।
ऊर्ध्वश्वास गतोष्माणं शूलोपहतवङ्क्षणम् ॥ १२१ ॥
अर्म वाऽनधिगच्छन्तं बुद्धिमान् परिवर्जयेत्।

विकारा यस्य वर्द्धन्ते प्रकृतिः परिहीयते ॥ १२२ ॥
सहसा सहसा तस्य मृत्युर्हरति जीवितम्।
यमुद्दिश्यातुरं वैद्यः सम्पादयितुमौषधम् ॥ १२३ ॥
यतमानो न शक्नोति दुर्लभं तस्य जीवितम्।
विज्ञातं बहुशः सिद्धं विधिवच्चावतारितम् ॥ १२४ ॥
न सिध्यत्यौषधं यस्य नास्ति तस्य चिकित्सितम्।
भवेद् यस्यौषधेऽन्ने वा कल्पमाने विपर्ययः ॥ १२५ ॥
अकस्माद् वर्णमन्धादेः स्वस्थोऽपि न स जीवति।
निवाते सेन्धनं यस्य ज्योतिश्चाप्युपशाम्यति ॥ १२६ ॥
आतुरस्य गृहे यस्य भिद्यन्ते वा पतन्ति वा।
अतिमात्रममत्राणि दुर्लभं तस्य जीवितम् ॥ १२७ ॥
यं नरं सहसा रोगो दुर्बलं परिमुञ्चति।
संशयं प्राप्तमाचे यो जीवितं तस्य मन्यते ॥ १२८ ॥
कथयेन्नैव पृष्टोऽपि दुःखं मरणमिषक्।
गतासोर्बन्धुमित्राणां न चेच्छेत् तं चिकित्सितुम् ॥ १२९ ॥
यमदूतपिशाचाद्यैर्यत्परासुरुपास्यते।
घ्नन्ति रौषधवीर्याणि तस्मात्तं परिवर्जयेत् ॥ १३० ॥
आयुर्वेदफलं कृत्स्नं यदायुर्ह्रीं प्रतिष्ठितम्।
रिष्टज्ञानाद्धतस्तस्मात्सर्वदैव भवेद्भिषक् ॥ १३१ ॥
मरणं प्रणिना दृष्टमायुःपुण्योभयक्षयात्।
तयोरप्यक्षयाद् दृष्टं विषमापरिहारिणाम् ॥ १३२ ॥

षष्ठोऽध्यायः।

अथातो दूतादिविज्ञानीयं व्याख्यास्यामः ॥
पाषण्डाश्रमवर्णानां सवर्णाः कर्मसिद्धये।
त एव विपरीताः स्युर्दूताः कर्मविपत्तये ॥ १ ॥

दीनं भीतं द्रुतं त्रस्तं रूक्षामङ्गलवादिनम् ।
श्लिष्टं दक्षिण षण्ढं मुण्डश्मश्रुं जटाधरम् ॥ २ ॥
अमङ्गलाढ्य क्रूरकर्माणं मलिनं स्त्रियम् ।
अनेकव्याधित व्यङ्ग रक्तमाल्यानुलेपनम् ॥ ३ ॥
तैलपङ्काङ्कित जीर्णविवर्णार्द्रैकवाससम् ।
खरोष्ट्रमहिषारूढ़ काष्ठलोष्टादिमर्दिनम् ॥ ४ ॥
नानुगच्छेद्विषग् दूतमाह्वयन्तं च दूरतः ।
अशस्तचिन्तावचने नग्ने छिन्दति भिन्दति ॥ ५ ॥
जुह्वाने पावके पिण्डान् पित्रभ्यो निर्वपत्यपि ।
सुप्ते मुक्तकचेऽभ्यक्ते रुदत्यप्रयते तथा ॥ ६ ॥
वैद्ये दूता मनुष्याणामागच्छन्ति मुमूर्षताम् ।
विकारसामान्यगुणे देशे काले ऽथवा भिषक् ॥ ७ ॥
दूतमभ्यागत दृष्ट्वा नातुर तमुपाचरेत् ।
स्पृशन्तो नाभिनासास्यकेशरोमनखद्विजान् ॥ ८ ॥
गुह्यपृष्ठस्तनग्रीवाजठरानाभिकाङ्गुलीः ।
कार्पासबुध्नसीसास्थिकपालमुशलोपलम् ॥ ९ ॥
मार्जनीशूर्पचैलान्तभस्माङ्गारदशातुषान् ।
रज्जूपानत्तुलापाशमन्यद्वा भग्नविच्युतम् ॥ १० ॥
तत्पूर्वदर्शने दूता व्याहरन्ति मरिष्यताम् ।
तथाऽर्धरात्रे मध्याह्ने सन्ध्ययोः पूर्ववासरे ॥ ११ ॥
षष्ठीचतुर्थीनवमीराहुकेतूदयादिषु ।
भरणीकृत्तिकाऽऽश्लेषापूर्वाऽऽर्द्रा पैत्रमनैर्ऋते ॥ १२ ॥
यस्मिंश्च दूते ब्रुवति वाक्यमातुरसंश्रयम् ।
पश्येन्निमित्तमशुभ तं च नानुव्रजेद्भिषक् ॥ १३ ॥
सद्यथा विकलः प्रेतः प्रेतालङ्कार एव वा ।
क्षिप्तं दग्धं विनष्टं वा तद्वादीनि वचांसि वा ॥ १४ ॥

रसो वा कटुकस्तीव्रो गन्धो वा कौणपो महान् ।
स्पर्शो वा विपुलः क्रूरो यद्यान्यदपि तादृशम् ॥ १५ ॥
तत्सर्वमभितो वाक्य वाक्यकालेऽथवा पुनः ।
दूतमभ्यागत दृष्ट्वा नातुर तमुपाचरेत् ॥ १६ ॥
हाहाक्रन्दितमुत्क्रुष्टं रुदित स्खलनं च्युतम् ।
वस्त्रातपत्रपादत्रव्यसन व्यसनोत्तरम् ॥ १७ ॥
चैत्यध्वजाना पात्राणां पूर्णानां च निमज्जनम् ।
हतानिष्टप्रवादाश्च दूषण भस्मपांसुभिः ॥ १८ ॥
पथस्थे दोऽहिमार्जारगोधासरठवानरैः ।
सोमां प्रतिदिश वाचं क्रूराणां मृगपक्षिणाम् ॥ १९ ॥
क्षणधान्यगुडोदश्वित्क्षवणासवचर्मणाम् ।
सर्षपाणां वसातैलक्षणपङ्कैन्धनस्य च ॥ २० ॥
क्लीवक्रूरखपाकानां जालवागुरयोरपि ।
कर्दितस्य पुरीषस्य पूतिदुर्दर्शनस्य च ॥ २१ ॥
निःसारस्य व्यवायस्य कार्पासादेररेरपि ।
शयनासनयानानामुत्तानानां तु दर्शनम् ॥ २२ ॥
न्युब्जानामितरेषां च पात्रादीनामशोभनम् ।
पुसंज्ञाः पक्षिणो वामाः स्त्रीसंज्ञा दक्षिणाः शुभाः ॥२३॥
प्रदक्षिणं खगमृगा यान्तो नैव श्वजम्बुकाः ।
आयुष्मान्श्च मृगाः श्रस्ताः श्रस्ता नित्यं च दर्शने ॥ २४ ॥
चाषभासभरद्वाजनकुलच्छागबर्हिणः ।
अशुभं सर्वथोलूकविडालसरठेक्षणम् ॥ २५ ॥
प्रशस्ताः कीर्त्तने कोलगोधाहिश्वशजाहकाः ।
न दर्शने न विरुते वानरर्क्षवतोऽन्यथा ॥ २६ ॥
धनुरैन्द्रं च लालाटमशुभं शुभमन्यतः ।
अग्निपूर्णानि पात्राणि भिन्नानि विशिखानि च ॥२७॥

दध्यक्षतादि निर्गच्छन् वक्ष्यमाणं च मङ्गलम्।
वैद्यो मरिष्यतां वेश्म प्रविशन्नेव पश्यति ॥ २८ ॥
दूताद्यसाधु दृष्ट्वैवं व्यजेदार्त्तमतोऽन्यथा।
करुणाशुद्धमनानो यत्नतः समुपाचरेत् ॥ २९ ॥
दध्यक्षतेक्षुनिष्पावप्रियङ्गुमधुसर्पिषाम्।
यवानां चन्दनस्याक्षतानां च रघणादीपसरोरुहाम् ॥ ३० ॥
दूर्वाङ्कुरमल्यमांसानां लाजानां फलभक्ष्ययोः।
रत्नैर्भपूर्णकुम्भानां कन्यायाः स्यन्दनस्य च ॥ ३१ ॥
नरस्य वर्द्धमानस्य देवतानां नृपस्य च।
शुक्लानां सुमनोबालचामराम्बरवाजिनाम् ॥ ३२ ॥
शङ्खसाधुद्विजोणीषतोरणस्वस्तिकस्य च।
भूमेः समुद्धृतायाश्च वह्नेः प्रज्वलितस्य च ॥ ३३ ॥
मनोज्ञस्यान्नपानस्य पूर्णस्य शकटस्य च।
नृभिर्धेन्वाः सवत्साया वडवायाः स्त्रिया अपि ॥ ३४ ॥
जीवञ्जीवकसारङ्गसारसप्रियवादिनाम्।
रुचकादर्शसिद्धार्थरोचनानां च दर्शनम् ॥ ३५ ॥
गन्धः सुसुरभिर्वर्णः सुशुक्लो मधुरो रसः।
गोपतेरनुकूलस्य स्वरस्तद्वद्वामपि ॥ ३६ ॥
मृगपक्षिनराणां च शोभिनां शोभना गिरः।
कृतध्वजपताकानामुत्क्षेपणमभिष्टुतिः ॥ ३७ ॥
भेरीमृदङ्गशङ्खानां शब्दाः पुण्याहनिःस्वनाः।
वेदाध्ययनशब्दाश्च सुखो वायुः प्रदक्षिणः ॥ ३८ ॥
पथिवेश्मप्रवेशे च विद्यादारोग्यलक्षणम्।
इत्युक्तं दूतशकुन स्वप्नानूर्द्धं प्रचक्ष्यते ॥ ३९ ॥
स्वप्ने मद्यं सह प्रेतैर्यः पिबन् क्षुयते शुना।
स मर्त्यो मृत्युना शीघ्रं ज्वररूपेण नीयते ॥ ४० ॥

रक्तमाल्यवपुर्वस्त्रो यो हसन् म्रियते स्त्रिया ।
सोऽसृपित्तेन
महिषश्ववराहोष्ट्रगर्दभैः ॥ ४१ ॥
यः प्रयाति दिशं याम्यां मरणं तस्य यक्ष्मणा ।
लता कण्टकिनी वंशस्तालो वा हृदि जायते ॥ ४२ ॥
यस्य तस्याश्च गुल्मेन
यस्य वह्निमनर्चिषम् ।
जुह्वतो घृतसिक्तस्य नग्नस्योरसि जायते ॥ ४३ ॥
यज्ञं स नश्येत् कुष्ठेन
चण्डालैः सह यः पिबेत् ।
स्नेहं बहुविधं स्वप्ने स प्रमेहेण नश्यति ॥ ४४ ॥
उन्मादेन जले मज्जेद् यो नृत्यन् राक्षसैः सह ।
अपस्मारेण यो मर्त्यो नृत्यन् प्रेतैर्न नीयते ॥ ४५ ॥
यानं खरोष्ट्रमार्जारकपिशार्दूलशूकरैः ।
यस्य प्रेतैः शृगालैर्वा स मृत्योर्वर्त्तते मुखे ॥ ४६ ॥
अपूपशष्कुलीजग्ध्वा विबुद्धस्तद्विधं वमन् ।
न जीवत्य-
चिरोगाय सूर्य्येन्दुग्रहणेक्षणम् ॥ ४७ ॥
सूर्य्याचन्द्रमसोः पातदर्शनं दृष्टिनाशनम् ।
मूर्ध्नि वंशलतादीनां सम्भवो वयसां तथा ॥ ४८ ॥
निलयो मुण्डता काकगृध्रार्द्यैः परिवारणम् ।
तथा प्रेतपिशाचस्त्रीद्रविडाम्ब्रगवाश्वनैः ॥ ४९ ॥
सङ्गो वेतलतावंशशठकण्टकसङ्कटे ।
श्वभ्रश्मशानशयनं पतनं पांसुभस्मनोः ॥ ५० ॥
मज्जनं जलपङ्कादौ शीघ्रेण स्रोतसा हृतिः ।
नृत्यवादित्रगीतानि रक्तस्रग्वस्त्रधारणम् ॥ ५१ ॥

वयोऽङ्गहरिभक्षो विवाहः श्मश्रुकर्म च।
पक्वान्नस्नेहमद्याग्राः प्रच्छर्दनविरेचने ॥ ५२ ॥
हिरण्यलोहयोर्लाभः कलिर्बन्धपराजयौ।
उपानद्युगनाशश्च प्रपातः पादचर्मणोः ॥ ५३ ॥
हर्षो भृशं प्रकुपितैः पित्तभिश्चावभर्त्सनम्।
प्रदीपग्रहनक्षत्रदन्तदैवतचक्षुषाम् ॥ ५४ ॥
पतनं वा विनाशो वा भेदनं पर्वतस्य च।
कानने रक्तकुसुमे पापकर्मनिवेशने ॥ ५५ ॥
चिताभ्रकारसम्बाधे जनन्याश्च प्रवेशनम्।
यातः प्रासादशैलादेर्मत्स्येन ग्रसनं तथा ॥ ५६ ॥
काषायिणामसौम्यानां नग्नानां दण्डधारिणाम्।
रक्ताम्बराणां च कृष्णानां दर्शनं जातु नेष्यते ॥ ५७ ॥
कृष्णा पापाननाचारा दीर्घकेशनखस्तनी।
विरागमाल्यवसना स्वप्नकालनिशा मता ॥ ५८ ॥
मनोवहानां पूर्णत्वात् स्रोतसां प्रबलैर्मलैः।
दृश्यन्ते दारुणाः स्वप्ना रोगी यैर्याति पञ्चताम् ॥५९॥
अरोगः संशयं प्राप्य कश्चिदेव विमुच्यते।
दृष्टः श्रुतोऽनुभूतश्च प्रार्थितः कल्पितस्तथा ॥ ६० ॥
भाविको दोषजश्चेति स्वप्नः सप्तविधो मतः।
तेष्वाद्या निष्फलाः पञ्च यथास्वप्रकृतिर्दिवा ॥ ६१ ॥
विस्मृतो दीर्घकृच्छ्रोऽति
पूर्वरात्रे चिरात् फलम् ॥६२॥
दृष्टः करोति तुच्छं च
गोसर्गे तदहर्मध्यत् ॥ ६३ ॥
निद्रया चानुपहतः प्रतीपैर्वचनैस्तथा।
याति पापोऽल्पफलतां दानहोमजपादिभिः ॥ ६४ ॥

अकल्याणमपि स्वप्नं दृष्ट्वा तत्रैव यः पुनः।
पश्येत् सौम्यं शुभं तस्य शुभमेव फलं भवेत्॥ ६५॥
देवान् द्विजान् गोवृषभान् जीवतः सुहृदो नृपान्।
साधून् यशस्विनो वह्निमिज्यांश्च जलाशयान्॥६६॥
कन्यां कुमारकान् गौरान् शुक्लवस्त्रान् सुतेजसः।
नराश्वनं दीप्ततनुं समन्ताद्रुधिरोक्षितः॥ ६७॥
यः पश्येल्लभते यो वा क्षत्रादर्शविषामिषम्।
शुक्लाः सुमनसो वस्त्रममेध्यालेपनं फलम्॥ ६८॥
शैलप्रासादसफलद्रुचसिंहनरद्विपान्।
आरोहेद्वोऽध्वयानं च तरेच्चदक्षदोदधीन्॥ ६९॥
पूर्वोत्तरेण गमनमगम्यागमनं मृतम्।
सम्बाधाद्रि'सृतिर्देवैः पितृभिश्चाभिनन्दनम्॥ ७०॥
रोदनं पतितोत्थानं द्विषतां चावमर्दनम्।
यस्य स्यादायुरारोग्यं चित्तं बहु च सोऽश्नुते॥ ७१॥
मङ्गलाचारसम्पन्नः परिवारस्त्वथातुरः।
श्रद्दधानोऽनुकूलश्च प्रभूतद्रव्यसङ्ग्रहः॥ ७२॥
सत्वलक्षणसंयोगो भक्तिर्वैद्यद्विजातिषु।
चिकित्सायामनिर्वेदस्त्रिदारोग्यस्य लक्षणम्॥ ७३॥
इत्यत्र जन्ममरणं यतः सम्यगुदाहृतम्।
शारीरस्य ततः स्थानं शारीरमिदमुच्यते॥ ७४॥

इति श्रीवैद्यपतिसिंहगुप्तसूनोर्वाग्भटस्य कृतावष्टाङ्गहृदय-संहितायां शारीरस्थानं समाप्तमध्यायश्च षष्ठः॥

निदानस्थानम् ।

प्रथमोऽध्यायः ।

अथातः सर्वरोगनिदानं व्याख्यास्यामः ॥

इति ह स्माहुरात्रेयादयो महर्षयः ।

रोगः पापमा ज्वरो व्याधिर्विकारो दुःखमामयः ॥ १ ॥

यक्ष्मातङ्कगदाबाधशब्दाः पर्यायवाचिनः ।

निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा ॥ २ ॥

सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् ।

निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः ॥ ३ ॥

निदानमाहुः पर्यायैः

प्राग्रूपं येन लक्ष्यते ।

उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः ॥ ४ ॥

लिङ्गमव्यक्तभावत्वाद् व्याधीनां तद्यथायथम् ।

तदेव व्यक्तता यातं रूपमित्यभिधीयते ॥ ५ ॥

संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृतिः ।

हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणाम् ॥ ६ ॥

औषधान्नविहाराणामुपयोगं सुखावहम् ।

विद्यादुपशयं

व्याधेः स हि सात्म्यमिति स्मृतः ॥ ७ ॥

विपरीतोऽनुपशयो व्याध्यसात्म्याभिसंज्ञितः ।

यथा दुष्टेन दोषेण यथा चानुविसर्पता ॥ ८ ॥

निर्वृत्तिरामयस्यासौ सम्प्राप्तिर्जातिरागतिः ।

सङ्ख्याविकल्पप्राधान्यबलकालविशेषतः ॥ ९ ॥

सा भिद्यते यथाऽऽवेव वक्ष्यन्तेऽष्टौ ज्वरा इति।
दोषाणां समवेतानां विकल्पोऽंशांशकल्पना ॥ १० ॥
स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत्।
हेत्वादिकात्स्न्र्यावयवैर्बलावलविशेषणम् ॥ ११ ॥
नक्तन्दिनर्त्तुभुक्तांशैर्व्याधिकालो यथामलम्।
इति प्रोक्तो निदानार्थः
तं व्यासेनोपदेक्ष्यते ॥ १२ ॥
सर्वेषामेव रोगाणां निदानं कुपिता मलाः।
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् ॥ १३ ॥
अहित विविधो योगस्त्रयाणां प्रागुदाहृतः।
तिक्तोषणकषायाम्लरूक्षप्रमितभोजनैः ॥ १४ ॥
धारणोदीरणनिशाजागराल्पुच्चभाषणैः।
क्रियातियोगभीशोकचिन्ताव्यायाममैथुनैः ॥ १५ ॥
ग्रीष्माहोरात्रिमुक्तान्ते प्रकुप्यति समीरणः।
पित्तं कटूम्लतीक्ष्णोष्णपटुक्रोधविदाहिभिः ॥ १६ ॥
शरन्मध्याङ्गरात्रार्द्धविदाहसमयेषु च।
स्वादुस्निग्धलवणस्निग्धगुर्वभिष्यन्दिशीतलैः ॥ १७ ॥
आस्यास्वप्नसुखाजीर्णदिवास्वप्नातिहर्षणैः।
प्रच्छर्दनाद्ययोगेन भुक्तमात्रवसन्तयोः ॥ १८ ॥
पूर्वाह्णे पूर्वरात्रे च श्लेष्मा
द्वन्द्वन्तु सङ्करात्।
मिश्रीभावात् समस्तानां सन्निपातस्तथा पुनः ॥ १९ ॥
सङ्कीर्णाजीर्णविषमविरुद्धाद्यशनादिभिः।
व्यापन्नमद्यपानीयशुष्कशाकामसूलकैः ॥ २० ॥
पिण्याकमृद्यवसुरापूतिशुष्कझषामिषैः।
दोषत्रयकरैस्तैस्तैस्तथान्नपरिवर्त्ततः ॥ २१ ॥

धातोर्दुष्टात् पुरोवातात् ग्रहवेशाद्दिवाऽनरात्।
दुष्टान्नात् पर्वताम्भोषाद् ग्रहैर्जन्मर्क्षपीड़नात् ॥ २२ ॥
मिथ्यायोगाच्च विविधात् पापानाच्च निषेवणात्।
क्षीणां प्रसववैषम्यात्तथा मिथ्योपचारतः ॥ २३ ॥
प्रतिरोगमिति क्रुद्धा रोगाधिष्ठानगामिनीः।
रसायनीः प्रपद्यान्ते दोषा देहे विकुर्वते ॥ २४ ॥

द्वितीयोऽध्यायः।

अथातो ज्वरनिदानं व्याख्यास्यामः ॥
ज्वरो रोगपतिः पाप्मा मृत्युरोजोऽग्निरन्तकः।
क्रोधो दक्षाध्वरध्वंसी रुद्रोर्द्वनयनोद्भवः ॥ १ ॥
जन्मान्तर्यामदेहमयः सन्तापात्माऽपचारजः।
विविधैर्नामभिः क्रूरो नानायोनिषु वर्त्तते ॥ २ ॥
स जायतेऽष्टधा दोषैः पृथग् मिश्रैः समागतैः।
आगन्तुश्च

मलास्तत्र स्वैः स्वैर्दुष्टाः प्रदूषणैः ॥ ३ ॥
आमाशयं प्रविश्याममनुगम्य पिधाय च।
स्रोतांसि पक्तिस्थानाच्च निरस्य ज्वलनं बहिः ॥ ४ ॥
सह तेनाभिसर्पन्तस्तप्तः सकलं वपुः।
कुर्वन्तो गात्रमत्युष्णं ज्वरं निर्वर्त्तयन्ति ते ॥ ५ ॥
स्रोतोविबन्धात् प्रायेण ततः स्वेदो न जायते।
तस्य प्राग्रूपमालस्यमरतिर्गात्रगौरवम् ॥ ६ ॥
आस्यवैरस्यमरुचिर्जृम्भा सास्राकुलाक्षता।
अङ्गमर्दोऽविपाकोऽल्पप्राणता बहुनिद्रता ॥ ७ ॥
रोमहर्षो विनमनं पिण्डिकोद्वेष्टनं क्लमः।
हितोपदेशेष्वचान्तिः प्रीतिरन्नपदूषणे ॥ ८ ॥

द्वेषः स्वादुषु भक्ष्येषु तथा बालेषु वृद्धभृशम्।
शब्दाग्निगीतवाताम्बुच्छायोष्णेष्वनिमित्ततः॥ ८॥
इच्छा द्वेषश्च तदनु ज्वरस्य व्यक्तता भवेत्।
आगमापगमचोभमृदुतावेदनोल्बणाम्॥ १०॥
वैषम्य तत्र तत्राङ्गे तास्ताः स्युर्वेदनाश्चलाः।
पादयोः सुप्तता स्तम्भः पीण्डिकोद्वेष्टनं श्रमः॥ ११॥
विश्लेष इव सन्धीनां साद ऊर्वोः कटीग्रहः।
पृष्ठं चोदरमिवाप्नोति निष्पीडित इवोदरम्॥ १२॥
क्षिप्यन्त इव चास्थीनि पार्श्वगानि विशेषतः।
हृदयस्य ग्रहस्तोदः प्राजनेनेव वक्षसः॥ १३॥
स्कन्धयोर्मथनं बाह्वोर्भेदपीड़नमंसयोः।
अक्षिभ्रंशणे हन्वोर्जृम्भणं कर्णयोः स्वनः॥ १४॥
निस्तोदः शङ्खयोर्मूर्ध्नि वेदना विरसास्यता।
कषायास्यत्वमथवा मलानामग्रवर्त्तनम्॥ १५॥
रूक्षारुणत्वगास्याक्षिनखमूत्रपुरीषता।
प्रसेकारोचकाग्न्यविपाकास्वेदजागराः॥ १६॥
कण्ठौष्ठशोषनष्टाग्न्यौ छर्दिकासौ विषादिता।
हर्षो रोमाङ्गदन्तेषु वेपथुः क्षवथोर्ग्रहः॥ १७॥
भ्रमः प्रलापो घर्मेच्छा विनामश्चानिलज्वरे।
युगपद् व्याप्तिरङ्गानां प्रलापः कटुवक्तता॥ १८॥
नासास्यपाकः शीतेच्छा भ्रमो मूर्च्छा मदोऽरतिः।
विट्संसः पित्तवमनं रक्तष्ठीवनमक्लमः॥ १९॥
रक्तकोठोद्गमः पीतहरितत्वं त्वगादिषु।
स्वेदो निःश्वासवैगन्ध्यमतितृष्णा च पित्तजे॥ २०॥
विशेषादरुचिर्जाड्यं स्रोतोरोधोऽल्पवेगता।
प्रसेको मुखमाधुर्यं श्लेष्मश्वासपीनसाः॥ २१॥

हृल्लासस्छर्दनं कासः स्तम्भः श्लैत्यं त्वगादिषु।
अङ्गेषु शीतपिटिकास्तन्द्रोदर्दः कफोल्बणे ॥ २२ ॥
काले यथास्वं सर्वेषां प्रवृत्तिर्वृद्धिरेव वा।
निदानोक्तानुपशयौ विपरीतोपशायिता।
यथा स्वलिङ्गसंसर्गे ज्वरः संसर्गजो-
ऽपि च ॥ २३ ॥

शिरोऽर्त्तिर्मूर्च्छाविमिदाहमोहकण्ठास्यशोषारतिपर्वभेदाः।
अनिद्रताह्लाभ्रमरोमहर्षा जृम्भातिवाक्ताश्च चलात्पित्तात् ॥ २४
तापश्चान्धत्वरुचिपर्वशिरोरुक्पीनसश्वसनकासविबन्धाः।
शीतजाद्यतिमिरभ्रमतन्द्राः श्लेष्मवातजनितज्वरलिङ्गम् ॥ २५ ॥
शीतस्तम्भस्तु दद्राहाव्यक्तास्तृष्णा कासः श्लेष्मपित्तप्रवृत्तिः।
मोहस्तन्द्रालसतिक्तास्यता च ज्ञेयं रूपं श्लेष्मपित्तज्वरस्य ॥ २६ ॥
सवजो लक्षणैः सर्वैर्दाहोऽत्र च मुहुर्मुहुः।
तद्वच्छीतं भवेन्निद्रा दिवाजागरणं निशि ॥ २७ ॥
सदा वा नैव वा निद्रा महास्वेदोऽति नैव वा।
गीतनर्त्तनहास्यादिविकृतेहाप्रवर्त्तनम् ॥ २८ ॥
सास्रणी कलुषे रक्ते भुग्ने लुलितपक्ष्मणी।
अक्षिणी पिण्डिकापार्श्वं मूर्द्धपर्वास्थिरुग् भ्रमः ॥ २९ ॥
सस्रवौ सरुजौ कर्णौ कण्ठः शूकैरिवाचितः।
परिदग्धा खरा जिह्वा गुरुः सस्ताङ्गसन्धिता ॥ ३० ॥
रक्तपित्तकफष्ठीवो लोलनं शिरसोऽतिरुक्।
कोष्ठानां श्यावरक्तानां मण्डलानाञ्च दर्शनम् ॥ ३१ ॥
हृद्व्यथा मलसंसर्गः प्रवृत्तिर्वाल्पशोऽति वा।
स्निग्धास्यता बलभ्रंशः स्वरसादः प्रलापता ॥ ३२ ॥
दोषपाकश्चिरात्तन्द्रा प्रततं कण्ठकूजनम्।
सन्निपातमभिन्यासं तं ब्रूयाच्च हृतौजसम् ॥ ३३ ॥

दोषे विबद्धे नष्टेऽग्नौ सर्वसम्पूर्णलक्षणः ।
असाध्यः सोऽन्यथा कृच्छ्रो भवेद् वैकल्यदोऽपि वा ॥३४॥
अन्यच्च सन्निपातोक्तो यत्र पित्तं पृथक् स्थितम् ।
त्वचि कोष्ठेऽथवा दाह विदधाति पुरोऽनु वा ॥ ३५ ॥
तद्दातकफौ शीतं
दाहादिर्दुस्तरस्तयोः ।
शीतादौ तत्र पित्तेन कफे स्यन्दितशोषिते ॥ ३६ ॥
शीते शान्तेऽल्पको मूर्च्छा मदस्तृष्णा च जायते ।
दाहादौ पुनरन्ते स्युस्तन्द्राष्ठीवव्रमिक्लमाः ॥ ३७ ॥
आगन्तुरभिघाताभिषङ्गशापाभिचारतः ।
चतुर्धा-
ऽऽत्र क्षतच्छेददाहाद्यैरभिघातजः ॥ ३८ ॥
श्रमाच्च तस्मिन् पवनः प्रायो रक्तं प्रदूषयन् ।
सव्यथाशोफवैवर्ण्यं सरुजं कुरुते ज्वरम् ॥ ३९ ॥
ग्रहावेशौषधिविषक्रोधभीशोककामजः ।
अभिषङ्गात्
ग्रहेणास्मिन्नकस्माद्धासरोदने ॥ ४० ॥
ओषधीगन्धजे मूर्च्छा शिरोरुग्वेपथुः क्लवः ।
विषान्मूर्च्छातिसाराश्यश्यावता दाहहृद्भ्रमाः ॥ ४१ ॥
क्रोधात्कम्पः शिरोरुक् च प्रलापो भयशोकजे ।
कामाद्भ्रमोऽरुचिर्दाहो क्षीनिद्राधीधृतिक्षयः ॥ ४२ ॥
ग्रहादौ सन्निपातस्य भयादौ मरुतस्त्रये ।
कोपः कोपेऽपि पित्तस्य
यौ तु शापविचारजौ ॥ ४३ ॥
सन्निपातज्वरौ घोरौ तावसाध्यतमौ मतौ ।
तत्राभिचारिकैर्मन्त्रैर्हूयमानस्य तप्यते ॥ ४४ ॥

पूर्वं चेतस्ततो देहस्ततो विस्फोटतृड्भ्रमैः।
सदाहमूर्च्छैर्यस्तस्य प्रत्यहं वर्द्धते ज्वरः ॥ ४५ ॥
इति ज्वरोऽष्टधा दृष्टः
समासाद् द्विविधस्तु सः।
शारीरो मानसः सौम्यस्तीक्ष्णोऽन्तर्बहिराश्रयः ॥ ४६ ॥
प्राकृतो वैकृतः साध्योऽसाध्यः सामो निरामकः।
पूर्वं शरीरे शारीरे तापो मनसि मानसे ॥ ४७ ॥
पवने योगवाहित्वाच्छीतं श्लेष्मयुते भवेत्।
दाहः पित्तयुते मिश्रं मिश्रे-
ऽन्तः संश्रये पुनः ॥ ४८ ॥
ज्वरेऽधिकविकाराः स्युरन्तःक्षोभो मलग्रहः।
बहिरेव बहिर्वेगे तापोऽपि च सुसाध्यता ॥ ४९ ॥
वर्षाशरद्वसन्तेषु वातादौ- प्राकृतः क्रमात्।
वैकृतोऽन्यः स दुःसाध्यः प्रायश्च प्राकृतोऽनिलात् ॥५०॥
वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम्।
कुर्य्यात्
पित्तं च शरदि तस्य चानुबलं कफः ॥ ५१ ॥
तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम्।
कफो वसन्ते तमपि वातपित्तं भवेदनु ॥ ५२ ॥
बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः।
सर्वथा विकृतिज्ञाने प्रागसाध्य उदाहृतः ॥ ५३ ॥
ज्वरोपद्रवतीक्ष्णत्वमग्लानिर्बहुमूत्रता।
न प्रवृत्तिर्न विड् जीर्णा न क्षुत्सामज्वराकृतिः ॥५४॥
ज्वरवेगोऽधिकं तृष्णा प्रलापः श्वसनं भ्रमः।
मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् ॥ ५५ ॥
जीर्णतामविपर्य्यासाल्लघुरागं च लङ्घनात्।

ज्वरः पञ्चविधः प्रोक्तो मलकालबलाबलात् ॥ ५६ ॥
प्रायशः सन्निपातेन भूयसा तूपदिश्यते ।
सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ ॥ ५७ ॥
धातुमूत्रशकृद्वाहिस्रोतसां व्यापिनो मलाः ।
तापयन्तस्तनुं सर्वां तुल्यदूष्यादिवर्द्धिताः ॥ ५८ ॥
बलिनो गुरवस्तब्धा विशेषेण रसाश्रिताः ।
सन्ततं निष्प्रतिद्वन्द्वा ज्वरं कुर्युः सदुःसहम् ॥ ५९ ॥
मलं ज्वरोष्मा धातून् वा स शीघ्रं क्षपयेत् ततः ।
सर्वाकारं रसादीनां शुद्ध्याऽशुद्ध्याऽपिवा क्रमात् ॥६०॥
वातपित्तकफैः सप्तदशद्वादशवासरान् ।
प्रायोऽनुयाति मर्य्यादां मोक्षाय च वधाय च ॥ ६१ ॥
इत्यग्निवेशस्य मतं हारीतस्य पुनः स्मृतिः ।
द्विगुणा सप्तमी यावन्नवम्येकादशी तथा ॥ ६२ ॥
एषा त्रिदोषमर्य्यादा मोक्षाय च वधाय च ।
शुद्धाशुद्धौ ज्वरः कालं दीर्घमप्यनुवर्त्तते ॥ ६३ ॥
क्षीणानां व्याधिमुक्तानां मिथ्याहारादिसेविनाम् ।
अल्पोऽपि दोषो दूष्यादेर्लब्ध्वाऽन्यतमतो बलम् ॥ ६४ ॥
सविपक्षो ज्वरं कुर्य्याद्विषमं क्षयवृद्धिभाक् ।
दोषः प्रवर्त्तते तेषां स्वे काले ज्वरयन् बलो ॥ ६५ ॥
निवर्त्तते पुनश्चैष प्रत्यनीकबलाबलः ।
क्षीणे दोषे ज्वरः सूक्ष्मो रसादिष्वेव लीयते ॥ ६६ ॥
लीनत्वात्काश्यवैवर्ण्यजाड्यादीनादधाति सः ।
आसन्नविद्वत्तास्यत्वात् स्रोतसां रसवाहिनाम् ॥ ६७ ॥
आशु सर्वस्य वपुषो व्याप्तिर्दोषेण जायते ।
सन्ततः स ततस्तेन

विपरीतो विपर्य्ययात् ॥ ६८ ॥
विषमो विषमारब्धक्रियाकालेऽनुषङ्गवान्।
दोषो रक्ताश्रयः प्रायः करोति सतत ज्वरम् ॥ ६९
अहोरात्रस्य स द्विः स्यात्
सकृदन्यैर्द्युराश्रितः।
तस्मिन् मांसवहा नाड़ीः
मेदोनाडीस्तृतीयके ॥ ७० ॥
ग्राही पित्तानिलान्मूर्ध्नि श्लेष्मकस्य कफपित्ततः।
सपृष्ठस्थानिलकफात् स चैकाहान्तरः स्मृतः ॥ ७१ ॥
चतुर्थको मले मेदोमज्जास्थ्यन्यतमस्थिते।
मज्जस्थ एवैत्यपरे प्रभावं स तु दर्शयेत् ॥ ७२ ॥
द्विधा कफेन जङ्घाभ्यां स पूर्वं शिरसोऽनिलात्।
अस्थिमज्जोभयगते चतुर्थकविपर्य्ययः ॥ ७३ ॥
त्रिधा
द्व्यहं ज्वरयति दिनमेकं तु मुञ्चति।
बलाबलेन दोषाणामन्नचेष्टादिजन्मना ॥ ७४ ॥
ज्वरः स्यान्मनसस्तद्वत् कर्मणश्च तदा तदा।
दोषदूष्यर्त्वहोरात्रप्रकृतीनां बलाज्ज्वरः ॥ ७५ ॥
मनसोविषयाणां च काल तं त प्रपद्यते।
धातून् प्रक्षोभयन् दोषो मोक्षकाले विलीयते ॥७६॥
ततो नरः श्वसन् क्षिद्यन् कूजन् वमति चेष्टते।
वेपते प्रलपत्युष्णैः शीतैश्चाङ्गैर्हतप्रभः ॥ ७७ ॥
विसंज्ञो ज्वरवेगार्त्तः सक्रोध इव वीक्षते।
सदोषशब्दं च मुहुर्मुहुः श्वसिति वेगवत् ॥ ७८ ॥
देहो लघुर्व्यपगतक्लममोहतापः
पाको मुखे करणसौष्ठवमव्यथत्वम्।

स्वेदः क्लवः प्रकृतियोगि मनोऽन्नलिप्सा
कण्डूश्च मूर्ध्नि विगतज्वरलक्षणानि ॥ ७८ ॥

तृतीयोऽध्यायः ।

अथातो रक्तपित्तकासनिदानं व्याख्यास्यामः ॥
अत्युष्णतीक्ष्णकटुकलवणादि विदाहिभिः ।
क्रोधविहालकैश्चान्नैः स्वदुक्तैरतिसेवितैः ॥ १ ॥
कुपितं पित्तकैः पित्तं द्रव रक्तं च मूर्च्छति ।
ते मिथस्तुल्यरूपत्वमागम्य व्याप्नुतस्तनुम् ॥ २ ॥
पित्तं रक्तस्य विकृतेः संसर्गाद् दूषणादपि ।
गन्धवर्णानुवृत्तेश्च रक्तेन व्यपदिश्यते ॥ ३ ॥
प्रभवत्यसृजः स्थानात् प्लीहतो यकृतश्च तत् ।
शिरोगुरुत्वमरुचिः शीतेच्छा धूमकोऽम्लकः ॥ ४ ॥
छर्दिष्कर्दितवैभत्स्यं कासः श्वासो भ्रमः क्लमः ।
लोहलोहितमत्स्यामगन्धास्यत्व स्वरक्षयः ॥ ५ ॥
रक्तहारिद्रहरितवर्णता नयनादिषु ।
नीललोहितपीतानां वर्णानामविवेचनम् ॥ ६ ॥
स्वप्ने तद्दर्शनं भिल्लं भवत्यस्मिन् भविष्यति ।
ऊर्ध्वं नासाक्षिकर्णास्यैर्मेढ्योनिगुदैरधः ॥ ७ ॥
कुपितं रोमकूपैश्च समस्तैः स्वत् प्रवर्त्तते ।
ऊर्ध्वं साध्य कफाधस्तात् तद्विरेचनसाधनम् ॥ ८ ॥
बस्तौषधं च पित्तस्य विरेको हि वरौषधम् ।
अनुबन्धी कफो यत्र तत्र तस्यापि शुद्धिकृत् ॥ ९ ॥
कषायाः स्वादवोऽप्यस्य विशुद्धस्रंसणे हिताः ।
किमु तिक्ताः कषाया वा ये निसर्गात् कफापहाः ॥१०॥
अधो याप्यं चलाद् यस्मात् तत् प्रच्छर्दनसाधनम् ।

अल्पौषधं च पित्तस्य वमनं न वरौषधम् ॥ ११ ॥
अनुबन्धी चलो यश्च शान्तयेऽपि न तस्य तत्।
कषायाश्च हितास्तस्य मधुरा एव केवलम् ॥ १२ ॥
कफमारुतसंसृष्टमसाध्यमुभयायनम्।
अशक्यप्रातिलोम्यत्वादभावादौषधस्य च ॥ १३ ॥
न हि संशोधनं किञ्चिदस्थस्थ प्रतिलोमगम्।
शोधनं प्रतिलोमं च रक्तपित्ते भिषग् जितम् ॥ १४ ॥
एवमेवोपशमनं सर्वशो नास्य विद्यते।
संसृष्टेषु हि दोषेषु सर्वजिच्छमनं हितम् ॥ १५ ॥
तत्र दोषानुगमनं शिरास्व इव लक्षयेत्।
उपद्रवांश्च विकृतिज्ञानत-
स्तेषु चाधिकम् ॥ १६ ॥
आशुकारी यतः कासस्तमेवातः प्रवक्ष्यति।
पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः ॥ १७ ॥
क्षयायोपेक्षिताः सर्वे बलिनश्चोत्तरोत्तरम्।
तेषां भविष्यतां रूपं कण्ठे कण्डूररोचकः ॥ १८ ॥
शूकपूर्णाभकण्ठत्वं
तत्राधो विहतोऽनिलः।
ऊर्ध्वं प्रवृत्तः प्राप्योरस्तस्मिन् कण्ठे च संसजन् ॥ १९ ॥
शिरःस्रोतांसि सम्पूर्य्य ततोऽक्ष्णान्युत्क्षिपन्निव।
क्षिपन्निवाक्षिणी पृष्ठमुरःपार्श्वे च पीडयन् ॥ २० ॥
प्रवर्त्तते स वक्त्रेण भिन्नकांस्योपमध्वनिः।
हेतुभेदात् प्रतीघातभेदो वायोः सरंहसः ॥ २१ ॥
यद्वृजाशब्दवैषम्यं कासानां जायते ततः।
कुपितो वातलैर्वातः शुष्कोरःकण्ठवक्त्रताम् ॥ २२ ॥
कृत्वाक्षीरःशिरःशूलं मोहक्षोभस्वरक्षयान्।

करोति शुष्कं कासं च महावेगरुजास्वनम् ॥ २३ ॥
सोऽङ्गमर्दी कफं शुष्कं कृच्छ्रान्मुक्ताऽल्पतां व्रजेत्।
पित्तात्पीताच्चिकफता तिक्तास्यत्व ज्वरो भ्रमः ॥२४॥
पित्तास्रवमन तृष्णा वैस्वर्य्यं धूमको मदः।
प्रततं कासवेगेन ज्योतिषामिव दर्शनम् ॥ २५ ॥
कफादूरोऽल्परुग्मूर्द्धहृदय स्तिमितं गुरु।
कण्ठोपलेपः सदन पीनसच्छर्द्यरोचकाः ॥२६॥
रोमहर्षो घनस्निग्धश्वेतश्लेष्मप्रवर्त्तनम्।
युद्वादैः साहसैस्तैस्तैः सेवितैरयथाबलम् ॥ २७ ॥
उरस्यन्तः क्षते वायुः पित्ते नानुगतो बली।
कुपितः कुरुते कास कफ तेन सशोणितम् ॥ २८ ॥
पीत श्यामं च शुष्कं च ग्रथितं कुथितं बहु।
ष्ठीवेत् कण्ठेन रुजता विभिन्नेनेव चोरसा ॥ २८ ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना।
पर्वभेदज्वरश्वासतृष्णावैस्वर्य्यकम्पवान् ॥ ३० ॥
पारावत इवाकूजन् पार्श्वशूली ततोऽस्य च।
क्रमाद्दीर्य्यं रुचिः पक्तिर्बलं वर्णश्च हीयते ॥ ३१ ॥
क्षीणस्य सासृग्मूत्रत्वं स्याच्च पृष्ठकटीग्रहः।
वायुप्रधानाः कुपिता धातवो राजयक्ष्मणः ॥ ३२ ॥
कुर्वन्ति यक्ष्मायतनैः कासं ष्ठीवेत् कफं ततः।
पूतिपूयोपमं पीतं विस्रं हरितलोहितम् ॥ ३३ ॥
सुप्तेऽते इव पार्श्वे च हृदयं पततीव च।
अकस्मादुष्णशीतेच्छा बह्वाशित्वं बलक्षयः ॥ ३४ ॥
स्निग्धप्रसन्नवक्त्रत्वं श्लेष्मदर्शननेक्षता।
ततोऽस्य क्षयरूपाणि सर्वाण्याविर्भवन्ति च ॥ ३५ ॥
इत्येष क्षयजः कासः क्षीणानां देहनाशनः।

याप्यो वा बलिनां तद्वत् क्षतजोऽभिनवौ तु तौ ॥३६॥
सिध्येतामपि सानाथ्यात् साध्या दोषैः पृथक् त्रयः।
मिश्रा याप्या हयात् सर्वे जरसा स्थविरस्य च ॥ ३७ ॥
कासाच्छ्वासक्षयच्छर्दिस्वरसादादयो गदाः।
भवन्त्युपेक्षया यस्मात् तस्मात् तं त्वरया जयेत् ॥ ३८ ॥

चतुर्थोऽध्यायः।

अथातः श्वासहिध्मानिदानं व्याख्यास्यामः ॥
कासवद्वा भवेच्छ्वासः पूर्ववा दोषकोपनैः।
आमातिसारवमथुविषपाण्डूज्वरैरपि ॥ १ ॥
रजोधूमानिलैर्मर्मघातादतिहिमाम्बुना।
क्षुद्रकस्तमकश्छिद्रो महान्नूर्ध्व पञ्चमः ॥ २ ॥
कफोपरुद्धगमनः पवनो विष्वगाश्रितः।
प्राणोदकान्नवाहीनि दुष्टः स्रोतांसि दूषयन् ॥ ३ ॥
उरःस्थ कुरुते श्वासमामाशयसमुद्भवम्।
प्राग्रूपं तस्य हृत्पार्श्वशूल प्राणविलोमता ॥ ४ ॥
आनाहः शब्दभेदश्च तत्रायासातिभोजनैः।
प्रेरितः प्रेरयेत् क्षुद्र श्वास शमनं मरुत् ॥ ५ ॥
प्रतिलोम शिरा गच्छन्नुदीर्य्य पवनः कफम्।
परिगृह्य शिरोग्रीवमुरः पार्श्वं च पीडयन् ॥ ६ ॥
कास घुर्घुरक मोहमरुचि पीनस क्लमम्।
करोति तीव्रवेगं च श्वास प्राणोपतापिनम् ॥ ७ ॥
प्रताम्येत् तस्य वेगेन निष्ठूतान्ते क्षण सुखी।
कृच्छ्राच्छयानः श्वसिति निषण्णः स्वास्थ्यमृच्छति ॥ ८ ॥
उच्छ्रिताक्षो ललाटेन स्विद्यते भ्रमवर्त्तिमान्।
विशुष्कास्यो मुहुःश्वासी काङ्क्षत्युष्ण सवेपथुः ॥ ९ ॥

मेघाम्बुशीतप्राग्वातैः श्लेष्मलैश्च विवर्द्धते ।
स याप्यस्तमकः साध्यो नवो वा बलिनो भवेत् ॥१०॥
ज्वरमूर्च्छायुतः शीतैः शाम्येत् प्रतमकस्तु सः ।
छिन्नाच्छ्वसिति विच्छिन्नं मर्मच्छेदरुजार्दितः ॥ ११ ॥
सस्वेदमूर्च्छः सानाहो वस्तिदाहनिरोधवान् ।
अधोदृग्विप्लुताच्छश्च मुह्यन् रक्तैकलोचनः ॥ १२ ॥
शुष्कास्यः प्रलपन् दीनो नष्टच्छायो विचेतनः ।
महता महता दीनो नादेन श्वसिति क्रथन् ॥ १३ ॥
उद्भूयमानः सरभो मत्तर्षभ इवानिशम् ।
प्रनष्टज्ञानविज्ञानो विभ्रान्तनयनाननः ॥ १४ ॥
वक्त्रः समाक्षिपन् बद्धमूत्रवर्चा विशीर्णवाक् ।
शुष्ककण्ठो मुहुर्मुह्यन् कर्णग्रङ्क्षिरोऽतिरुक् ॥ १५ ॥
दीर्घमूर्द्धं श्वसित्यूर्द्धान्न च प्रत्याहरत्यधः ।
श्लेष्माहतमुखस्रोताः क्षुद्गन्धवहार्दितः ॥ १६ ॥
ऊर्द्धदृग्वीक्षते भ्रान्तमक्षिणी परितः क्षिपन् ।
मर्मसु क्षिद्यमानेषु परिदेवी निरुद्धवाक् ॥ १७ ॥
एते सिध्येयुरव्यक्ता व्यक्ताः प्राणहरा ध्रुवम् ।
श्वासैकहेतुप्रायूपसख्याप्रतिसञ्चयाः ॥ १८ ॥
हिक्मा भङ्गोऽञ्जलिर्द्वा क्षुद्रा यमला महतीति च ।
गम्भीरा च मरुत् तत्र त्वरया युक्तिसेवितैः ॥ १९ ॥
रूक्षतीक्ष्णखरासात्म्यैरन्नपानैः प्रपीडितः ।
करोति हिक्मामरुजां मन्दशब्दां क्षवानुगाम् ॥ २० ॥
शमं सात्म्यान्नपानेन या प्रयाति च साऽन्वजा ।
आयासात् वपनं क्षुद्रः क्षुद्रा हिक्मां प्रवर्त्तयेत् ॥ २१ ॥
जत्वमूलप्रविस्तामल्पवेगां मृदु च सा ।
हृद्धिमायास्यतो याति भुक्तमात्रे च मार्दवम् ॥ २२ ॥

चिरेण यमलैर्वेगैराहारि या प्रवर्त्तते ।
परिणामोन्मुखे हृद्धिं परिणामे च गच्छति ॥ २३ ॥
कम्पयन्ती शिरो ग्रीवामाक्षातस्यातिहृष्यतः ।
प्रलापम्छर्दयतीसारनेत्रविप्लुतजृम्भिणः ॥ २४ ॥
यमला वेगिनी हिक्का परिणामवती च सा ।
स्तब्धभ्रूशङ्खयुग्मस्य सासविप्लुतचक्षुषः ॥ २५ ॥
स्तम्भयन्ती तनुं वाचं स्मृतिं सन्धां च मुष्णती ।
रुन्धती मार्गमन्नस्य कुर्वती मर्मघट्टनम् ॥ २६ ॥
पृष्ठतो नमन शोष महाहिक्का प्रवर्त्तते ।
महामूला महाशब्दा महावेगा महाबला ॥ २७ ॥
पक्वाशयाद्वा नाभेर्वा पूर्ववद् या प्रवर्त्तते ।
तद्रूपा सा मुहुः कुर्य्याज्जृम्भाङ्गप्रसारणम् ॥ २८ ॥
गम्भीरेणानुनादेन गभीरा तासु साधयेत् ।
आद्ये हे वर्जयेदन्त्ये सर्वलिङ्गा च वेगिनीम् ॥ २९ ॥
सर्वाश्च सञ्चितामस्य स्थविरस्य व्यवायिनः ।
व्याधिभिः क्षीणदेहस्य भक्तच्छर्दिनस्य वा ॥ ३० ॥
सर्वेऽपि रोगा नाशाय न त्वेवं शीघ्रकारिणः ।
हिक्माश्वासौ यथा तौ हि मृत्युकाले कृतालयौ ॥ ३१ ॥

पञ्चमोऽध्यायः ।

अथातो राजयक्ष्मादिनिदानं व्याख्यास्यामः ॥
अनेकरोगानुगतो बहुरोगपुरोगमः ।
राजयक्ष्मा क्षयः शोषो रोगराडिति च स्मृतः ॥ १ ॥
नक्षत्राणां द्विजानां च राज्ञोऽभूदुदयः पुरा ।
यच्च राजा च यक्ष्मा च राजयक्ष्मा ततो मतः ॥ २ ॥
देहौषधक्षयकृतः क्षयस्तत्प्रभवाच्च सः ।

रसादिशोषणाच्छोषो रोगराट् तेषु राजनात् ॥ ३ ॥
साहस वेगसंरोधः शुक्रोजःक्षय हेतवः ।
अन्नपानविधित्यागश्चत्वारस्तस्य हेतवः ॥ ४ ॥
तैरुदीर्णोऽनिलः पित्तं कफ चोदीर्य सर्वतः ।
शरीरसन्धीनाविश्य तान् शिराश्च प्रपीडयन् ॥ ५ ॥
मुखानि स्रोतसा रुद्ध्वा तथैवातिविवृत्य च ।
सर्पन्नूर्ध्वमधस्तिर्य्यग्यथास्वं जनयेद्गदान् ॥ ६ ॥
रूप भविष्यतस्तस्य प्रतिश्यायो भ्रम क्लवः ।
प्रसेको मुखमाधुर्य्यं सदनं वह्निदेहयोः ॥ ७ ॥
स्थाल्यमन्नान्नपानादौ शुचावप्यशुचीक्षणम् ।
मक्षिकाद्यैः केशादिपातः प्रायोऽन्नपानयोः ॥ ८ ॥
हृन्नासस्यच्छर्दिरुचिरग्नेरपि बलक्षयः ।
पाण्डोरवेक्षायादास्यशीफोऽक्ष्णोरतिशुक्लता ॥ ९ ॥
बाह्यैः प्रमाणजिज्ञासा काये वैभत्स्यदर्शनम् ।
स्त्रीमद्यमांसप्रियता घृणित्व मूर्द्धगुण्ठनम् ॥ १० ॥
नखकेशातिवृद्धिश्च स्वप्ने चाभिभवो भवेत् ।
पतङ्गकङ्ककलासाद्यैरपिधानपदपक्षिभिः ॥ ११ ॥
केशास्थितुषभस्माद्यैराशौ समधिरोहणम् ।
शून्यानां ग्रामदेशानां दर्शनं शुष्यतोऽम्भसः ॥ १२ ॥
ज्योतिर्गिरीणां पततां ज्वलतां च महीरुहाम् ।
पीनसश्वासकासाऽसमूर्द्धस्वररुजोऽरुचिः ॥ १३ ॥
ऊर्द्धविड्भ्रंशसशोषा वधस्छर्दिश्च कोष्ठगे ।
तिर्य्यक्स्थे पार्श्वरुग्दोषे सन्धिगे भवति ज्वरः ॥ १४ ॥
रूपाण्येकादशैतानि जायन्ते राजयक्ष्मणः ।
तेषामुपद्रवान् विद्यात् कण्ठध्वंसमुरोरुजम् ॥ १५ ॥
जृम्भाङ्गमर्दनिष्ठीववह्निसादास्यपूतिताः ।

तत्र वाताच्छिरः पार्श्वशूलमंसाङ्गमर्दनम् ॥ १६ ॥
कण्ठध्वंसः स्वरभ्रंशः पित्तात्पादांसपाणिषु।
दाहोऽतिसारोऽसृक्च्छर्दिर्मुखगन्धो ज्वरो मदः ॥ १७ ॥
कफादरोचकश्छर्दिः कासो मूर्धाङ्गगौरवम्।
प्रसेकः पीनसः श्वासः स्वरसादोऽवबद्धता ॥ १८ ॥
दोषैर्मन्दानलत्वेन सोपलेपैः कफोल्वणैः।
स्रोतोमुखेषु रुद्धेषु धातूष्मस्वल्पकेषु च ॥ १९ ॥
विदह्यमानः स्वस्थाने रसस्तांस्तानुपद्रवान्।
कुर्यादगच्छन्मांसादीनसृक् वीर्ध्वं प्रधावति ॥ २० ॥
पच्यते कोष्ठ एवान्नमन्नपक्त्रैव चाऽस्य यत्।
प्रायोऽस्रान्मलतां यातं नैवाल धातुपुष्टये ॥ २१ ॥
रसोऽप्यस्य न रक्ताय मांसाय कुत एव तु।
उपस्तब्धः स शक्रता केवलं वर्त्तते क्षयी ॥ २२ ॥
लिङ्गेष्वल्पेष्वपि क्षीणं व्याध्यौषधबलाक्षमम्।
वर्जयेत् साधयेदेव सर्वेष्वपि ततोऽन्यथा ॥ २३ ॥
दोषैर्व्यस्तैः समस्तैश्च क्षयात् षष्ठश्च मेदसा।
स्वरमेदो भवेत् तत्र श्यामो रूक्षश्लथः स्वरः ॥ २४ ॥
शुष्कपूर्णाभकण्ठत्व स्निग्धोष्णोपशयोऽनिलात्।
पित्तात्तालुगले दाहः शोष उत्क्लावसूयनम् ॥ २५ ॥
लिम्पन्निव कफात् कण्ठ मन्दः खुरखुरायते।
स्वरो विबद्धः सर्वैस्तु सर्वलिङ्गं क्षयात्क्षपेत् ॥ २६ ॥
धूमायतीव चात्यर्थं मेदसा श्लेष्मलक्षणः।
क्लेदश्लथाक्षरश्वासान् सर्वैरन्त्यं च वर्जयेत् ॥ २७ ॥
अरोचको भवेद्दोषैर्जिह्वाहृदयसंश्रयैः।
सन्निपातेन मनसः सन्तापेन च पञ्चमः ॥ २८ ॥
कषायतिक्तमधुरं वातादिषु मुखं क्रमात्।

सर्वोत्थे चिरसंशोकक्रोधादिषु यथामलम् ॥ २८ ॥
हृद्दिदोषैः पृथक् सर्वैर्द्विष्टैरर्थैश्च पञ्चमी ।
उदानो विकृतो दोषान् सर्वानप्यूर्ध्वमस्यति ॥ ३० ॥
तासूत्क्लेशास्यलावण्यप्रसेकारुचयोऽग्रगाः ।
नाभिपृष्ठ रुजन् वायुः पार्श्वे चाहारमुत्क्षिपेत् ॥३१॥
ततो विच्छिन्नमल्पाल्प कषायं फेनिल वमेत् ।
शब्दोद्गारयुतं क्षणमच्छं कृच्छ्रेण वेगवान् ॥ ३२ ॥
कासास्यशोषहृन्मूर्धस्वरपीडाक्लमान्वितः ।
पित्तात् क्षारोदकनिभ धूम्रं हरितपीतकम् ॥ ३३ ॥
सासृग्गन्धं कटूष्ण च क्षणमूर्च्छातापदाहवत् ।
कफात् स्निग्धं घनं शीत श्लेष्मतन्तुगवाचितम् ॥ ३४ ॥
मधुरं लवणं भूरि प्रसक्तं लोमहर्षणम् ।
मुखश्लथयुमाधुर्यतन्द्राहृल्लासकासवत् ॥ ३५ ॥
सर्वलिङ्गा मलैः सर्वैरिष्टोक्ता या च तां त्यजेत् ।
मूत्रमेध्याशुचिद्विष्टदर्शनश्रवणादिभिः ॥ ३६ ॥
तप्ते चित्ते हृदि क्लिष्टे हृद्दिर्द्विष्टार्थयोगजा ।
वातादीनेव विस्मृत्य क्रमिदूषणामदीहृदे ॥ ३७ ॥
शूलवेपथुहृल्लासैर्विशेषात् क्रमिजा वदेत् ।
क्रमिहृद्रोगलिङ्गैश्च स्मृताः पञ्च तु हृद्गदाः ॥ ३८ ॥
तेषां गुल्मनिदानोक्तैः समुत्थानैश्च सम्भवः ।
वातेन शूल्यतेऽत्यर्थं तुद्यते स्फुटतीव च ॥ ३९ ॥
भिद्यते शुष्यति स्तब्धं हृदयं शून्यता द्रवः ।
अकस्माद्दीनता शोको भय शब्दासहिष्णुता ॥ ४० ॥
वेपथुर्वेष्टनं मोहः श्वासरोधोऽल्पनिद्रता ।
पित्तात्तृष्णा भ्रमो मूर्च्छा दाहः स्वेदोऽम्लकः क्लमः ॥४१॥
छर्दनं चाम्लपित्तस्य धूमकः पीतता ज्वरः ।

श्लेष्मणा हृदयं स्तब्धं भारिकं साश्मगर्भवत्॥ ४२॥
कासाग्निसादनिष्ठीवनिद्रालस्यारुचिज्वराः।
सवलिङ्गक्षिभिर्दोषैः कृमिभिः श्यावनेत्रता॥ ४३॥
तमःप्रवेशो हृल्लासः शोषः कण्डूकफस्रुतिः।
हृदय प्रतत चात्र क्रकचेनेव दार्य्यते॥ ४४॥
चिकित्सेदामय घोर त शीघ्रं शीघ्रकारिणम्।
वातात्पित्तात्कफात्तृष्णा सन्निपाताद्रसक्षयात्॥ ४५॥
षष्ठी स्यादुपसर्गाच्च वातपित्ते तु कारणम्।
सर्वासु तत्प्रकोपो हि सौम्यधातुप्रशोषणात्॥ ४६॥
सर्वदेहभ्रमोत्कम्पतापदाहमोहकृत्।
जिह्वामूलगलक्लोमतालुतीयवहाः शिराः॥ ४७॥
संशोष्य तृष्णा जायन्ते तासां सामान्यलक्षणम्।
मुखशोषो जलात्प्तिरन्नद्वेषः स्वरक्षयः॥ ४८॥
कण्ठौष्ठजिह्वाकार्कश्य जिह्वानिष्क्रमणं क्लमः।
प्रलापश्चित्तविभ्रंशस्तृड्ग्रहोक्तास्तथाऽऽमयाः॥४९॥
मारुतात् श्यामता दैन्यं शङ्खतोदः शिरोभ्रमः।
गन्धाज्ञानास्यवैरस्यस्तुतिनिद्राबलक्षयाः॥ ५०॥
शीताम्बुपानाद् हृद्धिश्च पित्तान्मूर्च्छास्यतिक्तता।
रक्तेक्षणत्वं प्रततं शोषो दाहोऽतिधूमकः॥ ५१॥
कफो गुरुत्वं कुपितस्रोतोवाहिषु मारुतम्।
स्रोतःसु स कफस्तेन पङ्कवत् शोष्यते ततः॥ ५२॥
शूकैरिवाचितः कण्ठो निद्रा मधुरवक्त्रता।
आध्मानं शिरसो जाड्यं स्तैमित्यच्छर्दिरोचकाः॥ ५३॥
आलस्यमविपाकश्च सर्वैः स्यात् सर्वलक्षणा।
आमोद्भवा च भक्तस्य संरोधाद्दातपित्तजा॥ ५४॥
उष्णाक्रान्तस्य सहसा शीताम्भो भजतस्तृषम्।

क्षुधा रुद्धो गतः कोष्ठं यां कुर्यात् पित्तजैव सा ॥५५॥
या च पानातिपानोत्था तीक्ष्णाग्नेः स्नेहजा च या।
स्निग्धगुर्वम्ललवणभोजनेन कफोद्भवा ॥ ५६ ॥
क्षुधा रसक्षयोत्थेन लक्षणेन क्षयात्मिका।
शोषमोहज्वराद्यन्यदीर्घरोगोपसर्गतः।
या क्षुधा जायते तीव्रा सोपसर्गात्मिका स्मृता ॥ ५७ ॥

षष्ठोऽध्यायः।

अथातो मदात्ययनिदानं व्याख्यास्यामः ॥
तीक्ष्णोष्णरूक्षसूक्ष्माम्लं व्यवाय्याशुकरं लघु।
विकाशि विशदं मद्यमोजसोऽम्बादिपर्ययः ॥ १ ॥
तीक्ष्णादयो विषेऽप्यक्तास्चित्तोपप्लाविनो गुणाः।
जीवितान्ताय जायन्ते विषे तूत्कर्षवृत्तितः ॥ २ ॥
तीक्ष्णादिभिर्गुणैर्मद्यं मन्दादीनोजसो गुणान्।
दशभिर्दश संक्षोभ्य चेतो नयति विक्रियाम् ॥ ३ ॥
आद्ये मदे द्वितीये स प्रमादायतने स्थितः।
दुर्विकल्पहतो मूढः सुखमित्यधिमुच्यते ॥ ४ ॥
मध्यमोत्तमयोः सन्धिं प्राप्य राजसतामसः।
निरङ्कुश इव व्यालो न किञ्चिन्नाचरेज्जडः ॥ ५ ॥
इयं भूमिरवद्यानां दौःशील्यस्वेदमास्पदम्।
एकोऽप्य बहुमार्गाया दुर्गतेर्दैशिकः परम् ॥ ६ ॥
निश्चेष्टः शववच्छेते तृतीये तु मदे स्थितः।
मरणादपि पापात्मा गतः पापतरां दशाम् ॥ ७ ॥
धर्माधर्मसुखं दुःखमर्थानर्थं हिताहितम्।
यदासक्तो न जानाति कथं तच्छीलयेद् बुधः ॥ ८ ॥
यद्ये मोहो भयं शोकः क्रोधो मृत्युश्च संश्रिताः।

मोहादमदमूर्च्छायाः सापस्मारापतानकाः ॥ ९ ॥
यच्चैकः स्मृतिविभ्रंशस्तत्र सर्वमसाधु यत्।
अयुक्तियुक्तमत्र हि व्याधये मरणाय वा ॥ १० ॥
मद्यं त्रिवर्गधीधैर्यलज्जादेरपि नाशनम्।
नातिमाद्यन्ति बलिनः कृताहारा महाशनाः ॥ ११ ॥
स्निग्धाः सत्त्वयोयुक्ता मद्यनित्यास्तदन्वयाः।
मेदःकफाधिका मन्दवातपित्ता दृढाग्नयः ॥ १२ ॥
विपर्ययेऽतिमाद्यन्ति विश्रब्धाः कृतिपाश्च ये।
मद्येन चान्नरूपेण साजीर्णे बहु नाति च ॥ १३ ॥
वातात् पित्तात् कफात् सर्वैश्चत्वारः स्युर्मदाश्रयाः।
सर्वैऽपि सर्वैर्जायन्ते व्यपदेशस्तु भूयसा ॥ १४ ॥
सामान्यं लक्षणं तेषां प्रमोहो हृदयव्यथा।
विड्भेदः प्रततं तृष्णा सौम्याग्नेयो ज्वरोऽरुचिः ॥१५॥
शिरःपार्श्वास्थिहृत्कम्पो मर्मभेदस्त्वितग्रहः।
उरोविबन्धस्तिमिरं कासः श्वासः प्रजागरः ॥ १६ ॥
स्वेदोऽतिमात्रं विष्टम्भः क्षयधुश्चित्तविभ्रमः।
प्रलापस्छर्दिरुक् क्लेशो भ्रमो दुःस्वप्नदर्शनम् ॥ १७ ॥
विशेषाज्जागरश्वासकम्यमूर्हरुजोऽनिलात्।
स्वप्ने भ्रमत्युत्पतति प्रेतैश्च सह भाषते ॥ १८ ॥
पित्ताद्दाहोज्वरस्वेदमोहातीसारतृड्भ्रमाः।
देहो हरितहारिद्रो रक्तनेत्रकपोलता ॥१९॥
श्लेष्मणश्छर्दिहृल्लासनिद्रोदर्दाङ्गगौरवम्।
सर्वजे सर्वलिङ्गत्वं मुह्यन् मद्यं पिबेत् तु यः ॥ २० ॥
सहसाऽनुचितं चान्यत् तस्य ध्वंसकविच्चयौ।
भवेतां मारुतात् कष्टौ दुर्बलस्य विशेषतः ॥ २१ ॥
ध्वंसके श्लेष्मनिष्ठीवः कण्ठघ्रोषोऽतिनिद्रता।

मन्दासहत्वं तन्द्रा च विज्ञेयोऽङ्गगौरवातिरिक्तम् ॥ २२ ॥
हृत्कण्ठरोमसम्मोहः कासस्तृष्णा वमिर्ज्वरः ।
निवृत्तो यस्तु मद्येभ्यो जितात्मा बुद्धिपूर्वकृत् ॥ २३ ॥
विकारैः स्पृश्यते जातु न स शारीरमानसैः ।
रजोमोहाहिताहारपरस्य व्युत्क्रमो मदाः ॥ २४ ॥
रसासृक्चेतनावाहिस्रोतोरोधसमुद्भवाः ।
मदमूर्च्छायसन्यासा यथोत्तरबलोत्तराः ॥ २५ ॥
मदोऽत्र दोषैः सर्वैश्च रक्तमद्यविषैरपि ।
सक्तानल्पद्रुताभाषश्चलः स्खलितचेष्टितः ॥ २६ ॥
रूक्षश्यावारुणतनुर्मदे वातोद्भवे भवेत् ।
पित्तेन क्रोधनो रक्तपीताभः कलहप्रियः ॥ २७ ॥
स्वल्पासम्बद्धवाक् पाण्डुः कफाद् ध्यानपरोऽलसः ।
सर्वात्मा सन्निपातेन रक्तात् स्तब्धाङ्गदृष्टिता ॥ २८ ॥
पित्तलिङ्गञ्च मद्येन विक्लतेहास्यराङ्गता ।
विषे कम्पोऽतिनिद्रा च सर्वेभ्योऽभ्यधिकस्तु सः ॥ २९ ॥
लक्षयेल्लक्षणोत्कर्षाद्वातादीन् श्रोणितादिषु ।
अरुण कृष्णनीलं वा खं पश्यन् प्रविशेत्तमः ॥ ३० ॥
शीघ्रं च प्रतिबुध्येत हृत्पीड़ा वेपथुर्भ्रमः ।
कार्ष्ण्यं श्यावारुणा छाया मूर्च्छायें मारुतात्मके ॥३१॥
पित्तेन रक्तं पीतं वा नभः पश्यन् विशेत्तमः ।
विबुध्येत च सस्वेदो दाहतृट्तापपीडितः ॥ ३२ ॥
भिन्नविण्नीलपीताभो रक्तपीताकुलेक्षणः ।
कफेन मेघसङ्काशं पश्यन्नाकाशमाविशेत् ॥ ३३ ॥
तमश्चिराच्च बुध्येत सहल्लासः प्रसेकवान् ।
गुरुभिः स्तिमितैरङ्गैरार्द्रचर्मावनद्धवत् ॥ ३४ ॥
सर्वाकृतिस्त्रिभिर्दोषैरपस्मार इवापरः ।

पातयत्याशु निश्चेष्टं विना बीभत्सचेष्टितैः ॥ ३५ ॥
दोषेषु मदमूर्च्छायाः कृतवेगेषु देहिनाम् ।
स्वयमेवोपशाम्यन्ति सन्न्यासो नौषधैर्विना ॥ ३६ ॥
वाग्देहमनसां चेष्टामाक्षिप्यातिबला मलाः ।
सन्न्यासं सन्नियतिताः प्राणायतनसंश्रयाः ॥ ३७ ॥
कुर्वन्ति तेन पुरुषः काष्ठभूतो मृतोपमः ।
म्रियते शीघ्रं शीघ्रं चेच्चिकित्सा न प्रयुज्यते ॥ ३८ ॥
अगाधे ग्राहबहुले सलिलौघ इवातटे ।
सन्न्यासे विनिमज्जन्तं नरमाशु निवर्त्तयेत् ॥ ३९ ॥
मदमानरोषतोषप्रभृतिभिररिभिर्निजैः परिष्वङ्गः ।
युक्तायुक्तं च समं युक्तिवियुक्तेन मद्येन ॥ ४० ॥
बलकालदेशसात्म्यप्रकृतिसहायामयवयांसि ।
प्रविभज्य तदनुरूपं यदि पिबति ततः पिबत्यमृतम् ॥ ४१ ॥

सप्तमोऽध्यायः ।

अथार्शसां निदानं व्याख्यास्यामः ॥
अरिवत्प्राणिनो मांसकीलका विशसन्ति यत् ।
अर्शांसि तस्मादुच्यन्ते गुदमार्गनिरोधतः ॥ १ ॥
दोषास्त्वङ्मांसमेदांसि सन्दूष्य विविधाकृतीन् ।
मांसाङ्कुरानपानादौ कुर्वन्त्यर्शांसि तान् जगुः ॥ २ ॥
सहजन्मोत्तरोत्थानभेदाद् द्वेधा समासतः ।
शुष्कस्रावविभेदाच्च गुदस्थूलान्त्रसंश्रयः ॥ ३ ॥
अर्द्धपद्माङ्कुलस्थास्थिसोऽध्यर्द्धाङ्गुलाः स्थिताः ।
बल्याः प्रवाहिणी तासामन्तर्मध्ये विसर्जनी ॥ ४ ॥
बाह्या सवरणी तस्या गुदोष्ठो बहिरङ्गुले ।
यवाध्यर्द्धप्रमाणेन रोमाण्यत्र ततः परम् ॥ ५ ॥

तत्र हेतुः सङ्घोत्थानां बलीबीजोपतप्तता ।
अर्शसां बीजतप्तेषु मातापित्रपचारतः ॥ ६ ॥
दैवाच्च ताभ्यां कोपो हि सन्निपातस्य नान्यतः ।
असाध्यान्येवमाख्याताः सर्वे रोगाः कुलोद्भवाः ॥ ७ ॥
सहजानि विशेषेण रूक्षदुर्दर्शनानि च ।
अल्पमुखानि पाण्डूनि दारुणोपद्रवाणि च ॥ ८ ॥
षोढान्यानि पृथग्दोषसंसर्गनिचयात्मतः ।
शुष्काणि वातश्लेष्माभ्यामार्द्राणि त्वसृपित्ततः ॥ ९ ॥
दोषप्रकोपहेतुस्तु प्रागुक्तस्तेन सादिते ।
अग्नौ मलेऽतिनिचिते पुनश्चातिव्यवायतः ॥ १० ॥
यानसङ्क्षोभविषमकठिनोल्कटकासनात् ।
वस्तिनेत्राश्मलोष्टोर्वीतलचैलादिघट्टनात् ॥ ११ ॥
शुष्कशीताम्बुसस्यार्शात् प्रततातिप्रवाहणात् ।
वातमूत्रशकृद्वेगधारणात्तदुदीरणात् ॥ १२ ॥
ज्वरगुल्मातिसारामग्रहणीशोफपाण्डुभिः ।
कर्शनादिषमाभ्यश्च चेष्टाभ्यो योषिता पुनः ॥ १३ ॥
आमगर्भप्रपतनाद् गर्भवृद्धिप्रपीडनात् ।
दुष्टशैश्चापरैर्वायुरपानः कुपितो मलम् ॥ १४ ॥
पायोर्बलीषु सम्यक्ते तासभिष्यन्दमूर्त्तिषु ।
जायन्तेऽर्शांसि तत्पूर्वलक्षणं मन्दवह्निता ॥ १५ ॥
विष्टम्भः सक्थिसदनं पिण्डिकोद्वेष्टनं श्रमः ।
सादोऽङ्गे नेत्रयोः शोफः शकृद्वेदोऽथवा ग्रहः ॥ १६ ॥
मारुतः प्रचुरो मूढः प्रायो नाभेरधश्चरन् ।
सरुक् सपरिकर्त्तश्च कृच्छ्राद्विर्गच्छति स्वनन् ॥ १७ ॥
अल्पकूजनमाटोपः श्यामतोद्गारभूरिता ।
प्रभूतं मूत्रमल्पा विट् श्यावधूमकोऽम्लकः ॥ १८ ॥

शिरःपृष्ठोरसां शूलमालस्यं भिन्नवर्णता।
तथेन्द्रियाणां दौर्बल्यं क्रोधो दुःखोपचारता ॥ १९ ॥
आशङ्कायहृणीदोषपाण्डुगुल्मोदरेषु च।
एतान्येव विवर्धन्ते जातेषु हृतनामसु ॥ २० ॥
निवर्त्तमानोऽपानो हि तैरधोमार्गरोधतः।
क्षोभयन्निलानन्यान् सर्वेन्द्रियशरीरगान् ॥ २१ ॥
तथा मूत्रशकृत्पित्तकफान् धातूंश्च साशयान्।
मृद्नात्यग्निं ततः सर्वो भवति प्रायशोऽर्जसः ॥ २२ ॥
क्षणो भृशं हतोत्साही दीनः श्यामोऽतिनिष्प्रभः।
असारो विगतच्छायो जन्तुजुष्ट इव द्रुमः ॥ २३ ॥
क्षतस्त्रैरुपद्रवैर्ग्रस्तो यथोक्तैर्मर्मपीडनैः।
तथा कासपिपासास्यवैरस्यश्वासपीनसैः ॥ २४ ॥
क्षमाङ्गभङ्गवमथुश्वयथुश्वयथुज्वरैः।
क्लैव्यव्याधिर्यतैर्मिर्म्यैश्चर्कराश्मरिपीडितः ॥ २५ ॥
श्यामभिन्नस्वरो ध्यायन्मुहुः क्षीवन्नरोचकी।
सर्वपर्वास्थिकृन्ताभिपायुवङ्क्षणशूलवान् ॥ २६ ॥
गुदेन स्रवतापिच्छां पुलाकोदकसन्निभाम्।
विवद्धमुत्तं शुष्कार्द्रं पक्वामं चान्तरान्तरा ॥ २७ ॥
पाण्डुपीतं हरिद्रक्तं पिच्छिलं चोपवेश्यते।
गुदाङ्कुरा वह्ननिलाः शुष्काग्निसिचिमान्विताः ॥ २८ ॥
श्यावारुणाः स्तब्धा विषमाः परुषाः खराः।
मिथो विसदृशा वक्त्रास्तीक्ष्णा विस्फुटिताननाः ॥ २९ ॥
विम्बीकर्कन्धूखर्जूरकार्पासीफलसन्निभाः।
केचित्कदम्बपुष्पाभाः केचित्सिद्धार्थकोपमाः ॥ ३० ॥
शिरः पार्श्वांसकट्यूरुवङ्क्षणाभ्यधिकव्यथाः।
च्यवथूद्गारविष्टम्भहृद्ग्रहारोचकप्रदाः ॥ ३१ ॥

कासश्वासाग्निवैषम्यकर्णनादभ्रमावहाः।
तैरार्त्तो ग्रथित स्तोक सशब्दं सप्रवाहिकम्॥ ३२॥
रुक्फेनपिच्छानुगतं विबद्धमुपवेश्यते।
क्षणात्वङ्नखविण्मूत्रनेत्रवक्त्रश्च जायते॥ ३३॥
मुखाच्छोहोदराष्ठीलासम्भवस्तत एव च।
पित्तोत्तरा नीलसुखा रक्तपीतासितप्रभाः॥ ३४॥
तन्वस्रस्रावियो विस्रास्तनवो मृदवः श्लथाः।
शुक्तिजिह्वायकृत्खण्डजलौकावक्त्रसन्निभाः॥ ३५॥
दाहपाकज्वरस्वेदतमूर्च्छारुचिमोहदाः।
सोष्मणो द्रवनीलोष्णपीतरक्तामवर्चसः॥ ३६॥
यवमध्या हरित्पीतहारिद्रत्वङ्नखादयः।
श्लेष्मोल्बणा महामूला घना मन्दरुजाः सिताः॥३७॥
उच्छ्रूनोपचिताः स्निग्धाः स्तब्धवृत्तगुरुस्थिराः।
पिच्छिलाः स्तिमिताः श्लक्ष्णाः कण्ड्वाद्याः स्पर्शनप्रियाः॥ ३८॥
करीरपनसास्थ्याभास्तथागोस्तनसन्निभाः।
वङ्क्षणानाहिनः पायुवस्तिनाभिविकर्त्तिनः॥ ३९॥
सकासश्वासहृल्लासप्रसेकारुचिपीनसाः।
मेहक्लेच्छशिरोजाड्यशिश्चिरज्वरकारिणः॥ ४०॥
क्लैब्याग्निमार्दवच्छर्दिरामप्रायविकारदाः।
वसाभाः सकफप्राज्यपुरीषाः सप्रवाहिकाः॥ ४१॥
न स्रवन्ति न भिद्यन्ते पाण्डुस्निग्धत्वगादयः।
संसृष्टलिङ्गाः ससर्गात् निचयात्सर्वलक्षणाः॥ ४२॥
रक्तोल्बणा गुदे कोलाः पित्तार्त्तिसमन्विताः।
वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः॥ ४३॥
तेऽत्यर्थं दुष्टमुष्णं च गाढविट्प्रतिपीडिताः।
स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः॥ ४४॥

भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः।
हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः॥ ४५॥
मुद्गकोद्रवचूर्णाम्लकरीरचणकादिभिः।
रूक्षैः सग्राहिभिर्वायुः स्वस्थाने कुपितो बली॥ ४६॥
अधोवहानि स्रोतांसि सरुध्याधः प्रशोषयन्।
पूरोष वातविण्मूत्रसङ्गं कुर्वीत दारुणम्॥ ४७॥
तेन तीव्रा रुजा कोष्ठपृष्ठहृत्पार्श्वगा भवेत्।
आध्मानमुदरावेष्टो हृल्लासः परिकर्त्तनम्॥ ४८॥
वस्तौ च सुतरां शूलं गण्डस्रयथुसम्भवः।
पवनस्योर्ध्वगामित्वं ततश्छर्द्यरुचिज्वराः॥ ४९॥
हृद्रोगग्रहणीदोषमूत्रसङ्गप्रवाहिकाः।
वाधिर्य्यतिमिरश्वासशिरोरुक्कासपीनसाः॥ ५०॥
मनोविकारस्तृष्णास्रपित्तगुल्मोदरादयः।
ते ते च वातजा रोगा जायन्ते भृशदारुणाः॥ ५१॥
दुर्नाम्नामित्युदावर्त्तैः परमोऽयमुपद्रवः।
वाताभिभूतकोष्ठानां तैर्विनापि स जायते॥ ५२॥
सहजानि विदोषाणि यानि चाभ्यन्तरे बली।
स्थितानि तान्यसाध्यानि याप्यन्तेऽग्निबलादिभिः॥ ५३॥
द्वन्द्वजानि द्वितीयाया बली यान्याश्रितानि च।
कृच्छ्रसाध्यानि तान्याहुः परिसवत्सराणि च॥ ५४॥
वाङ्मायां तु बली जातान्येकदोषोल्बणानि च।
अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च॥ ५५॥
मेढ्रादिष्वपि वक्ष्यन्ते यथास्वं नाभिजानि तु।
गण्डूपदास्यरूपाणि पिच्छिलानि मृदूनि च॥ ५६॥
व्यानो गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो बहिः।
कीलोपमं स्थिरस्थूलं चर्मकीलं तु तं विदुः॥ ५७॥

वातेन तोदः पारुष्यं पित्तादसितरक्तता ।
श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता ॥ ५८ ॥
अर्शसां प्रशमे यत्नमाशु कुर्वीत बुद्धिमान् ।
तान्याशु हि गुदं वङ्क्षा कुर्य्युर्बहुगुदोदरम् ॥ ५९ ॥

अष्टमोऽध्यायः ।

अथातोऽतीसारग्रहणीरोगयोर्निदानं व्याख्यास्यामः ॥
दोषैर्व्यस्तैः समस्तैश्च भयाच्छोकाच्च षड्विधः ।
अतीसारः स सुतरां जायतेऽत्यम्बुपानतः ॥ १ ॥
क्रमशुष्कामिषासात्म्यतिलपिष्टविरूढकैः ।
मद्यरूक्षातिमात्रान्नैर्वर्षौभिः स्नेहविभ्रमात् ॥ २ ॥
क्रमिभ्यो वैगरोधाच्च तद्विधैः कुपितोऽनिलः ।
विलसत्यधोऽध्यातुं हत्वा तेनैव चानलम् ॥ ३ ॥
व्यापद्यानुशकृत्कोष्ठ पुरीषं द्रवतां नयन् ।
प्रकल्पतेऽतिसाराय लक्षणं तस्य भाविनः ॥ ४ ॥
तोदो हृद्गुदकोष्ठेषु गात्रसादो मलग्रहः ।
आध्मानमविपाकश्च तत्र वातेन विज्वलम् ॥ ५ ॥
अल्पाल्प शब्दशूलाढ्य विबद्धमुपवेश्यते ।
रूक्षं सफेनमच्छञ्च ग्रथितं वा मुहुर्मुहुः ॥ ६ ॥
तथा दग्धगुडाभास सपिच्छापरिकर्त्तिकम् ।
शुष्कास्यो भ्रष्टपायुश्च हृष्टरोमा विनिश्वसन् ॥ ७ ॥
पित्तेन पीतमसितं हारितं शाद्वलप्रभम् ।
सरक्तमतिदुर्गन्ध दहन्मूर्च्छाश्रमदाहवान् ॥ ८ ॥
सशूलपायुसन्ताप पाकवान् श्लेष्मणा घनम् ।
पिच्छिल तन्तुमच्छेत स्निग्धमांसं कफान्वितम् ॥ ९ ॥
अभीक्ष्ण गुरु दुर्गन्धं विबद्धमनुबद्धरुक् ।

निद्रालुरलसोऽबद्धविड्वात्य सप्रवाहिकम् ॥ १० ॥
सरोमहर्षः सोत्क्लेशो गुरुवस्तिगुदोदरः।
क्षुतेऽप्यकृतसञ्ज्ञश्च सर्वात्मा सर्वलक्षणः ॥ ११ ॥
भयेन क्षोभिते चित्ते सपित्तो द्रावयेत् शकृत्।
वायुस्ततोऽतिसार्येत क्षिप्रमुष्णं द्रवं प्लवम् ॥ १२ ॥
वातपित्तसमं लिङ्गैराहुस्तद्वच्च शोकतः।
अतीसारः समासेन द्विधा सामो निरामकः ॥ १३ ॥
सास्रद्विरसः तत्राद्ये गौरवादप्सु मज्जति।
शब्दगन्धमाटोपविष्टम्भार्त्तिप्रसेकिनः ॥ १४ ॥
विपरीतो निरामस्तु कफात्पक्वोऽपि मज्जति।
अतीसारेषु यो नातियत्नवान् ग्रहणीगदः ॥ १५ ॥
तस्य स्याद्ग्निविध्वंसकरैरत्यर्थसेवितैः।
साम शकृन्निराम वा जीर्णे येनातिसार्यते ॥ १६ ॥
सोऽतिसारोऽतिसरणादाशुकारी स्वभावतः।
साम सान्नमजीर्णेऽन्ने जीर्णे पक्वं तु नैव वा ॥ १७ ॥
अकस्माद्वा मुहुर्वेगमकस्मात् शिथिलं मुहुः।
चिरकृद्ग्रहणीदोषः सञ्चयाच्चोपवेशयेत् ॥ १८ ॥
स चतुर्धा पृथग्दोषैः सन्निपाताच्च जायते।
प्राग्रूपं तस्य सदनं चिरात्यचनमश्नकः ॥ १९ ॥
प्रसेको वक्त्रवैरस्यमरुचिस्तृट्क्लमो भ्रमः।
आनद्धोदरता हृद्रुक् कर्णक्ष्वेडोऽन्त्रकूजनम् ॥ २० ॥
सामान्यं लक्षणं काश्र्यं धूमकस्तमको ज्वरः।
मूर्च्छा शिरोरुग्विष्टम्भः क्षयथुः करपादयोः ॥ २१ ॥
तत्रानिलात्तालुशोषस्तिमिरं कर्णयोः स्वनः।
पार्श्वोरुवङ्क्षणग्रीवारुजाऽभीक्ष्णं विसूचिका ॥ २२ ॥
रसेषु रुचिः सर्वेषु क्षुत्तृष्णा परिकर्त्तिका।

जीर्णे जीर्यति चाध्मानं भुक्ते स्वास्थ्यं समश्नुते ॥ २३ ॥
वातरुग्दोषगुल्मार्शःप्लीहपाण्डुत्वशङ्कितः ।
चिराद्युःखं द्रव शुष्क तन्वाम शब्दफेनवत् ॥ २४ ॥
पुनः पुनः सृजेद्वर्चः पायुरुक्श्वासकासवान् ।
पित्तेन नील पीताभ पीताभः सृजति द्रवम् ॥ २५ ॥
पूत्यम्लोद्गारहृत्कण्ठदाहारुचिलड़र्दितः ।
श्लेष्मणा पच्यते दुःखमन्न छर्दिररोचकः ॥ २६ ॥
आस्योपदेहनिष्ठीवकासहृल्लासपीनसाः ।
हृदय मन्यते स्थानमुदर स्तिमित गुरु ॥ २७ ॥
उद्गारो दुष्टमधुरः सदन स्त्रीष्वहर्षणम् ।
भिक्तामन्ने ससंसृष्टगुरुवर्च प्रवर्त्तनम् ॥ २८ ॥
अङ्गग्लानिरपि दौर्बल्यं सर्वजे सर्वसङ्करः ।
विभागेऽङ्गस्य ये चोक्ता विषमाद्यास्त्रयोऽग्नयः ॥ २९ ॥
तेऽपि स्युर्ग्रहणीदोषाः समस्तु स्वास्थ्यकारणम् ।
वातव्याध्यश्मरीकुष्ठमेहोदरभगन्दराः ।
अर्शांसि ग्रहणीत्यष्टौ महारोगाः सुदुस्तराः ॥ ३० ॥

नवमोऽध्यायः ।

अथातो मूत्राघातनिदानं व्याख्यास्यामः ॥
वस्तिवस्तिशिरोमेढ्रकटीवृषणपायवः ।
एकसम्बन्धनाः प्रोक्ता गुदास्थिविवराश्रयाः ॥ १ ॥
अधोमुखोऽपि वस्तिर्हि मूत्रवाहिशिरामुखैः ।
पार्श्वेभ्यः पूर्यते सूक्ष्मैः स्यन्दमानैरनारतम् ॥ २ ॥
यैस्तैरेव प्रविश्यैनं दोषाः कुर्वन्ति विंशतिम् ।
मूत्राघातान् प्रमेहांश्च कृच्छ्रान्मर्मसमाश्रयान् ॥ ३ ॥
वस्तिवङ्क्षणमेढ्रार्त्ति युक्तोऽल्पाल्पं मुहुर्मुहुः ।

मूत्रयेद्वातजे कृच्छ्रे पैत्ते पीतं सदाहरुक् ॥ ४ ॥
रक्तं वा कफजे वस्तिमेढ्रगौरवशोफवान्।
सपिच्छं सविबन्धञ्च सर्वैः सर्वात्मके मलैः ॥ ५ ॥
यदा वायुर्मुखं वस्तेराहृत्य परिशोषयेत्।
मूत्रं सपित्तं सकफं सशुक्रं वा तदा क्रमात् ॥ ६ ॥
सञ्जायतेऽश्मरी घोरा पित्ताद्गोरिव रोचना।
श्लेष्माश्रया च सर्वा स्यादथाश्याः पूर्वलक्षणम् ॥ ७ ॥
वस्त्याध्मानं तदासन्नदोषेषु परितोऽतिरुक्।
मूत्रे च वस्तुगन्धत्वं मूत्रकृच्छ्रं ज्वरोऽरुचिः ॥ ८ ॥
सामान्यलिङ्गं रुङ्नाभिसेवनीवस्तिमूर्द्धसु।
विशीर्णधारं मूत्रं स्यात्तया मार्गनिरोधनैः ॥ ९ ॥
तद्वरणायात् सुखं मेढ्रेदच्छं गोमेदकोपमम्।
तत् रुग्भात् क्षते सास्रमायासाच्चातिरुग्भवेत् ॥ १० ॥
तत्र वाताद् भृशार्त्तो दन्तान् खादति वेपते।
मृद्नाति मेढ्रं नाभिं पीडयत्यनिशं क्षणम् ॥ ११ ॥
सानिलं मुञ्चति शुक्रमश्मरीमेहति विन्दुशः।
श्यावा रूक्षाऽश्मरी चास्य स्राविता कण्टकैरिव ॥ १२ ॥
पित्तेन दह्यते वस्तिः पच्यमान इवोष्मवान्।
भल्लातकास्थिसस्थाना रक्तपीताऽसिताऽश्मरी ॥ १३ ॥
वस्तिर्निस्तुद्यत इव श्लेष्मणा शीतलो गुरुः।
अश्मरी महती श्लक्ष्णा मधुवर्णाथवा सिता ॥ १४ ॥
एता भवन्ति बालानां तेषामेव च भूयसा।
आश्रयोपचयाल्पत्वाद् ग्रहणाहरणे सुखाः ॥ १५ ॥
शुक्राश्मरी तु महतां जायते शुक्रधारणात्।
स्थानात् च्युतमयुक्तं हि मुष्कयोरन्तरेऽनिलः ॥ १६ ॥
शोषयत्युपसृज्य शुक्रं तच्छुष्कमश्मरी।

वस्तिरुक् कृच्छ्रमूत्रत्वमुष्कस्रंसयथुकारिणी ॥ १७ ॥
तस्यामुत्पन्नमात्रायां शुक्रमेति विलीयते ।
पीडिते त्ववकाशेऽस्मिन् अश्मर्य्येव च शर्करा ॥ १८ ॥
अणुशो वायुना भिन्ना सा त्वस्मिन्ननुलोमगे ।
निरेति सह मूत्रेण प्रतिलोमे विबध्यते ॥ १९ ॥
मूत्रसन्धारणैः कुर्य्याद्रुद्धा वस्तेर्मुखं मरुत् ।
मूत्रसङ्गं रुजं कण्डूं कदाचिच्च स्वधामतः ॥ २० ॥
प्रच्याव्य वस्तिमुद्वृत्तं गर्भाभं स्थूलविप्लुतम् ।
करोति तत्र रुग्दाहस्रन्दनोद्वेष्टनानि च ॥ २१ ॥
विन्दुशश्च प्रवर्त्तेत मूत्रं वस्तौ तु पीडिते ।
धारया द्विविधोऽप्येष वातवस्तिरिति स्मृतः ॥२२॥
दुस्तरो दुस्तरतरो द्वितीयः प्रबलानिलः ।
शुक्रमार्गस्य वस्तेश्च वायुरन्तरमाश्रितः ॥ २३ ॥
अष्ठीलाभ घन ग्रन्थिं करोत्यचलमुन्नतम् ।
वाताष्ठीलेति साऽऽध्मानविण्मूत्रानिलसङ्गकृत् ॥ २४ ॥
विगुणः कुण्डलीभूतो वस्तौ तीव्रव्यथोऽनिलः ।
आविश्य मूत्रं भ्रमति सस्तम्भोद्वेष्टगौरवः ॥ २५ ॥
मूत्रमल्पाल्पमथवा विमुञ्चति शकृत् सृजन् ।
वातकुण्डलिकेत्येषा मूत्रन्तु विधृत चिरम् ॥ २६ ॥
न निरेति विबद्ध वा मूत्रातीत तदल्परुक् ।
विधारणात् प्रतिहतं वातोदावर्त्तितं यदा ॥ २७ ॥
नाभेरधस्तादुदरं मूत्रमापूरयेत्तदा ।
कुर्य्यात्तीव्ररुगाऽऽनमपक्तिमलसंग्रहम् ॥ २८ ॥
तन्मूत्रजठर छिद्रवैगुण्येनानिलेन वा ।
आच्छिन्नमल्प मूत्रन्तु वस्तौ नालेऽथवा मणौ ॥ २९ ॥
श्लिष्ट्वा स्रवेत् शनैः पश्चात् सरुजं वाऽथवाऽरुजम् ।

मूत्रौकसङ्गः स विच्छिन्नतच्छेषगुरुरेफसः ॥ ३० ॥
अन्तर्वस्तिमुखे क्षत्तः स्थिरोऽल्पः सहसा भवेत्।
अश्मरीतुल्यरुक् ग्रन्थिर्मूत्रयन्त्रिः स उच्यते ॥ ३१ ॥
मूत्रितस्य क्षियं यातो वायुना शुक्रमुल्बणम्।
स्थानात् च्युतं मूत्रयतः प्राक्पश्चाद्वा प्रवर्त्तते ॥ ३२ ॥
भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते।
रूक्षदुर्बलयोर्वातादुदावर्त्तं शकृद् यदा ॥ ३३ ॥
मूत्रस्रोतोऽनुपर्य्येति सस्रष्टं शकृता तदा।
मूत्र विट्तुल्यगन्धं स्याद्विड्घातं तमादिशेत् ॥ ३४ ॥
पित्तं व्यायामतीक्ष्णोष्णभोजनाध्वातपादिभिः।
प्रदुष्टं वायुना क्षिप्तं वस्त्यपस्थार्त्तिदाहवत् ॥ ३५ ॥
मूत्रं प्रवर्त्तयेत् पीत सरक्तं रक्तमेव वा।
उष्ण पुनः पुनः क्षच्छ्रादुष्णवात वदन्ति तम् ॥ ३६ ॥
रूक्षस्य क्लान्तदेहस्य वस्तिस्थौ पित्तमारुतौ।
मूत्रक्षयं सरुग्दाह जनयेतां तदाख्यम् ॥ ३७ ॥
पित्तं कफो द्वावपि वा संहन्येतेऽनिलेन च।
क्षच्छ्रान्मूत्रं तदा पीतं रक्तं श्वेतं घनं सृजेत् ॥ ३८ ॥
सदाह रोचनाशङ्खचूर्णवर्णं भवेच्च तत्।
शुष्क समस्तवर्णं वा मूत्रसादं वदन्ति तम् ॥ ३९ ॥
इति विस्तरतः प्रोक्ता रोगा मूत्राऽप्रवृत्तिजाः।
निदानलक्षणैरूर्द्धं वक्ष्यन्तेऽतिप्रवृत्तिजाः ॥ ४० ॥

दशमोऽध्यायः।

अथातः प्रमेहनिदानं व्याख्यास्यामः ॥
प्रमेहा विंशतिस्तत्र श्लेष्मतो दश पित्ततः।
षट् चत्वारोऽनिलात् तेषां मेदोमूत्रकफावहम् ॥ १ ॥

अन्नपानक्रियाजातं यत् प्रायस्तत् प्रवर्त्तकम् ।
स्याद्श्लक्ष्णवर्णस्निग्धगुरुपिच्छिलशीतलम् ॥ २ ॥
नवधान्यसुरानूपमांसेक्षुगुडगोरसम् ।
एकस्थानासनरतिः शयन विधिवर्जितम् ॥ ३ ॥
वस्तिमाश्रित्य कुरुते प्रमेमान् दूषितः कफः ।
दूषयित्वा वपु क्लेदस्वेदमेदोरसामिषम् ॥ ४ ॥
पित्तं रक्तमपि क्षीणे कफादौ मूत्रसञ्चयम् ।
धातून् वस्तिमुपानेय तत्क्षयेऽपि च मारुतः ॥ ५ ॥
साध्ययाप्यपरित्याज्य. मेहास्तेनैव तद्भवाः ।
समासमक्रियतया महात्ययतयापि च ॥ ६ ॥
सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता ।
दोषदूष्यविशेषेऽपि तत्संयोगविशेषतः ॥ ७ ॥
मूत्रवर्णादिभेदेन भेदो मेहेषु कल्प्यते ।
अच्छं बहु सित शीतं निर्गन्धमुदकोपमम् ॥ ८ ॥
मेहेत्युदकमेहेन किञ्चिच्चाविलपिच्छिलम् ।
इक्षोः रसमिवात्यर्थं मधुर चेक्षुमेहतः ॥ ९ ॥
सान्द्रीभवेत् पर्य्युषित सान्द्रमेही प्रमेहति ।
सुरामेही सुरातुल्यमुपर्य्यच्छमधो घनम् ॥ १० ॥
संहृष्टरोमा पिष्टेन पिष्टवद् बहुलं सितम् ।
शुक्राभं शुक्रमिश्रं वा शुक्रमेही प्रमेहति ॥ ११ ॥
मूत्राणून् सिकतामेही सिकतारूपिणो मलान् ।
शीतमेही सुबहुशो मधुरं भृशशीतलम् ॥ १२ ॥
शनैः शनैर्मेही मन्दं मन्द प्रमेहति ।
लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम् ॥ १३ ॥
गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोयवत् ।
नीलमेहेन नीलाभं कालमेही मषीनिभम् ॥ १४ ॥

हारिद्रमेही कटुकं हरिद्रासन्निभं दहत्।
विस्रं माञ्जिष्ठमेहेन मञ्जिष्ठासलिलोपमम् ॥ १५ ॥
विस्रमुष्णं सलवणं रक्ताभं रक्तमेहतः।
वासामेही वसाभिश्रं वसां वा मूत्रयेन्मुहुः ॥ १६ ॥
मज्जानं मज्जभिश्रं वा मज्जमेही मुहुर्मुहुः।
हस्ती मत्त इवाजस्रं मूत्रं वेगविवर्जितम् ॥ १७ ॥
सलसीकं विबद्धं च हस्तिमेही प्रमेहति।
मधुमेही मधुसमं जायते स किल द्विधा ॥ १८ ॥
क्रुद्धे धातुक्षयाद्वायौ दोषावृतपथेऽथवा।
आवृतो दोषलिङ्गानि सोऽनिमित्तं प्रदर्शयेत् ॥ १९ ॥
क्षीणः क्षणात् क्षणात् पूर्णो भजते कृच्छ्रसाध्यताम्।
कालेनोपेक्षिता सर्वे यद्यान्ति मधुमेहताम् ॥ २० ॥
मधुरं यच्च सर्वेषु प्रायो मध्विव मेहति।
सर्वेऽपि मधुमेहाख्या माधुर्य्याच्च तनोरतः ॥ २१ ॥
अविपाको रुचिच्छर्दिर्निद्राकासः सपीनसः।
उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम् ॥ २२ ॥
बस्तिमेहनयोस्तोदो मुष्कावदरण ज्वरः।
दाहस्तृष्णास्रको मूर्च्छा विड्भेदः पित्तजन्मनाम् ॥ २३ ॥
वातिकानामुदावर्त्तकण्ठहृद्ग्रहलोलताः।
शूलमुन्निद्रता शोषः कासः श्वासश्च जायते ॥ २४ ॥
शराविका कच्छपिका जालिनी विनताऽलजी।
मसूरिका सर्षपिका पुत्रिणी सविदारिका ॥ २५ ॥
विद्रधिश्चेति पिटिकाः प्रमेहोपेक्षया दश।
मांसमर्मसु जायन्ते मांसलेषु च धामसु ॥ २६ ॥
अन्तोन्नता मध्यनिम्ना श्यावा श्लेष्मरुजान्विता।
शरावसदृशस्थाना पिटिका स्यात् शराविका ॥ २७ ॥

अवगाढार्तिनिस्तोदा महावस्तुपरिग्रहा ।
श्लक्ष्णा कच्छपपृष्ठाभा पिटिका कच्छपी मता ॥ २८ ॥
स्तब्धा शिराजालवती स्निग्धस्रावा महाशया ।
रुजानिस्तोदबहुला सूक्ष्मच्छिद्रा च जालिनी ॥ २९ ॥
अवगाढरुजा क्लेदा पृष्ठे वा जठरेऽपि वा ।
महती पिटिका नीला विनता विनता स्मृता ॥ ३० ॥
दहति त्वचमुत्थाने मुहुः कष्टा विसर्पिणी ।
रक्तकृष्णातिलट्स्फोटदाहमोहज्वरान्विता ॥ ३१ ॥
मानसंस्थानयोस्तुल्या मसूरेण मसूरिका ।
सर्षपा मानसस्थाना क्षिप्रपाका महारुजा ॥ ३२ ॥
सर्षपा सर्षपातुल्यपिटिका परिवारिता ।
पुत्रिणी महती भूरिसुसूक्ष्मपिटिकावृता ॥ ३३ ॥
विदारीकन्दवद्वृत्ता कठिना च विदारिका ।
विद्रधिर्वक्ष्यतेऽन्यत्र तत्राद्यं पिटिकात्रयम् ॥ ३४ ॥
पुत्रिणी च विदारी च दुःसहा बहुमेदसः ।
सन्ति पित्तोल्बणास्त्वन्या. सम्भवन्त्यल्पमेदसः ॥ ३५ ॥
तासु मेहवशाच्च स्याद्दोषोद्रेकी यथायथम् ।
प्रमेहेण विनाप्येता जायन्ते दुष्टमेदसः ॥ ३६ ॥
तावच्च नोपलक्ष्यन्ते यावद्वस्तुपरिग्रहः ।
हारिद्रवर्णं रक्तं वा मेहप्राग्रूपवर्जितम् ॥ ३७ ॥
यो मूत्रयेत्र तं मेहं रक्तपित्तं तु तद्विदुः ।
स्वेदोऽङ्गगन्धः शिथिलत्वमङ्गे शय्यासनस्वप्नसुखाभिषङ्गः ॥ ३८ ॥
क्लिन्नत्वजिह्वास्यगलोपदेहो घनाङ्गता केशनखातिवृद्धिः ।
शीतप्रियत्वं गलतालुशोषो माधुर्यमास्ये करपाददाहः ॥ ३९ ॥
भविष्यतो मेहगणस्य रूपं मूत्रेऽभिधावन्ति पिपीलिकाश्च ।
दृष्ट्वा प्रमेहं मधुरं सपिच्छं मधूपमं स्याद्द्विविधो विचारः ॥ ४० ॥

सन्तर्पणाद्वा कफसम्भवः स्यात् क्षीणेषु दोषेष्वनिलात्मको वा।
सपूर्वरूपाः कफपित्तमेहाः क्रमेण ये वातकृताश्च मेहाः।
साध्या न ते पित्तकृतास्तु याप्याःसाध्यास्तुमेदो यदि नातिदुष्टं४१

एकादशोऽध्यायः।

अथातो विद्रधिवृद्धिगुल्मनिदानं व्याख्यास्यामः॥
भुक्तै. पर्य्युषिताल्पुष्टरूक्षशुष्कविदाहिभिः।
जिह्मशय्याविचेष्टाभिस्तैस्तैश्चासृक्प्रदूषणैः॥ १॥
दुष्टं त्वङ्मांसमेदोऽस्रिस्रावासृक्कण्डराश्रयः।
यः शोफो बहिरन्तर्वा महामूलो महारुजः॥ २॥
वृत्तः स्यादायतो यो वा स्मृतः षोढा स विद्रधिः।
दोषैः पृथक् समुदितैः शोणितेन क्षतेन च॥ ३॥
बाह्योऽत्र तत्र तत्राङ्गे दारुणो ग्रथितोन्नतः।
आन्तरो दारुणतरो गभीरो गुल्मवद् घनः॥ ४॥
वल्मीकवत् समुच्छ्रायो शीघ्रघात्यग्निशस्त्रवत्।
नाभिवस्तियकृत्प्लीहक्लोमहृत्कुक्षिबङ्क्षणे॥ ५॥
स्याद् हृक्कयोरपाने च वातात् तत्रातितीव्ररुक्।
श्यावारुणशिरोत्थानपाको विषमसंस्थितिः॥ ६॥
व्यवच्छेदभ्रमानाहस्यन्दसर्पणशब्दवान्।
रक्तताम्रासितः पित्तात् तृण्मोहज्वरदाहवान्॥ ७॥
चिप्रोत्थानप्रपाकश्च पाण्डुः कण्डूयुतः कफात्।
सोत्क्लेशशीतकस्तम्भजृम्भारोचकगौरवः॥ ८॥
चिरोत्थानविदाहश्च सकोथः सन्निपाततः।
सामर्थ्याच्चाव विभजेद् बाह्याभ्यन्तरलक्षणम्॥ ९॥
क्षणक्षोटाहतः श्यावस्तीव्रदाहरुजाज्वरः।
पित्तलिङ्गोऽसृजा बाह्यः स्त्रीणामेव तथान्तरः॥ १०॥

शस्त्राद्यैरभिघातेन क्षते वाऽपथ्यकारिणः ।
क्षतोष्मा वायुविक्षिप्तः सरक्तं पित्तमीरयन् ॥ ११ ॥
पित्तासृग्लक्षणं कुर्याद्विद्रधिं भूर्ध्युपद्रवम् ।
तेषूपद्रवभेदश्च स्मृतोऽधिष्ठानभेदतः ॥ १२ ॥
नाभ्यां हिक्षा भवेद् वस्तौ मूत्रं कृच्छ्रेण पूति च ।
श्वासो यकृति रोधस्तु प्लोक्तुच्छ्वासस्य लट् पुनः ॥ १३ ॥
गलग्रहश्च क्लोम्नि स्यात् सर्वाङ्गग्रहो हृदि ।
प्रमोहस्तमकः कासो हृदये घट्टन व्यथा ॥ १४ ॥
कुक्षिपार्श्वान्तरांसार्त्तिः कुक्षावाटोपजन्म च ।
सक्थ्योर्भ्रंशो वङ्क्षणयोर्वृक्कयोः कटिपृष्ठयोः ॥ १५ ॥
पार्श्वयोश्च व्यथा पायौ पवनस्य निरोधनम् ।
आमपक्वविदग्धत्वं तेषां शोफवदादिशेत् ॥ १६ ॥
नाभेरूर्द्धं मुखात् पक्वाः प्रस्रवन्त्यधरे गुदात् ।
उभाभ्यां नाभिजो विद्याद्दोषं क्लेदाच्च विद्रधौ ॥ १७ ॥
यथास्वं व्रणवत् तत्र विवर्ज्यं: सन्निपातजः ।
पक्वो द्रव्याभिवस्तिस्थो भिन्नोऽन्तर्बहिरेव वा ॥ १८ ॥
पक्वाशयान्तः स्रवन् वृक्कात् क्षीणस्योपद्रवान्वितः ।
एवमेव स्तनशिराविद्रुताः प्राप्य योषिताम् ॥ १९ ॥
सूतानां गर्भिणीनां वा सम्भवेच्छ्वयथुर्घनः ।
स्तने सदुग्धेऽदुग्धे वा बाह्यविद्रधिलक्षणः ॥ २० ॥
नाडीनां सूक्ष्मवक्त्रत्वात् कन्यानान्तु न जायते ।
क्रुद्धो रुद्धगतिर्वायुः शोफशूलकरश्चरन् ॥ २१ ॥
मुष्कौ वङ्क्षणतः प्राप्य फलकोशाभिवाहिनोः ।
प्रपीड्य धमनीर्वृद्धिं करोति फलकोशयोः ॥ २२ ॥
दोषासृमेदोमूत्रान्त्रैः सप्तधा गदः ।
मूत्रान्त्रजावप्यनिलाद्धेतुभेदस्तु केवलम् ॥ २३ ॥

वातपूर्णदृतिस्पर्शो रूक्षो वातादृतिरुक्।
पक्वोदुम्बरसङ्काशः पित्तादाशूष्मपाकवान् ॥ २४ ॥
कफाच्छीतो गुरुः स्निग्धः कण्डूमान् कठिनोऽल्परुक्।
क्षणस्फोटाहतः पित्तहृद्विलिङ्गश्च रक्ततः ॥ २५ ॥
कफवन्मेदसा हृद्विर्दुस्तालफलोपमः।
मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः ॥ २६ ॥
अम्भोभिः पूर्णदृतिवत् क्षोभं याति सरुक्स्पृदुः।
मूत्रक्षयाच्छमधस्ताच्च क्लेद्य फलकोशयोः ॥ २७ ॥
वातकोपिभिराहारैः शीततोयावगाहनैः।
धारणैः रणभाराध्वविषमाङ्गप्रवर्तनैः ॥ २८ ॥
क्षोभनैः क्षुभितोऽन्त्रेश्च क्षुद्रान्त्रावयवं यदा।
पवनो विगुणीकृत्य स्वनिवेशादधो नयेत्।
दुर्व्यादङ्गणसन्धिस्थो गत्वाभ्रं स्रवयुं तदा ॥ २९ ॥
उपेक्ष्यमाणस्य च मुष्कवृद्धिमाध्मानरुक्स्तम्भवतीं स वायुः।
प्रपीडितोऽन्तः स्रवन् प्रयाति प्रश्नापथक्षेति पुनश्च मुक्तः ॥३०
अन्त्रवृद्धिरसाध्योऽय वातवृद्धिसमाकृतिः।
रूक्षक्षणारुणशिरातन्तुजालसमावृतः ॥ ३१ ॥
गुल्मोऽष्टधा पृथग्दोषैः सन्नष्टैर्निचय गतैः।
आर्त्तवस्य च दोषेण नारीणां जायतेऽष्टमः ॥ ३२ ॥
ज्वरच्छर्दितिसाराद्यैर्वमनाद्यैश्च कर्मभिः।
कर्शितो वातलान्नित्यं शीतं वाम्बु बुभुक्षितः ॥ ३३ ॥
यः पिबत्यनु चान्नानि लङ्घनं प्लवनादिकम्।
सेवते देहमक्षोभि क्षुदिं वा समुदीरयेत् ॥ ॥ ३४ ॥
अनुदीर्णानुदीर्णान् वा वातादोन् न विमुञ्चति।
स्नेहस्वेदावनभ्यस्य शोधनं वा निषेवते ॥ ॥३५ ॥
रूक्षो वाग्विदाहीनि भजते स्यन्दनानि वा।

वातोल्बणास्य मलाः पृथक्कुद्धा द्विशोऽथवा ॥ ३६ ॥
सर्वे वा रक्तयुक्ता वा महास्रोतोऽनुशायिनः।
ऊर्ध्वाधोमार्गमाहृत्य कुर्वते शूलपूर्वकम् ॥ ३७ ॥
स्पर्शोपलभ्य गुल्माख्यमुत्प्लुत ग्रन्थिरूपिणम्।
कर्षणात् कफविट्पित्तं मार्गस्यावरणेन वा ॥ ३८ ॥
वायुः कृताश्रयः कोष्ठे रौक्ष्यात् काठिन्यमागतः।
स्वतन्त्रः स्वाश्रये दुष्टः परतन्त्रः पराश्रये ॥ ३९ ॥
पिण्डितत्वादमूर्त्तोऽपि मूर्त्तत्वमिव संश्रितः।
गुल्म इत्युच्यते वस्तिनाभिहृत्पार्श्वसंश्रयः ॥ ४० ॥
वाताष्ठीलाशिरःशूल ज्वरप्लीहान्त्रकूजनम्।
व्यधः सूचेव विट्सङ्गः कृच्छ्रादुच्छ्वसनं मुहुः ॥ ४१ ॥
स्तब्धो गात्रे मुखे शोषः कार्श्यं विषमवह्निता।
रूक्षकृष्णत्वगादित्वं चलत्वादनिलस्य च ॥ ४२ ॥
अनिरूपितसंस्थानस्थानवृद्धिक्षयव्यथः।
पिपीलिकाव्याप्त इव गुल्मः स्फुरति तुद्यते ॥ ४३ ॥
पित्तादाहोऽम्लको मूर्च्छाविड्भेदस्वेददाहज्वराः।
हारिद्रत्व त्वगाद्येषु गुल्मश्च स्पर्शनासहः ॥ ४४ ॥
दूयते दीप्यते सोष्मा स्वस्थान दहतीव च।
कफात् स्तैमित्यमरुचिः सदन शिशिरज्वरः ॥ ४५ ॥
पीनसालस्यहृल्लासकासशुक्लत्वगादिताः।
गुल्मोऽवगाढः कठिनो गुरुः सुप्तः स्थिरोऽल्परुक् ॥ ४६ ॥
स्वदोषस्थानधामानः स्वे स्वे काले च रुक्कराः।
प्रायः त्रयस्तु द्वन्द्वोत्था गुल्माः सङ्कीर्णलक्षणाः ॥ ४७ ॥
सर्वजस्तीव्ररुग्दाहः शीघ्रपाकी घनोन्नतः।
सोऽसाध्यो रक्तगुल्मस्तु स्त्रिया एव प्रजायते ॥ ४८ ॥
ऋतौ वा नवसूता वा यदि वा योनिरोगिणी।

सशब्दो निश्चरेद्वायुर्विड्बन्धो मूत्रमल्पकम् ॥ ११ ॥
नातिमन्दोऽनलो लौल्य न च व्याहिरसं सुखम्।
तत्र वातोदरे शोफः पाणिपाद्मुष्ककुक्षिषु ॥ १२ ॥
कुक्षिपार्श्वोदरकटीपृष्ठरुक् पर्वभेदनम्।
शुष्ककासाङ्गमर्दोऽधोगुरुता मलसंग्रहः ॥ १३ ॥
श्यावारुणत्वगादित्वमकस्मादृक्षविक्षासवत्।
सतोदभेदमुदरं तनु कृष्णशिराततम् ॥ १४ ॥
आध्मातदृतिवच्छब्दमाहतं प्रकरोति च।
वायुश्चात्र सरुक्शब्दो विचरेत्सर्वतोगतिः ॥ १५ ॥
पित्तादरे ज्वरो मूर्च्छा दाहस्तृट् कटुकास्यता।
भ्रमोऽतिसारः पीतत्व त्वगादावुदरं हरित् ॥ १६ ॥
पीततास्रशिरामद्धं सस्वेदं सोष्म दह्यते।
धूमायति मृदुस्पर्शं क्षिप्रपाकं प्रदूयते ॥ १७ ॥
श्लेष्मोदरेऽङ्गमर्दन स्तोपलेपगुरुगौरवम्।
निद्रोत्क्लेशोऽचि श्वासः कासः शुक्लत्वगादिता ॥ १८ ॥
उदरं स्तिमितं श्लक्ष्ण शुक्लराजीततं महत्।
चिराभिहृद्धि कठिन शीतस्पर्शं गुरु स्थिरम् ॥ १९ ॥
त्रिदोषकोपनैस्तैस्तैः स्रोदृष्टैश्च रजोमलैः।
गरदूषीविषाद्यैश्च सरक्ताः सञ्चिता मलाः ॥ २० ॥
कोष्ठं प्राप्य विकुर्वाणाः शोषमूर्च्छाभ्रमान्वितम्।
कुर्युस्त्रिलिङ्गमुदरं शीघ्रपाकं सुदारुणम् ॥ २१ ॥
बाधते तत्र सुतरां शीतवाताभ्रदर्शने।
अत्याशितस्य सङ्क्षोभात् यानयानादिचेष्टितैः ॥ २२ ॥
अतिव्यवायकर्माध्वगमनव्याधिकर्शनैः।
वामपार्श्वाश्रितः प्लीहा च्युतः स्थानाद्विवर्धते ॥ २३ ॥
शोणितं वा रसादिभ्यो विद्रधिं तं विवर्धयेत्।

सोऽष्ठीलेवातिकठिनः प्राकृतः कूर्मपृष्ठवत् ॥ २४ ॥
क्रमेण वर्द्धमानश्च कुक्षावुदरमावहेत् ।
श्वासकासपिपासास्यवैरस्याऽऽनरुग्ज्वरैः ॥ २५ ॥
पाण्डुत्वच्छर्दिमूर्च्छार्त्ति दाहमोहैश्च संयुतम् ।
अरुणाभ विवर्णं वा नीलहारिद्ररजिमत् ॥ २६ ॥
उदावर्त्तरुगानाहैर्मोहहृद्दहनज्वरैः ।
गौरवारुचिकाठिन्यैर्विद्यात्तत्र मलान् क्रमात् ॥ २७ ॥
प्लीहवद्दक्षिणात् पार्श्वात् कुर्य्याद्यकृदपि च्युतम् ।
पक्वमवालैः सहानेन भुक्तेवेदायने गुदे ॥ २८ ॥
दुर्नामभिरुदावर्त्तैरन्यैर्वाल्पोपलैपिभिः ।
वर्चः पित्तकफान् रुद्ध्वा करोति कुपितोऽनिलः ॥ २९ ॥
अपानो जठरं तेन स्तब्धहृज्वरवद्भवेत् ।
कासश्वासोरुसदन शिरोहृन्नाभिपायुरुक् ॥ ३० ॥
मलसङ्गोऽरुचिश्छर्दिरुदरं सूढमारुतम् ।
स्थिर नीलारुणशिराराजिमद्वेमराजि वा ॥ ३१ ॥
नाभेरुपरि च प्रायो गोपुच्छाकृति जायते ।
अस्थ्यादिशल्यैः सान्नैश्चेक्षुकैरत्यशनेन वा ॥ ३२ ॥
भिद्यते पच्यते वान्त्र तच्छिद्रैश्च स्रवन् बहिः ।
आम एव गुदादेति ततोऽल्पाल्प सविड्रसः ॥ ३३ ॥
तत्र कुणपगन्धेन पिच्छिलः पीतलोहितः ।
शेषश्चापूर्य्य जठर जठरं घोरमावहेत् ॥ ३४ ॥
वर्द्धयेत् तदधो नाभेराशु चैति जलाप्लुताम् ।
उद्रिक्तदोषरूपं च व्याप्तं च श्वासहृद्भ्रमैः ॥ ३५ ॥
छिद्रोदरमिदं प्राहुः परिस्रावीति चापरे ।
प्रवृत्तस्नेहपानादेः सहसाऽऽमाम्बुपायिनः ॥ ३६ ॥
अल्पाम्बुपानान्मन्दाग्नेः क्षीणस्यातिकृशस्य वा ।

रुद्ध्वाऽम्बुमार्गाननिलः कफश्च जलमूर्च्छितः ॥ ३७ ॥
वर्द्धयेतां तदेवाम्बु तत्स्थानादुदराश्रितौ ।
ततः स्यादुदरं तृष्णागुदमुतिरुजायुतम् ॥ ३८ ॥
कासश्वासारुचियुतं नानावर्णशिराततम् ।
सोदपूर्णदृतिस्पर्शशब्दप्रचोभवेपथु ॥ ३९ ॥
दकोदरं महत् स्निग्धं स्थिरमाबद्धनाभि तत् ।
उपेक्षया च सर्वेषु दोषाः स्वस्थानतश्युताः ॥ ४० ॥
पाकाद्रवाद् द्रवीकुर्युः सन्धिस्रोतोमुखान्यपि ।
स्वेदश्च वाह्यस्रोतःसु विहतस्तिष्ठेगात्रितः ॥ ४१ ॥
तदेवोदकमाक्रम्य पिच्छां कुर्यात्तदा भवेत् ।
गुरूदरं स्थिरं बद्धमाहतं च न शब्दवत् ॥ ४२ ॥
मृदु व्यपेतराजीकं नाभ्यां सृष्टं च सर्पति ।
तदन्नूदकजन्यास्मिन् कुक्षिर्बद्धस्ततोऽधिकम् ॥ ४३ ॥
शिरान्तर्धानमुदकजठरोक्तं च लक्षणम् ।
वातपित्तकफप्लीहसन्निपातोदकोदरम् ॥ ४४ ॥
कृच्छ्रं यथोत्तरं पश्चात् परं प्रायोऽपरे हतः ।
सर्वं च जातसलिलं रिष्टोक्तोपद्रवान्वितम् ॥ ४५ ॥
जन्मनैवोदरं सर्वं प्रायः कृच्छ्रतमं मतम् ।
बलिनस्तदजातास्तु यत्न साध्यं नवोत्थितम् ॥ ४६ ॥

त्रयोदशोऽध्यायः ।

अथातः पाण्डुरोगशोफक्रिमिसर्पनिदानं व्याख्यास्यामः ॥
पित्तप्रधानाः कुपिता यथोक्तैः कोपनैर्मलाः ।
तत्रानिलेन बलिना क्षिप्तं पित्तं हृदि स्थितम् ॥ १ ॥
धमनीर्दश सम्प्राप्य व्याप्नुवत् सकलां तनुम् ।
श्लेष्मरक्तयकृन्मांसानि प्रदूष्यान्तरमाश्रितम् ॥ २ ॥

त्वङ्मांसयोस्तत् कुरुते त्वचि वर्णान् पृथग्विधान्।
पाण्डुहारिद्रहरितान् पाण्डुत्वं तेषु चाधिकम् ॥ ३ ॥
यतोऽतः पाण्डुरित्युक्तः स रोगस्तेन गौरवम्।
धातूनां स्याच्च शैथिल्यमोजसश्च गुणक्षयः ॥ ४ ॥
ततोऽल्परक्तमेदस्को निःसारः स्यात् क्लथेन्द्रियः।
स्रुद्यमानैरिवाङ्गैर्ना द्रवता हृदयेन च ॥ ५ ॥
शूनाक्षिकूटः सदनः कोपनः ष्ठीवनोऽल्पवाक्।
भक्तविट् शिशिरद्वेषी शीर्णरोमा हतानलः ॥ ६ ॥
सन्नसक्थो ज्वरी श्वासी कर्णच्वेडी भ्रमी श्रमी।
स पञ्चधा पृथग्दोषैः समस्तैर्मृत्तिकादनात् ॥ ७ ॥
प्रागूपमस्य हृदयस्यन्दनं रूक्षता त्वचि।
अरुचिः पीतमूत्रत्वं स्वेदाभावोऽल्पवह्निता ॥ ८ ॥
सादः श्रमोऽनिलात्तत्र गात्ररुक्स्तोदकम्पनम्।
कृष्णरूक्षारुणशिरानखविण्मूत्रनेत्रता ॥ ९ ॥
शोफानाहास्यवैरस्यविट्शोषाः पार्श्वमूर्धरुक्।
पित्ताद्धरितपीताभशिरादित्वं ज्वरस्तमः ॥ १० ॥
हृत्क्लेदमूर्च्छातृतीक्ष्णा दौर्गन्ध्यं कटुवक्त्रता।
वर्चोभेदोऽम्लको दाहः कफात् शुक्लशिरादिता ॥ ११ ॥
तन्द्रा लवणवक्त्रत्वं रोमहर्षः स्वरक्षयः।
कासश्छर्दिश्च निचयान्मिश्रलिङ्गोऽतिदुःसहः ॥ १२ ॥
मृत्कषायानिलं पित्तमूषरामधुराकफम्।
दूषयित्वा रसादींश्च रौक्ष्याद्रुक्षं विरूक्ष्य च ॥ १३ ॥
स्रोतांस्यपक्वैवापूर्य्य कुर्य्याद्दुष्टा च पूर्ववत्।
पाण्डुरोगं ततः शूननाभिपादास्यमेहनः ॥ १४ ॥
पुरीषं कृमिमन्मूत्रं स्विन्नं सासृक्कफं नरः।
यः पाण्डुरोगी सेवेत पित्तलं तस्य कामलाम् ॥ १५ ॥

कोष्ठशाखाश्रयं पित्तं दग्ध्वासृङ्मांसमावहेत्।
हारिद्रनेत्रमूत्रत्वङ्नखवक्त्रशक्तत्तया ॥ १६ ॥
दाहाविपाकः तृष्णावान् मेकाभो दुर्बलेन्द्रियः।
भवेत्पित्तोल्वणस्यासौ पाण्डुरोगादृतेऽपि च ॥ १७ ॥
उपेक्षया च शोभाढ्या सा कृच्छ्रा कुम्भकामला।
हरितश्यावपीतत्वं पाण्डुरोगे यदा भवेत् ॥ १८ ॥
वातपित्तात् भ्रमस्तृष्णा स्रोध्वहर्षौ मृदुज्वरः।
तन्द्राबलानलभ्रंशो लोटनं तं हलीमकम् ॥ १९ ॥
अलस चेति शंसन्ति तेषां पूर्वमुपद्रवाः।
शोफप्रधानाः कथिताः स एवातो निगद्यते ॥ २० ॥
पित्तरक्तकफान् वायुर्दुष्टो दुष्टान् बहिःशिराः।
नीत्वा रुग्गतिस्तैर्हि कुर्य्यात्त्वङ्मांससंश्रयम् ॥ २१ ॥
उत्सेध सहतं शोफं तमाहुर्निचयादतः।
सर्वं हेतुविशेषैस्तु रूपभेदान्नवात्मकम् ॥ २२ ॥
दोषैः पृथग्द्वयैः सर्वैरभिघाताद्विषादपि।
द्विधा वा निजमागन्तुं सर्वाङ्गैकाङ्गजं च तम् ॥ २३ ॥
पृथक्त्वतद्ग्रथिततात्रिशेषैश्च त्रिधा विदुः।
सामान्यहेतुः शोफानां दोषजानां विशेषतः ॥ २४ ॥
व्यधिकर्मोपवासादिक्षीणस्य भजतो द्रुतम्।
अतिमात्रमधान्यस्य गुर्वभ्यस्निग्धशीतलम् ॥ २५ ॥
लवणक्षारतीक्ष्णोष्णं शाकान्वु स्वप्नजागरम्।
मृद्वाम्यमांसवल्लूरमजीर्णेऽममैथुनम् ॥ २६ ॥
पदातेर्मार्गगमनं यानेन क्षोभिनापि वा।
श्वासकासातिसाराग्नीजठरप्रदरज्वराः ॥ २७ ॥
विसूच्यलसकच्छर्दिगर्भवीसर्पपाण्डुताः।
कुष्ठे च मिथ्योपक्रान्तास्तैर्दोषा वक्षसि स्थिताः ॥२८॥

ऊर्द्ध शोफमधोवस्ती मध्ये कुर्वन्ति मध्यगाः ।
सर्वाङ्गगाः सर्वगतं प्रत्यङ्गेषु तदाश्रयाः ॥ २८ ॥
तत्पूर्वरूपं दवथुः शिरायामोऽङ्गगौरवम् ।
वाताच्छोफश्चलो रूक्षः खररोमारुणासितः ॥ ३० ॥
सङ्कोचस्पन्दहर्षार्त्तितोदभेदप्रसुप्तिमान् ।
क्षिप्रोत्थानशमः शीघ्रमुन्नमेत् पीडितस्तनुः ॥ ३१ ॥
स्निग्धोष्णमर्दनैः शाम्येद् रात्रावल्पो दिवा महान् ।
त्वक् च सर्षपलिप्तेव तस्मिंश्चिमिचिमायते ॥ ३२ ॥
पीतरक्तासितभासः पित्तादाताम्ररोमकृत् ।
शीघ्रानुसारप्रशमो मध्ये प्राग् जायते तनुः ॥ ३३ ॥
सदाहज्वरसंदष्टदष्टकोदमदभ्रमः ।
शीताभिलाषी विड्भेदी गन्धो स्पर्शासहो मृदुः ॥ ३४ ॥
कण्डूमान् पाण्डुरोमत्वक्कठिनः शीतलो गुरुः ।
स्निग्धः श्लक्ष्णः स्थिरः स्थानो निद्राच्छर्द्यग्निसादकृत् ॥३५॥
आक्रान्तो नोन्नमेत् कृच्छ्रशमजन्मा निशाबलः ।
सर्वेन्द्रियासृक् चिरात् पिच्छां कुरुते स्रादिचित्तः ॥३६॥
स्पर्शोष्णकाङ्क्षी च कफात् यथास्वं हेत्वजास्रयः ।
सङ्करादेतुलिङ्गानां निचयात् निचयात्मकः ॥ ३७ ॥
अभिघातेन शस्त्रादिच्छेदभेदक्षतादिभिः ।
हिमानिलोदध्यनिलैर्भल्लातकपिकच्छुजैः ॥ ३८ ॥
रसैः शूकैश्च संस्पर्शाच्छूयथुः स्याद्विसर्पवान् ।
मृद्शोषा लोहिताभासः प्रायशः पित्तलक्षणः ॥ ३९ ॥
विषजः सविषप्राणिपरिसर्पणमूत्रणात् ।
दंष्ट्रादन्तनखापातादविषप्राणिनामपि ॥ ४० ॥
विण्मूत्रशुक्रोपहतमलवद्वस्त्रसङ्करात् ।
विषदुष्टानिलस्पर्शाद्गरयोगावचूर्णनात् ॥ ४१ ॥

मृदुश्चलोऽवलम्बी च शीघ्रो दाहरुजाकरः।
नवोऽनुपद्रवः शोफः साध्योऽसाध्यः पुरेरितः ॥४२॥
स्यादिसर्पोऽभिघातान्तैर्दोषैर्दूष्यैश्च शोफवत्।
तमधिष्ठानतश्च तं प्राहुर्वाह्यान्तरुभयाश्रयात् ॥ ४३ ॥
यथोत्तरञ्च दुःसाध्याः तत्र दोषा यथायथम्।
प्रकोपनैः प्रकुपिता विशेषेण विदाहिभिः ॥ ४४ ॥
देहे शीघ्रं विसर्पन्ति तेऽन्तरन्तः स्थिता बहिः।
बहिस्था हितये हिंस्याः विद्यात्तन्त्वान्तराश्रयम् ॥ ४५ ॥
मर्मोपतापात् संमोहादयनानां विघट्टनात्।
तृष्णातियोगाद्वेगानां विषमं च प्रवर्त्तनात् ॥ ४६ ॥
आशु चाग्निबलभ्रंशादतो बाह्यं विपर्य्ययात्।
तत्र वातात्परीसर्पी वातज्वरसमव्यथः ॥ ४७ ॥
शोफस्फुरणनिस्तोदभेदो यामार्त्तिहर्षवान्।
पित्ताद् द्रुतिगतिः पित्तज्वरलिङ्गोऽतिलोहितः ॥ ४८ ॥
कफात् कण्डूयुतः स्निग्धः कफज्वरसमानरुक्।
स्वदोषलिङ्गैर्वीयन्ते सर्वस्फोटैरुपेक्षिताः ॥ ४९ ॥
ते पञ्चभिन्नाः स्वं स्वं च विभ्रति व्रणलक्षणम्।
वातपित्ताज्ज्वरच्छर्दिमूर्च्छातीसारहृद्भ्रमैः ॥ ५० ॥
अक्षिभेदाग्निसदनतमकारोचकैर्युतः।
करोति सर्वमङ्गञ्च दीप्ताङ्गारावकीर्णवत् ॥ ५१ ॥
यं यं देशं विपर्यस्य विसर्पति भवेत् स सः।
शान्ताङ्गारासितो नीलो रक्तो वाशु च चीयते ॥ ५२ ॥
अग्निदग्ध इव स्फोटैः शीघ्रगत्वाद् द्रुतश्च सः।
मर्मानुसारी वीसर्पः स्याद्यातोऽतिबलस्ततः ॥ ५३ ॥
व्यथेताङ्ग हरेत् संज्ञां निद्राञ्च श्वासमोरयेत्।
हिक्काञ्च स गतोऽवस्थामीदृशीं लभते न नाः ॥५४॥

क्वचिच्छर्मरतिग्रस्तो भूमिशय्यासनादिषु।
चेष्टमानस्ततः क्लिष्टो मनोदेहश्रमोद्भवाम् ॥ ५५ ॥
दुष्प्रबोधोऽभ्युते निद्रां सोऽग्निर्वीसर्प उच्यते।
कफेन रुद्धः पवनो भित्त्वा तं बहुधा कफम् ॥ ५६ ॥
रक्तं वा दूषयत्यस्य त्वक्शिरास्नावमांसगम्।
दूषयित्वा च दोषाणूत्तत्स्थूलखरात्मनाम् ॥ ५७ ॥
ग्रन्थीना कुरुते माला रक्तानां तीव्ररुग्ज्वराम्।
श्यामकालातिसारास्यशोषहिक्काविमिश्रकैः ॥ ५८ ॥
मोहवैवर्ण्यमूर्च्छाङ्गभङ्गाग्निसदनैर्युतम्।
इत्यय ग्रन्थिवीसर्पः कफमारुतकोपजः ॥ ५९ ॥
कफपित्ताज्वरः स्तम्भो निद्रातन्द्राशिरोरुजाः।
अङ्गावसादविच्छेदप्रलापारोचकभ्रमाः ॥ ६० ॥
मूर्च्छाग्निहानिर्मेदोऽस्थ्नां पिपासेन्द्रियगौरवम्।
आमोपवेशन लेपः स्रोतसां स च सर्पति ॥ ६१ ॥
प्रायेणामाशये गुह्यहृत्कदेशे न चातिरुक्।
पिटकैरवकीर्णोऽलिपीतलोहितपाण्डुरैः ॥ ६२ ॥
मेचकाभोऽसितस्निग्धो मलिनः शोफवान् गुरुः।
गम्भीरपाकः प्राज्योषा स्पृष्टः क्लिन्नोऽवदीर्यते ॥ ६३ ॥
पङ्क्यच्छीर्णमांसश्च स्पृष्टस्नायुशिरागणः।
श्वगन्धिश्च वीसर्पं कर्दमाख्यमुशन्ति तम् ॥ ६४ ॥
सर्वजो लक्षणैः सर्वैः सर्वधात्वतिसर्पणः।
बाह्यहेतोः क्षतात् क्षुद्रः सरक्तं पित्तमीरयन् ॥ ६५ ॥
विसर्पं मारुतः कुर्यात् कुलत्थसदृशैश्चितम्।
स्फोटैः शोफज्वररुजादाहाढ्यं श्यावलोहितम् ॥ ६६ ॥
पृथग्दोषैस्त्रयः साध्या द्वन्द्वजाश्चानुपद्रवाः।
असाध्यौ क्षतजवीसौ सर्वे चाक्रान्तमर्मकाः।

शीर्षस्नायुशिरामासाः प्रक्लिन्नाः श्रवगन्धयः ॥ ६७ ॥

चतुर्दशोऽध्यायः ।

अथातः कुष्ठश्वित्रकृमिनिदानं व्याख्यास्यामः ॥
मिथ्याहारविहारेण विशेषेण विरोधिना ।
साधुनिन्दाबधान्यस्वहरणादैश्च सेवितैः ॥ १ ॥
पाप्मभिः कर्मभिः सद्यः प्राक्तनैः प्रेरिता मलाः ।
शिराः प्रपद्य तिर्यग्गास्त्वग्लसीकासृगामिषम् ॥ २ ॥
दूषयन्ति श्लथीकृत्य निश्चरन्तस्ततो बहिः ।
त्वचः कुर्वन्ति वैवर्ण्यं दुष्टाः कुष्ठमुशन्ति तत् ॥ ३ ॥
कालेनोपेक्षितं यस्मात् सर्वं कृष्णाति तद्वपुः ।
प्रपद्य धातून् व्याप्यान्तः सर्वान् संक्लेद्य चावहेत् ॥४॥
मस्वेदक्लेदसङ्घोथान् क्रमान् सूक्ष्मान् सुदारुणान् ।
रोमत्वक्स्नायुधमनीतरुणास्थीनि यैः क्रमात् ॥ ५ ॥
भक्षयेच्छित्वमस्माच्च कुष्ठवाच्यमुदाहृतम् ।
कुष्ठानि सप्तधा दोषैः पृथङ्मिश्रैः समागतैः ॥ ६ ॥
सर्वेष्वपि त्रिदोषेषु व्यपदेशोऽधिकत्वतः ।
वातेन कुष्ठं कापालं पित्तादौदुम्बरं कफात् ॥ ७ ॥
मण्डलाख्यं विचर्ची च ऋष्याख्यं वातपित्तजम् ।
चर्मैककुष्ठं किटिभसिध्मालसविपादिकाः ॥ ८ ॥
वातश्लेष्मोद्भवा श्लेष्मपित्ताद्दुश्तारुषी ।
पुण्डरीकं सविस्फोटं पामा चर्मदलं तथा ॥ ९ ॥
सर्वैः स्यात् काकणं पूर्वं त्रिक दद्रुसकाकणम् ।
पुण्डरीकत्वजिह्वे च महाकुष्ठानि सप्त तु ॥ १० ॥
अतिश्लक्ष्णखरस्पर्शस्वेदस्वेदविवर्णताः ।
दाह, कण्डूस्त्वचि स्वापस्फोटः कोठोन्नतिः श्रमः ॥ ११ ॥

व्रणानामधिकं शूलं शीघ्रोत्पत्तिश्चिरस्थितिः ।
रूढानामपि रूक्षत्व निमित्तेऽल्पेऽपि कोपनम् ॥१२॥
रोमहर्षोऽसृजः कार्ष्ण्यं कुष्ठलक्षणमग्रजम् ।
कृष्णारुणकपालाभ रूक्ष सुप्त खर तनु ॥ १३ ॥
विस्तृतासमपर्य्यन्त दूषितैर्लोमभिश्चितम् ।
तोदाढ्यमल्पकण्डूकं कापाल शीघ्रमर्पि च ॥ १४ ॥
पक्वोदुम्बरताम्रत्वग्रोमगौरशिराचितम् ।
बहल बहुलक्लेद रक्तं दाहरुजाधिकम् ॥ १५ ॥
आशूत्थानावदरणक्रमि विद्यादुदुम्बरम् ।
स्थिर स्थानं गुरु स्निग्धं श्वेतरक्तमनाशुगम् ॥ १६ ॥
अन्योऽन्यभक्षमुत्क्लेद बहुकण्डूसुतिक्रिमि ।
श्लक्ष्णपीताभपर्य्यन्त मण्डलं परिमण्डलम् ॥ १७ ॥
सकण्डूपिटिकाश्यावा लसीकाख्या विचर्चिका ।
परुषं तनु रक्तान्तमन्तः श्याव समुन्नतम् ॥ १८ ॥
सतोददाहरुक्क्लेद कर्कशै पिटिकैश्चितम् ।
ऋष्यजिह्वाकृतिप्रोक्तमृष्यजिह्वं बहुक्रिमि ॥ १९ ॥
हस्तिचर्मखरस्पर्शं चर्मैकाख्यं महाशयम् ।
अस्वेद मत्स्यशकलसन्निभ किटिभं पुनः ॥ २० ॥
रूक्षं किणखरस्पर्शं कण्डूमत् पुरुषासितम् ।
मिश्रं रूक्ष बहि स्निग्धमन्तर्घृष्ट रजः किरेत् ॥ २१ ॥
श्लक्ष्णस्पर्शं तनु श्वेतताम्रं दौग्धिकपुष्पवत् ।
प्रायेण चोर्ध्वकाये स्याद् गण्डैः कण्डूयुतैश्चितम् ॥ २२ ॥
रक्तैरलसक पाणिपाददार्य्यो विपादिकाः ।
तीव्रार्त्यो मन्दकण्डूश्च सरागपिटिकाचिताः ॥ २३ ॥
दीर्घप्रताना दूर्वावदतसीकुसुमच्छविः ।
उत्सन्नमण्डला दद्रूः कण्डूमत्यनुषङ्गिणी ॥ २४ ॥

स्थूलमूलं सदाहार्त्ति रक्तश्यावं बहुव्रणम्।
शतारुः क्लेदजं त्वाढ्यं प्रायशः पूर्वजन्म च ॥ २५ ॥
रक्तान्तमन्तरा पाण्डु कण्डूदाहरुजान्वितम्।
सोत्सेधमाचितं रक्तैः पद्मपत्रमिवांशुभिः ॥ २६ ॥
घनभूरिलसीकास्रक्प्रायमाशुविभेदि च।
पुण्डरीकं तनुत्वग्भिश्चित स्फोटैः सितारुणैः ॥ २७ ॥
विस्फोटं पिटिकाः पामा कण्डूक्लेदरुजाधिकाः।
सूक्ष्माः श्यावारुणा बह्व्यः प्रायः सिक्पाणिकूर्परे ॥२८॥
सस्फोटमस्पर्शसहं कण्डूषातोददाहवत्।
रक्तं दलच्चर्मदलं काकण तीव्रदाहरुक् ॥ २९ ॥
पूर्वं रक्तश्च कृष्णश्च काकणन्तीफलोपमम्।
कुष्ठलिङ्गैर्युत सर्वैर्नैकवर्णं ततो भवेत् ॥ ३० ॥
दोषभेदीयविहितैरादिमेलिङ्गकर्मभिः।
कुष्ठेषु दोषोल्बणता सर्वदोषोल्बण त्यजेत् ॥ ३१ ॥
रिष्टोक्त यच्च यच्चास्थिमज्जशुक्रसमाश्रयम्।
याप्य मेदोगतं कृच्छ्र पित्तद्वन्द्वासृमासगम् ॥ ३२ ॥
अकृच्छ्र कफवाताढ्यं त्वक्स्थमेकमल च यत्।
तत्र त्वचि स्थिते कुष्ठे तोदवैवर्ण्यरूक्षताः ॥ ३३ ॥
स्वेदसाप्तक्षयश्वयथवः शोणिते पिशिते पुनः।
पाणिपादाश्रिताः स्फोटाः क्लेदः सन्धिषु चाधिकम् ॥३४॥
कौण्ण्यं गतिक्षयोऽङ्गानां दलनं स्याच्च मेदसि।
नासाभङ्गोऽस्थिमज्जस्थे नेत्ररागः स्वरक्षयः ॥ ३५ ॥
क्षते च क्रमयः शुक्रे स्वदारापत्यबाधनम्।
यथापूर्वं च सर्वाणि स्युर्लिङ्गान्यसृगादिषु ॥ ३६ ॥
कुष्ठैकसम्भवं श्वित्रं किलास दारुणञ्च तत्।
निर्दिष्टसपरिस्रावि त्रिधातूद्भवसंश्रयम् ॥ ३७ ॥

वाताद्रूक्षारुणं पित्तात् ताम्रं कललपत्रवत् ।
सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु ॥ ३८ ॥
सकण्डूं च क्रमाद्रक्तमांसमेदःसु चादिशेत् ।
वर्णैर्नवेष्टगुणयं कृच्छ्रं तच्चोत्तरोत्तरम् ॥ ३९ ॥
अशुक्लरोमाबहुलमसृष्टं मिथो नवम् ।
अनग्निदग्धजं साध्यं श्लिलवर्ज्यमतोऽन्यथा ॥ ४० ॥
गुह्यपाणितलोष्ठेषु जातमप्यचिरन्तनम् ।
स्वयंकाहारशय्यादिसेवनात् प्रायशो गदाः ॥४१॥
सर्वे सञ्चारिणो नेत्रत्वग्विकारा विशेषतः ।
कृमयस्तु द्विधा प्रोक्ता बाह्याभ्यन्तरभेदतः ॥ ४२ ॥
बहिर्मलकफासृग्विड्जन्मभेदाच्चतुर्विधाः ।
नामतो विंशतिविधाः बाह्यास्तत्रासृगुद्भवाः ॥ ४३ ॥
तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः ।
बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामतः ॥ ४४ ॥
द्विधा ते कोठपिटिकाकण्डूगण्डान् प्रकुर्वते ।
कुष्ठैकहेतवोऽन्तर्जाः श्लेष्मजास्तेषु चाधिकम् ॥ ४५ ॥
मधुरान्नगुडक्षीरदधिमत्स्यनवौदनैः ।
शुक्तज्ञा बहुविड्धान्यपर्णशाकोलकादिभिः ॥ ४६ ॥
कफादामाशये जाता वृद्धाः सर्पन्ति सर्वतः ।
पृथुवप्रनिभाः केचित् केचिद्गण्डूपदोपमाः ॥ ४७ ॥
रूढधान्याङ्कुराकारास्तनुदीर्घास्तथाणवः ।
श्वेतास्ताम्रावभासाश्च नामतः सप्तधा तु ते ॥ ४८ ॥
अन्त्रादा उदराविष्टा हृदयादा महाकुहाः ।
कुरवो दर्भकुसुमाः सुगन्धास्ते च कुर्वते ॥ ४९ ॥
हृल्लासमास्यस्रवणमविपाकमरोचकम् ।
मूर्च्छाच्छर्दिज्वरानाहकार्श्यंचवपुषीनसान् ॥ ५० ॥

रक्तवाहिशिरोत्थाना रक्तजा जन्तवोऽणवः।
अपादा हृत्ततास्वाद्य सौक्ष्म्यात् केचिददर्शनाः॥ ५१॥
केशादा लोमविध्वंसा लोमद्वीपा उदुम्बराः।
षट् ते कुष्ठैककर्माणः सहसौरसमातरः॥ ५२॥
पक्वाशये पुरीषोत्था जायन्तेऽधो विसर्पिणः।
हृद्वास्ते स्युर्भवेयुश्च ते यदाऽऽमाशयोन्मुखाः॥ ५३॥
तदास्योद्गारनिःश्वासा विड्गन्धानुविधायिनः।
पृथुवृत्ततनुश्यूलाः श्यावपीतसितासिताः॥ ५४॥
ते पञ्च नाम्ना कृमयः ककेरुकमकेरुकाः।
सौसुरादाः सलूनाख्या लेलिह्या जनयन्ति च॥ ५५॥
विड्भेदशूलविष्टम्भकार्श्यारुच्यपाण्डुताः।
रोमहर्षाग्निसदनगुदकण्डूविनिर्गमात्॥ ५६॥

पञ्चदशोऽध्यायः।

अथातो वातव्याधिनिदानं व्याख्यास्यामः॥
सर्वार्थानर्थकरणे विश्वस्यास्यैककारणम्।
अदुष्टदुष्टः पवनः शरीरस्थ विशेषतः॥ १॥
स विश्वकर्मा विश्वात्मा विश्वरूपः प्रजापतिः।
स्रष्टा धाता विभुर्विष्णुः सहर्त्ता मृत्युरन्तकः॥ २॥
तददुष्टौ प्रयत्नेन यतितव्यमतः सदा।
तस्योक्तं दोषविज्ञाने कर्म प्राकृतवैकृतम्॥ ३॥
समासाद् व्यासतो दोषभेदीये नाम धाम च।
प्रत्येकं पञ्चधा चारो व्यापारश्चेह वैकृतम्॥ ४॥
तस्योच्यते विभागेन सनिदानं सलक्षणम्।
धातुक्षयकरैर्वायुः कुप्यत्यतिनिषेवितैः॥ ५॥
चरन् स्रोतःसु रिक्तेषु भृशं तान्येव पूरयन्।

तेभ्योऽन्यदोषपूर्णेभ्यः प्राप्य वावरणं बली ॥ ६ ॥
तत्र पक्वाशये क्रुद्धः शूलानाहान्त्रकूजनम् ।
मलरोधाश्मवर्षार्शश्चिकापृष्ठकटीग्रहम् ॥ ७ ॥
करोत्यधरकायेषु तांस्तान् कृच्छ्रानुपद्रवान् ।
आमाशये हृद्ग्रमथुश्वासकासविसूचिकाः ॥ ८ ॥
कण्ठोपरोधमुद्गारान् व्याधीनूर्ध्वं च नाभितः ।
श्रोत्रादिष्विन्द्रियवधं त्वचि स्फुटनरुग्व्रणे ॥ ९ ॥
रक्ते तीव्रा रुजः स्रावं तापं रोगं विवर्णताम् ।
अरुःपक्वस्य विष्टम्भमरुचिं क्लमतां भ्रमम् ॥ १० ॥
मांसमेदोगतौ ग्रन्थींस्तोदाद्यान् कर्कशान् भ्रमम् ।
गुर्वङ्गं चातिरुक्स्तब्धसुष्टिदण्डहतोपमम् ॥ ११ ॥
अस्थिस्थः सक्थिसन्ध्यस्थिशूलं तीव्रं बलक्षयम् ।
मज्जस्थोऽस्थिषु सौषिर्यमस्रग्रं स्तब्धतां रुजम् ॥ १२ ॥
शुक्रस्य शीघ्रमुत्सर्गं सङ्गं विकृतिमेव च ।
तद्वद्गर्भस्य शुक्रस्थः शिरास्नाध्मानरिक्तते ॥ १३ ॥
तत्स्थः स्रावस्थितः कुर्याद् गुदभ्रंशायामकुब्जताः ।
वातपूर्णदृतिस्पर्शं शोफं सन्धिगतोऽनिलः ॥ १४ ॥
प्रसारणाऽऽकुञ्चनयोः प्रवृत्तिं च सवेदनाम् ।
सर्वाङ्गसंश्रयस्तोदभेदस्फुरणभञ्जनम् ॥ १५ ॥
स्तम्भमाक्षेपणं स्रावं सन्ध्याकुञ्चनकम्पनम् ।
यदा तु धमनीः सर्वाः कृत्स्नाऽभ्येति मुहुर्मुहुः ॥ १६ ॥
तदाऽऽमाक्षिपत्येष व्याधिराक्षेपकः स्मृतः ।
अधः प्रतिहतो वायुर्व्रजत्यूर्ध्वं हृदाश्रयाः ॥ १७ ॥
नाड़ीः प्रविश्य हृदयं शिरः ग्रीवां च पीडयन् ।
आक्षिपेत्परितो गात्रं धनुर्वच्चास्य नामयेत् ॥ १८ ॥
कृच्छ्रादुच्छ्वसिति स्तब्धसक्तमीलितदृक्ततः ।

कपोत इव कूजेत् स निःसंज्ञः सोऽपतन्त्रकः ॥ १९ ॥
स एव चापतानाख्यो मुक्ते तु मरुता हृदि ।
अश्नुवीत मुहुः स्वास्थ्यं मुहुरस्वास्थ्यमाहृते ॥ २० ॥
गर्भपातसमुत्पन्नः शोणितातिस्रवोत्थितः ।
अभिघातसमुत्थश्च दुश्चिकित्स्यतमो हि सः ॥ २१ ॥
मन्ये संस्तभ्य वातोऽन्तरायच्छन् धमनीर्यदा ।
व्याप्नोति सकलं देहं जन्तुरायम्यते तदा ॥ २२ ॥
अन्तर्धनुरिवाङ्गं च वेगैः स्तब्धं च नेत्रयोः ।
करोति जृम्भां दशनं दशनानां कफोद्गमम् ॥ २३ ॥
पार्श्वयोर्वेदनां वाक्यहनुपृष्ठशिरोग्रहम् ।
अन्तरायाम इत्येष बाह्यायामश्च तद्विधः ॥ २४ ॥
देहस्य बहिरायामात् पृष्ठतो नीयते शिरः ।
उरस्योत्क्षिप्यते तत्र कन्धरा चावसद्यते ॥ २५ ॥
दन्तेष्वास्थे च वैवर्ण्यं प्रस्वेदः सस्तगात्रता ।
बाह्यायामं धनुष्कम्भं ब्रुवते वेगिनं च तम् ॥ २६ ॥
व्रणं मर्माश्रितं प्राप्य समीरणसमीरणात् ।
व्यायच्छन्ति तनुं दोषाः सर्वमापादमस्तकम् ॥ २७ ॥
क्षपतः पाण्डुगात्रस्य व्रणायामः स वर्जितः ।
गते वेगे भवेत् स्वास्थ्यं सर्वेष्वाक्षेपकेषु च ॥ २८ ॥
जिह्वातिलेखनात् शुष्कभक्षणादभिघाततः ।
कुपितो हनुमूलस्थः संश्रयित्वाऽनिलो हनू ॥ २९ ॥
करोति विहतास्यत्वमथवा सहतास्यताम् ।
हनुसंसः स तेन स्यात् कृच्छ्राच्चर्वणभाषणम् ॥ ३० ॥
वाग्वाहिनीशिरासंस्थो जिह्वां स्तभ्नातेऽनिलः ।
जिह्वास्तम्भः स तेनान्नपानवाक्येष्वनीशता ॥ ३१ ॥
शिरसो भारहरणादतिहास्यप्रभाषणात् ।

उच्छ्वासवक्त्रच्छवयुग्खरकार्मुककर्षणात् ॥ ३२ ॥
विषमादुपधानाच्च कठिनानां च चर्वणात्।
वायुर्विदह्यस्तैस्तैश्च वातलैरूर्ध्वमाश्रितः ॥ ३३ ॥
वक्त्रीकरोति वक्त्रार्द्धमुक्तं हसितमीक्षितम्।
ततोऽस्य कम्पते मूर्द्धा वाक्सङ्गः स्तब्धनेत्रता ॥ ३४ ॥
दन्तचालः स्वरभ्रंशः श्रुतिहानिः क्षवग्रहः।
गन्धाज्ञानं स्मृतेर्मोहश्वासः सुप्तस्य जायते ॥३५॥
निष्ठीवः पार्श्वतो यायादेकस्याक्ष्णो निमीलनम्।
जत्रोरूर्ध्वं रुजा तीव्रा गुरोरार्द्धेऽधरेऽपि वा ॥ ३६ ॥
तमाहुरर्दितं केचिदेकायाममथापरे।
रक्तमाश्रित्य पवनः कुर्य्यान्मूर्द्धधराः शिराः ॥ ३७ ॥
रूक्षाः सवेदनाः कृष्णाः सोऽसाध्यः स्यात् शिराग्रहः।
गृहीत्वार्द्धं तनोर्वायुः शिराः स्नायूर्विशोष्य च ॥ ३८ ॥
पक्षमन्यतरं हन्ति सन्धिबन्धान् विमोक्षयन्।
क्षुत्क्षोऽर्दितकायस्तस्य स्यादकर्मण्यो विचेतनः ॥ ३९ ॥
एकाङ्गरोगं तं केचिदन्ये पक्षवधं विदुः।
सर्वाङ्गरोगं तद्वच्च सर्वकायाश्रितेऽनिले ॥ ४० ॥
शुद्धवातहतः पक्षः कृच्छ्रसाध्यतमो मतः।
कृच्छ्रस्वप्नेन संसृष्टो विवर्ज्यः क्षयहेतुकः ॥ ४१ ॥
आमबद्धायनः कुर्य्यात् संस्तभ्याङ्गं कफान्वितः।
असाध्यं हतसर्वेहं दण्डवद्दण्डकं मरुत् ॥ ४२ ॥
अमूलस्थितो वायुः शिराः सङ्कोच्य तद्गताः।
बाहुप्रस्पन्दितहरं जनयत्यवबाहुकम् ॥ ४३ ॥
तल प्रत्यङ्गुलीनां या कण्डरा बाहुपृष्ठतः।
बाहुचेष्टापहरणी विश्वाची नाम सा स्मृता ॥ ४४ ॥
वायुः कट्यां स्थितः सक्थ्नः कण्डरामाक्षिपेत् यदा।

तदा खञ्जो भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयोरपि ॥ ४५ ॥
कम्पते गमनारम्भे खञ्जवच्च याति यः ।
कडायखञ्जं तं विद्यान्मुक्तसन्धिप्रबन्धनम् ॥ ४६ ॥
शीतोष्णद्रवसंशुष्कगुरुस्निग्धैर्निषेवितैः ।
जीर्णाजीर्णे तथाऽऽयासक्षोभस्वप्नजागरैः ॥ ४७ ॥
सन्क्षोभमेदःपवनमामसत्यर्थसञ्चितम् ।
अभिभूयेतरं दोषमूरू चेत् प्रतिपद्यते ॥ ४८ ॥
सक्थ्यस्थीनि प्रपूर्यान्तः श्लेष्मणा स्तिमितेन तत् ।
तदा स्कभ्नाति तेनोरू स्तब्धौ शीतावचेतनौ ॥ ४९ ॥
परकीयाविव गुरू ख्यातामभिभवव्यथौ ।
ध्यानाङ्गमर्दस्तैमित्यतन्द्राच्छर्दिरुचिज्वरैः ॥ ५० ॥
संयुतौ पादसदनक्लच्छ्रोत्थानसुप्तिभिः ।
तमूरुस्तम्भमित्याहुराढ्यवातमथापरे ॥ ५१ ॥
वातशोणितजः शोफो जानुमध्ये महारुजः ।
ज्ञेयः क्रोष्टुकशीर्षश्च स्थूलः क्रोष्टुकशीर्षवत् ॥ ५२ ॥
रुक् पादे विषमन्यस्ते श्रमाद्वा जायते यदा ।
वातेन गुल्फमाश्रित्य तमाहुर्वातकण्टकम् ॥ ५३ ॥
पार्ष्णिं प्रत्यङ्गुलीनां या कण्डरा नाऽऽतार्दिता ।
सङ्कुचत्येव निश्चलति गुल्फसौ तां प्रचक्षते ॥ ५४ ॥
विखाची गुल्फसौ चोक्ता खञ्जो तीव्ररुजान्विता ।
हृष्येते चरणौ यस्य भवेताञ्च प्रसुप्तवत् ॥ ५५ ॥
पादहर्षः स विज्ञेयः कफमारुतकोपजः ।
पादयोः कुरुते दाहं पित्तासृक्संहितोऽनिलः ।
विशेषतश्च भ्रमिते पाददाहं तमादिशेत् ॥ ५६ ॥

सूत्रस्थानम् ।

षोड़शोऽध्यायः ।

अथातो वातशोणितनिदानं व्याख्यास्यामः ॥
विदाह्यन्नं विरुद्धञ्च तत्तच्चासृक्प्रदूषणम् ।
भजतां विधिहीनञ्च स्वप्नजागरमैथुनम् ॥ १ ॥
प्रायेण सुकुमाराणामचङ्क्रमणशीलिनाम् ।
अभिघातादशुद्धेश्च नृणामसृजि दूषिते ॥ २ ॥
वातैः शीतलैर्वायुर्हृद्ध क्रुद्धो विमार्गगः ।
तादृशेनासृजा रुद्धः प्राक् तदेव प्रदूषयेत् ॥ ३ ॥
आढ्यरोगं खुड वातबलासं वातशोणितम् ।
तदाहुर्नामभिस्तच्च पूर्वं पादौ प्रधावति ॥ ४ ॥
विशेषाद् यानयानाद्यैः प्रलम्बौ तस्य लक्षणम् ।
भविष्यतः कुष्ठसमं तथा सादः श्लथाङ्गता ॥ ५ ॥
जानुजङ्घोरुकट्यंसहस्तपादाङ्गसन्धिषु ।
कण्डूस्फुरणनिस्तोदभेदगौरवसुप्तताः ॥ ६ ॥
भूत्वा भूत्वा प्रणश्यन्ति मुहुराविर्भवन्ति च ।
पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि ॥ ७ ॥
आखोरिव विषं क्रुद्धं कृत्स्नं देहं विधावति ।
त्वङ्मांसाश्रयमुत्तानं तत् पूर्वं जायते ततः ॥ ८ ॥
कालान्तरेण गम्भीरं सर्वान् धातूनभिद्रवत् ।
कण्डूादिसंयुतोत्तानै स्वक्ताम्रश्यावलोहिता ॥ ९ ॥
सायामा भृशदाहोषा गम्भीरेऽधिकपूर्वरुक् ।
क्षयत्युर्ध्वथितः पाकी वायुः सन्ध्यस्थिमज्जसु ॥ १० ॥
छिन्दन्निव चरत्यन्तर्वक्रीकुर्वंश्च वेगवान् ।
करोति खञ्जं पङ्गुं वा शरीरे सर्वतश्चरन् ॥ ११ ॥
वातेऽधिकोऽधिकं तत्र शूलस्फुरणतोदनम् ।

शोफस्य रौक्ष्यक्षपणलङ्घनावगाहद्विहानयः ॥ १२ ॥
धमन्यङ्गुलिसन्धीनां सङ्कोचेऽङ्गग्रहोऽतिरुक् ।
शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तयः ॥ १३ ॥
रक्ते शोफोऽतिरुक् तोदस्ताम्रश्चिमिचिमायते ।
स्निग्धरूक्षैः शमं नैति कण्डूक्लेदसमन्वितः ॥ १४ ॥
पित्ते विदाहः समोहः स्वेदो मूर्च्छा मदः सदट् ।
स्पर्शाज्ञमत्व रुग्रागः शोफपाकौ भृशोष्मता ॥ १५ ॥
कफे स्तैमित्यगुरुतासुप्तिस्निग्धत्वशीतताः ।
कण्डूर्मन्दा च रुग् द्वन्द्वसर्वलिङ्गं च सङ्करे ॥ १६ ॥
एकदोषानुग साध्य नवं याप्यं द्विदोषजम् ।
त्रिदोषज त्यजेत् स्रावि स्तब्धमर्बुदकारि च ॥ १७ ॥
रक्तमार्गं निहन्त्याशु शाखासन्धिषु मारुतः ।
निविश्यान्योऽन्यमाचार्य्य वेदनाभिर्हरत्यसून् ॥ १८ ॥
वायौ पक्वाशयके प्राणो रौक्ष्यव्यायामलङ्घनैः ।
अत्याहाराभिघाताध्ववेगोदीरणधारणैः ॥ १९ ॥
कुपितश्चक्षुरादीनामुपघातं प्रवर्त्तयेत् ।
पीनसार्दितशङ्खास्यशिरोरुक्कासदीनयान् वहन् ॥ २० ॥
उदान. स्वस्थूलारुच्छर्दिनिद्रावधारणैः ।
गुरुभारातिरुदितहास्याद्यैर्विकृतो गदान् ॥ २१ ॥
कण्ठरोधमनोभ्रंशच्छर्यरोचकपीनसान् ।
कुर्य्याच्च गलगण्डादीं स्तांस्तान् जत्रूर्ध्वसञ्श्रयान् ॥ २२ ॥
व्यानोऽतिगमनध्यानक्रीडाविषमचेष्टितैः ।
विरोधिरूक्षभीहर्षविषादाद्यैश्च दूषितः ॥ २३ ॥
पुंस्त्वोत्साहबलभ्रंशशोफचित्तोत्प्लवज्वरान् ।
सर्वाङ्गरोगनिस्तोदरोमहर्षाङ्गसुप्तताः ॥ २४ ॥
कुष्ठ विसर्पमन्यांश्च कुर्य्यात् सर्वाङ्गगान् गदान् ।

समानो विषमाजीर्णशीतसङ्कीर्णभोजनैः ॥ २५ ॥
करोत्यकालशयनजागराद्यैश्च दूषितः ।
शूलगुल्मग्रहण्यादीन् पक्वामाशयजान् गदान् ॥ २६ ॥
अपानो रूक्षगुर्वन्नवेगघातातिवाहनैः ।
यानयानासनस्थानचङ्क्रमैश्चातिसेवितैः ॥ २७ ॥
कुपितः कुरुते रोगान् कृच्छ्रान् पक्वाशयाश्रयान् ।
मूत्रशुक्रप्रदोषार्शोगुदभ्रंशादिकान् बहून् ॥ २८ ॥
सर्वत्र मारुत सामं तन्द्रास्तैमित्यगौरवैः ।
स्निग्धोद्गारोचकालस्यशैत्यश्लेष्माग्निहानिभिः ॥ २९ ॥
कटुरूक्षाभिलाषेण तद्विधोपशयेन च ।
युक्तं विद्यान्निरामन्तु तन्द्रादीनां विपर्ययात् ॥ ३० ॥
वायोरावरणं वातो बहुभेद प्रवक्ष्यते ।
लिङ्गं पित्तावृते दाहस्तृष्णा शूल भ्रमस्तमः ॥ ३१ ॥
कटुकोष्णाम्ललवणैर्विदाहः शीतकामता ।
शैत्यगौरवशूलानि कट्वाद्युपशयोऽधिकम् ॥ ३२ ॥
लङ्घनायासरूक्षोष्णकामता च कफावृते ।
रक्तावृते महादाहार्त्तिस्त्वङ्मांसान्तरजा भृशम् ॥ ३३ ॥
भवेच्च रागी क्षयथुर्जायते मण्डलानि च ।
मांसेन कठिनः शोफो विवर्णः पिटिकास्तथा ॥ ३४ ॥
हर्षः पिपीलिकानां च सञ्चार इव जायते ।
चलः स्निग्धो मृदुः शीतः शोफो गात्रेष्वरोचकः ॥ ३५ ॥
आढ्यवात इति ज्ञेयः स कृच्छ्रो मेदसाऽऽवृते ।
स्पर्शमस्यावृतेऽत्युष्ण पीडनं चाभिनन्दति ॥ ३६ ॥
सूच्येव तुद्यतेऽत्यर्थमङ्ग सीदति शूल्यते ।
मज्जावृते विनमनं जृम्भणं परिवेष्टनम् ॥ ३७ ॥
शूलञ्च पीड्यमानेन पाणिभ्यां लभते सुखम् ।

शुक्राहृतेऽतिवेगो वा न वा निष्फलताऽपि वा ॥ ३८ ॥
भुक्ते कुक्षौ रुजा जीर्णे शाम्यत्यन्नाहृतेऽनिले।
मूत्राप्रवृत्तिराध्मान वस्तौ मूत्राहृते भवेत् ॥ ३९ ॥
विडाहृते विबन्धोऽधः स्वस्थाने परिकृन्तति।
व्रजत्याशु जरां स्नेहो भुक्ते चानह्यते नरः ॥ ४० ॥
अकृत् पीडितमन्नेन दुःखं शुष्कं चिरोत्सृजेत्।
सर्वधात्वाहृते वायौ श्रोणीवङ्क्षणपृष्ठरुक् ॥ ४१ ॥
विलोलो मारुतो रुद्ध्वा हृदयं पीड्यतेऽति च।
भ्रमो मूर्च्छा रुजा दाहः पित्तेन प्राण आहृते ॥ ४२ ॥
विदग्धेऽन्ने च वमनम् उदानेऽपि भ्रमादयः।
दाहोऽन्तरङ्गाभिभवश्च दाहो व्याने च सर्वगः ॥ ४३ ॥
क्लमोऽङ्गचेष्टासङ्गश्च ससन्तापः सवेदनः।
समान ऊष्मोपहतिरतिस्वेदोऽरतिः सदृट् ॥ ४४ ॥
दाहश्च स्यादपाने तु मले हारिद्रवर्णता।
रुजोऽतिवृद्धिस्रावश्च योनिमेढ्रगपायुषु ॥ ४५ ॥
श्लेष्मणा त्वाहृते प्राणे सादस्तन्द्रारुचिर्वमिः।
छर्दनत्ववयुद्गारनिःश्वासोच्छ्वाससंग्रहः ॥ ४६ ॥
उदाने गुरुगात्रत्वमरुचिर्वाक्स्वरग्रहः।
बलवर्णप्रणाशश्च व्याने पर्वास्थिवाग्ग्रहः ॥ ४७ ॥
गुरुताऽङ्गेषु सर्वेषु स्खलितं च गतौ भृशम्।
समानेऽतिहिमाङ्गत्वमग्नेर्दौ मन्दवह्निता ॥ ४८ ॥
अपाने सकफं मूत्रमकृतः स्यात् प्रवर्तनम्।
इति द्वाविंशतिविधं वायोरावरणं विदुः ॥ ४९ ॥
प्राणादयस्तथान्योन्यमावृण्वन्ति यथाक्रमम्।
सर्वेऽपि विंशतिविधं विद्यादावरणं च तत् ॥ ५० ॥
निःश्वासोच्छ्वासरोधः प्रतिश्यायः शिरोग्रहः।

हृद्रोगी मुखशोषश्च प्राणेोदान आवृते ॥ ५१ ॥
उदानेनावृते प्राणे कर्णौजोबलसङ्क्षयः ।
दिशाऽनया च विभजेत्सर्वमावरण भिषक् ॥ ५२ ॥
स्थानान्यवेक्ष्य वाताना वृद्धि हानिं च कर्मणाम् ।
प्राणादीना च पञ्चानां मिश्रमावरण मिथः ॥ ५३ ॥
पित्तादिभिर्दशभिर्मिश्राणा मिश्रितैश्च तैः ।
मिश्रैः पित्तादिभिस्तद्वत्प्राणादिभिरनेकधा ॥ ५४ ॥
तारतम्यविकल्पाच्च यात्यावृत्तिरसङ्ख्यताम् ।
ता लक्षयेदसहितो यथास्वं लक्षणोदयात् ॥ ५५ ॥
शनैः शनैश्चोपशयाद् गूढामपि सुदुर्मुदुः ।
विशेषाज्ज्ञोवित प्राण उदानो बलमुच्यते ॥ ५६ ॥
स्वात्तयोः पोडनाद्वानादायुषश्च बलस्य च ।
आवृता वायवोऽज्ञाता ज्ञाता वा बलवं स्थिताः ॥५७॥
प्रयत्नेनापि दुःसाध्या भवेयुर्वानुषङ्गिणः ।
विद्रधिप्लीहहृद्रोगगुल्माग्निसदनादयः ।
भवन्त्युपद्रवास्तेषामावृतानामुपेक्षणात् ॥ ५८ ॥

इति श्रीसिंहगुप्तसूनुवाग्भटविरचितायामष्टाङ्ग-
हृदयसंहितायां तृतीयं निदानस्थान
समाप्तम् ।

चिकित्सितस्थानम्।



प्रथमोऽध्यायः।

अथातो ज्वरचिकित्सितं व्याख्यास्यामः।
इति ह स्माहुरात्रेयादयो महर्षयः।
आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधाय यत्।
विदधाति ज्वरं दोषस्तस्मात् कुर्वीत लङ्घनम्॥ १॥
प्राग्रूपेषु ज्वरादौ वा बलं यत्नेन पालयन्।
बलाधिष्ठानमारोग्यमारोग्यार्थः क्रियाक्रमः॥ २॥
लङ्घनैः क्षयिते दोषे दीप्तेऽग्नौ लाघवे सति।
स्वास्थ्यं क्षुत्तृड् रुचिः पक्तिर्बलमोजश्च जायते॥ ३॥
तत्रोत्कृष्टे समुत्क्लिष्टे कफप्राये चले मले।
सङ्कल्पामप्रसेकान्नद्वेषकासविसूचिके॥ ४॥
सद्यो भुक्तस्य सञ्जाते ज्वरे सामे विशेषतः।
वमनं वमनार्हस्य शस्तं कुर्यात्तदन्यथा॥ ५॥
श्यामातीसारसम्मोहहृद्रोगविषमज्वरान्।
पिप्पलीभिर्युतान् गालान् कल्किकैर्मधुकेन वा॥ ६॥
उष्णाम्भसा समधुना पिबेत्सलवणेन वा।
पटोलनिम्बकर्कोटवेत्रपल्लोदकेन वा॥ ७॥
तर्पणेन रसेनेक्षोर्मद्यैः कल्कोदितानि वा।
वमनानि प्रयुञ्जीत बलकालविभागवित्॥ ८॥
कृतेऽकृते वा वमने ज्वरी कुर्याद्विशोषणम्।
दोषाणां समुदीर्णानां पाचनाय शमाय च॥ ९॥
आमेन भस्मनेवाग्नौ कृत्स्नं न विपच्यते।

तस्मादादोषपचनाज्ज्वरितानुपवासयेत् ॥ १० ॥
लघ्वन्नाल्पमुष्णाम्बु पिबेद्वातकफज्वरे ।
तत्कफ विलय नीत्वा लङ्घनामाशु निवर्त्तयेत् ॥ ११ ॥
उदीर्य्य चाग्निं स्रोतांसि मृदूकृत्य विशोधयेत् ।
लीनपित्तानिलस्वेदयकृन्मूलानुलोमनम् ॥ १२ ॥
निद्राजाड्यारुचिहरं प्राणानामवलम्बनम् ।
विपरीतमतः शीत दोषसङ्घातवर्द्धनम् ॥ १३ ॥
उष्णमेवङ्गुल्वेऽपि युञ्जान्नैकान्तपित्तले ।
उद्रिक्तपित्ते दवथुदाहमोहातिसारिणि ॥ १४ ॥
विषमद्योत्थिते ग्रीष्मे क्षतक्षीणेऽस्रपित्तिनि ।
घनचन्दनशुण्ठाम्बु पर्पटोशीरसाधितम् ॥ १५ ॥
शीतं तेभ्यो हित तोय पाचनं लघ्वज्वरापहम् ।
उमा पित्ताहते नास्ति ज्वरो नास्त्युष्णया विना ॥१६॥
तस्मात्पित्तविरुद्धानि त्यजेत् पित्ताधिकेऽधिकम् ।
स्नानाभ्यङ्गप्रदेहाश्च परिशेषं च लङ्घनम् ॥ १७ ॥
अजीर्ण इव शूलघ्नं सामे तीव्ररुजि ज्वरे ।
न पिबेद्दोषध तद्धि भूय एवाममावहेत् ॥ १८ ॥
आमाभिभूतकोष्ठस्य घोरं विषमहेरिव ।
सोदर्दपोनसश्वासे जड्घापर्वास्थिशूलिनि ॥ १९ ॥
वातश्लेष्मात्मके स्वेदः प्रशस्तः सम्यवर्त्तयेत् ।
स्वेदमूत्रशकृद्वातान् कुर्य्यादग्नेश्च पाटवम् ॥ २० ॥
स्वेदोक्तमाचारविधिं सर्वशश्चानुपालयेत् ।
लङ्घनं स्वेदनं कालो यवागूस्तिक्तको रसः ॥ २१ ॥
मलानां पाचनानि स्युर्यथावस्थं क्रमेण वा ।
शुद्धवातक्षयागन्तुजीर्णज्वरिषु लङ्घनम् ॥ २२ ॥
मेथते, तेषु हि हितं शमनं यच्च कर्शनम् ।

तत्र सामज्वराक्लान्तं जानीयादविशेषितम् ॥ २३ ॥
द्विविधोपक्रमज्ञानमवेक्षेत च लङ्घने ।
युक्तं लङ्घितलिङ्गैस्तु तं पेयाभिरुपाचरेत् ॥ २४ ॥
यथा स्वौषधसिद्धाभिर्मण्डपूर्वाभिरादितः ।
तस्याग्निर्दीप्यते ताभिः समिद्भिरिव पावकः ॥ २५ ॥
षडह्नं वा मृदुत्वं वा ज्वरो यावदवाप्नुयात् ।
प्राग्लाजपेयां सुजरां सशुण्ठीधान्यपिप्पलीम् ॥ २६ ॥
ससैन्धवां तथाश्नार्थी तां पिबेत् सहदाडिमाम् ।
सृष्टविड्बहुपित्तो वा सशुण्ठिमाक्षिकां हिमाम् ॥२७॥
वस्तिपार्श्वशिरःशूली व्याघ्रो गोक्षुरसाधिताम् ।
पृश्निपर्णीबलाबिल्वनागरोत्पलधान्यकैः ॥ २८ ॥
सिद्धां ज्वरातिसार्यश्नां पेयां दीपनपाचनीम् ।
श्लेष्मणा पञ्चमूलेन हिक्कारुक्श्वासकासवान् ॥ २९ ॥
पञ्चमूलेन महता कफार्त्तो यवसाधिताम् ।
विबद्धवर्चाः सयवां पिप्पल्यामलकैः कृताम् ॥ ३० ॥
यवागूं सर्पिषा भृष्टां मलदोषानुलोमनीम् ।
चविकां पिप्पलीमूलद्राक्षामलकनागरैः ॥ ३१ ॥
कोष्ठे विबद्धे सरुजि पिबेत् तु परिकर्त्तनि ।
कोलदृक्षाम्लकलशोधावनी श्रीफलैः कृताम् ॥ ३२ ॥
श्रमेणातिप्रसृष्णार्त्तः सितामलकनागरैः ।
सितावदरसद्वीका सारिवा मुस्तचन्दनैः ॥ ३३ ॥
तृष्णाच्छर्दिपरीदाहज्वरघ्नीं क्षौद्रसंयुताम् ।
कुर्य्यात् पेयौषधैरेव रसयूषादिकानपि ॥ ३४ ॥
मद्योद्भवे मद्यनित्ये पित्तस्थानगते कफे ।
ग्रीष्मे तयोर्बाधकयोस्तृट्च्छर्दिर्दाहपीडिते ॥ ३५ ॥
क्षतं प्रवृत्ते रक्ते च पेयां नेच्छन्ति तेषु तु ।

ज्वरापहैः फलरसैरङ्गिवो लाजतर्पणम् ॥ ३६ ॥
पिबेत् सशर्कराक्षौद्रं ततो जीर्णे च तर्पणे ।
यवाग्वामोदन क्षुद्वानश्नीयाद् भ्रष्टतण्डुलम् ॥ ३७ ॥
दक्षलावणिकैर्यूषै रसैर्वा मुद्गलावजैः ।
कृत्स्नं पञ्चेषु दोषेषु लङ्घनाद्यै. प्रशस्यते ।
कषायो दोषशेषस्य पाचनः शमनो यथा ॥ ३९ ॥
पित्त. पित्ते विशेषेण प्रयोज्यः कटुकः क्वथे ।
पित्तश्लेष्मज्वरेऽपि कषायस्तु न शस्यते ॥ ४० ॥
नवज्वरे मलस्तब्धात् कषायो विषमज्वरम् ।
कुरुते क्वचिच्छ्लाक्ष्णिकाक्षानादिकानपि ॥ ४१ ॥
सप्ताहादौषधं केचिदाहुरन्ये दशाहतः ।
केचित्तत्त्वभुक्तस्य योज्यमामोत्क्लेशे न तु ॥ ४२ ॥
तीव्रज्वरपरीतस्य दोषवेगोदये यतः ।
दोषैरथवातिनिचितं तद्धास्तैमित्यकारिभिः ॥ ४३ ॥
अपचमानं भैषज्यं भूयो ज्वलयति ज्वरम् ।
लघुज्वरो लघुर्देहश्चलिताश्च मला यदा ॥ ४४ ॥
अचिरज्वरितस्यापि भेषजं कारयेत् तदा ।
सुखोष्णं पर्पटं युक्तं शुण्ठ्या दुस्पर्शयापि वा ॥ ४५ ॥
वाक्यं शीतकषायं वा पाठोशीरं सबालकम् ।
पिबेत् तद्वच्च भूनिम्बगुडूचीमुस्तनागरम् ॥ ४६ ॥
यथायोगमिमे योज्याः कषाया दोषपाचनाः ।
ज्वरारोचकतृष्णास्यवैरस्यापक्तिनाशनाः ॥ ४७ ॥
कलिङ्गकः पटोलस्य पत्रं कटुकरोहिणी ॥ ४८ ॥
पटोलं सारिवा मुस्ता पाठाः कटुकरोहिणी ।
पटोलनिम्बत्रिफलामृद्वीका मुस्तवत्सकाः ॥ ४९ ॥

किराततिक्तममृता चन्दनं विश्वभेषजम् ।
धात्री मुस्तामृताचौद्रमर्द्धश्लोकसमापनाः ॥ ५० ॥
पञ्चैते सन्ततादीनां पञ्चाना शमना मताः ।
दुरालभाऽमृता मुस्ता नागरं वातजे ज्वरे ॥ ५१ ॥
अथवा पिप्पलीमूलगुडूची विश्वभेषजम् ।
कनीयः पञ्चमूलं च पित्ते शक्रयवा घनम् ॥ ५२ ॥
कटुका त्रेति सक्षौद्र मुस्तापर्पटक तथा ।
सधन्वयासभूनिम्बं वत्सकाद्यो गणः कफे ॥ ५३ ॥
अथवा वृषगाङ्गेयी शृङ्गवेरदुरालभाः ।
रुग्विबन्धानिलश्लेष्मयुक्ते दीपनपाचनम् ॥ ५४ ॥
अभया पिप्पलीमूलशम्याकाकटुकाघनम् ।
द्राक्षामधूकमधुक रोध्रकाश्मर्य्यतारिवाः ॥ ५५ ॥
मुस्तामलकक्षीवेरपद्मकेसरपद्मकम् ।
मृणालचन्दनोशीरनीलोत्पलपरूषकम् ॥ ५६ ॥
फाण्टो हिमो वा द्राक्षादिर्जातीकुसुमवासितः ।
युक्तो मधुसितालाजैर्जयत्यनिलपित्तजम् ॥ ५७ ॥
ज्वर मदात्यय छर्दिर्मूर्च्छादाह श्रम भ्रमम् ।
ऊर्ध्वग रक्तपित्त च पिपासां कामलामपि ॥ ५८ ॥
पाचयेत् कटुकां पिष्ट्वा कर्परेऽभिनवे शुचौ ।
निष्पीडितो घृतयुतस्तद्रसो ज्वरदाहजित् ॥ ५९ ॥
कफवाते वचा तिक्ता पाठारग्वधवत्सकाः ।
पिप्पलीचूर्णयुक्तो वा क्वाथश्छर्द्यादिवोल्बणः ॥ ६० ॥
व्याघ्रीशुण्ठ्यमृताक्वाथः पिप्पलीचूर्णसंयुतः ।
वातश्लेष्मज्वरश्वासकासपीनसशूलजित् ॥ ६१ ॥
पथ्या कुस्तुम्बरी मुस्ता शुण्ठी कट्फलपर्पटम् ।
सकट्फलवचाभार्गीदेवाह्वं मधुहिङ्गुमत् ॥ ६२ ॥

कफवातज्वरेष्वेव कुक्षिहृत्पार्श्ववेदनाः।
कण्ठामयास्यस्रवथुकासश्वासाग्नियच्छति ॥ ६३ ॥
भारङ्गधादिः सक्षौद्रः कफपित्तज्वरं जयेत्।
तथा तिक्ता हृषीक्षीरत्रायन्ती त्रिफलामृता: ॥ ६४ ॥
सन्निपातज्वरे श्रेष्ठो देवदारुनिशाघनम्।
पटोलपत्रनिम्बत्वक्त्रिफलाकटुकायुतम् ॥ ६५ ॥
नागरं पौष्करं मूलं गुडूची कण्टकारिका।
सकासश्वासपार्श्वार्त्तौ वातश्लेष्मोत्तरे ज्वरे ॥ ६६ ॥
मधूकपुष्पं सृद्वीका त्रायमाणा परूषकम्।
सोक्षीरतिक्ता त्रिफला काश्मर्य्यं कल्पयेद्विषम् ॥ ६७ ॥
कषायं तं पिबन् काले ज्वरान् सर्वान् व्यपोहति।
जात्यामलकमुस्तानि तद्वन्नयवासकम् ॥ ६८ ॥
वह्निविट् कटुका द्राक्षा त्रायन्ती त्रिफलागुडान्।
जीर्णौषधोऽन्नं पेयाद्यमाचरेच्छ्लेष्मवान्नतु ॥ ६९ ॥
पेया कफं वर्द्धयति पङ्गूपांसुषु वृष्टिवत्।
श्लेष्माभिष्यन्दरोहाणां मतः प्रागपि योजयेत् ॥ ७० ॥
यूषान् कुलत्थचणकदाडिमादिकृतात् लघून्।
रूक्षांस्त्रिकटुकरसोपेतान् क्षुद्यान् रुचिकरान् पटून् ॥ ७१ ॥
रक्ताद्याः शालयो जीर्णाः षष्टिकाश्च ज्वरे हिताः।
श्लेष्मोत्तरे वीततुषास्तथा वाद्यकृता यवाः ॥ ७२ ॥
ओदनस्तैः श्रृतो हिङ्गुप्रयोक्तव्यो यथायथम्।
दोषदूष्यादिबलतो ज्वरघ्नक्वाथसाधितः ॥ ७३ ॥
मुद्गाद्यैर्लघुभिर्यूषाः कुलत्थैश्च ज्वरापहाः।
कारवेल्लककर्कोटवालमूलकपर्पटैः ॥ ७४ ॥
वार्ताकनिम्बकुसुमपटोलफलपल्लवैः।
अत्यन्तलघुभिर्मांसैर्जाङ्गलैश्च हिता रसाः ॥ ७५ ॥

द्राक्षाबिल्वपरूषकैर्दाडिमैः।
संस्कृता पिप्पलीशुण्ठीधान्यजीरकसैन्धवैः ॥ ७६ ॥
सितामधुभ्यां प्रायेण संयुता वा कृताकृताः।
अनम्लतक्रसिद्धानि रुच्यानि व्यञ्जनानि च ॥ ७७ ॥
अच्छान्यनलसम्पन्नान्यनुपानेऽपि योजयेत्।
तानि क्वथितशीतं च वारि मद्यं च सात्म्यतः ॥ ७८ ॥
सजूरं जूरमुक्तं वा दिनान्ते भोजयेल्लघु।
श्लेष्मचयविबद्धोष्मा बलवाननलस्तदा ॥ ७९ ॥
यथोचितेऽथवा काले देशसात्म्यानुरोधतः।
प्रागल्पवह्निर्भुञ्जानो न ह्यजीर्णेन पीड्यते ॥ ८० ॥
कषायपानपथ्यान्नैर्दशाह इति लङ्घिते।
सर्पिर्दद्यात्कफे मन्दे वातपित्तोत्तरे ज्वरे ॥ ८१ ॥
पक्वेषु दोषेष्वमृत तद्विषोपममन्यथा।
दशाहे स्यादतीतेऽपि ज्वरोपद्रवहृद्धिकृत् ॥ ८२ ॥
लङ्घनादिक्रमं तत्र कुर्यादाकफसङ्क्षयात्।
देहधात्वबलत्वाच्च ज्वरो जीर्णोऽनुवर्त्तते ॥ ८३ ॥
रूक्षं हि तेजो ज्वरकृत्तेजसा रूक्षितस्य च।
वमनस्नेटकालाम्बुकषायलघुभोजनैः ॥ ८४ ॥
यः स्यादतिबलो धातुः सहचारी सदागतिः।
तस्य सशमनं सर्पिर्दीप्तस्येवाम्बुवेश्मनः ॥ ८५ ॥
वातपित्तजितामग्र्य संस्कारमनुरुध्यते।
सुतरां तद्व्रतो दद्याद्यथा स्वौषधसाधितम् ॥ ८६ ॥
विपरीतं ज्वरोष्माणं जयेत् पित्तं च शैत्यतः।
स्नेहाद्दातं घृतं तुल्यं योगसंस्कारतः कफम् ॥ ८७ ॥
पूर्वं कषायाः सृष्टाः सर्वे योज्या यथामलम्।
त्रिफलापिप्पलीमल्लङ्घनकं वृष्यतीक्ष्णम्।

समसूरदलं क्वाथः सघृतो ज्वरकासहा ॥ ८८ ॥
पिप्पलीन्द्रयवधावनितिक्तासारिवामलकतामलकीभिः ।
बिल्वमुस्तहिमपालतिसैर्व्यैर्द्राक्षयातिविषया स्थिरया च ॥८९॥
घृतशाखु निहन्ति साधित ज्वरमग्निं विषमं हलीमकम् ।
अरुचिं भृशतापमसयोर्वमथु पार्श्वशिरोरुज चयम् ॥९०॥
तैल्वक पवनजन्मनि ज्वरे योजयेल्लिहतया वियोजितम् ।
तिक्तक वृषघृतं च पैत्तिके यच्च पालनिकया शृतं हविः ॥९१॥
विडङ्गसौवर्चलचव्यपाठाव्योषाग्निसिन्धूद्भवयावशूकैः ।
पलांशकैः क्षीरसमं घृतस्य प्रस्थं पचेज्जीर्णकफज्वरघ्नम् ॥९२॥
गुडूच्या रसकल्काभ्यां त्रिफलाया वृषस्य च ।
गृहीकाया बलायाश्च स्नेहाः सिद्धा ज्वरच्छिदः ॥ ९३ ॥
जीर्णे घृते च भुञ्जीत मृदुमासरसौदनम् ।
बल ह्यल दोषहर पर तच्च बलप्रदम् ॥ ९४ ॥
कफपित्तहरा मुद्गकारवेल्लादिजा रसाः ।
प्रायेण तस्माद्य हिता जीर्णे वातोत्तरे ज्वरे ॥ ९५ ॥
शूलोदावर्त्तविष्टम्भजनना ज्वरवर्द्धनाः ।
न शाम्यत्येवमपि चेज्ज्वरः कुर्वीत शोधनम् ॥ ९६ ॥
शोधनार्हस्य वमन प्रागुक्तं तस्य योजयेत् ।
आमाशयगते दोषे बलिनः पालयन् बलम् ॥ ९७ ॥
पक्के तु शिथिले दोषे ज्वरे वा विषमव्यजे ।
मोदकं त्रिफलाश्यामात्रिवृत्पिप्पलिकेसरैः ॥ ९८ ॥
सशितामधुभिर्दद्याद् व्योषाद्यं वा विरेचनम् ।
आरग्वधं वा पयसा गृहीकानां रसेन वा ॥ ९९ ॥
त्रिफलां त्रायमाणं वा पयसा ज्वरितः पिबेत् ।
विरिक्तानां स संसर्गो मण्डपूर्वा यथाक्रमम् ॥ १०० ॥
व्यवमानं ज्वरोत्क्लिष्टमुपेक्षेत मल सदा

पक्वेऽपि हि विकुर्वीत दोषः कोष्ठे कृतास्पदः ॥ १०१ ॥
अतिप्रवर्त्तमान वा पाचयन् सङ्ग्रहं नयेत्।
आमसङ्ग्रहणे दोषा दोषोपक्रम ईरिताः ॥ १०२ ॥
पाययेद्दोषहरणं मोहादामज्वरे तु यः।
प्रसुप्त कृष्णसर्पं च करायेण परामृशेत् ॥ १०३ ॥
ज्वरक्षीणस्य न हितं वमनं च विरेचनम्।
काम तु पयसा तस्य निरूहैर्वा हरेन्मलान् ॥ १०४ ॥
क्षीरोचितस्य प्रक्षीणश्लेष्मणो दाहवड्वतः।
क्षीर पित्तानिलार्त्तस्य पथ्यमप्यतिसारिणः ॥ १०५ ॥
तद्दग्धेन्धनोत्तप्तं प्लुष्टं वनमिवाग्निना।
दिव्याम्बु जीवयेत्तस्य ज्वर चाशु नियच्छति ॥ १०६ ॥
संस्कृत शीतमुष्ण वा तस्मादारोष्णमेव वा।
विभज्य काले युञ्जीत ज्वरिण हन्त्यतोऽन्यथा ॥ १०७ ॥
पयः मधुशीखर्जूरमृद्वीकाशर्कराप्लुतम्।
शृतशीत मधुयुत वड्दाहज्वरनाशनम् ॥ १०८ ॥
तद्वद् द्राक्षावलायष्टीसारिवाकणचन्दनैः।
चतुर्गुणेनाम्भसा वा पिप्पल्या वा शृत पिबेत् ॥१०९॥
कामात् श्वासाच्छिरःशूलात्पार्श्वशूलाच्चिरज्वरात्।
मुच्यते ज्वरितः पीत्वा पञ्चमूलीशृत पयः ॥ ११० ॥
शृतमैरण्डमूलेन बालविल्वेन वा ज्वरात्।
धारोष्ण वा पयः पीत्वा विबद्धानिलवर्चसः ॥ १११ ॥
सरक्तपित्तातिसृतेः सवट्शूलप्रवाहिकान्।
सिद्ध शुण्ठीबलाव्याघ्रीगोकण्टकगुडैः पयः ॥ ११२ ॥
शोफमूत्रग्रहोद्गातविबन्धज्वरकासजित्।
वृश्चिकविल्ववर्षाभूसाधितं ज्वरशोफनुत् ॥ ११३ ॥
शिग्रुपासारसिद्धं वा क्षीरमाशु ज्वरापहम्।

निरूहस्तु बलं वह्निं विजुरत्व मुद रुचिम् ॥ ११४ ॥
दोषे युक्तः करोत्याशु पक्वे पक्वाशय गते ।
पित्तं वा कफपित्त वा पक्वाशयगत हरेत् ॥ ११५ ॥
स्रसन स्रोनपि मलान् वस्ति.पक्वाशयाश्रयान् ।
प्रक्षीणकफपित्तस्य विकृष्ठकटिग्रहे ॥ ११६ ॥
दीप्ताग्नेर्बद्धशक्तः प्रयुञ्जीतानुवासनम् ।
पटोलनिम्बच्छदनकटुकाचतुरङ्गुलैः ॥ ११७ ॥
स्थिराबलागोक्षुरकमदनोशीरबालकैः ।
पयस्यर्द्धोदके क्वाथ क्षीरशेषं विमिश्रितम् ॥ ११८ ॥
कल्कितैर्मुस्तमदनकृष्णामधुकवत्सकैः ।
वस्तिं मधुघृताभ्याक्त पीडयेच्छ्वरनाशनम् ॥ ११९ ॥
क्षतक्षः पर्णिनीयष्टीफलोशीरनष्टपञ्चमान् ।
क्वाथयेत् कल्कयेद्यष्टीशतावृक्षफलिनीफलम् ॥ १२० ॥
मुस्तक्ष वस्तिः सगुडक्षौद्रसर्पिर्ज्वरापहः ।
जीवन्तो मदन मेदां पिप्पलीं मधुकं वचाम् ॥ १२१ ॥
ऋद्धिं राक्षा बला बिल्वं शतपुष्पां शतावरीम् ।
पिष्ट्वा क्षीरं जलं सर्पिस्तैल चैकत्र साधितम् ॥ १२२ ॥
ज्वरिऽवासन दद्याद्यथास्वेहं यथामलम् ।
ये च सिद्धिषु वक्ष्यन्ते वस्तयो ज्वरनाशनाः ॥ १२३ ॥
शिरोरुग्गौरवश्लेष्महरमिन्द्रियबोधनम् ।
जीर्णज्वरे रुजिकरं दद्यान्नस्यं विरेचनम् ॥ १२४ ॥
स्नैहिक शूल्यशिरसो दाहार्त्ते पित्तनाशनम् ।
धूमगण्डूषकवलान् यथादोषञ्च कल्पयेत् ॥ १२५ ॥
प्रतिश्यायास्यवैरस्यशिरःकण्ठामयापहान् ।
अरुचौ मातुलुङ्गस्य केसरं साज्यसैन्धवम् ॥ १२६ ॥
धात्रीद्राक्षासितानां वा कल्कमास्येन धारयेत् ।

यथोपश्रयसस्पर्शान् शीतोष्णद्रव्यकल्पितान् ॥ १२७ ॥
अभ्यङ्गालेपसेकादीन् ज्वरे जीर्णे त्वगाश्रिते।
कुर्यादज्ञनधूमाश्च तथैवागन्तुजेऽपि तान् ॥ १२८ ॥
दाहे सहस्रधौतेन सर्पिषाभ्यङ्गमाचरेत्।
सूत्रोक्तैश्च गणैस्तैस्तैर्मधुराम्लकषायकैः ॥ १२९ ॥
दूर्वादिभिर्वा पित्तघ्नैः शोधनादिगणोदितैः।
शीतवीर्यैर्हिमस्पर्शैः क्वाथः कल्कीकृतैः पचेत् ॥ १३० ॥
तैल सचीरमभ्यङ्गात् सद्यो दाहज्वरापहम्।
शिरो गात्रञ्च तैरेव नातिपिष्टैः प्रलेपयेत् ॥ १३१ ॥
तत्क्वाथेन परीषेकमवगाहञ्च योजयेत्।
तथारनालसलिलक्षीरयूक्षकृतादिभिः ॥ १३२ ॥
कपित्थमातुलिङ्गाम्लविदारीरोध्रदाडिमैः।
वदरीपल्लवोत्थेन फेनेनारिष्टजेन वा ॥ १३३ ॥
लिप्ते ऽङ्गे दाहरुग्मोहक्लर्दिस्तृष्णा च शाम्यति।
यो वर्णित पित्तहरो दोषोपक्रमणे क्रमः ॥ १३४ ॥
न च शीलयतः शीघ्रं सदाहो नश्यति ज्वरः।
वीर्य्योष्णैरुष्णसस्पर्शैस्तगरागुरुकुङ्कुमैः ॥ १३५ ॥
कुष्ठस्थौणेयशैलेयसरलामरदारुभिः।
नखरास्नासुरवचाचण्डेलाह्वयचोरकैः ॥ १३६ ॥
पृथ्वीकाशिग्रुसुरसाहिसाध्यामकसर्षपैः।
दशमूलाम्लतैरण्डह्वयपत्रूररोहिषैः ॥ १३७ ॥
तमालपत्रभूतिकगन्धकीधान्यदीप्यकैः।
मिशिमाषकुलत्थाग्निप्रकीर्य्यानाकुलीह्वयैः ॥ १३८ ॥
अन्यैश्च तद्विधैर्द्रव्यैः शीते तैलं ज्वरे पचेत्।
क्वथितैः कल्कितैर्युक्तैः सुरासौवीरकादिभिः ॥ १३९ ॥
तेनाभ्यङ्गात् सुखोष्णेन तैः सुपिष्टैश्च लेपयेत्।

क्वोष्णैस्तैः परिषेकमवगाहञ्च कल्पयेत् ॥ १४० ॥
केवलैरपि तद्वच्च शुक्तगोमूत्रवस्तुभिः ।
आरग्वधादिवर्गञ्च पानाभ्यञ्जनलेपनैः ॥ १४१ ॥
धूपानगुरुजास्तांश्च वक्ष्यन्ते विषमज्वरे ।
अन्यानग्निकृतान् स्वेदान् स्वेदिभेषजभोजनम् ॥१४२॥
गर्भभूवेश्मशयनं कुथाकम्बलरङ्कवान् ।
निर्धूमदीप्तैरङ्गारैर्हसन्तीञ्च हसन्तिकाः ॥ १४३ ॥
मद्यं सत्रूषणं तक्रं कुलत्थव्रीहिकोद्रवान् ।
सशीलयेद्वपुष्मान् यच्चान्यदपि पित्तलम् ॥ १४४ ॥
दयिताः स्तनशालिन्यः पीना विभ्रमभूषणाः ।
यौवनासवमत्ताश्च तमालिङ्गेयुरङ्गनाः ॥ १४५ ॥
वीतशीतञ्च विज्ञाय तास्ततोऽपनयेत् पुनः ।
वर्द्धनैनैकदोषस्य क्षपणैर्नोच्छ्रितस्य च ॥ १४६ ॥
कफस्थानानुपूर्व्या वा तुल्यकालान् जयेन्मलान् ।
सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः ॥ १४७ ॥
शोफः संजायते तेन कश्चिदेव प्रमुच्यते ।
रक्तावसेचनैः शीघ्रं सर्पिःपानैश्च तं जयेत् ॥ १४८ ॥
प्रदेहैः कफपित्तघ्नैर्नावनैः कवलग्रहैः ।
शीतोष्णस्निग्धरूक्षाद्यैर्यो यस्य न शाम्यति ॥ १४९ ॥
शाखानुसारी तस्याशु सुच्छेद बाह्वोः क्रमाच्छिराम् ।
अयमेव विधिः कार्य्यो विषमेऽपि यथायथम् ॥१५०॥
ज्वरे विभज्य वातादीन् यच्चानन्तरमुच्यते ।
पटोलकटुकामुस्ताप्राणदामधुकैः कृताः ॥ १५१ ॥
त्रिवृत्पञ्चमूलः क्वाथा विभ्रमच्छर्दनाशनाः ।
योजयेच्चिफलां पथ्यां गुडूचीं पिप्पलीं पृथक् ॥ १५२ ॥
तैस्तैर्विधानैः सगुडैर्भल्लातकमथापि वा ।

लङ्घनं बृंहणं चापि ज्वरागमनवासरे ॥ १५३ ॥
प्रातः सतैल लशुन प्राग्भक्तं वा तथा घृतम्।
जीर्णे तद्दधि पयस्तक्र सर्पिश्च षट्पलम् ॥ १५४ ॥
कल्याणक पञ्चगव्यं तिक्ताख्य वृषसाधितम्।
त्रिफलाकोलतर्कारीक्वाथदध्ना शृतं घृतम् ॥ १५५ ॥
तिक्तकत्वक्कृतावाप विषमज्वरजित् परम्।
सुरां तीक्ष्णाश्च यन्मद्यं शिखितित्तिरिकुक्कुटान् ॥१५६॥
मांस मध्योष्णवीर्यंश्च सहान्नेन प्रकामतः।
सेवित्वा तदहः स्वप्यादथवा पुनरुल्लिखेत् ॥ १५७ ॥
सर्पिषो महतीं मात्रां पीत्वा तच्छर्दयेत् पुनः।
नीलिनीमजगन्धाञ्च लिहतां कटुरोहिणीम् ॥१५८ ॥
पिबेज्ज्वरस्यागमने स्नेहस्वेदोपपादितः।
मनोह्वा सैन्धव कृष्णा तैलेन नयनाञ्जनम् ॥ १५९॥
योज्य हिङ्गुसमा व्याघ्री वसान्वितं ससैन्धवम्।
पुराणसर्पिः सिंहस्य वसा तद्वत्ससैन्धवा ॥ १६० ॥
पलङ्कषा निम्बपत्र वचाकुष्ठहरीतकी।
सर्षपा सयवा सर्पिर्धूपोविड्वा विड़ालजा ॥ १६१ ॥
पुरध्यामवचासर्जनिम्बार्कागरुदारुभिः।
धूपो ज्वरेषु सर्वेषु प्रयोक्तव्योऽपराजितः ॥ १६२ ॥
धूपनस्याञ्जनत्रासा ये चोक्ताश्चित्तवैकृते।
दैवाश्रयं च भैषज्य ज्वरान् सर्वान् व्यपोहति ॥ १६३ ॥
विशेषाद्विषमान् प्रायस्ते ह्यागन्वनुबन्धजा।
यथास्व च शिरा विध्येदग्नौ विषमज्वरे ॥ १६४ ॥
केवलानिलवीसर्पविस्फोटाभिहतज्वरे।
सर्पिःपानहिमालेपसेकमांसरसाशनम् ॥ १६५ ॥
कुर्याद्यथास्वमुक्तं च रक्तमोक्षादिसाधनम्।

ग्रहोत्थे भूतविद्योक्तं बलिमन्त्रादिसाधनम् ॥ १६६ ॥
ओषधीगन्धजे पित्तशमनं विषजिद् विषे।
इष्टैरर्थैर्मनोज्ञैश्च यथादोषशमेन च ॥ १६७ ॥
हिताहितविवेकैश्च ज्वरं क्रोधादिजं जयेत्।
क्रोधजो याति कामेन शान्तिं क्रोधेन कामजः ॥१६८॥
भयशोकोद्भवौ ताभ्यां भीशोकाभ्यां तथेतरौ।
आपाथर्वणमन्त्रोत्थे विधिर्दैवव्यपाश्रयः ॥ १६९ ॥
ते ज्वराः केवलाः पूर्वं व्याप्यन्तेऽनन्तरं मलैः।
तस्माद्दोषानुसारेण तेषाहारादि कल्पयेत् ॥ १७० ॥
न हि ज्वरोऽनुबध्नाति मारुतादीर्विनाकृतः।
ज्वरकालं स्मृतिं चास्य हारिभिर्विषयैर्हरेत् ॥ १७१ ॥
करुणार्द्रं मनः शुद्धं सर्वज्वरविनाशनम्।
त्यजेदाबललाभाच्चं व्यायामस्नानमैथुनम् ॥ १७२ ॥
गुर्वसात्म्याविदाह्यन्नं यच्चान्यज्ज्वरकारणम्।
न विज्वरोऽपि सहसा सर्वान्नीनो भवेत्तथा ॥ १७३ ॥
निवृत्तोऽपि ज्वरः शीघ्रं व्यापादयति दुर्बलम्।
सद्यः प्राणहरो यस्मात्तस्मात्तस्य विशेषतः।
तस्यां तस्यामवस्थायां तत्तत् कुर्य्याद्विषग्जितम् ॥१७४॥
ओषधयो मणयश्च सुमन्त्राः साधुगुरुद्विजदैवजपूजाः।
प्रीतिकरा मनसो विषयाश्च घ्नन्त्यपि विष्णुकृतं ज्वरमुग्रम् ॥१७५॥

द्वितीयोऽध्यायः।

अथातो रक्तपित्तचिकित्सितं व्याख्यास्यामः ॥
ऊर्द्ध्वगं बलिनो वेगमेकदोषानुगं नवम्।
रक्तपित्तं सुखे काले साधयेन्निरुपद्रवम् ॥ १ ॥
अधोगं यापयेद्रक्तं यच्च दोषद्वयानुगम्।

शान्तं शान्तं पुनः कुप्यन्मार्गान्मार्गान्तरं च यत् ॥ २ ॥
अतिप्रवृत्तं मन्दाग्नेः क्षिदोषं द्विपथं त्यजेत्।
सन्तर्पणोत्थं बलिनो बहुदोषस्य साधयेत् ॥ ३ ॥
ऊर्ध्वभागं विरेकेण वमनेन त्वधोगतम्।
शमनैर्लङ्घनैश्चान्यल्लङ्घयित्वानवेक्ष्य च ॥ ४ ॥
ऊर्ध्वं प्रवृत्ते शमनौ रसौ तिक्तकषायकौ।
उपवासश्च निःशुण्ठीषड्धौतोदकपायिनः ॥ ५ ॥
अधोगे रक्तपित्ते तु लंघनो मधुरो रसः।
ऊर्ध्वगे तर्पणं योज्यं पेयापूर्वमधोगते ॥ ६ ॥
अश्नतो बलिनो युक्तं न धार्यं तद्धि रोगकृत्।
धारयेदन्यथा शीघ्रमग्निवच्छीघ्रकारि तत् ॥ ७ ॥
त्रिवृच्छ्यामाकषायेण कल्केन च सशर्करम्।
साधयेद्विधिवल्लेहं लिह्यात्प्राग्वितलं ततः ॥ ८ ॥
त्रिवृता त्रिफला श्यामा पिप्पली शर्करा मधु।
मोदकः सन्निपातोर्ध्वरक्तपित्तशोफज्वरापहः ॥ ९ ॥
त्रिवृत्समसिता तद्वत् पिप्पली पादसंयुता।
वमनं फलसंयुक्तं तर्पणं सशितामधु ॥ १० ॥
सशितं वा जलं क्षौद्रयुक्तं वा मधुकोदकम्।
क्षीरं वा रसमिश्रो वा शुद्धस्यानन्तरो विधिः ॥ ११ ॥
यथास्वं मद्यपेयादिः प्रयोज्यो रक्तता बलम्।
मद्यो ज्वरोक्तो द्राक्षादिः पित्तघ्नैर्वा फलैः कृतः ॥ १२ ॥
मधुखर्जूरमृद्वीकापरूषकसिताम्भसा।
मद्यो वा पञ्चसारेण सघृतैर्लाजसक्तुभिः ॥ १३ ॥
दाडिमामलकाम्लो वा मन्दाग्न्यक्षाभिलाषिणाम्।
कमलोत्पलकिञ्जल्कपृश्निपर्णीप्रियङ्गुकाः ॥ १४ ॥
ह्रीबेरं शाबरं रोध्रं शृङ्गवेरं कुचन्दनम्।

ग्रहोत्थे भूतविद्योक्तं बलिमन्त्रादिसाधनम् ॥ १६६ ॥
ओषधीगन्धजे पित्तशमनं विषजिद् विषे।
इष्टैरर्थैर्मनोज्ञैश्च यथादोषशमेन च ॥ १६७ ॥
हिताहितविवेकैश्च ज्वरं क्रोधादिजं जयेत्।
क्रोधजो याति कामेन शान्तिं क्रोधेन कामजः ॥१६८॥
भयशोकोद्भवौ ताभ्यां भीशोकाभ्यां तथेतरौ।
शापाथर्वणमन्त्रोत्थे विधिर्दैवव्यपाश्रयः ॥ १६९ ॥
ते ज्वराः केवलाः पूर्वं व्याप्यन्तेऽनन्तरं मलैः।
तस्माद्दोषानुसारेण तेषाहारादि कल्पयेत् ॥ १७० ॥
न हि ज्वरोऽनुबध्नाति मारुतादीर्विनाकृतः।
ज्वरकालं स्मृतिं चास्य हारिभिर्विषयैर्हरेत् ॥ १७१ ॥
करुणार्द्रं मनः शुद्धं सर्वज्वरविनाशनम्।
त्यजेदाबललाभाच्चं व्यायामस्नानमैथुनम् ॥ १७२ ॥
गुर्वसात्म्याविदाह्यन्नं यच्चान्यज्ज्वरकारणम्।
न विज्वरोऽपि सहसा सर्वान्नीनो भवेत्तथा ॥ १७३ ॥
निवृत्तोऽपि ज्वरः शीघ्रं व्यापादयति दुर्बलम्।
सद्यः प्राणहरो यस्मात्तस्मात्तस्य विशेषतः।
तस्यां तस्यामवस्थायां तत्तत् कुर्य्याद्विषग्जितम् ॥१७४॥
ओषधयो मणयश्च सुमन्त्राः साधुगुरुद्विजदैवजपूजाः।
प्रीतिकरा मनसो विषयाश्च घ्नन्त्यपि विष्णुकृतं ज्वरमुग्रम् ॥१७५॥

द्वितीयोऽध्यायः।

अथातो रक्तपित्तचिकित्सितं व्याख्यास्यामः ॥
ऊर्द्ध्वगं बलिनो वेगमेकदोषानुगं नवम्।
रक्तपित्तं सुखे काले साधयेन्निरुपद्रवम् ॥ १ ॥
अधोगं यापयेद्रक्तं यच्च दोषद्वयानुगम्।

सक्षौद्रं ग्रथितं रक्ते लिह्यात्पारावतं यकृत् ।
अतिनिसृतरक्तस्य क्षौद्रेण रुधिरं पिबेत् ॥ २८ ॥
जाङ्गलं भक्षयेद्वाजमामपित्तयुतं यकृत् ।
चन्दनोशीरजलदालाजामुद्गकषायवैः ॥ ३० ॥
बलाजले पर्युषितैः कषायो रक्तपित्तहा ।
प्रसादचन्दनाम्भोजसेव्यं मृद्वृष्टलोष्टजः ॥ ३१ ॥
सुशीतः ससिताक्षौद्रः शोणितातिप्रवृत्तिजित् ।
आयोध्य वा नवे कुम्भे प्लावयेदिक्षुगण्डिकाः ॥ ३२ ॥
स्थितं तद्गुणमाकाशे रात्रिं प्रातः पृतं जलम् ।
मधूदीक्षाम्भोजकृतोत्तंसं च तद्गुणम् ॥ ३३ ॥
ये च पित्ते ज्वरे चोक्ताः कषायास्तांश्च योजयेत् ।
कषायैर्विविधैरेभिर्दीप्तेऽग्नौ विजिते कफे ।
रक्तपित्ते न चेच्छाम्येत्तत्र वातोल्बणे पयः ॥ ३४ ॥
युञ्जाच्छागं पृतं तद्वच्चं पञ्चगुणेऽम्भसि ।
पञ्चमूलेन लघुना पृतं वा ससितामधु ॥ ३५ ॥
जीवकर्षभकद्राक्षाबलागोक्षुरनागरैः ।
पृथक् पृथक् पृतं क्षीरं सघृतं सितयाऽथवा ॥ ३६ ॥
गोकण्टकाभीरुपृतं पर्णिनीभिस्तथा पयः ।
हन्त्याशु रक्तं सरुजं विशेषान्मूत्रमार्गगम् ॥ ३७ ॥
विषमार्गगे विशेषेण हितं मोचरसेन तु ।
वटप्ररोहैः शृङ्गैर्वा शुष्कुदीक्षोत्पलैरपि ॥ ३८ ॥
रक्तातिसारदुर्नामचिकित्सां चात्र कल्पयेत् ।
पीत्वा कषायान् पयसा भुञ्जीत पयसैव च ॥ ३९ ॥
कषाययोगैरेभिर्वा विपक्वं पाययेद् घृतम् ।
समूलमस्तकं क्षुण्णं वृषमष्टगुणेऽम्भसि ॥ ४० ॥
पक्वाष्टांशावशेषेण घृतं तेन विपाचयेत् ।

पुष्पगर्भं च तच्छीतं सक्षौद्रं पित्तशोणितम् ॥ ४१ ॥
पित्तगुल्मज्वरश्वासकासच्छर्द्रोगकामलाः ।
तिमिरभ्रमवीसर्पस्वरसादांश्च नाशयेत् ॥ ४२ ॥
पालाशवत्तत्स्वरसे तद्गर्भं च घृतं पचेत् ।
सक्षौद्रं तच्च रक्तघ्नं तथैव त्रायमाणया ॥ ४३ ॥
रक्ते सपिच्छे सकफे ग्रथिते कण्ठमार्गगे ।
लिह्यान्माक्षिकसर्पिर्भ्यां क्षारमुत्पलनालजम् ॥ ४४ ॥
पृथक् पृथक् तथाम्भोजरेणुश्यामामधूकजम् ।
गुदागमे विशेषेण शोणिते वस्तिरिष्यते ॥ ४५ ॥
घ्राणगे रुधिरे शुद्धे नावनं चानुषेचयेत् ।
कषाययोगान् पूर्वोक्तान् क्षीरेक्षादिरसप्लुतान् ॥ ४६ ॥
क्षीरादीन् ससितांस्तोयं केवलं वा जलं हितम् ।
रसो दाडिमपुष्पाणामाम्बोत्थः शाड्वलस्य वा ।
कल्पयेच्छीतवर्गं च प्रदेहाभ्यञ्जनादिषु ॥ ४७ ॥

तृतीयोऽध्यायः ।

अथातः कासचिकित्सितं व्याख्यास्यामः ॥
केवलानिलजं कासं स्नेहैरादावुपाचरेत् ।
वातघ्नसिद्धैः स्निग्धैश्च पेयायूषरसादिभिः ॥ १ ॥
स्नेहैर्धूमैस्तथाभ्यङ्गैः स्वेदसेकावगाहनैः ।
वस्तिभिर्बृंहणैर्वातं सपित्तं तूर्ध्वभक्तिकैः ॥ २ ॥
तृतैः क्षीरैश्च सकफं जयेत् स्नेहविरेचनैः ।
गुडूचीकण्टकारीभ्यां पृथक् त्रिंशत्पलाद्रसे ॥ ३ ॥
प्रस्थः सिद्धो घृताद्वातकासनुद्वह्निदीपनः ।
क्षारराज्ञावचाच्छिङ्गुपाठायष्ट्याह्वधान्यकैः ॥ ४ ॥
द्विगुणैः सर्पिषः प्रस्थं पञ्चकोलयुतैः पचेत् ।

दशमूलस्य निर्यूहे पीतो मण्डानुपायिना ॥ ५ ॥
सकासश्वासहृत्पार्श्वग्रहणीरोगगुल्मनुत् ।
द्रोणेऽपां साधयेद्रास्नादशमूलशतावरीः ॥ ६ ॥
पलोन्मिताढकुडवं कुलत्थं वदरं यवम् ।
तुलार्द्धं वाजमांसस्य तेन साध्यं घृताढकम् ॥ ७ ॥
समक्षीरं पलांशैश्च जीवनीयैः समीक्ष्य तत् ।
प्रयुक्तं वातरोगेषु पाननावनवस्तिभिः ॥ ८ ॥
पजकासान् शिरःकम्पं योनिवङ्क्षणवेदनाम् ।
सर्वाङ्गैकाङ्गरोगांश्च सद्योहोर्ध्वानिलान् जयेत् ॥ ९ ॥
विदार्य्यादिगणक्वाथकल्कसिद्धं च कामजित् ।
अशोकबीजत्वक्पजन्तुघ्नाञ्जनपद्मकैः ॥ १० ॥
सविडैश्च घृतं सिद्धं तच्चूर्णं वा घृतप्लुतम् ।
लिह्यात् पयश्चानुपिबेदाजं कासादिपीडितः ॥ ११ ॥
विडङ्गं नागरं राम्ना पिप्पली हिङ्गुसैन्धवम् ।
भार्ङ्गी क्षारश्च तच्चूर्णं पिबेद्वा घृतमात्रया ॥ १२ ॥
सकफेऽनिलजे कासे श्वासहिक्माहृतेऽग्निषु ।
दुरालभां शृङ्गवेरं यष्टीं द्राक्षां सितोपलाम् ॥ १३ ॥
लिह्यात्कर्कटशृङ्गीं च कासे तैलेन वातजे ।
दुरालभां पिप्पलीं मुस्तां भार्ङ्गीं कर्कटकीं यष्टीम् ॥ १४ ॥
पुराणगुडतैलाभ्यां चूर्णितान्यवलेहयेत् ।
तद्वत्कृष्णां शुण्ठीं च सभार्ङ्गीं तद्वदेव च ॥ १५ ॥
पिबेच्च कृष्णां कोष्णेन सलिलेन ससैन्धवाम् ।
मस्तुना सशितां शुण्ठीं दध्ना वा कणरेणुकाम् ॥ १६ ॥
पिबेद्वदरमज्जो वा मदिरादधिमस्तुभिः ।
अथवा पिप्पलीकल्कं घृतभ्रष्टं ससैन्धवम् ॥ १७ ॥
कासी सपीनसो धूमं स्नैहिकं विधिना पिबेत् ।

हिङ्ग्वाज्यासोक्षधूमांश्च क्षीरमांसरसाशनः ॥ १८ ॥
ग्राम्यानूपोदकैः शालियवगोधूमषष्टिकान् ।
रसैर्माषाढ्यगुप्तानां यूषैर्वा भोजयेद्धि तान् ॥ १९ ॥
यवानीपिप्पलीविल्वमध्यनागरचित्रकैः ।
राम्ना जाजी पृथक्पर्णी पलाशशठीपौष्करैः ॥ २० ॥
पिष्टां स्निग्धाम्ललवणां पेयामनिलजे पिबेत् ।
कटिहृत्पार्श्वकोष्ठार्त्तिश्वासहिक्माप्रणाशनीम् ॥ २१ ॥
दशमूलरसे तद्वत् पञ्चकोलगुडान्विताम् ।
पिबेत् पेयां समतिलां क्षैरेयीं वा ससैन्धवाम् ॥ २२ ॥
माक्षिकौक्षुटवाराहैर्मांसैर्वा साज्यसैन्धवाम् ।
वास्तुको वायसीशाकं कासघ्नः सुनिषण्णकः ॥ २३ ॥
कण्टकार्य्याः फलं पत्रं बालं शुष्कं च मूलकम् ।
स्नेहास्तैलादयो भक्ष्याः क्षीरेक्षुरसगौडिकाः ॥ २४ ॥
दधिमस्त्वारनालाम्लफलाम्बुमदिराः पिबेत् ।
पित्तकासे तु सकफे वमनं सर्षपा हितम् ॥ २५ ॥
तथा मदनकाश्मर्य्यमधुककथितैर्जलैः ।
फलयष्ट्याह्वकल्कैर्वा विदारीक्षुरसाप्लुतैः ॥ २६ ॥
पित्तकासे तनुकफे त्रिवृतां मधुरैर्युताम् ।
युञ्ज्याद्विरेकायुतां घनश्लेष्मणि तिक्तकैः ॥ २७ ॥
कृतदोषो हिमं स्वादु स्निग्धं संसर्जनं भजेत् ।
घने कफे तु शिशिरं रूक्षं तिक्तोपसंहितम् ॥ २८ ॥
स्नेहः पैत्ते सिता धात्री क्षौद्रद्राक्षा हिमोत्पलैः ।
सकफे साब्दमरिचः सघृतः सानिले हितः ॥२८॥
मृद्वीकार्द्धशतं चिंञ्चत् पिप्पलीः शर्करापलम् ।
लेहयेन्मधुना गोर्वा क्षीरपथ्य शक्तद्वसम् ॥ ३० ॥
अगेलात्र्योषमृद्वीकापिप्पलीमूलपौष्करैः ।

लाजमुस्ताशठीरास्नाधात्रीफलविभीतकैः ॥ ३१ ॥
शर्कराक्षौद्रसर्पिर्भिर्लेहो हृद्रोगकासहा।
मधुरैर्जाङ्गलरसैर्यवश्यामाककोद्रवाः ॥ ३२ ॥
मुद्गादियूषैः शाकैश्च तिक्तकैर्मात्रया हिताः।
घनश्लेष्मणि लेहाश्च तिक्ता मधुसंयुताः ॥ ३३ ॥
शालयः स्युस्तनुकणे षष्टिकाश्च रसादिभिः।
शर्कराक्षौऽनुपानार्थं द्राक्षेक्षुस्वरसाः पयः ॥ ३४ ॥
काकोली बृहती मेदाद्वयैः सद्वयनागरैः।
पित्तकासे रसक्षीरपेयायूषान् प्रकल्पयेत् ॥ ३५ ॥
द्राक्षां कणां पञ्चमूलं वृषाख्यं च पचेज्जले।
तेन क्षीरं घृतं शीतं पिबेत् समधुशर्करम् ॥ ३६ ॥
साधितां तेन पेयां वा सुशीतां मधुनान्विताम्।
यष्टीक्षीरैर्बृहतीशर्कराविश्वभेषजम् ॥ ३७ ॥
पिष्ट्वा रसं पिबेत् पूतं क्षौद्रेण घृतमूर्च्छितम्।
शर्करां जीवकं मुद्गमाषपर्ण्यौ दुरालभाम् ॥ ३८ ॥
कल्कीकृत्य पचेत् सर्पिः क्षीरेणाष्टगुणेन तत्।
यानभोजनलेहेषु प्रयुक्तं पित्तकासजित् ॥ ३९ ॥
लिह्याद्वा चूर्णमेतेषां कषायमथवा पिबेत्।
कफकासी पिबेदादौ सुरकाष्ठात् प्रदीपितात् ॥४०॥
स्नेहं परिस्रुतं व्योषयवक्षारावचूर्णितम्।
स्निग्धं विरेचयेद्दूर्ध्वमधोमूर्ध्नि च युक्तितः ॥ ४१ ॥
तीक्ष्णैर्विरेकैर्बलिनं संसर्गी चास्य योजयेत्।
यवमुद्गकुलत्थार्द्ररूक्षैः कटुकटैः ॥ ४२ ॥
कासमर्दकवार्ताकव्याघ्रीक्षारकणान्वितैः।
धान्याम्लसरसैः स्नेहैस्तिलसर्षपनिम्बजैः ॥ ४३ ॥
दशमूलाम्बु घर्माम्बु मद्यं मद्यरसं वा पिबेत्।

मूलैः पौष्करशृङ्ग्याकपटोलैः संस्थितं निशाम् ॥ ४४ ॥
पिबेद्दारिसहस्रौद्र कालेष्वन्नस्य वा विधु।
पिप्पलीपिप्पलीमूलं शृङ्गवेरं बिभीतकम् ॥ ४५ ॥
शिखिकुक्कुटपिच्छानां मषीक्षारो यवोद्भवः।
विशालापिप्पलीमूल त्रिहता च मधुद्रवाः ॥ ४६ ॥
कफकासहरा लेहास्त्रयः श्लोकार्द्धयोजिताः।
मधुना मरिचं लिह्यान्मधुनैव च जोङ्गकम् ॥ ४७ ॥
शृङ्गबेरसांश्च मधुना व्याघ्रीवार्त्ताकशृङ्गजान्।
कासघ्नस्याश्वगन्धाया सुरसस्यासितस्य च ॥ ४८ ॥
देवदारुशठीरास्नाकर्कटाख्यादुरालभाः।
पिप्पली नागरं मुस्तं पथ्या धात्री सितोपला ॥ ४९ ॥
लाजासितोपलासर्पिः शृङ्गी धात्रीफलोद्भवा।
मधुतैलयुता लेहास्त्रयो वातानुगे कफे ॥ ५० ॥
द्वे पले दाडिमादष्टौ गुडाद् औषात् पलत्रयम्।
रोचनं दीपनं स्वर्यं पीनसश्वासकासजित् ॥ ५१ ॥
गुडचारोषणकणादाडिम श्वासकासजित्।
क्रमात् पलद्वयार्द्धाक्षकर्षाक्षार्द्धपलोन्मितम् ॥ ५२ ॥
पिबेज्ज्वरोक्तं पथ्यादि सशृङ्गीकं च पाचनम्।
अथवा दीप्यकत्रिवृद्विशालाघनपौष्करम् ॥ ५३ ॥
सकणं क्वथितं मूत्रे कफकासी जलेऽपि वा।
तैलभ्रष्टञ्च वैटेहीकल्काक्षं ससितोपलम् ॥ ५४ ॥
पाययेत् कफकासघ्नं कुलत्थसलिलाप्लुतम्।
दशमूलाढके प्रस्थं घृतस्याक्षसमैः पचेत् ॥ ५५ ॥
पुष्करास्नाशठीविल्वसुरसाव्योषहिङ्गुभिः।
पेयानुपानं तत्सर्पिर्वातश्लेष्मामयापहम् ॥ ५६ ॥
निर्गुण्डीपत्रनिर्य्याससाधितं कासजिद् घृतम्।

घृतं रसे विडङ्गानां व्योषगर्भं च साधितम् ॥ ५७ ॥
पुनर्नवार्कवाटिकासरलकाष्ठसमर्दितैः ।
पटोलबृहतीफणिज्झक्करसैः पयःसंयुतैः ॥ ५८ ॥
घृतं त्रिकटुना च सिद्धमुपयुज्य सञ्जायते ।
न कासविषमज्वरक्षयगुदाङ्कुरेभ्यो भयम् ॥ ५९ ॥
समूलफलपत्रायाः कण्टकार्य्या रसाढके ।
घृतप्रस्थं बलाव्योषविडङ्गशठीदाडिमैः ॥ ६० ॥
सौवर्चलयवक्षारमूलामलकपौष्करैः ॥
बृहतीबृहतीपथ्यायवानीचित्रकार्द्धिभिः ॥ ६१ ॥
सद्वीका चव्यवर्षाभूदुरालभाश्वेतसैः ।
शृङ्गीतामलकीभार्ङ्गीरास्नागोक्षुरकैः पचेत् ॥ ६२ ॥
कल्कैस्तत्कर्षकासेषु श्वासहिक्कासु चेष्यते ।
पचेद्ग्राघ्रीतुला क्षुण्णां वह्नेपामाढकस्थिते ॥ ६३ ॥
क्षिपेत् पूते तु सक्षौद्रं व्योषक्षाराम्लताम्लिकान् ।
शृङ्गीभार्ङ्गीधनग्रन्थिधन्वयासान् पलार्द्धकान् ॥ ६४ ॥
सर्पिषः षोडशपलं चत्वारिंशत्पलानि च ।
मत्स्यण्डिकायाः शुद्धायाः पुनश्च तदधिश्रयेत् ॥ ६५ ॥
दर्वीलेपिनि शीते च पृथग् द्विकुडवं क्षिपेत् ।
पिप्पलीनां तवक्षीर्य्या माक्षिकस्यानवस्य च ॥ ६६ ॥
लेहोऽयं गुल्महृद्रोगदुर्नामश्वासकासजित् ।
श्रमनं च पिबेद्धूम शोधनं बहुले कफे ॥ ६७ ॥
मनःशिलालमधुकमांसीमुस्तेङ्गुदित्वचः ।
धूमं कासघ्नविधिना पीत्वा क्षीरं पिबेदनु ॥ ६८ ॥
निष्धूतान्ते गुडयुतं कोष्ण धूमो निहन्ति सः ।
वातश्लेष्मोत्तरान् कासानचिरेण चिरन्तनान् ॥ ६९ ॥
तमकः कफकासे तु स्याच्चेत् पित्तानुबन्धजः ।

पित्तकामक्रियां तत्र यथावस्थं प्रयोजयेत् ॥ ७० ॥
कफानुबन्धे पवने कुर्य्यात्कफहरा क्रियाम् ।
पित्तानुबन्धयोर्वातकफयोः पित्तनाशनीम् ॥ ७१ ॥
वातश्लेष्मात्मके शुष्के स्निग्धं चार्द्रे विरूक्षणम् ।
कासे कर्मसपित्ते तु कफजे तिक्तसंयुतम् ॥ ७२ ॥
ज्वरस्थन्तः क्षते सद्यो लाजां क्षौद्रयुतां पिबेत् ।
क्षीरेण शालीन् तीर्णोऽद्यात् क्षीरेणैव सशर्करान् ॥७३॥
पार्श्ववस्तिसरुक्चाल्पपित्ताग्निस्तां सुरायुताम् ।
भिन्नविट्कः समुस्तातिविषापाठां सवत्सकाम् ॥ ७४ ॥
लाजां सर्पिर्मधूच्छिष्टं जीवनीयं गणं सितम् ।
त्वक्षीरीसम्मितं क्षीरे पक्वा दीप्तानलः पिबेत् ॥७५॥
इक्षुकारिकाविषग्रन्थिपद्मकेसरचन्दनैः ।
शृतं पयो मधुयुतं सन्धानार्थं क्षती पिबेत् ॥ ७६ ॥
यवानां चूर्णमामानां क्षीरे क्षिप्त घृतान्वितम् ।
ज्वरदाहे सिताक्षौद्रसक्तून् वा पयसा पिबेत् ॥७७॥
कासवांश्च पिबेत्सर्पिर्मधुरौषधसाधितम् ।
गुडोदकं वा क्वथितं सक्षौद्रमरिचं हिमम् ॥ ७८ ॥
चूर्णमामलकानां वा क्षीरपक्वं घृतान्वितम् ।
रसायनविधानेन पिप्पलीर्वा प्रयोजयेत् ॥ ७९ ॥
कासी पर्वास्थिशूली च लिह्यादक्षघृतमाक्षिकान् ।
मधूकमधुकद्राक्षात्वक्क्षीरीपिप्पलीबलान् ॥ ८० ॥
त्रिजातमर्द्धकर्षांशं पिप्पल्यर्द्धपलं सिता ।
द्राक्षामधूक खर्जूर पलाश श्लक्ष्णचूर्णितम् ॥ ८१ ॥
मधुना गुटिका घ्नन्ति ता क्षुधाः पित्तशोणितम् ।
कासश्वासारुचिच्छर्दिमूर्च्छाहिध्मावमिभ्रमान् ॥ ८२ ॥
क्षतक्षयस्वरभ्रंशग्रहणीपाण्ड्यमारुतान् ।

रक्तनिष्ठीवहृत्पार्श्वरुक्पिपासाज्वरानपि ॥ ८३ ॥
वर्षाभूशर्करारक्तशालितण्डुलजं रजः।
रक्तष्ठीवी पिबेत्सिद्धं द्राक्षारसपयोघृतैः ॥ ८४ ॥
मधूकमधुकक्षीरसिद्धं वा तण्डुलीयकम्।
यथा स्वमार्गविसृते रक्ते कुर्याच्च भेषजम् ॥ ८५ ॥
मूढ़वातस्खजामेदः सुराभृष्टं ससैन्धवम्।
क्षामः क्षीणक्षतोरस्को मन्दनिद्रोऽग्निदीप्तिमान् ॥८६॥
घृतक्षीरसरेणाद्यात्सघृतक्षौद्रशर्करम्।
शर्करां यवगोधूमं जीवकर्षभकौ मधु ॥ ८७ ॥
घृतक्षीरानुपानं वा लिह्यात् क्षीणः क्षतः क्षयः।
क्रव्यात्पिशितनिर्मूहं घृतभृष्टं पिबेच्च सः ॥ ८८ ॥
पिप्पलीक्षौद्रसयुक्तं मांसशोणितवर्द्धनम्।
न्यग्रोधोदुम्बराश्वत्थप्लक्षशालप्रियङ्गुभिः ॥ ८९ ॥
तालमस्तकजम्बूत्वक्प्रियालैश्च सपद्मकैः।
साश्वकर्णैः शृतात् क्षीरादाज्जातेन सर्पिषा ॥ ९० ॥
शाल्योदनं क्षतोरस्कः क्षीणशुक्रबलेन्द्रियः।
वातपित्तार्दितेऽभ्यङ्गे गात्रभेदे घृतैर्मतः ॥ ९१ ॥
तैलैश्चानिलरोगघ्नैः पीडिते मातरिश्वना।
हृत्पार्श्वार्त्तिषु पानं स्याज्जीवनीयस्य सर्पिषः ॥९२॥
कुर्याच्चा वातरोगघ्नं पित्तरक्तविरोधि यत्।
यच्यात्त्वनागबलयोः क्वाथे क्षीरे समे घृतम् ॥ ९३ ॥
पयस्या पिप्पलीवांसीकल्कैः सिद्धं क्षते हितम्।
जीवनीयो गणः क्षीरी वरीवीरा पुनर्नवा ॥ ९४ ॥
बला भार्ङ्गीस्वगुप्तार्द्धशठी तामलकी कणा।
शृङ्गाटकं पयस्या च पञ्चमूलं च यत्स्मृतम् ॥ ९५ ॥
द्राक्षाक्षौद्रादि च फलं मधुरस्निग्धबृंहणम्।

तैः पचेत् सर्पिषः प्रस्थं कर्षांशैः श्लक्ष्णकल्कितैः ॥९६॥
क्षीरधात्रीविदारीक्षुच्छागमांसरसान्वितम् ।
प्रस्थार्धं मधुनः प्रीते शर्करार्धं तुलारजः ॥ ९७ ॥
पलार्धकं च मरिचं त्वगेलापत्रकेसरम् ।
विनीय चूर्णितं तस्माल्लिह्यात्मात्रां यथाबलम् ॥ ९८ ॥
अमृतप्राशमित्येतद्वराणाममृतं घृतम् ।
सुधामृतरसं प्राश्यं क्षीरमांसरसाग्निना ॥ ९९ ॥
नष्टशुक्रक्षतक्षीणदुर्बलव्याधिकर्शितान् ।
क्लीबप्रसक्तान् क्षयान् वर्णस्वरहीनांश्च वृंहयेत् ॥ १०० ॥
कासहिध्माज्वरश्वासदाहहृत्पार्श्वपित्तनुत् ।
पुत्रदं हृद्दिमूर्च्छाहृद्योनिमूत्रामयापहम् ॥ १०१ ॥
खदंष्ट्रोशीरमञ्जिष्ठाबलाकाश्मर्यकन्दजम् ।
दर्भमूल पृथक्पर्णी पलाशर्षभकौशिरा ॥१०२॥
पालिकानि पचेत् तेषां रसे क्षीरचतुर्गुणे ।
कल्कैः स्वगुप्ताजीवन्तीमेदकर्षभजीवकैः ॥ १०३ ॥
शतावर्यार्द्धमृद्वीकाशर्करात्र्यावणीविसैः ।
प्रस्थः सिद्धो घृताद्यातपित्तहृद्रोगशूलनुत् ॥ १०४ ॥
मूत्रकृच्छ्रप्रमेहार्शःकासशोषक्षयापहः ।
धनुस्त्रीमद्यभाराध्वक्षिन्नानां बलमांसदः ॥ १०५ ॥
मधुकाष्टपलद्राक्षाप्रस्थक्वाथे पचेद् घृतम् ।
पिप्पल्यष्टपले कल्के प्रस्थं सिद्धे च शीतले ॥ १०६ ॥
पृथगष्टपले क्षौद्रशर्कराभ्यां विमिश्रयेत् ।
समःसक्षुक्षतक्षीणरक्तगुल्मेषु तद्धितम् ॥ १०७ ॥
धात्री लविदारीक्षुजीवनीयरसाद् घृतात् ।
गव्याजयोश्च पयसोः प्रस्थं प्रस्थं विपाचयेत् ॥ १०८ ॥
सिद्धपूते सिताक्षौद्रं द्विप्रस्थं विनयेत्ततः ।

यक्ष्मापस्मारपित्तास्रकासमेहज्वरापहम् ॥ १०९ ॥
घृतं तु पित्तेऽभ्यधिके लिह्याद्वाताधिके पिबेत् ॥११०॥
लोढं निर्वापयेत्पित्तमल्पत्वात् हन्ति नानलम्।
आक्रामत्यनिलं पीतमूष्माणं निरुणद्धि च ॥ १११ ॥
श्यामत्रोषकशाङ्कानामेतान्येव घृतानि तु।
त्वक्क्षीरोपिप्पलीलाजचूर्णैः पानानि योजयेत् ॥ ११२ ॥
सर्पिर्गुडान् समध्वंशान् कृत्वा दद्यात् पयोऽनु च।
रेतो वीर्यं बलं पुष्टिं तैराप्यतरमाप्नुयात् ॥ ११३ ॥
वीतत्वगस्थिकूष्माण्डतुलां स्विन्नां पुनः पचेत्।
घट्टयन् सर्पिषः प्रस्थे क्षौद्रवर्णेऽवतारिते च क्षिपेत् ॥ ११४ ॥
खण्डाच्छृतं कणाशुण्ठीमरिचं जीरकादपि।
त्रिजातधान्यमरिच पृथगर्धं पलांशकम् ॥ ११५ ॥
अवतारितशीते च दत्वा क्षौद्र घृतार्धकम्।
खजेनामथ्य च क्षाम्य तन्निहन्त्यु पयोजितम् ॥ ११६ ॥
कासहिध्माज्वरश्वासरक्तपित्तक्षतक्षयान्।
स्मृतिसन्धानजननं मेधास्मृतिबलप्रदम् ॥ ११७ ॥
अक्षिभ्यां विहितं क्षय्यं कूष्माण्डकरसायनम्।
पिबेन्नागबलामूलस्यार्धकर्षाभिवर्द्धितम् ॥ ११८ ॥
पक्षं क्षीरयुतं मासं क्षीरवृत्तिरनन्नभुक्।
एष प्रयोगः पुष्ट्यायुर्बलवर्णकरः परम् ॥ ११९ ॥
मण्डूकपर्ण्याः कल्कोऽथ यष्ट्या विश्लेषधस्य च।
पादशेषं जलद्रोणे पचेन्नागबलातुलाम् ॥ १२० ॥
तेन क्वाथेन तुल्यांशं घृतं क्षीरेण पाचयेत्।
पलार्धिकैश्चातिबलाबलायष्टीपुनर्नवैः ॥ १२१ ॥
प्रपौण्डरीककाश्मर्य्यप्रियालकपिकच्छुभिः।
अश्वगन्धासिताभीरुमेदायुग्मत्रिकण्टकैः ॥ १२२ ॥

काकोली क्षीरकाकोली क्षीरशुक्लाद्विजीवकैः।
एतन्नागबलासपित्तरक्तक्षतक्षयान् ॥ १२३ ॥
जयेत्तृड्भ्रमदाहांश्च बलपुष्टिकरं परम्।
वर्ष्यं मायुष्यमोजस्यं वलीपलितनाशनम् ॥ १२४ ॥
उपयुज्य च पयसा मांसान् वृद्धोऽपि तरुणायते।
दीप्तेऽग्नौ विधिरेषः स्यान्मन्दे दीपनपाचनः ॥ १२५ ॥
यक्ष्मीक्षतिनां शस्तो ग्राही शक्नोति तु द्रवे।
दशमूल स्वयगुप्तां शङ्खपुष्पीं शठीं बलाम् ॥ १२६ ॥
हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकान्।
भार्गीं पुष्करमूलं च द्विपलांशान् यवाढकम् ॥ १२७ ॥
हरीतकीशतं चैकं जले पञ्चाढ़के पचेत्।
यवस्विन्ने कषायं तं पूतं तच्चाभयाशतम् ॥१२८॥
पचेद् गुडतुलां दत्त्वा कुडवं च पृथग्घृतात्।
तैलात्पिप्पलीचूर्णात्सिद्धशीते च माक्षिकात् ॥१२९॥
लेहं ह्रे चाभये नित्यमतः खादेद्रसायनात्।
तद्वलीपलितं हन्याद्वर्णायुर्बलवर्द्धनम् ॥ १३० ॥
पञ्चकासान् क्षयं श्वासं सहिक्कां विषमज्वरम्।
मेहगुल्मार्शसः प्लीहकुष्ठोदरारुचिपीनसान् ॥ १३१ ॥
अगस्त्यविहितं धन्यमिदं श्रेष्ठं रसायनम्।
दशमूलं बलां मूर्वां हरिद्रे पिप्पलीद्वयम् ॥ १३२ ॥
पाठाश्वगन्धापामार्गस्वगुप्तातिविषामृतम्।
बालविल्वं त्रिवृद्दन्तीमूल पत्रं च चित्रकात् ॥१३३॥
पयस्यां कुटजं हिंस्रां पुष्पं सारं च वीजकात्।
बोटस्थविरभल्लातविकङ्कतशतावरी ॥ १३४ ॥
पूतीकरञ्जशम्याकचन्द्रलेखासहाचरम्।
सौभाञ्जनकनिम्बत्वग्गिञ्जरं च पलांशकम् ॥ १३५ ॥

पञ्चाशत्पलसंमितं यवानां चाढकद्वयम्।
पचेदष्टगुणे तोये यवस्वेदेऽवतारयेत् ॥ १३६ ॥
पूते क्षिपेत् समस्थे च तत्र जीर्णगुडात् तुलाम्।
तैलाज्यधात्रीरसतः प्रस्थं प्रस्थं ततः पुनः ॥ १३७ ॥
अधिश्रयेन्मृदावग्नौ दर्वीलिप्तेऽवतार्य्य च।
शीते प्रस्थद्वयं क्षौद्रात् पिप्पलीकुडवं क्षिपेत् ॥१३८॥
चूर्णीकृतं त्रिजातात्च त्रिफलं निक्षनेत्ततः।
धान्ये पुराणकुम्भस्थं मासं खादेच्च पूर्ववत् ॥१३९॥
रसायन वशिष्ठोक्तमेतत् पूर्वगुणाधिकम्।
स्वस्थानां निष्परीहार सर्वर्तुषु च शस्यते ॥ १४० ॥
पालिकं सैन्धवं शुण्ठी द्वे च सौवर्चलात् पले।
कुडवांशानि हृच्चाम्लं दाडिमं पत्रमार्जकम् ॥१४१॥
एकैकां मरिचाजाज्योर्धान्यकाद् द्वे चतुर्थिके।
शर्करायाः पलान्यत्र दश द्वे च प्रदापयेत् ॥ १४२ ॥
कृत्वा चूर्णमतो मात्रामन्नपानेषु दापयेत्।
रुच्यं तद्दीपनं बल्यं पार्श्वार्त्तिश्वासकासजित् ॥१४३॥
एकां षोडशिकां धान्याद् द्वे द्वे वाऽजाजिदीप्यकात्।
ताभ्यां दाडिमहृच्चाम्लैर्द्विद्विसौवर्चलात् पलम् ॥१४४॥
शुण्ठ्याः कर्षं दधित्थस्य मध्यात् पञ्च पलानि च।
तच्चूर्णं षोडशपलैः शर्करायाः विमिश्रयेत् ॥ १४५ ॥
खाण्डवोऽयं प्रदेयः स्यादन्नपानेषु पूर्ववत्।
विधिश्च यक्ष्मविहितो यथावस्थं च ते हितः ॥ १४७ ॥
निहृत्ते क्षतदोषे तु कफे हृद्ये उरः शिरः।
दाह्यते कासिनी यस्य स धूमानापिबेदिमान् ॥१४७॥
हिमेदादिबलापलाशष्टीकल्कैः क्षौमे सुभाविते।
वर्त्तिं कृत्वा पिबेद्धूमं जीवनीयघृतानुपः ॥ १४८ ॥

मनःशिलापलाशाजमन्थात्वक्क्षीरीनागरैः ।
लङ्घनेष्वनुपानं तु शर्करेक्षुगुडोदकम् ॥ १४८ ॥
पिष्ट्वा मनःशिलां तुल्यामार्द्रया वटशृङ्गया ।
ससर्पिष्कं पिबेद्धूमं तित्तिरिप्रतिभोजनम् ॥ १५० ॥
क्षयजे हृद्ग्रहे पूर्वं कुर्य्यादग्नेश्च वर्द्धनम् ।
बहुदोषाय सस्नेहं मृदु दद्याद्विरेचनम् ॥ १५१ ॥
शम्याकेन त्रिवृतया मृद्वीकारसयुक्तया ।
तिल्वकस्य कषायेण विदारीक्षुरसेन च ॥ १५२ ॥
सर्पिः सिद्धं पिबेद्युक्त्या क्षीणदेहो विशोधनम् ।
पित्ते कफे धातुषु च क्षीणेषु क्षयकासवान् ॥ १५३ ॥
घृतं कर्कटकीक्षीरद्विबलासाधितं पिबेत् ।
विदारीभिः कदम्बैर्वा तालशस्यैश्च साधितम् ॥१५४॥
घृतं पयश्च मूत्रस्य वैवर्ण्ये कृच्छ्रनिर्गमे ।
शूने सवेदने मेढ्रे पायौ मन्थोरुवङ्क्षणे ॥ १५५ ॥
घृतमण्डेन लघुनाऽनुवास्यो मिश्रकेण वा ।
जाङ्गलैः प्रतिभुक्तस्य वर्त्तकाद्या विलेशयाः ॥१५६॥
क्रमशः प्रसहास्तद्वद्योज्याः पिशितभोजिनः ।
औष्ण्यात्सरत्वभावाच्च स्रोतोभ्यश्चावयन्ति ते ॥१५७॥
कफं शुद्धेश्च तैः पुष्टिं कुर्य्यात् सम्यग् वहन् रसः ।
पक्वविकङ्कफलाभार्द्रीदशमूलैः सचित्रकैः ॥ १५८ ॥
कुलत्थपिप्पलीमूलपाठार्कालयवैर्जले ।
घृतैर्नागरदुस्पर्शापिप्पलीशठिपौष्करैः ॥ १५९ ॥
पिष्टैः कर्कटशृङ्ग्या च समैः सर्पिर्विपाचयेत् ।
सिद्धेऽस्मिंश्चूर्णितौ क्षारौ द्वौ पञ्चलवणानि च ॥१६०॥
दत्त्वा युक्त्या पिबेन्मात्रां क्षयकासनिपीडितः ।
कासमर्दाभयामुस्तापाठाकट्फलनागरैः ॥ १६१ ॥

पिप्पल्या कटुरोहिण्या काश्मर्य्या स्वरसेन च।
अक्षमात्रैर्घृतप्रस्थं क्षीरद्राक्षारसाढके ॥ १६२ ॥
पचेच्छोषज्वरप्लीहसर्वकासहरं शिवम्।
वृषव्याघ्रीगुडूचीना पत्रमूलफलाङ्कुरान् ॥ १६३ ॥
रसकल्कैर्घृतं पक्वं हन्ति कासज्वरारुचीः।
द्विगुणे दाडिमरसे सिद्धं वा व्योषमयुतम् ॥ १६४ ॥
पिबेदुपरिभुक्तस्य यवक्षारघृतं नरः।
पिप्पलीगुडसिद्धं वा क्षागक्षीरयुतं घृतम् ॥१६५॥
एतान्यग्निविवृद्ध्यर्थं सर्पींषि क्षयकासिनाम्।
सुदोषबद्धः कण्ठोरःस्रोतसाञ्च विशुद्धये ॥ १६६ ॥
प्रस्थोन्मिते यवक्वाथे विंशतिर्विजयाः पचेत्।
स्विन्ना मृदित्वा तास्तस्मिन् पुराणात् षट्पलं गुडात् १६७
पिप्पल्या द्विपलं कर्षं मनोह्वाया रसाञ्जनात्।
दत्त्वार्द्धाक्षं पचेद्भूयः स लेहः श्वासकासनुत् ॥ १६८ ॥
श्वासविधां सूचयो दग्धाः सघृतक्षौद्रशर्कराः।
श्वासकासहरा वह्निपादौ वा मधुसर्पिषा ॥ १६९ ॥
एरण्डपक्वक्षारं वा व्योषतैलगुडान्वितम्।
लेहयेत् क्षारमेवं वा सुरसैरण्डपत्रजम् ॥ १७० ॥
लिह्यात् चूर्षणचूर्णं वा पुराणगुडसर्पिषा।
पद्मकं त्रिफलाव्योषं विडङ्गं देवदारु च ॥ १७१ ॥
बला रास्ना च तच्चूर्णं समस्तं समशर्करम्।
खादेन्मधुघृताभ्याञ्च लिह्यात्कासहरं परम् ॥ १७२ ॥
तद्वन्मरिचचूर्णं वा सघृतक्षौद्रशर्करम्।
पथ्यागुडौषधनगुडैर्गुटिका धारयेन्मुखे ॥ १७३ ॥
सर्वेषु श्वासकासेषु केवलं वा बिभीतकम्।
पत्रवल्कं च तद्भृष्टं तिलकस्य सशर्करम् ॥ १७४ ॥

पेया वोल्लारिका छर्दिष्टट्कासामातिसारनुत्।
कण्टकारीरसे सिद्धो मुद्गयूष सुसंस्कृतः।
सगौरामलकः साम्ल. सर्वकासभिषग्जितम् ॥ १७५ ॥
वातघ्नौषधनिःक्काथे क्षीरं यूषान् रसानपि।
वैष्किरान् प्रातुदान् वैलान् दापयेत् क्षयकासिने ॥१७६॥
क्षतकासे च ये धूमाः सानुपाना निदर्शिताः।
क्षयकासेऽपि ते योज्या वक्ष्यन्ते यच्च यक्ष्मणि ॥ १७७ ॥
हंहणं दीपनं चाग्नेः स्रोतसां च विशोधनम्।
व्यत्यासात् क्षयकासिभ्यो बल्यं सर्वं प्रशस्यते ॥ १७८ ॥
सन्निपातोद्भवो घोरः क्षयकासो यतस्ततः।
यथा दोषबलं तस्य सन्निपातहितं हितम् ॥ १७९ ॥

चतुर्थोऽध्यायः।

अथातः श्वासहिक्माचिकित्सितं व्याख्यास्यामः ॥
श्वासहिक्मा यतस्तुल्यहेत्वाद्याः साधनं ततः।
तुल्यमेव तदार्त्तं च पूर्वं स्नेहैरुपाचरेत् ॥ १ ॥
स्निग्धैर्लवणतैलाक्तं तैः स्वेदैः ग्रथितः कफः।
सुलीनोऽपि विलीनोऽस्य कोष्ठं प्राप्तः सुनिर्हरः ॥ २ ॥
स्रोतसां स्यान्मृदुत्वं च मारुतस्यानुलोमता।
स्निग्धं च भोजयेदन्नं स्निग्धमानूपजै रसैः ॥ ३ ॥
दध्युत्तरेण वा दद्यात् ततोऽस्मै वमनं मृदु।
विशेषात्कासवमथुर्हृद्यहस्यरसादिने ॥ ४ ॥
पिप्पलीसैन्धवक्षौद्रयुक्तं वाताविरोधि यत्।
निर्हृते सुखमाप्नोति सकफे दुष्टविग्रहे ॥ ५ ॥
स्रोतःसु च विशुद्धेषु चरत्यविहतोऽनिलः।

ध्मानोदावर्त्ततमके मातुलिङ्गाम्लवेतसैः ॥ ६ ॥
हिङ्गुपीलुविडैर्युक्तमन्नं स्यादनुलोमनम् ।
ससैन्धवं फलाम्लं वा कोष्णं दद्याद्विरेचनम् ॥ ७ ॥
एते हि कफसंरुद्धगतिप्राणप्रकोपजाः ।
तस्मात्तन्मार्गशुद्ध्यर्थमूर्द्ध्वाधःशोधनं हितम् ॥ ८ ॥
उदीर्य्यते भृशतरं मार्गरोधाद्दृढज्वलम् ।
यथानिलस्तथा तस्य मार्गमस्माद्विशोधयेत् ॥ ९ ॥
अशान्तौ कृतसंशुद्धेर्धूमैर्लीनं मलं हरेत् ।
हरिद्रापत्तमेरण्डमूलं द्राक्षां मनःशिलाम् ॥ १० ॥
सदेवदार्वलं मांसीं पिष्ट्वा वर्त्तिं प्रकल्पयेत् ।
तां घृताक्तां पिबेद्धूमं यवान् वा घृतसंयुतान् ॥ ११ ॥
मधूच्छिष्टं सर्जरसं घृतं वा गुरु वागुरु ।
चन्दनं वा तथा शृङ्गबालान् रास्नाथवा गवाम् ॥ १२ ॥
ऋक्षगोधाकुरङ्गैणचर्मशृङ्गखुराणि वा ।
गुग्गुलुं वा मनोह्वां वा शालनिर्य्यासमेव वा ॥ १३ ॥
शल्लकीं गुग्गुलुं लोहं पद्मकं वा घृतप्लुतम् ।
अवश्यं स्वेदनीयानामस्वेद्यानामपि क्षणम् ॥ १४ ॥
स्वेदयेत्समिताक्षीरसुखोष्णस्नेहसेचनैः ।
उत्कारिकोपनाहैश्च स्वेदाध्यायोक्तभेषजैः ॥ १५ ॥
उरःकण्ठं च मृदुभिः सामे त्वामविधिं चरेत् ।
अतियोगोद्धतं वातं दृष्ट्वा पवननाशनैः ॥ १६ ॥
स्निग्धैः रसाद्यैर्नात्युष्णैरभ्यङ्गैश्च शमं नयेत् ।
अनुत्क्लिष्टकफास्त्विन्नदुर्बलाना हि शोधनात् ॥ १७ ॥
वायुर्लब्धास्पदो मर्म सशोथाशु हरेदसून् ।
कषायलेहस्नेहाद्यैस्तेषां संशमयेदतः ॥ १८ ॥
क्षीणक्षतातिसाराम्लपित्तदाहानुबन्धजान् ।

मधुरस्निग्धशीतान्नैर्हिध्माश्वासानुपाचरेत् ॥ १९ ॥
कुलत्थदशमूलानां क्वाथे स्युर्जाङ्गला रसाः ।
यूषाश्च शिग्रुवार्त्ताककासघ्नवृषमूलकैः ॥ २० ॥
पल्लवैर्निम्बकुलकबृहतीमातुलिङ्गजैः ।
व्याघ्रीदुरालभाभृङ्गीविल्वमध्यत्रिकण्टकैः ॥ २१ ॥
पेया च चित्रकाजाजीभृङ्गीसौवर्चलैः कृता ।
दशमूलेन वा कासश्वासहिध्मारुजापहा ॥ २२ ॥
दशमूलशठीरास्नाभार्ङ्गीविल्वर्द्धिपुष्करैः ॥ २३ ॥
कुलीरशृङ्गीचपलातामलक्यमृतौषधैः ।
पिबेत् कषायं जीर्णेऽस्मिन् पेयां तैरेव साधिताम् ॥२४॥
शालीषष्टिकगोधूमयवमुद्गकुलत्थभुक् ।
कासबृहद्ग्रहपार्श्वार्त्तिहिध्माश्वासप्रशान्तये ॥ २५ ॥
सक्तून् वार्काङ्कुरक्षीरभावितानां समाक्षिकान् ।
यवानां दशमूलादि निःक्वाथलुलितान् पिबेत् ॥ २६ ॥
अन्ने च योजयेत् क्षार हिङ्ग्वाज्यविडदाडिमान् ।
सपौष्करशठीव्योषमातुलिङ्गाम्लवेतसान् ॥ २७ ॥
दशमूलस्य वा क्वाथमथवा देवदारुणः ।
पिबेद्वा वारुणीमण्ड हिध्माश्वासी पिपासितः ॥ २८ ॥
पिप्पलीपिप्पलीमूलपथ्याजन्तुघ्नचित्रकैः ।
कल्कितैर्लेपिते रूढ़े निक्षिपेद् घृतभाजने ॥ २९ ॥
तक्र मासस्थित तद्धि दीपन श्वासकासजित् ।
पाठां मधुरसा दारुसरल निशि संस्थितम् ॥ ३० ॥
सुरामण्डेऽल्पलवण पिबेत् प्रसृतिसम्मितम् ।
भार्ङ्गीशुण्ठ्यौ सुखाम्भोभिः क्षारं वा मरिचान्वितम् ॥३१॥
स्वक्वाथपिष्टां लुलितां वाष्पिकां पाययेत वा ।
स्वरसः सप्तपर्णस्य पुष्पाणां वा शिरीषतः ॥ ३२ ॥

हिक्माश्वासे मधुकणायुक्तः पित्तकफानुगे।
शुल्कारिकातुगाक्षणामधूलीघृतनागरैः ॥ ३३ ॥
पित्तानुबन्धे योक्तव्या पवने त्वनुबन्धिनि।
श्वाविच्छशामिषकणाघृतशल्यकशोणितैः ॥ ३४ ॥
पिप्पलीमूलमधुकगुडगोऽश्वशृङ्गद्रसान्।
हिक्माभिष्यन्दकासघ्नान् लिह्यान्मधुघृतान्वितान् ॥ ३५ ॥
गोगजाश्ववराहोष्ट्रखरमेषाजविड्रसम्।
समध्वेकैकशो लिह्याद् बहुश्लेष्माथवा पिबेत् ॥ ३६ ॥
चतुष्पाच्चर्मरोमास्थिखुरशृङ्गोद्भवां मषीम्।
तथैव वाजिगन्धाया लिह्यात् श्वासी कफोल्वणः ॥ ३७ ॥
शठीपुष्करधात्रीवां पौष्करं वा कफान्वितम्।
गैरिकाञ्जनकृष्णां वा स्वरसं वा कपित्थजम् ॥ ३८ ॥
रसेन वा कपित्थस्य धात्रीसैन्धवपिप्पलीः।
घृतक्षौद्रेण वा पथ्याविडङ्गोषणपिप्पलीः ॥ ३९ ॥
कोलमाञ्जामलद्राक्षापिप्पलीनागराणि वा।
गुडतैलनिशाद्राक्षाकणाराम्लोषणानि वा ॥ ४० ॥
पिबेद्रसाम्बु मद्यानि लेहौषधरजांसि वा।
जीवन्तीमुस्तसुरसत्वगेलाद्वयपौष्करम् ॥ ४१ ॥
चण्डातामलकीलोहभार्ङ्गीनागरबालकम्।
कर्कटाख्या शठी कृष्णा नागकेसरचोरकम् ॥ ४२ ॥
उपयुक्तं यथाकामं चूर्णं द्विगुणशर्करम्।
पार्श्वरुग्ज्वरकासघ्नं हिक्माश्वासहरं परम् ॥ ४३ ॥
शठी तामलकी भार्ङ्गी चण्डाबालकपौष्करम्।
शर्कराष्टगुणं चूर्णं हिक्माश्वासहरं परम् ॥ ४४ ॥
तुल्यं गुडं नागरं च भक्षयेन्नावयेत वा।
शणस्य पलाण्डोर्वा मूलं गृञ्जनकस्य वा ॥ ४५ ॥

चन्दनाद्वा रसं दद्यात्सारीचीरेण नावनम्।
स्तन्येन मक्षिकाविष्ठामलक्तकरसेन वा ॥ ४६ ॥
कषायसौवर्चलक्षारवयस्थाहिङ्गुचोरकैः।
सकायस्थैर्घृतं मस्तु दशमूलरसे पचेत् ॥ ४७ ॥
तत्पिबेज्जीवनीयैर्वा लिह्याल्लमधु साधितम्।
तेजोवत्यभया कुष्ठं पिप्पली कटुरोहिणी ॥ ४८ ॥
भूतिकं पौष्करं मूलं पलाशश्चित्रकः शठी।
पटुद्वयं तामलकी जीवन्ती विल्वपेशिका ॥ ४९ ॥
यवाषात्रं च तालीस कर्षांशैस्तैर्विपाचयेत्।
हिङ्गुपादैर्घृतप्रस्थं पीतमाशु निहन्ति तत् ॥ ५० ॥
शाखानिलार्शोग्रहणीहिध्माहृत्पार्श्ववेदनाः।
अर्द्धांशेन पिबेत् सर्पिः क्षारेण पटुनाऽथवा ॥ ५१ ॥
धान्वन्तरं वृषघृतं दाधिकं हपुषादि वा।
शीताम्बुसेकः सहसा त्रासविक्षेपभीशुचः ॥ ५२ ॥
हर्षेर्ष्याच्छ्वाससंरोधा हितं कीटैश्च दंशनम्।
यत्किञ्चित् कफवातघ्नमुष्णं वातानुलोमनम्।
तत्सेव्यं प्रायशो यच्च सुतरां मारुतापहम् ॥ ५३ ॥
सर्वेषां बृंहणे ह्यल्पः शक्यश्च प्रायशो भवेत्।
बात्यर्थं शमनेऽप्यल्पो मृदोश्शक्यश्च कर्षणे ॥ ५४ ॥
शमनैर्बृंहणैश्चातो भूयिष्ठं तानुपाचरेत्।
कासश्वासहृदयच्छर्दिहिध्माश्वान्योऽन्यभेषजैः ॥ ५५ ॥

पञ्चमोऽध्यायः।

अथातो राजयक्ष्मादिचिकित्सितं व्याख्यास्यामः ॥
बलिनो बहुदोषस्य स्निग्धस्विन्नस्य शोधनम्।
ऊर्ध्वाधो यक्ष्मिणः कुर्य्यात् सस्नेह यत्र कर्षणम् ॥ १ ॥

पयसा फलयुक्तेन मधुरेण रसेन वा।
सर्पिष्मत्या यवाग्वा वा वमनद्रव्यसिद्धया ॥ २ ॥
वमेत्, विरेचन दद्यात् त्रिवृच्छ्यामान्पदुमान्।
शर्करामधुसर्पिर्भिः पयसा तर्पणेन वा ॥ ३ ॥
द्राक्षाविदारीकाश्मर्य्यमांसानां वा रसैर्युतान्।
शुद्धकोष्ठस्य युञ्जीत विधिं ह्रहणदीपनम् ॥ ४ ॥
हृद्यानि चान्नपानानि वातघ्नानि लघूनि च।
शालिषष्टिकगोधूमयवमुद्गं समोषितम् ॥ ५ ॥
आजं क्षीरं घृतं मांसं क्रव्यान्मांसं च शोषजित् ॥
काकोलूकह्रकद्दीपिगवाश्वखनकुलोरगम् ॥ ६ ॥
गव्यभासखरोष्ट्रं च हितं क्षुद्योपसंहितम्।
ज्ञानं जुगुप्सितं तद्धि क्रर्दिषे न बलीजसे ॥ ७ ॥
मृगाद्याः पित्तकफयोः पवने प्रसहादयः।
वेसवारीकृताः पथ्या रसादिषु च कल्पिताः ॥ ८ ॥
भृष्टा सर्षपतैलेन सर्पिषा वा यथायथम्।
रसिका मृदवः स्निग्धाः मृदुद्रव्याभिसंस्कृताः ॥ ९ ॥
हितामौलककौलत्थास्तद्वद् यूषाश्च साधिताः।
सर्पिष्मल्लोकं सयवं सकुलत्थं सनागरम् ॥ १० ॥
सदाडिमं सामलकं स्निग्धमाजं रसं पिबेत्।
तेन षड्विनिवर्त्तन्ते विकाराः पीनसादयः ॥ ११ ॥
पिबेच्च सुतरां मद्यं जीर्णं स्रोतो विशोधनम्।
पित्तादिषु विशेषेण मध्वरिष्टासवारुणीः ॥ १२ ॥
सिद्धं वा पञ्चमूलेन तामलक्याथवा जलम्।
पर्णिनीभिश्चतसृभिर्धान्यनागरकेण वा ॥ १३ ॥
कल्पयेच्चानुकूलोऽस्य तेनान्नं शुचि यत्नवान्।
दशमूलेन पयसा सिद्धं मांसरसेन वा ॥ १४ ॥

बलागर्भं घृतं योज्यं क्रव्यान्मांसरसेन वा ।
सक्षौद्रं पयसा सिद्धं सर्पिर्दशगुणेन वा ॥ १५ ॥
जीवन्ती मधुक द्राक्षां फलानि कुटजस्य च ।
पुष्करार्द्धं शठीं कृष्णां व्याघ्रीं गोक्षुरकं बलाम् ॥ १६ ॥
नीलोत्पलं तामलकीं त्रायमाणां दुरालभाम् ।
कल्कीकृत्य घृतं पक्वं रोगराजहरं परम् ॥ १७ ॥
घृतं खर्जूरमृद्वीकामधुकैः सपरूषकैः ।
सपिप्पलीकं वैस्वर्य्यकासश्वासज्वरापहम् ॥ १८ ॥
दशमूलशृतात् क्षीरात् सर्पिर्यदुदियाद्भवम् ।
सपिप्पलीकं सक्षौद्रं तत्परं स्वरबोधनम् ॥ १९ ॥
शिरःपार्श्वांसशूलघ्नं कासश्वासज्वरापहम् ।
पञ्चभिः पञ्चमूलैर्वा शृताद्यदुदियाद् घृतम् ॥ २० ॥
पञ्चानां पञ्चमूलानां रसे क्षीरचतुर्गुणे ।
सिद्धं सर्पिर्जयत्येतद् यक्ष्मणः सप्तकं बलम् ॥ २१ ॥
पञ्चकोलयवक्षारषट्पलेन पचेद् घृतम् ।
प्रस्थोन्मितं तुल्यपयः स्रोतसां तद्विशोधनम् ॥ २२ ॥
गुल्मज्वरोदरप्लीहयकृत्पाण्डुपीनसान् ।
श्वासकासाग्निसदनक्षयपूर्द्धानिलान् जयेत् ॥ २३ ॥
राज्ञावलागोक्षुरकक्षिरावर्षाभूवारिणि ।
जीवन्ती पिप्पलीगर्भं सक्षौद्रं शोषजिद् घृतम् ॥ २४ ॥
अश्वगन्धात् शृतात् क्षीराद् घृतं च ससितापयः ।
साधारणामिषतुलां तोयद्रोणद्वये पचेत् ॥ २५ ॥
तेनाष्टभागशेषेण जीवनीयैः पलोन्मितैः ।
साधयेत् सर्पिषः प्रस्थं वातपित्तामयापहम् ॥ २६ ॥
मांसमर्पिरिदं पीतं युक्तं मांसरसेन वा ।
कासश्वासस्वरभ्रंशशोषहृत् पार्श्वशूलजित् ॥ २७ ॥

एलाजमोदात्रिफलासौराष्ट्रीव्योषचित्रकान्।
सारानरिष्टगायत्रीशालबीजकसम्भवान् ॥ २८ ॥
भल्लातकं विडङ्गं च पृथगष्टपलोन्मितम्।
सलिले षोडशगुणे षोडशांशस्थिते पचेत् ॥ २९ ॥
पुनस्तेन घृतप्रस्थ मिश्रे चास्मिन् पलानि षट्।
तुगाक्षीर्य्याः क्षिपेत् त्रिंशत् सिताया द्विगुणं मधु ॥३०॥
घृतं त्रिजातात् त्रिपलं ततो लोढं खजाहतम्।
पयोऽनुपानं तत्प्राज्ञे रसायनमयल्क्षणम् ॥ ३१ ॥
मेध्यं चक्षुष्यमायुष्यं दीपनं हन्ति चाचिरात्।
मेहगुल्मक्षयव्याधिपाण्डुरोगभगन्दरान् ॥ ३२ ॥
ये च सर्पिर्गुडाः प्रोक्ताः क्षते योज्याः क्षयेऽपि ते।
त्वगेलापिप्पलीक्षीरीशर्कराद्यिगुणाः क्रमात् ॥ ३३ ॥
चूर्णिता भक्षिताः क्षौद्रसर्पिषा च बले हिताः।
स्वर्य्याः कासक्षयश्वासपार्श्वरुक्कफनाशनाः ॥ ३४ ॥
विशेषात् स्वरसादेऽस्य नस्यधूमादि योजयेत्।
तत्रापि वातजे कोष्णं पिबेदौत्तरभक्तिकम् ॥ ३५ ॥
कासमर्दकवार्त्ताकीमार्कवस्वरसैर्घृतम्।
साधितं कासजित् स्वर्य्यं सिद्धमार्त्तगलेन वा ॥ ३६ ॥
बदरीपक्वकल्कं वा घृतभृष्टं ससैन्धवम्।
तैलं वा मधुकं द्राक्षापिप्पलीक्षुमिनुत्पलैः ॥ ३७ ॥
हंसपाद्याश्च मूलेन पक्वं नस्तो निषेचयेत्।
सुखोदकानुपानं च सर्पिष्कं च गुडौदनम् ॥ ३८ ॥
अश्नीयात् पायसं चैवं स्निग्धं स्वेदं नियोजयेत्।
पित्तोल्बणे पिबेत् सर्पिः शृतशीतपयोऽनुपः ॥ ३९ ॥
क्षीरेक्षवाङ्कुरक्वाथकल्कसिद्धं समाक्षिकम्।
अश्नीयाच्च ससर्पिष्कं यष्टीधूमकपायसम् ॥ ४० ॥

बलाविदारिगन्धाभ्यां विदार्य्या मधुकेन च।
सिद्धं सलवणं सर्पिर्नस्यं स्वर्य्यमनुत्तमम्॥ ४१॥
प्रपौण्डरीकं मधुकं पिप्पली बृहती बला।
साधितं क्षीरसर्पिश्च तत् स्वर्य्यं नावनं परम्॥ ४२॥
लिह्यान्मधुरकाणां च चूर्णं मधुघृताप्लुतम्।
पिबेत् कटूनि मूत्रेण कफजे रूक्षभोजनः॥ ४३॥
कटफलामलकव्योषं लिह्यात् तैलमधुप्लुतम्।
व्योषक्षाराग्निचविकाभार्ङ्गीं पथ्यामधूनि वा॥ ४४॥
यवैर्यवागूं यमके कणाधात्रीकृतां पिबेत्।
भुक्ताद्यात् पिप्पलीं शुण्ठीं तीक्ष्णं वा वमनं भजेत्॥४५॥
शर्कराक्षौद्रमिश्राणि घृतानि मधुरैः सह।
पिबेत् पयांसि यस्योच्चैर्वदतोऽभिहतः स्वरः॥ ४६॥
विचित्रमन्त्रमरुचौ हितैरुपहितं हितम्।
बहिरन्तर्मृजाचित्तनिर्वाणं हृद्यमौषधम्॥ ४७॥
द्वौ कालौ दन्तधवनं भक्षयेन्मुखधावनैः।
कषायैः क्षालयेदास्यं धूमं प्रायोगिकं पिबेत्॥ ४८॥
तालीसचूर्णवटकाः सकर्पूरसितोत्पलाः।
प्रशाङ्किरणाख्याश्च भक्ष्या रुचिकराः शुभम्॥ ४९॥
वातादरोचके तत्र पिबेच्चूर्णं प्रसन्नया।
हरेणुकृष्णाकृमिजिद् द्राक्षासैन्धवनागरात्॥ ५०॥
एलाभार्ङ्गीयवक्षारहिङ्गुयुक्ताघृतेन वा।
छर्दयेद्वा वचाभीभिः पित्तात्तु गुडवारिभिः॥ ५१॥
लिह्याद्वा शर्करासर्पिर्लवणोत्तममाक्षिकम्।
कफादमेत्रिस्वजलैर्दीप्यकारग्वधोदकम्॥ ५२॥
पानं समधुरिष्टाया तीक्ष्णैः समधुमाधवाः।
पिबेच्चूर्णं च पूर्वोक्तं हरेत्क्याद्युष्णवारिणा॥ ५३॥

एलात्वग्नामकुसुमतीक्ष्णकृष्णामहौषधम्।
भागद्वयं क्रमाच्चूर्णं निहन्ति समशर्करम् ॥ ५४ ॥
प्रसेकारुचिहृत्पार्श्वकासश्वासगलामयान्।
ह्रवानोतिन्तिड़ीकाम्लवेतसौषधदाड़िमम् ॥ ५५ ॥
क्षत्वा कोल च कर्षांश सितायाश्च चतुष्पलम्।
धान्यसौवर्चलाजाजीवराङ्गं चार्द्धकार्षिकम् ॥ ५६ ॥
पिप्पलीना शतं चैक द्वे शते मरिचस्य च।
चूर्णमेतत् पर रुच्यं ग्राहि हृद्यं हिनस्ति च ॥ ५७ ॥
विबन्धकासहृत्पार्श्वप्लीहार्शोग्रहणीगदान्।
तालीसपत्रं मरिचं नागरं पिप्पली कणा ॥ ५८ ॥
यथोत्तरं भागवृद्धया त्वगेले चार्द्धभागिके।
तद्द्रव्यं दीपन चूर्णं कणाष्टगुणशर्करम् ॥ ५९ ॥
कासश्वासरुचिच्छर्दिप्लीहहृत्पार्श्वशूलनुत्।
पाण्डुज्वरातिसारघ्नं मूढवातानुलोमनम् ॥ ६० ॥
अर्कामृताक्षीरजले शर्वरीमुषितैर्यवैः।
प्रसेके कल्पितान् सक्तून् भक्ष्यांश्चाद्याद् बली वमेत् ॥ ६१ ॥
कटुतिक्तैस्तथा शूल्य भक्षयेज्जाङ्गलं पलम्।
शुष्कांश्च भक्ष्यान् सुलघूंश्चणकादिरसानुपः ॥ ६२ ॥
श्लेष्मणोऽतिप्रसेकेन वायुः श्लेष्माणमस्यति।
कफप्रसेकं तं विद्वान् स्निग्धोष्णैरेव निर्जयेत् ॥ ६३ ॥
पीनसेऽपि क्रममिमं वमथौ च प्रयोजयेत्।
विशेषात् पीनसेऽभ्यङ्गान् स्नेहस्वेदांश्च शीलयेत् ॥ ६४ ॥
स्निग्धानुत्कारिका पिण्डैः शिरःपार्श्वगलादिषु।
लवणाम्लकटूष्णांश्च रसान् स्नेहोपसंहितान् ॥ ६५ ॥
शिरोऽक्षपार्श्वशूलेषु यथा दोषविधिं चरेत्।
शीतकानुपपिण्डितैरुपनाहाः सुसंस्कृताः ॥ ६६ ॥

तवेष्टाः सचतुःस्नेहा दोषसंसर्ग इष्यते।
प्रलेपो नतयष्ट्याह्वमतराह्वाकुष्ठचन्दनैः॥ ६७॥
बलाराम्नातिलैस्तद्वत्सर्पिर्मधुकोत्पलैः।
पुनर्नवा क्षणगन्धा बला वीरा विदारीभिः॥ ६८॥
नावनं धूमपानानि स्नेहाश्चोत्तरभक्तिकाः।
तैलान्यभ्यङ्गयोगीनि वस्तिकर्म तथा परम्॥ ६९॥
शृङ्गाद्यैर्वा यथादोषं दुष्टमेषां हरेदसृक्।
प्रदेहैः सृष्टतैः श्रेष्ठैः पद्मकोशीरचन्दनैः॥ ७०॥
दूर्वामधुकमञ्जिष्ठाकेसरैर्वा घृतप्लुतैः।
वटादिसिद्धतैलेन शतधौतेन सर्पिषा॥ ७१॥
अभ्यङ्गः पयसा सेकः शस्तश्च मधुकाम्बुना।
प्रादेशोपहताग्नित्वात् सपिच्छमतिसार्यते॥ ७२॥
तस्यातिसारग्रहणीविहितं हितमौषधम्।
पुरीषं यत्नतो रक्षेच्छुष्यतो राजयक्ष्मणः॥ ७३॥
सर्वधातुक्षयार्त्तस्य बलं तस्य हि विड्बलम्।
मांसमेवाश्नतो मुक्त्वा माहीकं पिबतोऽनु च॥ ७४॥
अविधारितवेगस्य यक्ष्मा न लभतेऽन्तरम्।
सुरां समण्डां माहीकमरिष्टान् सीधुमाधवान्॥ ७५॥
यथार्हमनुपानार्थं पिबेन्मांसानि भक्षयन्।
स्रोतोविबन्धमोक्षार्थं बलौजःपुष्टये च तत्॥ ७६॥
स्नेहक्षीराम्बुकोष्ठेषु स्नेहाक्तमवगाहयेत्।
उत्तीर्णमिश्यकैः स्नेहैर्भूयोऽभ्यक्तं सुखैः करैः॥ ७७॥
शूद्रीयात् सुखमासीन सुखं चोद्वर्त्तयेत् परम्।
जीवन्तीं शतवीर्यां च विकसां सपुनर्नवाम्॥ ७८॥
अश्वगन्धामपामार्गं तर्कारीं मधुकं बलाम्।
विदारीं सर्षपान् कुष्ठं तण्डुलानतसीफलम्॥ ७९॥

माषांस्तिलांश्च किण्वं च सर्वमेकत्र चूर्णयेत्।
यवचूर्णं त्रिगुणितं दत्त्वा युक्तं समाहिकम् ॥ ८० ॥
एतदुद्वर्त्तनं कार्यं पुष्टिवर्णबलप्रदम्।
गौरसर्षपकल्केन स्नानीयौषधिभिश्च सः ॥ ८१ ॥
स्नानाष्टतुसुखैस्तोयैर्जीवनीयोपसाधितैः।
गन्धमाल्यादिकं भूषामलक्ष्मीनाशनीं भजेत् ॥ ८२ ॥
सुहृदां दर्शनं गीतवादित्रोत्सवसंश्रुतिः।
वस्त्रयः क्षीरसर्पींषि मद्यमांससुशीलता।
दैवव्यपाश्रयं तत्तदथर्वोक्तं च पूजितम् ॥ ८३ ॥

षष्ठोऽध्यायः।

अथातश्छर्दिहृद्रोगतृष्णाचिकित्सितं व्याख्यास्यामः ॥
आमाशयोत्क्लेशभवाः प्रायश्छर्दयो हितं ततः।
लङ्घनं प्राग्वते वायोर्वमनं तत्र योजयेत् ॥ १ ॥
बलिनो बहुदोषस्य वमतः प्रतत बहु।
ततो विरेकं क्रमशो हृद्यं मद्यैः फलाम्बुभिः ॥ २ ॥
क्षीरैर्वा सह सक्षुद्रं गतं दोषं नयत्यधः।
शमनं चौषध रूक्षदुर्बलस्य तदेव तु ॥ ३ ॥
परिशुष्कं प्रिय सात्म्यमन्नं लघु च शस्यते।
उपवासस्तथा यूषा रसाः काम्बलिकाः खलाः ॥ ४ ॥
शाकानि लेहभोज्यानि रागखाण्डवपानकाः।
भक्ष्याः शुष्का विचित्राश्च फलानि स्नानघर्षणम् ॥ ५ ॥
गन्धाः सुगन्धयो गन्धफलपुष्पान्नपानजाः।
भुक्तमात्रस्य सहसा मुखे शीताम्बुसेचनम् ॥ ६ ॥
हन्ति मारुतजां छर्दिं सर्पिः पीतं ससैन्धवम्।
किञ्चिदुष्णं विशेषेण सकासहृदयग्रहान् ॥ ७ ॥

व्योषक्षिलवणाढ्यं वा सिद्धं वा दाडिमाम्बुना।
सशुण्ठीदधिधान्येन घृतं तुल्याम्बु वा पयः॥ ८॥
व्यक्तसैन्धवसर्पिर्वा फलाम्लो वैष्किरो रसः।
स्निग्धं च भोजनं शुण्ठीदधिदाडिमसाधितम्॥ ९॥
कोष्णं सलवणं चात्र हितं स्नेहविरेचनम्।
पित्तजायां विरेकार्थं द्राक्षेक्षुस्वरसैस्त्रिवृत्॥ १०॥
सर्पिर्वा तैल्वकं योज्यं वृद्धं च श्लेष्मधामगम्।
ऊर्ध्वमेव हरेत् पित्तं स्वादुतिक्तैर्विशुद्धिमान्॥ ११॥
पिबेन्मन्थं यवागूं वा लाजैः समधुशर्कराम्।
मुद्गजाङ्गलजैरद्याद् व्यञ्जनैः शालिषष्टिकम्॥ १२॥
सृष्टमृष्टलोष्टप्रभवं सुशीतं सलिलं पिबेत्।
मुन्नीक्षीरकणाधान्यैः सह वा संस्थितं निशाम्॥ १३॥
द्राक्षारसं रसं वेक्षोर्गुडूच्यम्बुपयोऽपि वा।
जम्ब्वाम्रपल्लवक्षीरवटशृङ्गावरोहजः॥ १४॥
क्वाथः क्षौद्रयुतः पीतः शीतो वा विनियच्छति।
छर्दिं ज्वरमतीसारं मूर्च्छां तृष्णां च दुर्जयाम्॥ १५॥
धात्रीरसेन वा शीतं पिबेन्मुद्गदलाम्बु वा।
कोलमज्जसितालाजामक्षिकाविट्कणाञ्जनम्॥ १६॥
लिह्यात् क्षौद्रेण पथ्यां वा द्राक्षां वा बदराणि वा।
कफजायां वमेन्निम्बकृष्णापोडितसर्षपैः॥ १७॥
युक्तेन कोष्णतोयेन दुर्बलं चोपवासयेत्।
पारग्वधादिनिर्यूहं शीतं क्षौद्रयुतं पिबेत्॥ १८॥
मन्थान्यवैर्वा बहुशः छर्दिघ्नौषधभावितैः।
कफघ्नमन्नं हृद्यं च रागाः सार्जकभूस्तृणाः॥ १९॥
लोढ मनःशिलाकृष्णामरिचं बीजपूरकात्।
स्वरसेन कपित्थाच्च सक्षौद्रेण वमिं जयेत्॥ २०॥

खादेत् कपित्थं सव्योषं मधुना वा दुरालभाम्।
अनुलोमोपचारेण याति हिध्मार्थजा शमम् ॥ २१ ॥
कृमिजाक्रमिसङ्घातैर्गगदितैश्च भिषग्जितैः।
यथास्वं परिशेषाय तत्कृतायै तथामयाः ॥ २२ ॥
छर्दिप्रसङ्गेन हि मातरिश्वा धातुक्षयात् कोपमुपैत्यवश्यम्।
कुर्यादतोऽस्मिन् वमनातियोगप्रोक्तं विधिं स्तम्भनहंहणीयम्॥२३॥
सर्पिर्गुडामांसरसा घृतानि कल्याणकक्षीरषणजीवनानि।
पयांसि पथ्योपहितानि लेहाच्छर्दिं प्रसक्तां प्रशमं नयन्ति ॥२४
छर्दिरोगे वातजे तैलं मस्तुसौवीरतक्रवत्।
पिबेत् सुखोष्णं सविडं गुल्मानाहार्त्तिजिच्च तत् ॥२५॥
तैलं च लवणैः सिद्धं समूत्राम्लं तथागुणम्।
विल्वं राम्नां यवान् कोलं देवदारुं पुनर्नवाम् ॥ २६ ॥
कुलत्थान् पञ्चमूलं च पक्त्वा तस्मिन् पचेज्जले।
तैलं तन्नावने पाने वस्तौ च विनियोजयेत् ॥ २७ ॥
गुडौदयस्थालवणकायस्थाद्विडपौष्करैः।
पथ्यया च घृतं पार्श्वहृद्रुजागुल्मजिद् घृतम् ॥ २८ ॥
सौवर्चलस्य हिपले पथ्यापञ्चाशदन्विते।
घृतस्य साधितः प्रस्थो हृद्रोगश्वासगुल्मजित् ॥ २९ ॥
पुष्कराङ्गशठीगुडौदीबीजपूरजटाभयाः।
पीताः कल्कीकृताः क्षारघृताम्लवणैर्युताः ॥ ३० ॥
विकर्त्तिकाशूलहराः क्षाराः कोष्णाश्च तद्गुणाः।
यवानीलवणक्षारवचाजाजीयवैः कृतः ॥ ३१ ॥
समतिदारुबीजाढ्यविजयागुडौपौष्करैः।
पञ्चकोलशठीपथ्यागुडबीजाढ्यपौष्करम् ॥ ३२ ॥
वारुणीकल्कितं भृष्टं यमके लवणान्वितम्।
हृत्पार्श्वयोनिशूलेषु खादेद् गुल्मोदरेषु च ॥ ३३ ॥

स्निग्धाश्चेह हिताः स्वेदाः सङ्कुतानि घृतानि च ।
लघुना पञ्चमूलेन शुण्ठ्या वा साधितं जलम् ॥ ३४ ॥
वारुणी दधिमण्डं वा धान्याम्लं वा पिबेत् क्षपि ।
सायामस्तम्भशूलामे हृदि मारुतदूषिते ॥ ३५ ॥
क्रियैषा सद्ववायामप्रमोहे तु हिता रसाः ।
स्नेहाद्यास्तित्तिरिक्रोञ्चमयूरवर्त्तककुक्कुटजाः ॥ ३६ ॥
बलातैलं सहद्रोगः पिबेद्वा सुकुमारकम् ।
यष्ट्याह्वाशतपाकं वा महास्नेहं तथोत्तमम् ॥ ३७ ॥
रास्नाजीवकजीवन्ती बलाश्वगन्धापुनर्नवैः ।
भार्ङ्गीं स्थिरां वचां व्योषैर्महास्नेहं विपाचयेत् ॥ ३८ ॥
दधिपादं तथाम्लैश्च लाभतः स निषेवितः ।
तर्पणो बृंहणो बल्यो वातहृद्रोगनाशनः ॥ ३९ ॥
दोषेऽग्नौ सद्ववायामे हृद्रोगे वातिके हितम् ।
क्षीरं दधिगुडः सर्पिरौदकानूपमामिषम् ॥ ४० ॥
एतान्येव च वर्ज्यानि हृद्रोगेषु चतुर्ष्वपि ।
शेषेषु स्तम्भजाड्यामसंयुक्तेऽपि च वातिके ॥ ४१ ॥
कफानुबन्धे तस्मिंस्तु रूक्षोष्णामाचरेत् क्रियाम् ।
पैत्ते द्राक्षेक्षुनिर्याससिताक्षौद्रपरूषकैः ॥ ४२ ॥
युक्तो विरेको हृद्यः स्यात् क्रमः शुद्धे च पित्तहा ।
क्षतपित्तज्वरोक्तं च बाह्यान्तःपरिमार्जनम् ॥ ४३ ॥
कट्वीमधूककल्कं च पिबेत्सितमधुप्लुतम् ।
श्रेयसीशर्करार्द्राद्याजीवकर्षभकोत्पलैः ॥ ४४ ॥
बलाखर्जूरकाकोलीमेदायुग्मैश्च साधितम् ।
सक्षीरं माहिषं सर्पिः पित्तहृद्रोगनाशनम् ॥ ४५ ॥
प्रपौण्डरीकमधुकविसग्रन्थिकसेरुकाः ।
सशृङ्गाटैर्बलास्थाभिः सक्षीरं विपचेद्घृतम् ॥ ४६ ॥

शीतं समधु तच्चेष्टं स्वादुवर्गकृतं च यत् ।
वस्तिं च दद्यात्सक्षौद्रं तैलं मधुकसाधितम् ॥ ४७ ॥
कफोल्बणे वमेत् स्निग्धः पित्तुमन्दवचाम्बुना ।
कुलत्थधन्वोत्थरसतीक्ष्णमद्यवाशनः ॥ ४८ ॥
पिबेच्चूर्णं वचाहिङ्गुलवणद्वयनागरान् ।
सैलायवानीकर्कणायवचारान् सुखाम्बुना ॥ ४९ ॥
फलं धान्याम्लकौलत्थयूषमूत्रासवैस्तथा ।
पुष्करास्नाभयाशुण्ठीशठीरास्नावचाकणाः ॥ ५० ॥
क्वाथ तथा भयाशुण्ठीमाद्रीपीतद्रुकट्फलात् ।
क्वाथे रौहीतकाश्वत्थखदिरोदुम्बरार्जुने ॥ ५१ ॥
सपलाशवटे क्षौद्रत्रिवृच्चूर्णान्विते कृतः ।
सुखोदकानुपानस्य लेहः कफविकारहा ॥ ५२ ॥
श्लेष्मगुल्मोदितान्यानि चारांश्च विविधान् पिबेत् ।
प्रयोजयेच्छिलाह्वं वा ब्राह्म चात्र रसायनम् ॥ ५३ ॥
तथामलकलेहं वा प्राश्य वागस्तिनिर्मितम् ।
स्याच्छूल यस्य भुक्तेऽन्ने जीर्यत्यन्ने जरां गते ॥ ५४ ॥
शाम्येत्सकृष्टक्रमिजिल्लवणद्वयतिल्वकैः ।
सदेवदार्वतिविषैश्चूर्णमुष्णाम्बुना पिबेत् ॥ ५५ ॥
यस्य जीर्णेऽधिकं स्रस्तैः स विरेच्यः फलैः पुनः ।
जीर्यत्यन्ने तथा मूलैस्तीक्ष्णैः शूले सदाधिके ॥ ५६ ॥
प्रायोऽनिलो रुद्धगतिः कुप्यत्यामाशये गतः ।
तस्यानुलोमनं कार्यं स्नुहिलङ्घनपाचनैः ॥ ५७ ॥
क्रमिघ्नमौषधं सर्वं क्रमिजे हृदयामये ।
हृच्छ्वासु वातपित्तघ्नो विधिः प्रायेण युज्यते ॥ ५८ ॥
सर्वासु शीतो बाह्यान्तस्तथा शमनशोधनम् ।
दिव्याम्बुशीतं सक्षौद्रं तद्वद्धौतं च तद्गुणम् ॥ ५९ ॥

निर्वापितं तप्तलोष्टकपालसिकतादिभिः ।
सशर्करं वा क्वथितं पञ्चमूलेन वा जलम् ॥ ६० ॥
दर्भपूर्वेण मन्थश्च प्रशस्तो लाजसक्तुभिः ।
वाट्यश्चामयवैः शीतः शर्कराम्लिकान्वितः ॥ ६१ ॥
यवागूः शालिभिस्तद्वत्कोद्रवैश्च चिरन्तनैः ।
शीतेन शीतवीर्य्येण द्रव्यैः सिद्धेन भोजनम् ॥ ६२ ॥
हिमाम्बुपरिषिक्तस्य पयसा सर्पिषा मधु ।
रसैश्चानम्लवर्गैर्जाङ्गलैर्घृतभर्जितैः ॥ ६३ ॥
मुद्गादीनां तथा यूषैर्जीवनीयरसान्वितैः ।
नस्यं क्षीरघृतं सिद्धं शीतैरिक्षोस्तथा रसः ॥ ६४ ॥
निर्वापणाश्च गण्डूषाः सूत्रस्थानोदिता हिताः ।
दाहज्वरोक्ता लेपाद्या निरोहत्वं मनोरतिः ॥ ६५ ॥
महासरिदुह्रदादीनां दर्शनस्मरणादि च ।
तृष्णाया पवनोत्थाया सगुडं दधि शस्यते ॥ ॥६६॥
रसाश्च तृष्णाः शीता विदार्य्यादिगणाम्बु वा ।
पित्तजायां सितायुक्तः पक्वोदुम्बरजो रसः ॥ ६७ ॥
तत्क्वाथो वा हिमस्तद्वत्पारिवादिगणाम्बु वा ।
तद्विधैश्च गणैः शीतकषायान् समितामधून् ॥ ६८ ॥
मधुरैरौषधैस्तद्वत् क्षीरवर्च्चैश्च कल्पितान् ।
बीजपूरकमृद्वीकावटवेतसपल्लवान् ॥ ६९ ॥
मूलानि कुशकाशानां यष्ट्याह्वं च जले घृतम् ।
ज्वरोदितं वा द्राक्षादिपञ्चसाराम्बु वा पिबेत् ॥ ७० ॥
कफोल्बणायां वमन निम्बप्रसववारिणा ।
विल्वाढकी पञ्चकोलदर्भपञ्चकसाधितम् ॥ ७१ ॥
जलं पिबेदजन्यां वा सिद्धं सक्षौद्रशर्करम् ।
सुद्रयूष च सव्योषपटोलीनिम्बपल्लवम् ॥ ७२ ॥

यवान्नं तीक्ष्णवलनस्नेहांश्च शीलयेत् ।
सर्वैरामाच्च तद्वन्नो क्रियेष्टा वमनं तथा ॥ ७३ ॥
शूषणाक्षिकारवचाफलाम्बोष्णाम्बुभक्तुभिः ।
अन्नात्ययान्नखण्डमुष्णं हिमं मद्यं च कालवित् ॥ ७४ ॥
क्षपि श्रमान्मासरसं मद्यं वा सक्षितं पिबेत् ।
आतपात्सक्षितं मद्यं यवकोलाम्बुसक्तुभिः ॥ ७५ ॥
सर्वाण्यङ्गानि लिम्पेच्च तिलपिण्याककाञ्जिकैः ।
शीतस्नानात्तु मद्याम्बु पिबेत् क्षणान् गुरूदाम्बु वा ॥७६॥
मद्यादर्द्धजलं मद्यं स्नातोऽम्ललवणैर्युतम् ।
स्नेहतीक्ष्णतरान्नित्तु स्वभावाच्छिशिरं जलम् ॥ ७७ ॥
स्नेहादुष्णाम्बु जीर्णात् तु जीर्णान्नण्ड पिपासितः ।
पिबेत् स्निग्धान्नक्षपितो हिमस्पर्द्धि गुडोदकम् ॥ ७८ ॥
गुर्वाद्यन्नेन क्षपितः पीत्वोष्णाम्बु तदुल्लिखेत् ।
क्षयजायां क्षयहितं सर्वं हंहणमौषधम् ॥ ७९ ॥
क्षतदुर्बलरूक्षाणां क्षीरं छागो रसोऽथवा ।
क्षीरं च सोर्द्ध्ववाताया क्षयकासहरैः शृतम् ॥ ८० ॥
रोगोपसर्गजाताया धान्याम्बु समिताम्बु वा ।
पाने प्रशस्ता सर्वाश्च क्रिया रोगाद्यपेक्षया ॥ ८१ ॥
क्षपयन् पूर्वामयक्षीणो न लभेत जलं यदि ।
मरणं दीर्घरोगं वा प्राप्नुयात्त्वरितं ततः ॥ ८२ ॥
सात्म्यान्नपानभैषज्यैस्तृष्णां तस्य जयेत् पुरः ।
तस्यां जितायामन्योऽपि शक्यो व्याधिश्चिकित्सितुम् ॥८३॥

सप्तमोऽध्यायः ।

अथातो मदात्ययचिकित्सितं व्याख्यास्यामः ॥
यं दोषमधिकं पश्येत् तस्यादौ प्रतिकारयेत् ।

कफस्थानानुपूर्व्या वा तुल्यदोषे मदात्यये ॥ १ ॥
पित्तमारुतपर्य्यन्तः प्रायेण हि मदात्ययः ।
क्षीणमिथ्यानि पीतेन यो व्याधिरुपजायते ॥ २ ॥
समपीतेन तेनैव स मद्येनोपशाम्यति ।
मद्यस्य विषसाट्यात् विषं तूत्कर्षवृत्तिभिः ॥ ३ ॥
तीक्ष्णादिभिर्गुणैर्योगाद्विषान्तरमपेक्षते ।
तीक्ष्णोष्णेनातिमात्रेण पीतेनाशु विदाहिना ॥ ४ ॥
मद्येनाशु रसक्लेदो विदग्धः क्षारतां गतः ।
यान् कुर्य्यात्पन्दलणोद्दज्वरान्तर्दाहविभ्रमान् ॥ ५ ॥
मद्योत्क्लिष्टेन दोषेण रुद्धः स्रोतःसु मारुतः ।
सुतीव्रा वेदना याश्च शिरस्यस्थिषु सन्धिषु ॥ ६ ॥
जीर्णाममद्यदोषस्य प्रकाङ्क्षालाघवे सति ।
यौगिकं विधिवद्युक्तं मद्यमेव निहन्ति तान् ॥ ७ ॥
क्षारो हि याति माधुर्य्यं शीघ्रमन्नोपसंहितः ।
मद्यमद्येषु च श्रेष्ठं दोषविष्यन्दनादलम् ॥ ८ ॥
तीक्ष्णोष्णाद्यैः पुरा प्रोक्तैर्दीपनाद्यैस्तथा गुणैः ।
सात्म्यत्वाच्च तदेवास्य धातुसाम्यकरं परम् ॥ ९ ॥
सप्ताहमष्टरात्रं वा कुर्य्यात्पानात्ययौषधम् ।
जीर्य्यत्येतावता पानं कालेन विषया गृहम् ॥ १० ॥
परं ततोऽनुवध्नाति यो रोगस्तस्य भेषजम् ।
यथायथं प्रयुञ्जीत क्षतपानात्ययौषधैः ॥ ११ ॥
तत्र वातोल्बणे मद्यं दद्यात् पिष्टकृतं युतम् ।
बीजपूरकहुचाम्लकोलदाडिमदीप्यकैः ॥ १२ ॥
यवानीहपुषाजाजीशोषवित्तवणार्द्रकैः ।
शूल्यैर्मांसैर्हरीतकैः स्नेहवद्भिश्च सक्तुभिः ॥ १३ ॥
स्नेहस्निग्धाम्ललवणा मद्यमांसरसा हिताः ।

आस्वाम्लातकपेशीभिः संस्कृता रागखाण्डवाः ॥१४॥
गोधूममाषविकृतीर्मृदुस्निग्धामुखप्रियाः।
आर्द्रिकार्द्रककुल्माषसूक्तमांसादिगर्भिणी ॥ १५ ॥
सुरभिर्लवणा शीता निगदा वाच्छवारुणी।
खरसो दाडिमः क्वाथः पञ्चमूलात्कनीयसः ॥ १६ ॥
शुण्ठी धान्यात्तथा मस्तुसूक्ताम्भोत्याम्लकाञ्चिकम्।
अभ्यङ्गोद्वर्तनस्नानमुष्ण प्रावरण घनम् ॥ १७ ॥
घनस्त्वागुरुजो धूपः पङ्कस्त्वागुरुकुङ्कुमः।
कुचोरुश्रोणिशालिन्यो यौवनोष्णाङ्गयष्टयः ॥ १८ ॥
हर्षेणालिङ्गनैर्युक्ताः प्रियाः सवहनेषु च।
पित्तोल्वणे बहुजल शार्कर मधुना युतम् ॥ १९ ॥
रसैर्दाडिमखर्जूरभव्यद्राक्षापरूषकैः।
सुशीत ससितासक्तुयोज्य तादृक् च पानकम् ॥ २० ॥
स्वादुवर्गकषायैर्वा युक्तं मद्य समाक्षिकम्।
शालिषष्टिकमश्नीयाच्छशजैणकपिञ्जलैः ॥ २१ ॥
सतीनमुद्गामलकपटोलीदाडिमैरपि।
कफपित्त समुत्क्लिष्टमुल्लिखेत् तर्ड्डिदाहवान् ॥ २२ ॥
पीत्वाम्बु शीतं मद्यं वा भूरीक्षुरससंयुतम्।
द्राक्षारसं वा संसर्गी तर्पणादिपर हितः ॥ २३ ॥
तथाग्निर्दीप्यते तस्य दोषश्चैषान्नपाचनः।
कासे सरक्तनिष्ठीवे पार्श्वस्तनरुजासु च ॥ २४ ॥
तृष्णायां सविदाहायां सोत्क्लेशे हृदयोरसि।
गुडूचिभद्रमुस्तानां पटोलस्याथवा रसम् ॥ २५ ॥
सशृङ्गवेरं युञ्जीत तित्तिरिप्रतिभोजनम्।
तृष्यते चातिबलवद्वातपित्ते समुद्धते ॥ २६ ॥
दद्याद् द्राक्षारसं पानं शीतं दोषानुलोमनम्।

जीर्णेऽद्यान्मधुराम्लेन छागमांसरसेन वा ॥ २७ ॥
क्षुत्क्षमः पिबेन्मद्यं मेदं रक्षन् बृंहदकम्।
मुस्तदाडिमलाजाम्बु, जलं वा पर्णिनी शृतम् ॥ २८ ॥
पटोल्युत्पलकन्दैर्वा स्वभावादेव वा हिमम्।
मद्यातिपानादभ्याती क्षोभे तेजसि चोद्धते ॥ २९ ॥
यः शुष्कगलताल्वोष्ठो जिह्वां निष्कृष्य चेष्टते।
पाययेत् कामतोऽभ्यस्तं निशीथपवनाहतम् ॥ ३० ॥
कोलदाडिमबृक्षाम्लचुक्रिकाचुक्रिकारसः।
पञ्चाम्लको मुखालेपः सद्यस्तृष्णां नियच्छति ॥ ३१ ॥
क्वचं प्राप्तश्च पानोष्मा पित्तरक्ताभिमूर्च्छितः ॥ ३२ ॥
दाहं प्रकुरुते घोरं तत्रातिशिशिरो विधिः।
शाम्यति रसैस्तृप्ते रोहिणीं व्यधयेच्छिराम् ॥ ३३ ॥
उल्लेखनोपवासाभ्यां जयेत् श्लेष्मोल्बणं पिबेत् ॥ ३४ ॥
शृतं शुण्ठीक्षिरोदीच्यदुस्पर्शान्यतमोदकम्।
निरामं क्षुधित काले पाययेद्दुग्धाधिकम् ॥ ३५ ॥
शार्करं मधु वा जीर्णमरिष्टं सीधुमेव च।
रूक्षतर्पणसंयुक्तं यवानी नागरान्वितम् ॥ ३६ ॥
यूषेण यवगोधूमं तनुनाम्लेन भोजयेत्।
उष्णाम्लकटुतिक्तेन कौलत्थेनाल्पसर्पिषा ॥ ३७ ॥
शुष्कमूलकजैश्छागैः रसैर्वा धन्वचारिणाम्।
साम्लवेतसबृक्षाम्लपटोलीव्योषदाडिमैः ॥ ३८ ॥
प्रभूतशुण्ठीमरिचहरितार्द्रकपेशिकम्।
बीजपूररसाद्यम्लभृष्टनीरसवर्त्तितम् ॥ ३९ ॥
करीरकरमर्दादिरोचिष्णुबहुशालनम्।
प्रव्यक्ताष्टाङ्गलवणं विकल्पितनिमर्दकम् ॥ ४० ॥
यथाग्नि भक्षयन्मांसं माधवं निगदं पिबेत्।

सितामौक्तिकलाजाजीतिन्तिडीकाम्लवेतसम् ॥ ४१ ॥
त्वगेलामरिचार्द्रांग्रमष्टाङ्गलवणं हितम्।
क्षौद्रोविश्वाग्निकर कफप्राये मदात्यये ॥ ४२ ॥
रूक्षोष्णोदर्त्तनोद्वर्षस्नानभोजनलङ्घनैः।
सकामाभिः सह स्त्रीभिर्युक्त्या जागरणेन च ॥ ४३ ॥
मदात्ययः कफप्रायः शीघ्रं समुपशाम्यति।
यदिदं कर्म निर्दिष्टं पृथग्दोषबलं प्रति ॥ ४४ ॥
सन्निपाते दशविधे तत्तेष्वेऽपि विकल्पयेत्।
त्वङ्नागपुष्पमगधामरीचाजाजिधान्यकैः ॥ ४५ ॥
परूषकमधूकैलासुराह्वैश्च सितान्वितैः।
सकर्पित्थरसं क्षौद्रं पानकं शर्करोधितम् ॥ ४६ ॥
मदात्ययेषु सर्वेषु पेयं रुच्यग्निदीपनम्।
नाविचोद्य मनोमद्यं शरीरमविहन्य वा ॥ ४७ ॥
कुर्य्यान्मदात्ययं तस्मादिष्यते हर्षणी क्रिया।
संशुद्धिशमनाद्येषु मददोषः कृतेष्वपि ॥ ४८ ॥
न चेच्छाम्येत् कफे क्षीणे जाते दौर्बल्यलाघवे।
तस्य मद्यविदग्धस्य वातपित्ताधिकस्य च ॥ ४९ ॥
शीर्णोपतप्तस्य तरोर्यथा वर्षं तथा पयः।
मद्यक्षीणस्य हि क्षीणं क्षीरमाखेव पुष्यति ॥ ५० ॥
ओजस्तुल्यं गुणैः सर्वैर्विपरीतं च मद्यतः।
पयसा विजिते रोगे बले जाते निवर्त्तयेत् ॥ ५१ ॥
क्षीरप्रयोगं मद्यं च क्रमेणास्यास्यमाचरेत्।
न विट्क्षयध्वंसकोत्थैः स्रग्वीपट्टवैर्यथा ॥ ५२ ॥
तयोस्तु स्याद् घृतं क्षीरं वस्त्रयो हंसकाः शिवाः।
अभ्यङ्गोद्वर्त्तनस्नानमद्यपानं च वातजित् ॥ ५३ ॥
युक्तमद्यस्य मद्योत्थो न व्याधिरुपजायते।

अतोऽस्य वक्ष्यते योगो यः सुखायैव केवलम् ॥५४॥
आग्नेयं या महत् तेजो बलं सारस्वतं च या ।
दधात्यैन्द्रं च या वीर्य्यं प्रभावं वैष्णवं च या ॥ ५५ ॥
अस्त्रं मकरकेतोर्या पुरुषार्थो बलस्य या ।
सौत्रामण्यां द्विजमुखे या हुताशे च ह्रूयते ॥ ५६ ॥
या सर्वौषधिसंपूर्णान्मथ्यमानात् सुरासुरैः ।
महोदधेः समुद्भूता श्रीशशाङ्कामृतैः सह ॥ ५७ ॥
मधुमाधवमैरेयसीधुगौडासवादिभिः ।
मदशक्तिमनुघ्नन्ती या रूपैर्बहुभिः स्थिता ॥ ५८ ॥
यामासाद्य विलासिन्यो यथार्थं नाम बिभ्रति ।
कुलाङ्गनापि यां पीत्वा नयत्युद्धतमानसा ॥ ५९ ॥
अनङ्गालिङ्गितैरङ्गैः क्वापि चेतो मुनेरपि ।
तरङ्गभङ्गभ्रुकुटीतर्जनैर्मानिनी मनः ॥ ६० ॥
एकं प्रसाद्य कुरुते या द्वयोरपि निर्वृतिम् ।
यथाकाम भटावाप्तिपरिहृष्टाप्सरोगणे ॥ ६१ ॥
तृणवत् पुरुषा युद्धे यामासाद्य त्यजन्त्यसून् ।
यां श्लथयित्वापि चिरं बहुधा बहुविग्रहाम् ॥ ६२ ॥
नित्यं हर्षातिवेगेन तत् पूर्वमिव सेवते ।
शोकोद्वेगारतिभयैर्यां दृष्ट्वा नाभिभूयते ॥ ६३ ॥
गोष्ठीमहोत्सवोद्यानं न यस्याः शोभते विना ।
स्मृत्वा स्मृत्वा च बहुशो वियुक्तः शोचते यया ॥६४॥
अप्रसन्नापि या प्रीत्यै प्रसन्ना स्वर्ग एव या ।
अपीन्द्रं मन्यते दुःस्थं हृदयस्थितया यया ॥ ६५ ॥
अनिर्देश्य सुखास्वादा स्वयंवेद्यैव या परम् ।
इति चित्तास्ववस्थासु प्रियामनुकरोति या ॥ ६६ ॥
प्रियातिप्रियतां याति यत् प्रियस्य विशेषतः ।

या प्रीतिर्या रतिर्या वाग् या पुष्टिरिति च स्मृता ॥६७॥
देवदानवगन्धर्वयक्षराक्षसमानुषैः।
पानप्रवृत्तौ सत्यां तां सुरां तु विधिना पिबेत् ॥ ६८ ॥
सन्ति च ये रोगा मेदोऽनिलकफोद्भवाः।
विधियुक्ताद्ऋते मद्यात् तेन सिध्यन्ति दारुणाः ॥ ६९ ॥
अस्ति देहस्य सावस्था यस्यां पानं निवार्यते।
अन्यत्र मद्यान्मिगदादिविधौषधसंभृतात् ॥ ७० ॥
अनूपं जाङ्गलं मांसं विधिनाप्युपकल्पितम्।
मद्यं सहायमप्राप्य सम्यक् परिणमेत् कथम् ॥ ७१ ॥
सुतीव्रमारुतव्याधिघातिनो लशुनस्य च।
मद्यमांसवियुक्तस्य प्रयोगः स्यात् कियान् गुणः ॥७२॥
निगूढशल्याहरणे शस्त्रक्षाराग्निकर्मणि।
पीतमद्यो विषहते सुखं वैद्यविकत्थनाम् ॥ ७३ ॥
अनलोत्तेजनं रुच्यं शोकश्रमविनोदकम्।
न चातः परमस्त्यन्यदारोग्यबलपुष्टिकृत् ॥ ७४ ॥
रक्षता जीवितं तस्मात् पेयमात्मवता सदा।
आश्रितोपाश्रितहितं परमं धर्मसाधनम् ॥ ७५ ॥

स्नातः प्रणम्य सुरविप्रगुरून् यथास्वं
वृत्तिं विधाय च समस्तपरिग्रहस्य।
आधानभूमिमथ गन्धजलाभिषिक्ताम्
आहारमण्डपसमीपगता श्रयेत ॥ ७६ ॥

स्वास्तृतेऽथ शयने कमनीये मित्रभृत्यरमणीसमवेतः।
स्व यशः कथकचारणसङ्घैरुद्गतं निशमयन्नतिलोकम् ॥७७ ॥
विलासिनीनां च विलासशोभि गीतं सनृत्य कलतूर्यघोषैः।
काञ्चीकलापैश्चलकिङ्किणीकैः क्रीड़ाविहङ्गैश्च कृतानुनादम् ७८

मणिकनकसमुत्थैरावनेयैर्विचित्रैः

सजलविविधलेखचौमवस्त्रावृताङ्गैः ।
अपि मुनिजनचित्तक्षोभसम्पादिनीभिः
चकितहरिणलोलप्रेक्षणीभिः प्रियाभिः ॥७९॥
स्तननितम्बकृतादतिगौरवात्
अलसमाकुलमीश्वरसभ्रमात् ।
इति गतं दधतीभिरसंस्थितं
तरुणचित्तविलोभनकारणम् ॥ ८० ॥
यौवनासवमत्ताभिर्विलासाधिष्ठिताङ्गभिः ।
सञ्चार्य्यमाणं युगपत्तन्वङ्गीभिरितस्ततः ॥ ८१ ॥
तालवृन्तनलिनीदलानिलैः शीतलीकृतमतीवशीतलैः ।
दर्शनेऽपि विदधद्दशानुगं स्वादितं किमुत चित्तजन्मनः ॥८२॥
चूतरसेन्दुमृगैः कृतवासं मल्लिकयोज्ज्वलया च सनाथम् ।
स्फाटिकशुक्तिगतं सतरङ्गं कान्तमनङ्गमिवोद्वहदङ्गम् ॥८३॥
तालीसाद्यं चूर्णमेलादिकं वा
हृद्यं प्राश्य प्राग्वयःस्थापनं वा ।
तत्रार्थिभ्यो भूमिभागे समृद्धे
तयोश्चित्रं दापयित्वा ततश्च ॥ ८४ ॥
धृतिमान् स्मृतिमान् नित्यमन्यूनाधिकमाचरन् ।
उचितेनोपचारेण सर्वमेवोपपादयन् ॥ ८५ ॥
जितविकसितसरोजनयनसङ्क्रान्तिवर्द्धितश्लोकम् ।
कान्तामुखमिव सौरभहृतमधुपगणं पिबेन्मद्यम् ॥८६॥
पीत्वैवं चषकद्वयं परिजनं सम्मान्य सर्वं ततो
गत्वा द्वारभुवं पुरः सुभिषजो भुञ्जीत भूयोऽत्र च ।
मांसापूपघृतार्द्रकादिहरितैर्युक्तं ससौवर्चलै-
र्हिङ्गुव्वा निशि वाल्पमेव वनिता सञ्चालनार्थं पिबेत् ॥८७॥
रहसि दयितामङ्के ज्ञात्वा भुजान्तरपीड़नात्

पुलकिततनुं जातस्वेदां सकम्पपयोधराम्।
यदि सरभसं सीधूद्गारं न पाययते कृतो
ऽस्यमनुभवति क्लेशप्रायं ततो गृहतन्त्रताम् ॥ ८८ ॥
वरतनुवक्त्रसङ्गतिसुगन्धितरं सरकं
द्रुतमिव पद्मरागमणिभासवरूपधरम्।
भवति रतिश्रमेण च मदः पिबतोऽल्पमपि
क्षयमतनुजोजसः परिहरन् स भयीत परम् ॥ ८९ ॥
इत्थं युक्त्या पिबन्मद्यं न त्रिवर्गाद्विहीयते।
असारसंसारसुखं परमेवाधिगच्छति ॥ ९० ॥
ऐश्वर्यस्योपभोगोऽय स्पृहणीयः सुरैरपि।
अन्यथा हि विपत्सु स्यात् पश्चात्तापेन्धनं धनम् ॥९१॥
उपभोगेन रहितो भोगवानिति निन्द्यते।
निर्मितोऽतिकदर्थोऽय विधिना निधिपालकः ॥९२॥
तस्माद् व्यवस्थया पान पानस्य सतत हितम्।
जित्वा विषयलुब्धानामिन्द्रियाणां स्वतन्त्रताम् ॥९३॥
विधिर्वसुमतामेष भविष्यद्दसवस्तु ये।
यथोपपत्ति तैर्मद्यं पातव्य मात्रया हितम् ॥ ९४ ॥
यावद् दृष्टेर्न सम्भ्रान्तिर्यावन्न क्षोभते मनः।
तावदेव विरन्तव्यं मद्यादात्मवता सदा ॥ ९५ ॥
अभ्यङ्गोद्वर्तनस्नानवासधूपानुलेपनैः।
स्निग्धोष्णैर्भावितश्चान्नैः पान वातोत्तरः पिबेत् ॥९६॥
शीतोपचारैर्विविधैर्मधुरस्निग्धशीतलैः।
पैत्तिको भावितश्चान्नैः पिबन्मद्यं न सीदति ॥ ९७ ॥
उपचारैरग्निशिशिरैर्यवगोधूमभुक् पिबेत्।
श्लैष्मिको जाङ्गलैर्मांसैर्मद्यं मरिचकैः सह ॥ ९८ ॥
तत्र वाते हितं मद्यं प्रायः पैष्टिकगौडिकम्।

पित्ते साध्वो मधुकफे माहीकारिष्टमाधवम् ॥ ९९ ॥
प्राक् पिबेत् श्लेष्मिको मद्यं भुक्तस्योपरि पैत्तिकः ।
वातिकस्तु पिबेन्मध्ये समदोषो यथेच्छया ॥ १०० ॥
मदेषु वातपित्तघ्नं प्रायो मूर्च्छासु चेष्टते ।
सर्वत्रापि विशेषेण पित्तमेवोपलक्षयेत् ॥ १०१ ॥
शीताः प्रदेहा मण्डयः सेका व्यजनमारुताः ।
सिताद्राक्षेक्षुखर्जूरकाश्मर्य्यः स्वरसाः पयः ॥ १०२ ॥
सिद्धं मधुरवर्गेण रसा यूषाः सदाडिमाः ।
यष्टिकाः शालयो रक्ता यवाः सर्पिश्च जीवनम् ॥१०३॥
कल्याणकं महातिक्तं पटोलं पयसान्विताः ।
पिप्पल्यो वा शिलाजतु वा रसायनविधानतः ॥ १०४ ॥
त्रिफला वा प्रयोक्तव्या सघृतक्षौद्रशर्करा ।
प्रसक्तवेगेषु हितं सुखनासावरोधनम् ॥ १०५ ॥
पिबेद्वा मानुषीक्षीरं तेन दद्याच्च नावनम् ।
मृणालविसकृष्णा वा लिह्यात् क्षौद्रेण साभयाः ॥१०६॥
दुरालभां वा मुस्तां वा शीतेन सलिलेन वा ।
पिबेन्मरिचकोलास्थिमज्जोशीराहिकेसरम् ॥ १०७ ॥
धात्रीफलरसे सिद्धं यष्ट्याक्काथेन वा घृतम् ।
कुर्य्यात् क्रियां यथोक्तां च यथादोषबलोदयम् ॥ १०८ ॥
पञ्चकर्मणि चेष्टानि सेचनं शोणितस्य च ।
सत्त्वस्यालम्बनं ज्ञानमग्र्यविर्धिषयेषु च ॥ १०९ ॥
मदेष्वतिप्रवृद्धेषु मूर्च्छायेषु च योजयेत् ।
तीक्ष्णं सन्न्यासविहितं विषघ्नं विषजेषु च ॥ ११० ॥
आशु प्रयोज्यं सन्न्यासे सुतीक्ष्णं नस्यमञ्जनम् ।
धूमप्रधमनं तोदः सूचिभिश्च नखान्तरे ॥ १११ ॥
केशानां लुञ्चनं दाहो दंशोदशनवृश्चिकैः ।

कट्वङ्गमालनं वक्त्रे कपिकच्छ्वघर्षणम् ॥ ११२ ॥
क्षुत्थितो लब्धसंज्ञश्च लशुनस्वरसं पिबेत्।
खादेत्सव्योषलवणं बीजपूरकेसरम् ॥ ११३ ॥
लघून्नं प्रतिसोच्णोष्णमद्यात् स्रोतोविशुद्धये।
विस्रापनैः संस्मरणैः प्रियश्रवणदर्शनैः ॥ ११४ ॥
पटुभिर्गीतवादित्रशब्दैर्व्यायामशीलनैः।
संसनोल्लेखनैर्धूमैः शोणितस्रावसेचनैः ॥ ११५ ॥
उपाचरेत्तं प्रततमनुबन्धभयात् पुनः।
लब्ध्वा सरक्षितव्यं च मनः प्रलयहेतुतः ॥ ११६ ॥

अष्टमोऽध्यायः।

अथातोऽर्शसां चिकित्सितं व्याख्यास्यामः ॥
काले साधारणे स्निग्धे नातिदुर्बलमर्शसम्।
विशुद्धकोष्ठं लघ्वन्नमनुलोमनमाशितम् ॥ १ ॥
शुचिः कृतस्वस्त्ययनं मुक्तविण्मूत्रमव्यथम्।
शयने फलके वान्यनरोत्सङ्गे व्यपाश्रितम् ॥ २ ॥
पूर्वेण कायेनोत्तानं प्रत्यादित्यगुदं समम्।
समुन्नतकटीदेशमथ यन्त्रणवाससा ॥ ३ ॥
सक्थ्नोः शिरोधरायां च परिक्षिप्तभुजस्थितम्।
आलम्बित परिचरैः सर्पिषाभ्यक्तपायवे ॥ ४ ॥
ततोऽस्मै सर्पिषाभ्यक्तं निदध्याद्ऋजुयन्त्रकम्।
शनैरनुसुखं पायौ ततो दृष्ट्वा प्रवाहणात् ॥ ५ ॥
यन्त्रे प्रावेष्ट दुर्नामश्लोतगुच्छितयाऽनु च।
शलाकयोत्पीड्य भिषक् यथोक्तविधिना दहेत् ॥ ६ ॥
क्षारेणैवार्द्धमितरत् क्षारेण ज्वलनेन वा।
महद्धा बलिनश्छित्वा वीतयन्त्रमथातुरम् ॥ ७ ॥

स्वभ्यक्तपायुजघनमवगाहे निधापयेत्।
निर्वातमन्दिरस्थस्य ततोऽस्याचारमादिशेत् ॥ ८ ॥
एकैकमिति सप्ताहात्सप्ताहात्समुपाचरेत्।
प्राग्दक्षिणं ततो वाममर्धं पृष्ठाग्रज तत:॥ ९ ॥
बलवर्णस: सुदग्धस्य स्नाहायोरनुलोमता।
रुचिरग्नेऽग्निपटुता स्वास्थ्यं वर्णबलोदय:॥ १० ॥
वस्तिशूले स्वधोनाभेर्लेपयेच्छुष्ककल्कितै:।
वर्षाभूकुष्ठसुरभिमिश्रिलोहामरार्ह्वयै:॥ ११ ॥
शक्रब्रह्मत्रपतीघाते परिषेकावगाहयो:।
वरणालम्बुधैरण्डगोकण्टकपुनर्नवै:॥ १२
सुखवीसुरभीभ्यां च क्वाथमुष्णं प्रयोजयेत्
सक्षेइमथवा क्षीरं तैलं वा वातनाशनम्॥ १३ ॥
युञ्जीतान्न शक्रक्षेदि स्नेहान् वातघ्नदीपनान्।
अथाप्रयोज्यदाहस्य निर्गतान् कफवातजान्॥ १४ ॥
सस्नायुकण्डूरुक्क्लोफानभ्यज्य गुदकीलकान्।
विल्वमूलाग्निकक्षारकुष्ठै: सिद्धेन सेचयेत्॥ १५ ॥
तैलेनाहिविडालोष्ट्रवराहवसयाथवा।
स्वेदयेदनुपिण्डेन द्रवस्वेदेन वा पुन:॥ १६ ॥
सक्तूना पिण्डिकाभिर्वा स्निग्धानां तैलसर्पिषा।
रास्नाया हपुषाया वा पिण्डैर्वा कार्ष्णगन्धिकै:॥ १७ ॥
अर्कमूल शमीपत्रं नृकेशा: सर्पकञ्चुकम्।
मार्जारचर्मसर्पिश्च धूपन हितमर्शसाम्॥ १८ ॥
तथा खगन्धा सुरसा वृहती पिप्पली घृतम्।
धान्याम्लपिष्टैर्जीमूतबीजैस्तज्ज्वालकं मृदु॥ १९ ॥
लेपितं छायया शुष्कं वर्त्तिर्गुदजशातनी।
सजालमूलजीमूतस्नेहे वा क्षारसंयुते॥ २० ॥

गुञ्जासूरणकूष्माण्डबीजैर्वार्त्तिं स्तथागुणा।
स्नुक्क्षीरार्द्रनिशालेपस्तथा गोमूत्रकल्कितैः॥ २१॥
काकवाकुशकृत्कृष्णानिशागुञ्जाफलैस्तथा।
स्नुक्क्षीरपिष्टैः षड्ग्रन्थाहलिनीवारणास्थिभिः॥ २२॥
क्षीरस्यृङ्गीविजयाकुष्ठारुष्करतुल्यकैः।
शिग्रुमूलकजैर्बीजैः पत्रैरश्वघ्ननिम्बजैः॥ २३॥
पीलुमूलेन विल्वेन हिङ्गुना च समन्वितैः।
कुष्ठं शिरीषबीजानि पिप्पल्यः सैन्धवं गुडः॥ २४॥
अर्कक्षीरं सुधाक्षीरं त्रिफला च प्रलेपनम्।
आर्कं पयः स्नुहीकाण्डं कटुकालाम्बुपल्लवाः॥ २५॥
करञ्जो वस्तमूत्रं च लेपनं श्रेष्ठमर्शसाम्।
आनुवासनिकैर्लेपैः पिप्पल्याद्यैश्च पूजितैः॥ २६।
एभिरेवौषधैः कुर्यात्तैलान्यभ्यञ्जनानि च।
धूपनालेपनाभ्यङ्गैः प्रस्रवन्ति गुदाङ्कुराः॥ २७॥
सञ्चित दुष्टरुधिरं ततः सम्पद्यते सुखी।
अवर्त्तमानमुच्छूनकठिनेभ्यो हरेदसृक्॥ २८॥
अर्शोभ्यो जलजाशस्त्रसूचीकूर्चैः पुनः पुनः।
शीतोष्णस्निग्धरूक्षाद्यैर्न व्याधिरुपशाम्यति॥ २९॥
रक्ते दुष्टे भिषक् तस्माद्रक्तमेवावसेचयेत्।
यो जातो गोरसः क्षीराद्भिचूर्णावचूर्णितात्॥ ३०॥
पिबंस्तमेव तेनैव भुञ्जानो गुदजान् जयेत्।
कोविदारस्य मूलानां मथितेन रजः पिबेत्॥ ३१॥
अश्नन् जीर्णे च पथ्यानि मुच्यते हतनामभिः।
गुदभ्रंशरुजाशूलार्त्तो मन्दाग्निर्गौल्मिकान् पिबेत्॥ ३२॥
हिङ्वादीननुतक्रां वा खादेद् गुडहरीतकीम्।
तक्रेण वा पिबेत् पथ्यावेल्लाग्निकुटजत्वचः॥ ३३॥

कलिङ्गमगधाज्योतिःसूरणान् वांशवर्द्धितान् ।
कोष्णाम्बुना वा त्रिपटुव्योषहिङ्गूम्लवेतसम् ॥ ३४ ॥
युक्तं बिल्वकपित्थाभ्यां महौषधविडेन वा ।
शाकैरेवान्या वा प्रदद्यात्तक्रतर्पणम् ॥ ३५ ॥
दद्याद्वा हपुषा हिङ्गुचित्रकं तक्रसंयुतम् ।
मांसं तक्रानुपानानि खादेत् पीलुफलानि वा ॥ ३६ ॥
पिबेदहरहस्तक्रं निरन्नो वा प्रकामतः ।
अत्यर्थं मन्दकायाग्नेस्तक्रमेवावचारयेत् ॥ ३७ ॥
सप्ताहं वा दशाहं वा मासार्द्धं मासमेव वा ।
बलकालविकारज्ञो भिषक् तक्रं प्रयोजयेत् ॥ ३८ ॥
साय वा लाजसक्तूनां दद्यात्तक्रावलेहिकाम् ।
जीर्णे तक्रे प्रदद्याद्वा तक्रपेयां ससैन्धवाम् ॥ ३९ ॥
तक्रानुपान सस्नेहं तक्रौदनमतः परम् ।
यूषै रसैर्वा तक्राढ्यैः शालीन् भुञ्जीत मात्रया ॥ ४० ॥
रूक्षमर्द्दीदृतस्नेहं यतश्चानुद्धृत घृतम् ।
तक्रं दोषाग्निबलवत् विविध तत्प्रयोजयेत् ॥ ४१ ॥
न विरोहन्ति गुदजाः पुनस्तक्रसमाहताः ।
निषिक्त तिन्दिधं हन्ति भूमावपि तृणोलुपम् ॥ ४२ ॥
स्रोतःसु तक्रशुद्धेषु रसो धातूनुपैति यः ।
तेन पुष्टिर्बलं वर्णः परं तुष्टिश्च जायते ॥ ४३ ॥
वातश्लेष्मविकाराणां शत च विनिवर्त्तते ।
मथित भाजने क्षुद्रबृहतीफललेपिते ॥ ४४ ॥
निशां पर्य्युषितं पेयमिच्छद्भिर्गुदजक्षयम् ।
धान्योपकुञ्चिकाजाजी हपुषा पिप्पलीद्वयैः ॥ ४५ ॥
कारवीग्रन्थिकशठीयवान्यग्नियवानकैः ।
चूर्णितैर्घृतपात्रस्थं नात्यम्लं तक्रमाहृतम् ॥ ४६ ॥

तक्रारिष्टं पिबेज्जातं व्यक्ताम्लकटुकामतः ।
दीपनं रोचनं वर्ण्यं कफवातानुलोमनम् ॥ ४७ ॥
गुदक्षयपथुकण्डूर्त्तिनाशनं बलवर्द्धनम् ।
त्वचं चित्रकमूलस्य पिष्ट्वा कुम्भं प्रलेपयेत् ॥ ४८ ॥
तक्रं वा दधि वा तत्र जातमर्शोहरं पिबेत् ।
भार्ङ्गीस्रोतामृतापञ्चकोलेष्वप्येष संविधिः ॥ ४९ ॥
पिष्टैर्गजकणापाठाकारवीपञ्चकोलकैः ।
तुम्बर्य्यजाजीधनिकाविल्वमध्यैश्च कल्पयेत् ॥ ५० ॥
फलाम्लान् यमकस्नेहान् पिबेत् यूषरसादिकान् ।
एभिरेवौषधैः साध्यं वारिसर्पिश्च दीपनम् ॥ ५१ ॥
क्रमोऽयं भिन्नशक्तीनां वक्ष्यते गाढ़वर्चसाम् ।
स्नेहाद्यैः सप्तभिर्युक्तां लवणां वारुणीं पिबेत् ॥ ५२ ॥
लवणा एव वा तक्रसीधुधान्याम्लवारुणीः ।
प्राग्भक्तं यमके भृष्टान् सक्तुभिश्चावचूर्णितान् ॥ ५३ ॥
करञ्जपल्लवान् खादेद्धातवर्चोऽनुलोमनान् ।
सगुडं नागरं पाठां गुडक्षारप्लुतानि वा ॥ ५४ ॥
गोमूत्राध्युषितामद्यात् सगुडां वा हरीतकीम् ।
पथ्याशतद्वयं मूत्रद्रोणेनामूत्रसंक्षयात् ॥ ५५ ॥
पक्वान् खादेत् समधुना द्वे द्वे हन्ति कफोद्भवान् ।
दुर्नामकुष्ठश्वयथुगुल्ममेहोदरक्रिमीन् ॥ ५६ ॥
ग्रन्थ्यर्बुदापचीस्थौल्यपाण्डुरोगाढ्यमारुतान् ।
अजशृङ्गीजटाकल्कमजामूत्रेण यः पिबेत् ॥ ५७ ॥
गुडवार्त्ताकभुक्तस्य नश्यन्त्याशु गुदाङ्कुराः ।
श्रेष्मारसेन त्रिवृतां पथ्यां तक्रेण वा सह ॥ ५८ ॥
पथ्यां वा पिप्पलीयुक्तां घृतभृष्टां गुड़ान्विताम् ।
अथवा सचित्रहस्तीं भक्षयेदनुलोमनीम् ॥ ५९ ॥

हते गुदाश्रये दोषे गुदजा यान्ति संक्षयम् ।
दाडिमस्वरसाऽजाजीयवानीगुडनागरैः ॥ ६० ॥
पाठया वा युतं तक्रं वातवर्चोऽनुलोमनम् ।
सीधुं वा गौडमथवा सचित्रकमहौषधम् ॥ ६१ ॥
पिबेत् सुरां वा हपुषा पाठासौवर्चलान्विताम् ।
दशादिदशकैर्वृद्धाः पिप्पलीर्द्विपिचुं तिलान् ॥ ६२ ॥
पीत्वा घीरेण लभते बलं देहहुताशयोः ।
दुस्पर्शकेन विल्वेन यवान्या नागरेण वा ॥ ६३ ॥
एकैकेनापि संयुक्ता पाठा हन्त्यर्शसां रुजम् ।
सलिलस्य वहे पक्वा प्रस्थार्द्धमभयात्वचम् ॥ ६४ ॥
प्रस्थं धात्र्या दशपलं कपित्थानां ततोऽर्द्धतः ।
विशालारीध्रमरिचकृष्णावेल्लैलवालुकम् ॥ ६५ ॥
द्विपलांशं पृथक् पादशेषे पूते गुडात् तुले ।
दत्त्वा प्रस्थं च धात्र्याः स्थापयेद् घृतभाजने ॥ ६६ ॥
पश्चात् सशोणितोऽरिष्टः करोत्यग्निं निहन्ति च ।
गुदजग्रहणीपाण्डुकुष्ठोदरगरज्वरान् ॥ ६७ ॥
क्षयपुप्फुसहृद्रोगगुल्मयक्ष्मविसर्पमीन् ।
जलद्रोणे पचेद्दन्तीदशमूलावराग्निकान् ॥ ६८ ॥
पालिकान् पादशेषे तु क्षिपेद् गुडतुलां परम् ।
पूर्ववत् सर्वमस्य स्यादानुलोमितरक्षयम् ॥ ६९ ॥
पचेद् दुरालभाप्रस्थं द्रोणेऽपां प्रासृतैः सह ।
दन्तीपाठाग्निविजयावासामलकनागरैः ॥ ७० ॥
तस्मिन् सिताशतं दद्यात् पादशेऽन्यच्च पूर्ववत् ।
लिम्पेत् कुम्भं तु फलिनीकृष्णाचव्याज्यमाक्षिकैः ॥७१॥
प्राग्भक्तमानुलोम्याय फलाम्लं वा पिबेद् घृतम् ।
चव्यचित्रकसिद्धं वा यवक्षारगुडान्वितम् ॥ ७२ ॥

पिप्पलीमूलसिद्धं वा सगुडक्षारनागरम्।
पिप्पलीपिप्पलीमूलधानकादाडिमैर्घृतम् ॥ ७३ ॥
दध्ना च साधित वातगुल्मशूलविबन्धहृत्।
पलाशक्षारतोयेन त्रिगुणेन पचेद् घृतम् ॥ ७४ ॥
वत्सकादिप्रतीवापमर्शोघ्नं दीपनं परम्।
पञ्चकोलाभयाक्षीरयवानी विडसैन्धवैः ॥ ७५ ॥
सपाठाधान्यमरिचैः सविल्वैर्दधिमद् घृतम्।
साधयेत् तज्जयत्याशु गुदवङ्क्षणवेदनाम् ॥ ७६ ॥
प्रवाहिकां गुदभ्रंशं मूत्रकृच्छ्रं परिस्रवम्।
पाठाजमोदधनिकाश्चदष्ट्रापञ्चकोलकैः ॥ ७७ ॥
सविल्वैर्दधिचाङ्गेरीस्वरसे च चतुर्गुणे।
हन्त्याज्यं सिद्धमानाह मूत्रकृच्छ्रं प्रवाहिकाम् ॥७८॥
गुदभ्रंशार्त्तिगुदजग्रहणीगदमारुतान्।
शिखितित्तिरिलावानां रसानम्लान् सुसंस्कृतान् ॥७९॥
दद्याणां वर्त्तकानां वा दद्याद् विड्वातसग्रहे।
वास्तुकाग्निमन्थहृद्दन्तीपाठाम्लीकादिपल्लवान् ॥ ८० ॥
अन्यच्च कफवातघ्नं शाकं च लघुमेदि च।
सहिङ्गुयमके भृष्टं सिद्धं दधिरसैः सह ॥ ८१ ॥
धनिकापञ्चकोलाभ्यां पिष्टाभ्यां दाडिमाम्बुना।
आर्द्रिकायाः किसलयैः शकलैरार्द्रकस्य च ॥ ८२ ॥
युक्तमङ्गारधूपेन हृद्येन सुरभीकृतम्।
सजीरकं समरिचं विडसौवर्चलोत्कटम् ॥ ८३ ॥
वातोत्तरस्य रूक्षस्य मन्दाग्नेर्बद्धवर्चसः।
कल्पयेद्रक्तशाल्यन्नव्यञ्जनं शाकवद्रसान् ॥ ८४ ॥
गोगोधाच्छगलोष्ट्राणां विशेषात् क्रव्यभोजिनाम्।
मदिरां शार्करं गौड़ं सीधुं तक्रं तुषोदकम् ॥ ८५ ॥

अरिष्टं मस्तु पानीयं पानीयं चाल्पकं श्रृतम्।
धान्येन धान्यशुण्ठीभ्यां कणाकारिकयाऽथवा ॥८६॥
अन्ते भक्तस्य मध्ये वा वातवर्चोऽनुलोमनम्।
विड्वातकफपित्तानामानुलोम्ये हि निर्मले ॥ ८७ ॥
गुदे शाम्यन्ति गुदजाः पावकश्चाभिवर्द्धते।
उदावर्त्तपरीता ये ये चात्यर्थं विरूक्षिताः ॥ ८८ ॥
विलोमवाताः शूलार्त्तास्तेष्विष्टमनुवासनम्।
पिप्पलीं मदनं बिल्वं शताह्वां मधुकं वचाम् ॥ ८९ ॥
कुष्ठं शुण्ठीं पुष्करास्थ्य चित्रकं देवदारु च।
पिष्ट्वा तैलं विपक्तव्यं द्विगुणक्षीरमयुतम् ॥ ९० ॥
अर्शसां मूढवातानां तच्छ्रेष्ठमनुवासनम्।
गुदनिःसरणं शूलं मूत्रकृच्छ्रं प्रवाहिकाम् ॥ ९१ ॥
कण्डूरुष्टदौर्बल्यमानाहं वङ्क्षणाश्रयम्।
पिच्छास्रावं गुदे शोफं वातवर्चोविनिग्रहम् ॥९२॥
उत्थानं बहुशो यच्च जयेत् तच्चानुवासनात्।
निरूहं वा प्रयुञ्जीत सक्षीरं पाञ्चमूलिकम् ॥९३॥
समूत्रक्षेहलवणं कल्कैर्युक्तं फलादिभिः।
अथ रक्तार्शसां वीक्ष्य मारुतस्य कफस्य वा ॥९४॥
अनुबन्धं ततः स्निग्धं रूक्षं वा योजयेद्भिषक्।
शक्तच्छ्रावं खरं रूक्षमधो निर्याति नानिलः ॥९५॥
कण्डूरुगुदशूलं च हेतुर्यदि च रूक्षणम्।
तत्रानुबन्धो वातस्य श्लेष्मणो यदि विट्स्रथा ॥९६॥
श्लेष्मा पीता गुरु स्निग्धा सपिच्छस्तिमितो गुदः।
हेतुस्निग्धगुरुर्विद्याद् यथास्वं चास्रलक्षणात् ॥ ९७ ॥
दुष्टेऽस्रे शोधनं कार्यं लङ्घनं च यथाबलम्।
यावच्च दोषैः कालुष्यं सुतेस्तावदुपेक्षणम् ॥९८॥

दोषाणां पाचनार्थं च वह्निसन्धुक्षणाय च।
संग्रहाय च रक्तस्य परं तिक्तैरुपाचरेत् ॥ ९९ ॥
यत्तु प्रक्षीणदोषस्य रक्तं वातोल्बणस्य वा।
स्नेहैस्तच्छोधयेद् युक्तैः पानाभ्यञ्जनवस्तिषु ॥ १०० ॥
यत्तु पित्तोल्बणं रक्तं घर्मकाले प्रवर्त्तते।
स्तम्भनीयं तदेकान्तान्न चेद्धातक्यनुगम् ॥ १०१ ॥
सकफेऽस्रे पिबेत् पाक्यं गुडूचीं कुटजवल्कलम्।
किराततिक्तकं शुण्ठीं धन्वयासं कुचन्दनम् ॥ १०२ ॥
दार्वीत्वगनिम्बसेव्यानि त्वचं वा दाडिमोद्भवाम्।
कुटजत्वक् पलं तार्क्ष्यं माक्षिकं घृणवल्लभाम् ॥ १०३ ॥
पिबेत् तण्डुलतोयेन कल्कितं वा मयूरकम्।
तुलां दिव्याम्भसि पचेदार्द्रायाः कुटजत्वचः ॥ १०४ ॥
नीरसायां त्वचि क्वाथे दद्यात् सूक्ष्मरजोक्तान।
समङ्गाफलिनीमोचरसाम्बुघ्नशकान् समान् ॥१०५॥
तैश्च शक्रयवान् पूते ततो दर्वीप्रलेपनम्।
पक्वावलेह लीढ्वा च त यथाग्निबलं पिबेत् ॥ १०६ ॥
पेयां मण्डं पयश्छागं मद्यं वा छागदुग्धभुक्।
लेहोऽयं शमयत्याशु रक्तातीसारपायुजान् ॥ १०७ ॥
बलवद्रक्तपित्तं च सवदूर्ध्वमधोऽपि वा।
कुटजत्वक्तुलां द्रोणे पचेदष्टांशशेषिताम् ॥ १०८ ॥
कल्कीकृत्य क्षिपेत्तत्र तार्क्ष्यशैल कटुत्रयम्।
रोध्रहयं मोचरसं बलां दाडिमजां त्वचम् ॥ १०९ ॥
बिल्वकर्कटिका मुस्तं समङ्गा धातकीफलम्।
पलोन्मितं दशपल कुटजस्यैव च त्वचः ॥ ११० ॥
विंशत्पलानि गुडतो घृतात् पूते च विंशतिः।
तत्पक्वं लेहतां यातं धान्ये पक्वस्थितं लिहन् ॥ १११ ॥

सर्वार्शोग्रहणीदोषश्वासकासान् नियच्छति ।
रोध्रं तिलाम्बोचरसं समङ्गां चन्दनोत्पलम् ॥११२॥
पाययित्वाजदुग्धेन शालींस्तेनैव भोजयेत् ।
यष्ट्याह्वपद्मकानन्तापयस्याक्षीरमोरटम् ॥ ११३ ॥
सर्पिताम्बु पातव्यं शीततोयेन तेन वा ।
रोध्रकट्वङ्गकुटजसमङ्गाशाल्मलीत्वचम् ॥ ११४ ॥
हिमकेसरयष्ट्याह्वं सेव्यं वा तण्डुलाम्बुना ।
यवानीन्द्रयवाः पाठा विल्वं शुण्ठीरसाञ्जनम् ॥ ११५ ॥
चूर्णश्च लेहितः शूले प्रवृत्ते चातिशोणिते ।
दुग्धिकाकणटकारीभ्यां सिद्धं सर्पिः प्रशस्यते ॥ ११६ ॥
अथवा धातकीरोध्रकुटजत्वक्फलोत्पलैः ।
सकेसरैर्यवक्षारदाडिमस्वरसेन वा ॥ ११७ ॥
शर्कराम्भोजकिञ्जल्कसहितं सह वा तिलैः ।
अभ्यस्तं रक्तगुदजान् नवनीतं नियच्छति ॥ ११८ ॥
छागादिनवनीताज्यक्षीरमांसानि जाङ्गलः ।
अनम्लो वा कदम्लो वा सवास्तूकरसो रसः ॥ ११९ ॥
रक्तशालिः सरो दध्नः षष्टिकस्तरुणी सुरा ।
तरुणश्च सुरामण्डः शोणितस्यौषधं परम् ॥ १२० ॥
पेया यूषरसाद्येषु पलाण्डुः केवलोऽपि वा ।
स जयत्युल्बणं रक्तं मारुतं च प्रयोजितः ॥ १२१ ॥
वातोल्बणानि प्रायेण भवन्त्यस्रेऽतिनिःसृते ।
अर्शांसि तस्मादधिकं तज्जये यत्नमाचरेत् ॥ १२२ ॥
दृष्ट्वास्रपित्तं प्रबलमबलौ च कफानिलौ ।
शोतोपचारः कर्त्तव्यः सर्वथा तत्प्रशान्तये ॥ १२३ ॥
तावदेवं समस्तस्य स्निग्धोष्णैस्तर्पयेत् ततः ।
रसैः कोष्णैश्च सर्पिर्भिरवपीड़कयोजितैः ॥ १२४ ॥

सेचयेत् तं क्वोष्णैश्च कामं तैलपयोघृतैः।
यवासकुशकाशानां मूलं पुष्पं च शाल्मलेः॥ १२५॥
न्यग्रोधोदुम्बराश्वत्थशुङ्गाश्च,द्विपलोन्मिताः।
त्रिप्रस्थे सलिलस्यैतत् क्षीरप्रस्थं च साधयेत्॥ १२६॥
क्षीरशेषे कषाये च तस्मिन् पूते विमिश्रयेत्।
कल्कीकृतं मोचरसं समङ्गां चन्दनोत्पलम्॥ १२७॥
प्रियङ्गुं कौटजं बीजं कमलस्य च केसरम्।
पिच्छावस्तिरयं सिद्धः सघृतक्षौद्रशर्करः॥ १२८॥
प्रवाहिकागुदभ्रंशरक्तस्रावज्वरापहः।
यष्ट्याह्वपुष्करीकेण तथा मोचरसादिभिः॥ १२९॥
क्षीरद्विगुणितः पक्वो देयः स्नेहोऽनुवासनम्।
मधुकोत्पलरोध्रास्रसमङ्गा बिल्वचन्दनम्॥ १३०॥
चविकातिविषा मुस्तं पाठा क्षारो यवाग्रजः।
दार्वीत्वग् नागरं भार्ङ्गी चित्रको देवदारु च॥ १३१॥
चाङ्गेरीस्वरसे सर्पिः साधितं तैस्त्रिदोषजित्।
अर्शोऽतिसारग्रहणीपाण्डुरोगज्वरारुचौ॥ १३२॥
मूत्रकृच्छ्रे गुदभ्रंशे वस्त्यानाहे प्रवाहणे।
पिच्छास्रावेऽर्शसां शूले देयं तत् परमौषधम्॥ १३३॥
व्यत्यासान्मधुरास्तानि शीतोष्णानि च योजयेत्।
नित्यमग्निबलापेक्षी जयत्यर्शःकृतान् गदान्॥ १३४॥
उदावर्त्तार्त्तमभ्यज्य तैलैः शीतज्वरापहैः।
स्निग्धैः स्वेदयेत्पिण्डैर्वर्त्तिमस्रे गुदे ततः॥ १३५॥
अभ्यक्तां तत् कराङ्गुष्ठसन्निभामनुलोमनीम्।
दद्यात् श्यामात्रिवृद्दन्तीपिप्पलीनीलिनीफलैः॥ १३६॥
विचूर्णितैर्द्विलवणैर्गुडगोमूत्रसंयुतैः।
तद्वन्नागधिकाराठग्रहधूमैः ससर्षपैः॥ १३७॥

एतेषामेव वा चूर्णं गुदे नाड्या विनिर्धमेत् ।
तद्विधाते सुतीक्ष्णन्तु वस्तिं स्निग्धं प्रपीड़येत् ॥ १३८ ॥
ऋजु कुर्य्याद् गुदशिरो विण्मूत्रमरुतोऽस्य सः ।
भूयोऽनुबन्धे वातघ्नैर्विरेच्यः स्नेहरेचनैः ॥ १३९ ॥
अनुवास्यश्च रौक्ष्याद्धि सङ्गो मारुतवर्चसोः ।
त्रिकटुत्रिपटुश्रेष्ठादन्त्यरुष्करचित्रकम् ॥ १४० ॥
जर्जरं स्नेहमूत्राक्तमन्तर्धूमं विपाचयेत् ।
शरावसम्पुटे क्षिप्ते क्षारः कल्याणकाह्वयः ॥ १४१ ॥
स पीतः सर्पिषा युक्तो भक्ते वा स्निग्धभोजिना ।
उदावर्त्तविबन्धार्शोगुल्मपाण्डूदरक्रिमीन् ॥ १४२ ॥
मूत्रसङ्गाश्मरीशोफहृद्रोगग्रहणीगदान् ।
मेहप्लीहरुजानाहश्वासकासांश्च नाशयेत् ।
सर्वं च कुर्य्याद् यत् प्रोक्तमर्शसां गाढ़वर्चसाम् ॥ १४३ ॥
द्रोणेऽपां पूतिवल्कद्वितुलमथ पचेत् पादशेषे च तस्मिन
देयाशीतिर्गुडस्य प्रतनुकरजसो व्योषतोऽष्टौ पलानि ।
एतन्मासेन जातं जनयति परमाग्निबलं पक्तिशक्तिं
शुक्रं कृत्वानुलोम्यं प्रजयति गुदजश्लोहगुल्मोदराणि ॥१४४॥
पचेत्तुलां पूतिकरञ्जवल्काद् द्वे मूलतश्चित्रककण्टकार्य्योः ।
द्रोणत्रयेऽपां चरणावशेषे पूते शतं तत्र गुडस्य दद्यात् ॥१४५॥
पलिकञ्च सुचूर्णितं त्रिजातत्रिकटुग्रन्थिकदाडिमाग्निभेदम् ।
परपुष्करमूलधान्यचव्यं हपुषामार्द्रकमम्लवेतसं च ॥ १४६ ॥
शीतीभूतं क्षौद्रविश्लेषितार्द्धं
मार्द्वीकाचावीजपूराद्धकैश्च ।
युक्तं कामं गण्डिकाभिस्तथैच्योः
सर्पिः पात्रे मासमात्रेण जातम् ॥ १४७ ॥
शुक्रं क्रकचमिवेदं दुर्नाम्नां वह्निदीपनं परमम् ।

पाण्डुगरोदरगुल्मप्लीहानाहाश्मकृच्छ्रघ्नम् ॥ १४८ ॥
द्रोण पीलुरसस्य वस्त्रगलितं न्यस्तं हविर्भाजने
युञ्जीत द्विपलैर्मदामधुफलाखर्जूरधात्रीफलैः ।
पाठामार्द्रिदुरालभामुविदुलव्योषत्वगीलोल्लकैः
सूक्ष्माकोललवङ्गवेल्लचपलामूलाग्निकैः पालिकैः ॥१४९॥

गुडपलशतयोजितं निवाते
निहितमिदं प्रपिबेच्च पक्षमात्रात् ।
निशमयति गुदाङ्कुरान् सगुल्मान्
अनलबलं प्रबलं करोति चाशु ॥ १५० ॥
एकैकशो दशपले दशमूलकुष्ठ-
पाठाद्वयार्कषुणवल्लभकट्फलानाम् ।
दग्धे शुतेऽनु कलशेन जलेन पक्वे
पादस्थिते गुडतुलां पलपञ्चकञ्च ॥ १५१ ॥
दद्यात् प्रत्येक व्योषचव्याभयानां
वह्नेर्मुष्टी द्वे यवक्षारतश्च ।
दर्वीमालिपन् हन्ति लीढ़ो गुडोऽयं
गुल्मप्लीहार्शं कुष्ठमेहाग्निसादान् ॥ १५२ ॥
तोयद्रोणे चित्रकमूलतुलार्द्धं
साध्यं यावत् पादजलस्थमप्येदम् ।
अष्टौ दत्त्वा जीर्णगुडस्य फलानि
क्षाद्यं भूयः सान्द्रतया सममेतत् ॥ १५३ ॥
त्रिकटुकमिसिपथ्याकुष्ठमुस्तावराङ्ग-
कृमिरिपुदहनैलाचूर्णकीर्णोऽवलेहः ।
जयति गुदजकुष्ठप्लीहगुल्मोदराणि
प्रबलयति हुताशं शश्वदभ्यस्यमानः ॥१५४॥
गुडव्योषवराजेवतिलारुष्करचित्रकैः ।

अर्शांसि हन्ति गुटिका त्वग्विकार च शोलिता ॥१५५॥
सूक्ष्मिलं सौरणं कन्द पक्वाग्नौ पुटपाकवत् ।
अद्यात् सतैललवण दुर्नामविनिवृत्तये ॥ १५६ ॥
मरिचपिप्पलिनागरचित्रकान्
क्रमविवर्द्धितभागसमाङ्कितान् ।
शिखिचतुर्गुणसूरणयोजितान्
कुरु गुडेन गुडान् गुदजच्छिदः ॥ १५७ ॥
चूर्णीकृताः षोडशसूरणस्य
भागास्ततोऽर्द्धेन च चित्रकस्य ।
महौषधाद् द्वौ मरिचस्य चैकः
गुडेन दुर्नामजयाय पिण्डी ॥ १५८ ॥
पथ्यानागरकृष्णां करञ्जवेल्लाग्निभिः सितातुल्यैः ।
वडवामुख इव जरयति बहुगुर्वपि भोजन चूर्णम् ॥१५९॥
कलिङ्गलाङ्गलीकृष्णावह्निप्रयामार्गतण्डुलैः ।
भूनिम्बसैन्धवगुडैर्गुडा गुदजनाशनाः ॥ १६० ॥
लवणोत्तमवह्निकलिङ्गयवान्
चिरविल्वमहापिचुमन्दयुतान् ।
पिब सप्त दिनं मथितालुडितान्
यदि मर्दितुमिच्छसि पायुरुहान् ॥ १६१ ॥
शुष्केषु भल्लातकमथ्यमुक्त भैषज्यमार्द्रेषु तु वत्सकत्वक् ।
सर्वेषु सर्वर्तुषु कालशेयमर्शःसु बल्यं च मलापहञ्च ॥१६२॥
भित्त्वा विबन्धाननुलोमनाय यन्मारुतस्याग्निबलाय यच्च ।
तदन्नपानौषधमर्शसाच सेव्यं विवर्ज्यं विपरीतमस्मात् ॥१६३॥
अर्शोऽतिसारग्रहणीविकाराः प्रायेण चान्योऽन्यनिदानभूताः ।
सन्त्येऽनले सन्ति न सन्ति दोषे रक्षेदतस्तेषु विशेषतोऽग्निम्
॥ १६४ ॥

नवमोऽध्यायः।

अथातोऽतीसारचिकित्सितं व्याख्यास्यामः॥
अतीसारो हि भूयिष्ठं भवत्यामाशयान्वयः।
हत्वाग्निं वातजेऽप्यस्मात् प्राक् तस्मिन् लङ्घनं हितम्॥१॥
शूलानाहप्रसेकार्त्तं वामयेदतिसारिणम्।
दोषाः सन्निचिता ये च विदग्धाहारमूर्च्छिताः॥२॥
अतिसाराय कल्पन्ते तेषूपेक्षैव भेषजम्।
भृशोत्क्लेशप्रवृत्तेषु स्वयमेव चलात्मसु॥३॥
प्रयोज्य नतु संग्राहि पूर्वमामातिसारिणि।
अपि चाध्मानगुरुता शूलस्तैमित्यकारिणि॥४॥
प्राणदा प्राणदा दोषे विबद्धे सप्रवर्त्तिनी।
पिबेत् प्रक्वथितांस्तोये मध्यदोषो विशोषयन्॥५॥
भूतीकपिप्पलीशुण्ठीवचाधान्यहरीतकीः।
अथवा बिल्वधनिका मुस्ता नागरबालकम्॥६॥
विडपाठावचापथ्याकृमिजिन्नागराणि वा।
शुण्ठीधनवचामाद्री बिल्ववत्सकहिङ्गु वा॥७॥
शस्यते त्वल्पदोषाणामुपवासोऽतिसारिणाम्।
वचाप्रतिविषाभ्यां वा मुस्तापर्पटकेन वा॥८॥
क्षीवेरनागराभ्यां वा विपक्वं पाययेज्जलम्।
युक्तेऽन्नकाले क्षुत्क्षामं लघ्वन्नं प्रतिभोजयेत्॥९॥
तथा स शीघ्रं प्राप्नोति रुचिमग्निबलं बलम्।
नक्रेणावन्तिसोमेन यथाग्वा तर्पणेन वा॥१०॥
सुरया मधुना चाथ यथासात्म्यमुपाचरेत्।
भोज्यानि कल्पयेदूर्ध्वं ग्राहिदीपनपाचनैः॥११॥

बालविल्वशठीधान्यहिङ्गुवृक्षाम्लदाडिमैः।
पलाशपुष्पाऽजाजीयवानीविडसैन्धवैः॥ १२॥
लघुना पञ्चमूलेन पञ्चकोलेन पाठया।
शालपर्णीबलाविल्वैः पृश्निपर्ण्या च साधिता॥ १३॥
दाडिमाम्ला हिता पेया कफपित्ते समुल्बणे।
अभया पिप्पलीमूलविल्वैर्वातानुलोमनी॥ १४॥
विबद्धं दोषबहुलो दीप्ताग्निर्योऽतिसार्यते।
कृष्णाविडङ्गत्रिफलाकषायैस्तं विरेचयेत्॥ १५॥
पेयां युञ्जाद्विरिक्तस्य वातघ्नैर्दीपनैः कृताम्।
आमे परिणते यस्तु दोषेऽग्नावुपवेश्यते॥ १६॥
सफेनपिच्छं सरुजं सविबन्धं पुनः पुनः।
अल्पाल्पमल्पं समलं निर्विड् वा सप्रवाहिकम्॥१७॥
दधितैलघृतक्षीरैः सशुण्ठीं सगुडां पिबेत्।
खिन्नानि गुडतैलेन भक्षयेद् बदराणि वा॥ १८॥
गाढविड्विहितैः शाकैर्बहुस्नेहैस्तथा रसैः।
क्षुधितं भोजयेदेनं दधिदाडिमसाधितैः॥ १९॥
शाल्योदनं तिलैर्माषैर्मुद्गैर्वा साधु साधितम्।
शठ्यामूलकपोतायाः पाठायाः स्वस्तिकस्य वा॥ २०॥
सुषायवानीकर्कारुक्षीरिणीचिर्भटस्य वा।
उपोदकाया जीवन्त्या वाकुच्या वास्तुकस्य वा॥ २१॥
सुवर्चलायाश्चुक्रोर्वा लोणिकाया रसैरपि।
कूर्मवर्त्तकलोपाकशिखितित्तिरिकौक्कुटैः॥ २२॥
विल्वमुस्ताग्निभैषज्यधातकीपुष्पनागरैः।
पक्वातिसारजित्तक्रे यवागूर्दाधिकी तथा॥ २३॥
कपित्थकच्छुराफञ्जीयूथिकावटशैलुजैः।
दाडिमीशुण्ठकार्पासीशाल्मलीमोचपल्लवैः॥ २४॥

कल्को बिल्वशलाटूनां तिलकल्कश्च तक्रभः।
दध्नः सरोऽम्लः सक्षौद्रः खलो हन्ति प्रवाहिकाम् ॥ २५ ॥
मरिचं धनिका जाजीतिन्तिडीकशठीविडम्।
दाडिमं धातकीपाठात्रिफलापञ्चकोलकम् ॥ २६ ॥
यावशूकं कपित्थाम्लजम्बुमध्यं सदीप्यकम्।
पिष्टैः षड्गुणबिल्वैस्तैर्दधि मुद्गरसे गुडे ॥ २७ ॥
स्नेहे च यमके सिद्धः खलोऽयमपराजितः।
दीपनः पाचनो ग्राही रुच्यो विघ्नविनाशनः ॥ २८ ॥
कोलानां बालबिल्वानां कल्कैः शालियवस्य च।
मुद्गमाषतिलानां च धान्ययूषं प्रकल्पयेत् ॥ २९ ॥
ऐकध्यं यमके भृष्टं दधिदाडिमसारिकम्।
वर्चःक्षये शुष्कमुखं शाल्यन्नं तेन भोजयेत् ॥ ३० ॥
दध्नः सरं वा यमके भृष्टं सगुडनागरम्।
सुरा वा यमके भृष्टा व्यञ्जनार्थं प्रयोजयेत् ॥ ३१ ॥
फलाम्लं यमके भृष्टं यूषं गञ्जनकस्य वा।
भृष्टान् वा यमके सक्तून् खादेद् व्योषावचूर्णितान् ॥ ३२ ॥
माषान् सुसिद्धांस्तद्वद् वा घृतमस्तूपसेवनान्।
रसं सुसिद्धं पूतं वा छागमेषान्तराधिजम् ॥ ३३ ॥
यवेष्टाड़िमसाराम्लं सधान्यलवणागरम्।
रक्तशाल्योदनं तेन भुञ्जानः प्रपिबंश्च तम् ॥ ३४ ॥
वर्चःक्षयकृतैराशु विकारैः परिमुच्यते।
बालबिल्वं गुडं तैलं पिप्पलीविश्वभेषजम् ॥ ३५ ॥
लिह्यादहते प्रतिहते सशूलः सप्रवाहिकः।
वल्कश्च शावरं पुष्पं धातक्या बदरीदलम् ॥ ३६ ॥
पिबेद्दधिसरक्षौद्रकपित्थस्वरसाप्लुतम्।
विबद्धवातवर्चास्तु बहुशूलप्रवाहिकः ॥ ३७ ॥

सरक्तपिच्छस्तृष्णार्त्तः क्षीरसौहित्यमर्हति ।
यमकस्योपरि क्षीरं धारोष्णं वा प्रयोजयेत् ॥ ३८ ॥
घृतमेरण्डमूलेन बालविल्वेन वा पुनः ।
पयस्युत्क्वाथ्य मुस्तानां विंशतिर्विगुणेऽम्भसि ॥ ३९ ॥
क्षीरावशिष्टं तत्पीतं हन्यादामं सवेदनम् ।
पिप्पल्या पिबतः सूक्ष्मं रजो मरिचजन्म वा ॥ ४० ॥
चिरकालानुषक्तापि नश्यत्याशु प्रवाहिकाम् ।
निरामरूपं शूलार्त्तं लङ्घनाद्यैश्च कर्षितम् ॥ ४१ ॥
रूक्षकोष्ठमपेक्ष्याग्निं सक्षारं पाययेद् घृतम् ।
सिद्धं दधिसुरामण्डे दशमूलस्य चाम्भसि ॥ ४२ ॥
सिन्धूत्थपञ्चकोलाभ्यां तैल्वं सद्योऽर्त्तिनाशनम् ।
षड्भिः शुण्ठ्याः पलैर्द्वाभ्यां द्वाभ्यां ग्रन्थ्यग्निसैन्धवात् ॥ ४३ ॥
तैलप्रस्थं पचेद्दध्ना निःसारकरुजापहम् ।
एकतो मांसदुग्धाज्य पुरीषग्रहशूलजित् ॥ ४४ ॥
पानानुवासनाभ्यङ्गप्रयुक्तं तैलमेकतः ।
तद्धि वातजितामग्र्य शूलं च विगुणोऽनिलः ॥ ४५ ॥
धात्वन्तरोपमर्दाद्धि वै चलो व्यापी स्वधामगः ।
तैल मन्दानलस्यापि युक्त्या शर्मकरं परम् ।
वायुाग्नये सतैले हि विस्रंसो नावतिष्ठते ॥ ४६ ॥
क्षीणे मले स्वायतनच्युतेषु दोषान्तरेष्वीरण एकवीरे ।
कोनिष्ठनन्प्राणितिकोष्ठशूली नान्तर्बहिस्तैलपरो यदि स्यात्४७
गुदरुग्भ्रंशयोर्युञ्जात् सक्षीर साधित हविः ।
रसे कोलाम्लचाङ्गेर्योर्दध्नि पिष्टे च नागरे ॥ ४८ ॥
तैरेव चाम्लैः संयोज्यं सिद्ध सुश्लक्ष्णकल्कितैः ।
धान्योषणविडाजाजीपाञ्चकोलकदाडिमैः ॥ ४९ ॥
योजयेत् क्षे हवस्तिं वा दशमूलेन साधितम् ।

शठीशताह्वाकुष्ठैर्वा वचया चित्रकेण वा ॥ ५० ॥
प्रवाहणे गुदभ्रंशे मूत्राघाते कटिग्रहे।
मधुराम्लैः शृतं तैल घृतं वाप्यनुवासनम् ॥ ५१ ॥
प्रवेशयेद् गुदं ध्वस्तमभ्यक्तं स्वेदितं मृदु।
कुर्याच्च गोः फणाबन्ध मध्यच्छिद्रेण चर्मणा ॥ ५२ ॥
पञ्चमूलस्य महतः क्वाथ क्षीरे विपाचयेत्।
उन्दुरु चान्त्ररहितं तेन वातघ्नकल्कवत् ॥ ५३ ॥
तैलं पचेद् गुदभ्रंश पानाभ्यङ्गेन तज्जयेत्।
पैत्ते तु सर्पि तीक्ष्णोष्णवर्जं प्रागिव लङ्घनम् ॥ ५४ ॥
लड्वान् पिबेत् षडङ्गाम्बु सभूनिम्ब ससारिवम्।
पेयादि क्षुधितस्यान्नमग्निसन्धुक्षण हितम् ॥ ५५ ॥
हरीतक्यादिगणाभीरुद्विबलाशूर्पपर्णिभिः।
पाययेदनुबन्धे तु सक्षौद्रं तण्डुलाम्भसा ॥ ५६ ॥
पाठा वत्सकबीजत्वग्दार्वी ग्रन्थिकशुण्ठि वा।
वत्सकस्य फलं पिष्टं सवल्कं मधुसर्पिषम् ॥ ५७ ॥
क्वाथ वातिविषाबिल्ववत्सकोदीच्यमुस्तजम्।
अथवातिविषामूर्वानिशेन्द्रयवताक्ष्यजम् ॥ ५८ ॥
समध्वतिविषाशुण्ठीमुस्तेन्द्रयवकट्फलम्।
पल वत्सकबीजस्य श्रपयित्वा रस पिबेत् ॥ ५९ ॥
यो रसाशी जयेच्छीघ्र सपैत्तं जठरामयम्।
मुस्ताकषायमेव वा पिबेन्मधुसमायुतम् ॥ ६० ॥
सक्षौद्रं शाल्मलीबल्कषायं वा हिमाह्वयम्।
किराततिक्तक मुस्तं वत्सकं सुरसाञ्जनम् ॥ ६१ ॥
कटङ्कटेरी क्षीवेरं बिल्वमध्यं दुरालभाम्।
तिलान् मोचरसं रोध्र समङ्गां कमलोत्पलम् ॥ ६२ ॥
नागरं धातकीपुष्पं दाडिमस्य त्वगुत्पलम्।

अर्द्धश्लोकैः स्मृता योगाः सचौद्रास्तण्डुलाम्बुना ॥६३॥
निशेन्द्रयवरोध्रैलाकाथः पक्वातिसारनुत् ।
रौध्राम्रषाप्रियङ्ग्वादिमण्डांस्तद्वत् पृथक् पिबेत् ॥ ६४ ॥
कट्वङ्गकल्कयष्ट्याह्वफलिनीदाडिमाङ्कुरैः ।
पेया विलेपी खलकान् कुर्य्यात्सदधिदाडिमात् ॥६५॥
तद्वदधित्थविल्वाम्र जम्बुमध्यैः प्रकल्पयेत् ।
अजापयः प्रयोक्तव्यं निरामे तेन चेच्छमः ॥ ६६ ॥
दोषाधिक्यान्न जायेत बलिनं तं विरेचयेत् ।
व्यत्यासेन शकृद्रक्तमुपवेश्येत योऽपि वा ॥ ६७ ॥
पलाशफलनिर्यूहं युक्तं वा पयसा पिबेत् ।
ततोऽनु कोष्णं पातव्यं क्षीरमेव यथाबलम् ॥ ६८ ॥
प्रवाहिते तेन मले प्रशाम्यत्युदरामयः ।
पलाशवल्क्यो वा क्वाथमाण्ड विशोधनी ॥ ६९ ॥
ससर्पिषां क्रियमाणायां शूलं यद्यनुवर्त्तते ।
सुतदोषस्य तं शीघ्रं यथावङ्क्षनुवासयेत् ॥ ७० ॥
धातपुष्पावरीभ्यां च विल्वेन मधुकेन च ।
तैलपादं पयोयुक्तं पक्वमन्वासनं घृतम् ॥ ७१ ॥
अशान्तावित्यतीसारे पिच्छावस्तिः परं हितः ।
परिवेष्य कुशैरार्द्रैरार्द्रहस्तानि शाल्मलेः ॥ ७२ ॥
क्षणवृत्तिकयालिप्य स्वेदयेद्धोमयाग्निना ।
मृच्छोषे तानि सङ्कुद्य तत्पिण्डं मुष्टिसम्मितम् ॥७३॥
मर्दयेत्पयसः प्रस्थे पूतेनाश्वापयेत्ततः ।
नतयष्ट्याह्वकल्काज्यक्षौद्रतैलवतानु च ।
ज्ञातो भुञ्जीत पयसा जाङ्गलेन रसेन वा ॥ ७४ ॥
पित्तातिसारज्वरशोफगुल्मप्लीहासमीरणास्रग्रहणीविकारान् ।
जयत्ययं शीघ्रमतिप्रवृत्तिं विरेचनास्थापनयोश्च वस्तिः ॥७५॥

फाणितं कुटजोत्थं च सर्वातीसारनाशनम् ॥ ७६ ॥
वत्सकादिसमायुक्तं साम्बष्ठादिसमाह्विकम्।
निरग्निरामं दोषाग्नेरपि सासृक् चिरोत्थितम् ॥ ७७ ॥
नानावर्णमतीसार पुटपाकैरुपाचरेत्।
त्वक्पिच्छाद् दीर्घवृन्तस्य श्रीपर्णीपल्लवाद्वतात् ॥ ७८ ॥
मृक्षिसादग्निना स्विन्नाद्रसं निष्पीडितं हितम्।
अतीसारी पिबेद्युक्तं मधुना सितयाऽथवा ॥ ७९ ॥
एवं क्षीरद्रुमत्वग्भिस्तत्पत्रैश्च कल्पयेत्।
कट्वङ्गत्वग्घृतयुता स्वेदिता सलिलोल्बणा ॥ ८० ॥
सक्षौद्रा ह्यतीसारं बलवन्तमपि द्रुतम्।
पित्तातिसारी सेवेत पित्तलान्येव वा पुनः ॥ ८१ ॥
रक्तातिसारं कुरुते तस्य पित्तं सदाऽत्ययम्।
दारुणं गुदपाकाच्च तत्र छागं पयो हितम् ॥ ८२ ॥
पद्मोत्पलसमङ्गाभिः सृतं मोचरसेन वा।
सारिवायष्टिरोध्रैर्वा प्रसवैर्वा वटादिजैः ॥ ८३ ॥
सक्षौद्रशर्करं पाने भोजने गुदसेचने।
तद्वत्साद्योऽनभ्राः साज्याः पानान्नयोर्हिताः ॥ ८४ ॥
काश्मर्य्यफलयूषश्च किञ्चिदम्लः सशर्करः।
पयस्यर्द्धोदके छागे क्षीरेरोत्पलनागरैः ॥ ८५ ॥
पेया रक्तातिसारघ्नी पृश्निपर्णी रसान्विता।
प्रागभक्तं नवनीतं वा लिह्यान्मधुसिताप्लुतम् ॥ ८६ ॥
बलिन्यस्रेऽस्रमे वाजं मार्गं वा घृतभर्जितम्।
क्षीरानुपानं क्षीराशी क्षीरोद्भवं घृतम् ॥ ८७ ॥
कपिञ्जलरसाशी वा लिह्यादारोग्यमश्नुते।
पीत्वा शतावरीकल्कं क्षीरेण क्षीरभोजनः ॥ ८८ ॥
रक्तातिसारं हन्त्याशु तया वा साधितं घृतम्।

लाक्षागरवैदेहीकटुकादार्वीवल्कलैः ॥ ८८ ॥
सर्पिः सेन्द्रयवैः सिद्धं पेयामण्डावचारितम् ।
अतिसारं जयेच्छीघ्रं त्रिदोषमपि दारुणम् ॥ ८० ॥
क्षणमृच्छङ्खयष्ट्याह्वचौद्राक्तण्डुलोदकम् ।
जयत्यसृं प्रियङ्गुश्च तण्डुलाम्बु मधुप्लुतम् ॥ ८१ ॥
कल्कस्त्रिलानां क्षणानां शर्करापाञ्चभागिकः ।
आजेन पयसा पीतः सद्यो रक्तं नियच्छति ॥ ८२ ॥
पीत्वा सशर्कराक्षौद्र चन्दन तण्डुलाम्बु ना ।
दाहतृष्णाप्रमेहेभ्यो रक्तस्रावाच्च मुच्यते ॥ ८३ ॥
गुदस्य दाहे पाके वा सेकलेपा हिता हिमाः ।
अल्पाल्पं बहुशो रक्तं सशूलमुपवेश्यते ॥ ८४ ॥
यदा विबद्धो वायुश्च कृच्छ्राच्चरति वा न वा ।
पिच्छावस्तिं तदा तस्य पूर्वोक्तमुपकल्पयेत् ॥ ८५ ॥
पल्लवान् जर्जरीकृत्य शिंशपाकोविदारयोः ।
पचेद् यवांश्च सक्काथो घृतक्षीरसमन्वितः ॥ ८६ ॥
पिच्छासुतौ गुदभ्रंशे प्रवाहणरुजासु च ।
पिच्छावस्तिः प्रयोक्तव्यः क्षतक्षीणबलावहः ॥ ८७ ॥
प्रपौण्डरीकसिद्धेन सर्पिषा चानुवासनम् ।
रक्तं विट्सहितं पूर्वं पश्चाद्या योऽतिसार्यते ॥ ८८ ॥
अतावरीघृतं तस्य लेहार्थमुपकल्पयेत् ।
शर्करार्द्धांशकं लोढं नवनीतं नवोद्धृतम् ॥ ८९ ॥
क्षौद्रपादं जयेच्छीघ्रं तं विकारं हिताशिनः ।
न्यग्रोधोदुम्बराश्वत्थशृङ्गानापोथ्य वासयेत् ॥ १०० ॥
अहोरात्रं जले तप्ते घृतं तेनाभ्रसा पचेत् ।
तदर्द्धशर्करायुक्तं लेहयेत् क्षौद्रपादिकम् ॥ १०१ ॥
अधो वा यदि वाप्यूर्द्धं यस्य रक्तं प्रवर्त्तते ।

श्लेष्मातिसारे वातोक्तं विशेषादामपाचनम् ॥ १०२ ॥
कर्त्तव्यमनुबन्धस्य पिबेत् पक्वाग्निदीपनम् ।
बिल्वकर्कटिकामुस्तप्राणदाविश्वभेषजम् ॥ १०३ ॥
वचाविडङ्गभूतीकधानकामरदारु वा ।
अथवा पिप्पलीमूलं पिप्पलीद्वयचित्रकाः ॥ १०४ ॥
पाठाग्निवल्लकग्रन्थितिक्ताग्रन्थिवचाभयाः ।
क्वथिता यदि वा पिष्टाः श्लेष्मातीसारभेषजम् ॥ १०५ ॥
सौवर्चलवचाव्योषहिङ्गुप्रतिविषाभयाः ।
पिबेत् श्लेष्मातिसारार्त्तः क्वथिता कोष्णवारिणा ॥ १० ६ ॥
मध्वक्षं लीढ्वा कपित्थस्य सव्योषक्षौद्रशर्करम् ।
कट्फलं मधुयुक्तं वा मुच्यते जठरामयात् ॥ १०७ ॥
कणां मधुयुतां लीढ्वा तक्रं पीत्वा सचित्रकम् ।
भुक्त्वा वा बालबिल्वानि व्योषहृद्गुदरामयम् ॥ १०८ ॥
पाठामोचरसाम्भोदधातकीबिल्वनागरम् ।
सुकृच्छ्रमप्यतीसारं गुडतक्रेण नाशयेत् ॥ १०९ ॥
यवानीपिप्पलीमूलचातुर्जातकनागरैः ।
मरिचाग्निजलाजाजीधान्यसौवर्चलैः समैः ॥ ११० ॥
हृच्चान्नधातकीकृष्णाबिल्वदाडिमदीप्यकैः ।
त्रिगुणैः षड्गुणसितैः कपित्वाष्टगुणैः कृतः ॥ १११ ॥
चूर्णोऽतीसारगृहणीहृद्ग्रगुल्मोदरामयान् ।
कासश्वासाग्निसादार्शःपीनसारोचकान् जयेत् ॥ ११२ ॥
कर्षोन्मिता तुगाक्षीरी चातुर्जातं द्विकार्षिकम् ।
यवानीधान्यकाजाजीग्रन्थिव्योषं पलांशकम् ॥ ११३ ॥
पलानि दाडिमादष्टौ सितायाश्चैकतः कृतः ।
गुणैः कपित्थाष्टकवच्चूर्णोऽयं दाडिमाष्टकः ॥ ११४ ॥
भोज्यो वातातिसारोक्तैर्यथावस्थं रसादिभिः ।

सविड्भङ्गः समरिचः सकपित्थः सनागरः ॥ ११५ ॥
चाङ्गेरीतक्रकोलाम्लः खलः श्लेष्मातिसारजित्।
क्षीणे श्लेष्मणि पूर्वोक्तमन्नं लाजादिषट्पलम् ॥ ११६ ॥
पुराणं वा घृतं दद्यात् यवागूं मण्डमिश्रिताम्।
वातश्लेष्मविबन्धे च सुवत्यतिकफेऽपि वा ॥ ११७ ॥
शूले प्रवाहिकायां वा पिच्छावस्तिः प्रशस्यते।
वचाविल्वकणाकुष्ठशताह्वालवणान्वितः ॥ ११८ ॥
विल्वतैलेन तैलेन वचाद्यैः साधितेन वा।
बहुशः कफवातार्त्ते कोष्णेनास्थापनं हितम् ॥ ११९ ॥
क्षीणे कफे गुदे दीर्घकालातीसारदुर्बले।
अनिलः प्रबलोऽवश्यं स्वस्थानस्थः प्रजायते ॥ १२० ॥
सबली सहसा हन्यात्तस्मात्तं त्वरया जयेत्।
वायोरनन्तरं पित्तं पित्तस्यानन्तरं कफम् ॥ १२१ ॥
जयेत् पूर्वं त्रयाणां वा भवेद् यो बलवत्तमः।
भीशोकाभ्यामपि चलः शीघ्रं कुप्यत्यतस्त्रयोः ॥ १२२ ॥
कार्य्या क्रिया वातहरा हर्षणाश्वासनानि च।
यस्योच्चारादिना मूत्रं पवनो वा प्रवर्त्तते।
दीप्ताग्नेर्लघुकोष्ठस्य शान्तस्तस्योदरामयः ॥ १२३ ॥

दशमोऽध्यायः।

अथातो ग्रहणीदोषचिकित्सितं व्याख्यास्यामः ॥
ग्रहणीमाश्रितं दोषमजीर्णवदुपाचरेत्।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥ १ ॥
अन्नकाले यवाग्वादि पञ्चकोलादिभिर्युतम्।
वितरेत् पटुलघ्वन्नं पुनर्योगांश्च दीपनान् ॥ २ ॥
दद्यात् सातिविषां पेयामामे साम्लां सनागराम्।

पानेऽतिसारविहितं वारितक्रं सुधादि च ॥ ३ ॥
ग्रहणीदोषिणां तक्रं दीपनग्राहिलाघवात्।
पथ्य मधुरपाकित्वान्न च पित्तप्रदूषणम् ॥ ४ ॥
कषायोष्णविकाशित्वाद्रूक्षत्वाच्च कफे हितम्।
वाते स्नेहमूसान्द्रत्वात् सद्यस्कमविदाहि तत् ॥ ५ ॥
चतुर्णां प्रस्थमानां चूर्णाच्च पलत्रयम्।
लवणानां च चत्वारि शर्करायाः पलाष्टकम् ॥ ६ ॥
तच्चूर्णं शाकसूपान्नरागादिष्ववचारयेत्।
कासाजीर्णारुचिश्वासहृत्पार्श्वामयशूलनुत् ॥ ७ ॥
नागरातिविषा मुस्तं पाक्यमामहरं पिबेत्।
उष्णाम्बुना वा तत्कल्कं नागरं वाथवाभयाम् ॥ ८ ॥
ससैन्धवं वचाहिं वा तद्वदादित्यपर्ण्यथवा।
वर्चस्यामे सप्रवाहे पिबेद्वा दाडिमाम्बुना ॥ ९ ॥
विडेन लवणं पिष्टं बिल्वचित्रकनागरम्।
सामे कफानिले कोष्ठरुक्करे कोष्णवारिणा ॥ १० ॥
कलिङ्गहिङ्गुतिविषावचासौवर्चलाभयम्।
हृदिहृद्रोगशूलेषु पेयमुष्णेन वारिणा ॥ ११ ॥
पथ्यासौवर्चलाजाजीचूर्णं मरिचसंयुतम्।
पिप्पलीं नागरं पाठां सारिवां हृत्तोदभयम् ॥ १२ ॥
चित्रकं क्षौटजं क्षारं तथा लवणपञ्चकम्।
चूर्णीकृतं दधिसुरातन्मण्डोष्णाम्बुकाञ्जिकैः ॥ १३ ॥
पिबेदग्निविवृद्ध्यर्थं कोष्ठवातहरं परम्।
पटूनि पञ्च द्वौ क्षारौ मरिचं पञ्चकोलकम् ॥ १४ ॥
दीप्यकं हिङ्गुमुलिका बीजपूररसे कृता।
कोलदाडिमतोये वा परं पाचनदीपनी ॥ १५ ॥
तालीसपत्रचविकामरिचानां पलं पलम्।

कृष्णातमूलयोर्द्वे द्वे पले शुण्ठीपलत्रयम् ॥ १६ ॥
चतुर्जातमुशीरं च कर्षांशं श्लक्ष्णचूर्णितम्।
गुडेन वटकान् कृत्वा त्रिगुणेन सदा भजेत् ॥ १७ ॥
मद्ययूषरसारिष्टमस्तुपेया पयोऽनुपः।
वातश्लेष्मात्मनां कृच्छ्रग्रहणीपार्श्वहृद्रुजाम् ॥ १८ ॥
ज्वरश्वयथुपाण्डुत्वग्गुल्मपानाह्यर्शसाम्।
प्रसेकपीनसश्वासकासानां च निवृत्तये ॥ १९ ॥
अभयां नागरस्थाने दद्यादत्रैव विड्ग्रहे।
कृच्छ्रादिषु च पैत्तेषु चतुर्गुणसितान्विताः ॥ २० ॥
पक्वेन वटकाः कार्य्या गुडेन सितयापि वा।
परं हि वह्निसम्पर्काल्लघिमानं भजन्ति ते ॥ २१ ॥
अथैनं परिपक्वाममाकृतग्रहणीगदम्।
दीपनीययुतं सर्पिः पाययेदल्पशो भिषक् ॥ २२ ॥
किञ्चित् सम्मुच्छिते त्वग्नौ सक्तविण्मूत्रमारुतम्।
द्रवैर्द्रवैर्वा सस्नेहैः स्निग्धाभ्यक्तं निरूहयेत् ॥ २३ ॥
ततः एरण्डतैलेन सर्पिषा तैल्वकेन वा।
सञ्चारेणानिले शान्ते स्नस्तदोषं विरेचयेत् ॥ २४ ॥
शुद्धरूक्षाशयं वह्निवर्च्चस्कं चानुवासयेत्।
दीपनीयाम्लवातघ्नसिद्धतैलेन तं ततः ॥ २५ ॥
निरूढं च विरिक्तं च सम्यक् चाप्यनुवासितम्।
लघुन्नप्रतिसंयुक्तं सर्पिरभ्यासयेत् पुनः ॥ २६ ॥
पञ्चमूलाभयाव्योषपिप्पलीमूलसैन्धवैः।
क्षारक्षीरदधियाजाजीविडङ्गशटीभिर्हृतम् ॥ २७ ॥
शुक्लेन मातुलुङ्गस्य स्वरसेनार्द्रकस्य वा।
शुष्कमूलककोलाम्लचुक्रिका दाडिमस्य च ॥ २८ ॥
तक्रमस्तुसुरामण्डसौवीरकतुषोदकैः।

काञ्जिकेन च तत् पक्वमग्निदीप्तिकरं परम् ॥ २८ ॥
शूलगुल्मोदरश्वासकासानिलकफापहम्।
सबीजपूरकरसे सिद्धं वा पाययेद् घृतम् ॥ २० ॥
तैलमभ्यञ्जनार्थं च सिद्धमेभिश्च लापहम्।
एतेषामौषधानां वा पिबेच्चूर्णं सुखाम्बुना ॥ २१ ॥
वातश्लेष्मावृते सामे कफे वा वायुनोद्धते।
अग्निं निर्वापकं पित्त रेकेण वमनेन वा ॥ २२ ॥
हृत्वा तिक्तलघुग्राहिदीपनैरविदाहिभिः।
अमृतैः सम्भृतयेदग्निं चूर्णैः क्षौद्रेश्च तिक्तकैः ॥ २३ ॥
पटोलनिम्बत्रायन्तीतिक्तातिक्तकपर्पटम्।
कुटजत्वक्फलं मूर्वा मधुग्निगुफलं वचा ॥ २४ ॥
दार्वीत्वक्पद्मकोशीरयवानीमुस्तचन्दनम्।
सौराष्ट्रातिविषाव्योषत्वगेलापत्रदारु च ॥ २५ ॥
चूर्णितं मधुना लेह्यं पेयं मद्यैर्जलेन वा।
हृत्वाण्डुग्रहणीरोगगुल्मशूलारुचिज्वरान् ॥ २६ ॥
कामलां सन्निपातं च मुखरोगांश्च नाशयेत्।
भूनिम्बकटुका मुस्ता वृषणेन्द्रयवान् समान् ॥ २७ ॥
द्वौ चित्रकात् कुटजत्वग्भागान् षोडश चूर्णयेत्।
गुडशीताम्बुना पीतं ग्रहणीदोषगुल्मनुत् ॥ २८ ॥
कामलाज्वरपाण्डुत्वमेहारुच्यतिसारजित्।
नागरातिविषा मुस्ता पाठा बिल्वं रसाञ्जनम् ॥ २९ ॥
कुटजत्वक्फलं तिक्ता धातकी च कृतं रजः।
क्षौद्रतण्डुलवारिभ्यां पैत्तिके ग्रहणीगदे ॥ ३० ॥
प्रवाहिकार्शोगुदरुग्रक्तोत्थानेषु चेष्यते।
चन्दनं पद्मकोशीरं पाठां मूर्वां कुटत्वचम् ॥ ३१ ॥
षड्ग्रन्थासारिवाऽऽस्फोतासप्तपर्णाटरूषकान्।

पटोलोदुम्बराश्वत्थवटप्लक्षकपीतनम् ॥ ४२ ॥
कटुकां रोहिणीं मुस्तां निम्बं च द्विपलांशकान् ।
द्रोणेऽपां साधयेत् तेन पचेत् सर्पिः पिचूम्मितैः ॥४३॥
किराततिक्तेन्द्रयववीरामागधिकोत्पलैः ।
पित्तग्रहण्यां तत् पेयं कुष्ठोक्तं तिक्तकं च यत् ॥ ४४ ॥
ग्रहण्यां श्लेष्मदुष्टायां तीक्ष्णैः प्रच्छर्दने कृते ।
कटुमूलवणक्षारैः क्रमादग्निं विवर्द्धयेत् ॥ ४५ ॥
पञ्चकोलाभयाधान्यपाठागन्धपलाशकैः ।
बीजपूरप्रवालैश्च सिद्धैः पेयादि कल्पयेत् ॥ ४६ ॥
द्रोणं मधूकपुष्पाणां विडङ्गं च ततोऽर्द्धतः ।
चित्रकस्य ततोऽर्द्धं च तथा भल्लातकाढ़कम् ॥ ४७ ॥
मञ्जिष्ठाऽष्टपलं चैतज्जलद्रोणत्रये पचेत् ।
द्रोणशेषं घृतं शीतं मध्वर्द्धाढ़कसंयुतम् ॥ ४८ ॥
एलामृणालागुरुभिश्चन्दनेन च रूषिते ।
कुम्भे मासं स्थितं जातमासवं तं प्रयोजयेत् ॥४९॥
ग्रहणीं दीपयत्येष वृंहणः पित्तरक्तनुत् ।
शोषकुष्ठकिलासानां प्रमेहाणां च नाशनः ॥ ५० ॥
मधूकपुष्पस्वरसं घृतमर्द्धचयीकृतम् ।
क्षौद्रपादयुतं शीतं पूर्ववत् सन्निधापयेत् ॥५१॥
तत् पिबन् ग्रहणीदोषान् जयेत् सर्वान् हिताशनः ।
तद्वद्द्राक्षेक्षुखर्जूरस्वरसानासुतात् पिबेत् ॥ ५२ ॥
हिङ्गुतिक्तावचामाद्रिपाठेन्द्रयवगोक्षुरम् ।
पञ्चकोलं च कर्षांशं पलांशं पटु पञ्चकम् ॥ ५३ ॥
घृततैलद्विकुडवे दध्नः प्रस्थद्वये च तत् ।
आपोथ्य क्वाथयेदग्नौ मृदावनुगते रसे ॥ ५४ ॥
अवशेषं ततो दग्ध्वा चूर्णीकृत्य घृताप्लुतम् ।

पिबेत् पाणितलं तस्मिन् जीर्णे स्यान्मधुराशनः ॥५५॥
वातश्लेष्मामयान् सर्वान् हन्याद्विषगरांश्च सः।
भूनिम्बं रोहिणीं तिक्तां पटोलं निम्बपर्पटम् ॥ ५६ ॥
दग्ध्वा माहिषमूत्रेण पिबेदग्निविवर्धनम्।
हे हरिद्रे वचा कुष्ठं चित्रकः कटुरोहिणी ॥ ५७ ॥
मुस्ता च छागमूत्रेण सिद्धः क्षारोऽग्निवर्धनः।
चतुःपलं सुधाकाण्डात्त्रिपलं लवणत्रयात् ॥ ५८ ॥
वार्त्ताककुडवं चार्कादष्टौ हे चित्रकात्पले।
दग्ध्वा रसेन वार्त्ताकाद् गुटिका भोजनोत्तराः ॥ ५९ ॥
भुक्तमन्नं पचन्त्याशु कासश्वासार्शसां हिताः।
विषूचिकाप्रतिश्यायहृद्रोगशमनाश्च ताः ॥ ६० ॥
मातुलुङ्गयठी राम्ना कटुत्रयहरीतकी।
खर्जिकायावशूकाख्यौ क्षारौ पञ्चपटूनि च ॥ ६१ ॥
सुखाम्बुपीतं तच्चूर्णं बलवर्णाग्निवर्धनम्।
श्लैष्मिके ग्रहणीदोषे सवाते तैर्घृतं पचेत् ॥ ६२ ॥
धान्वन्तरं षट्पलं च भल्लातकघृताभयम्।
विडं कालोषलवणं खर्जिकायावशूकजान् ॥ ६३ ॥
समलां कण्टकारीं च चित्रकं चैकतो दहेत्।
समक्षारः सुतस्यास्य क्षारस्यार्द्धाढके पचेत् ॥ ६४ ॥
आढकं सर्पिषः पेयं तदग्निबलवृद्धये।
निचये पञ्चकर्माणि युञ्जीताद्यं तद् यथाबलम् ॥ ६५ ॥
प्रसेके श्लैष्मिकेऽग्नेर्दीपनं रूक्षतिक्तकम्।
योज्यं क्षयस्य व्यत्यासात् स्निग्धरूक्षं कफोदये ॥६६॥
क्षीणक्षामशरीरस्य दीपनं स्नेहसंयुतम्।
दीपनं बहुपित्तस्य तिक्तं मधुरकैर्युतम् ॥ ६७ ॥
स्नेहोऽच्छलवणैर्युक्तो बहुवातस्य शस्यते।

स्नेहमेव परं विद्याद् दुर्बलानलदीपनम् ॥ ६८ ॥
नालं स्नेहसमिद्धस्य शमायान्नं सुगुर्वपि ।
योऽल्पाग्नित्वात्कफे क्षीणे वर्चः पक्वमपि श्लथम् ॥६९॥
सुस्निग्धं यदीषधयुतं स पिबेदल्पशो घृतम् ।
तेन स्वमार्गमानीतः स्वकर्मणि नियोजितः ॥ ७० ॥
समानो दीपयत्यग्निमग्नेः सन्मुष्टको हि सः ।
पुरीषं यश्च रूक्षत्वेन कठिनत्वाद्विमुञ्चति ॥ ७१ ॥
सघृत लवणैर्युक्तं नरोऽन्नावग्रहं पिबेत् ।
रौक्ष्यान्मन्देऽनले सर्पिस्तैलं वा दीपनैः पिबेत् ॥ ७२ ॥
क्षारचूर्णासवारिष्टान् मन्दे स्नेहातिपानतः ।
उदावर्त्तोक्तयोक्तव्या निरूहस्नेहवस्तयः ॥ ७३ ॥
दोषाऽतिहृद्याऽमन्देऽग्नौ संशुद्धोऽन्नविधिं चरेत् ।
व्याधिमुक्तस्य मन्देऽग्नौ सर्पिरेव तु दीपनम् ॥७४॥
अध्वोपवासव्यायामैर्यवाग्वा पाययेद् घृतम् ।
अन्नावपीडितं बल्यं दीपनं बृंहणं च तत् ॥ ७५ ॥
दीर्घकालप्रसङ्गात् तु क्षामक्षीणकृशान् नरान् ।
प्रसहानां रसैः साम्लैर्भोजयेत् पिशितान्निनाम् ॥७६॥
लघूष्णकटुशोषित्वाद् दीपयन्त्याशु तेऽनलम् ।
मांसोपचितमांसत्वात् परं च बलवर्द्धनम् ॥ ७७ ॥
स्नेहासवसुरारिष्टचूर्णक्वाथहितानलैः ।
सम्यक् प्रयुक्तैर्देहस्य बलमग्निश्च वर्द्धते ॥ ७८ ॥
दीप्तो यथैव स्थाणुश्च बाह्योऽग्निः सारदारुभिः ।
सस्नेहैर्जायते तद्वदाहारैः कोष्ठकोऽनलः ॥ ७९ ॥
न भोजनेन कायाग्निर्दीप्यते नातिभोजनात् ।
यथा निरिन्धनो वह्निरल्पो वाऽतीन्धनान्वितः ॥८०॥
यदा क्षीणे कफे पित्तं स्वस्थाने पवनानुगम् ।

प्रवृद्धं वर्धयत्यग्निं तदाऽसौ सानिलोऽनलः ॥ ८१ ॥
पक्त्वान्नमाशु धातूंश्च सर्वानोजश्च सङ्क्षिपन् ।
मारयेत्साशनात् स्वस्थो भुक्ते जीर्णे तु ताम्यति ॥८२॥
हृट्कासदाहमूर्च्छार्दा व्याधयोऽत्यग्निसम्भवाः ।
तमत्यग्निं गुरुस्निग्धमन्दसान्द्रहिमस्थिरैः ॥ ८३ ॥
अन्नपानैर्नयेच्छान्तिं दीप्तमग्निमिवाम्बुभिः ।
मुहुर्मुहुरजीर्णेऽपि भोज्यान्यस्योपहारयेत् ॥ ८४ ॥
निरिन्धनोऽन्तर लब्ध्वा यथैनं न विपादयेत् ।
क्षीरं पायसं स्निग्धं पैष्टिकं गुडवैकृतम् ॥ ८५ ॥
अश्नीयादौदकानूपपिशितानि घृतानि च ।
मत्स्यान् विशेषतः श्लक्ष्णान् स्थिरतोयचराश्च ये ॥८६॥
आविकं सुभृतं मांसमद्यादत्यग्निवारणम् ।
पयः सहमधूच्छिष्टं घृतं वा क्षपितः पिबेत् ॥ ८७ ॥
गोधूमचूर्णं पयसा बहुसर्पिः परिप्लुतम् ।
आनूपरसयुक्तान् वा स्नेहांस्तैलविवर्जितान् ॥ ८८ ॥
श्यामात्रिवृद्विपक्वं वा पयो दद्यादिरेचनम् ।
असक्तत्पित्तहरणं पायसं प्रतिभोजनम् ॥ ८९ ॥
सर्वं तदत्यग्निहितं भुक्त्वा च स्वपन दिवा ॥ ९० ॥
आहारमग्निः पचति दोषानाहारवर्जितः ।
धातून् क्षीणेषु दोषेषु जीवितं धातुसङ्क्षये ॥ ९१ ॥

एतत्कृत्स्नं त्वेव विरुद्धमन्नं सयोगसंस्कारवशेन चेदम् ।
इत्याद्यविज्ञाय यथेष्टचेष्टाश्चरन्ति यत्नाग्निबलस्य शक्तिः ॥९२॥
तस्मादग्निं पालयेत्सर्वयत्नैस्तस्मिन् नष्टे याति ना नाशमेव ।
दोषैर्युक्ते ग्रस्यते रोगसङ्घैर्युक्ते तु स्याद्वीरुजो दीर्घजीवी ॥९३॥

एकादशोऽध्यायः ।

अथातो मूत्राघातचिकित्सितं व्याख्यास्यामः ॥
क्षच्छ्रे वातघ्नतैलाक्तमधोनाभेः समीरजे ।
सुस्निग्धैः स्वेदयेदङ्गं पिण्डसेकावगाहनैः ॥ १ ॥
दशमूलबलैरण्डयवाभीरुपुनर्नवैः ।
कुलत्थकोलपत्तूरबृश्चिकीपलभेदकैः ॥ २ ॥
तैलसर्पिर्वराहर्क्षवसाः क्वथितकल्कितैः ।
सपञ्चलवणाः सिद्धाः पीताः शूलहराः परम ॥ ३ ॥
द्रव्याण्येतानि पानान्ने तथा पिण्डोपनाहने ।
सह तैलफलैर्युञ्जात् सान्नानि स्नेहवन्ति च ॥ ४ ॥
सौवर्चलाढ्या मदिरां पिबेन्मूत्ररुजापहाम् ।
पैत्ते युञ्जीत शिशिरं सेकलेपावगाहनम् ॥ ५ ॥
पिबेदरीं गोक्षुरकं विदारीं सकसेरुकाम् ।
तृणाख्य पञ्चमूलञ्च पाक्यं समधुशर्करम् ॥ ६ ॥
इषकं त्रपुषैर्वारु लट्वाबीजानि कुङ्कुमम् ।
द्राक्षाम्भोभिः पिबेत् सर्वान् मूत्राघातानपोहति ॥ ७ ॥
एर्वारुबीजयष्ट्याह्वदार्वीर्वा तण्डुलाम्बुना ।
तोयेन कल्कं द्राक्षायाः पिबेत्पर्युषितेन वा ॥ ८ ॥
कफजे वमनं स्वेदं तीक्ष्णोष्णकटुभोजनम् ।
यवानां विकृतेः क्षारं कालसेयञ्च शीलयेत् ॥ ९ ॥
पिबेन्मद्येन सूक्ष्मैलां धात्रीफलरसेन वा ।
सारसाख्यिखदंष्ट्रैलाव्योषं वा मधुमूत्रवत् ॥ १० ॥
स्वरसं कण्टकार्य्या वा पाययेन्माक्षिकान्वितम् ।
क्षितिवारकबीजं वा तत्क्षीरेण कृष्णचूर्णितम् ॥ ११ ॥
धवसप्ताह्वकुटजं गुडूचीचतुरङ्गुलम् ।

कटुकैलाकरञ्जञ्च पाक्यं समधुसाधितम् ॥ १२ ॥
तैर्वा पेयां प्रवाल वा चूर्णित तण्डुलाम्बुना।
सतैलं पाटलाचार सप्तकृत्वोऽथवा घृतम् ॥ १३ ॥
पाटलीयावशूकाभ्या पारिभद्र तिलादपि।
क्षारोदकेन मदिरा खगैलौषधसंयुताम् ॥ १४ ॥
पिबेद् गुडोपदंशान् वा लिह्यादेतान् पृथक् पृथक्।
सन्निपातात्मके सर्वं यथावस्थमिदं हितम् ॥ १५ ॥
अश्मन्यथ चिरोत्थाने वातवस्त्यादिकेषु च।
अश्मरी दारुणो व्याधिरन्तकप्रतिमो मतः ॥ १६ ॥
तरुणी भेषजैः साध्यः प्रवृद्धस्तूर्ध्वमर्हति।
तस्य पूर्वेषु रूपेषु स्नेहाद्यिक्रम इष्यते ॥ १७ ॥
पाषाणभेदो वसुको वशिरोऽश्मन्तको वरी।
कपोतवङ्क्षातिबलाभल्लूकोशीरकन्तकम् ॥ १८ ॥
वृक्षादनी शाकफलं व्याघ्री गुण्ठचिकण्टकम्।
यवाः कुलत्थाः कोलानि वरुणः कतकात् फलम् ॥१९॥
ऋषकादिप्रतीवापमेषां क्वाथे घृतं घृतम्।
भिनत्ति वातसम्भूता तत् पीतं शीघ्रमश्मरीम् ॥२०॥
गन्धर्वहस्तिवृक्षती व्याघ्रीगोक्षुरकेक्षुरात्।
मूलकल्कं पिबेदम्ला मधुरेणाश्मभेदनम् ॥ २१ ॥
कुशः काशः शरो गुण्ठ इक्षाटो मोरटोऽश्मभित्।
दर्भो विदारी वाराही शाली मूलं चिकण्टका ॥ २२ ॥
भल्लुकः पाटली पाठा पत्तूरः सकुरण्टकः।
पुनर्नवा शिरीषश्च तेषां क्वाथे पचेद् घृतम् ॥ २३ ॥
पिष्टेन त्वपुषादीनां बीजेनेन्दीवरेण वा।
मधुकेन शिलाजेन तत्पित्ताश्मरिभेदनम् ॥ २४ ॥
वरुणादिः समीरघ्नो गुणवेलाहरेणुका।

गुग्गुलुर्मरिचं कुष्ठं चित्रकः सप्तराङ्क्षयः ॥ २५ ॥
तैः कल्कितैः कृतावापं मूषकादिगणेन च।
भिनत्ति कफजामाशु साधितं घृतमश्मरीम् ॥ २६ ॥
क्षारक्षीरयवाग्वादि द्रव्यैः स्नैः स्नेह कल्पयेत्।
पिचुक्राङ्कोल्लकतकशाकेन्दीवरजैः फलैः ॥ २७ ॥
पीतमुष्णाम्बु सगुडं शर्करापातन परम्।
क्रौञ्चोष्ट्ररासभाश्वोनि खदंष्ट्रा तालपत्रिका ॥ २८ ॥
अजमोदाकदम्बस्य मूलं विल्वस्य चौषधम्।
पीतानि शर्करां भिद्युः सुरयोष्णोदकेन वा ॥ २९ ॥
स्नुक्यकुण्डलबीजानां चूर्णं माक्षिकसयुतम्।
अविक्षीरेण सप्ताहं पीतमश्मरीपातनम् ॥ ३० ॥
क्वाथश्च श्रिगुमूलोत्थः कटूष्णोऽश्मरीपातनः।
तिलापामार्गकदलीपलाशयवसम्भवः ॥ ३१ ॥
क्षारः पेयोऽविमूत्रेण शर्करास्वश्मरीषु च।
कपोतवङ्क्षामूलं वा पिबेदेकं सुरादिभिः ॥ ३२ ॥
तत्सिद्धं वा पिबेत् क्षीरं वेदनाभिरुपद्रुतः।
हरीतक्यक्षिसिद्धं वा साधितं वा पुनर्नवैः ॥ ३३ ॥
क्षीराक्षमुग्वर्हिशिखामूलं वा तण्डुलाम्बुना।
मूत्राघातेषु विभजेदतः शेषेष्वपि क्रियाम् ॥ ३४ ॥
हृद्ग्रहादिगणे सिद्धं द्विगुणोक्षतगोक्षुरे।
क्षीरं पयो वा सर्पिर्वा सर्वमूत्रविकारजित् ॥ ३५ ॥
देवदारुं घनं मूर्वां यष्टीं मधुहरीतकीम्।
मूत्राघातेषु सर्वेषु सुराक्षीरजलैः पिबेत् ॥ ३६ ॥
रसं वा धन्वयासस्य कषायं ककुभस्य वा।
सुखाम्भसा वा त्रिफलां पिष्टां सैन्धवसंयुताम् ॥ ३७ ॥
ब्राह्मीगोक्षुरकक्वाथे यवागूं वा सफाणिताम्।

क्वाथे वीरतरादेर्वा ताम्रचूडरसेऽपि वा ॥ ३८ ॥
अद्याद्वीरतराद्येन भावितं वा शिलाजतु ।
मद्यं वा निगदं पीत्वा रथेनाश्वेन वा व्रजन् ॥ ३९ ॥
शीघ्रवेगेन सद्योभात् तथास्य च्यवतेऽश्मरी ।
सर्वथा चोपयोक्तव्यो वर्गो वीरतरादिकः ॥ ४० ॥
रेकार्थं तैल्वकं सर्पिर्वस्तिकर्म च शीलयेत् ।
विशेषादुत्तरान् वस्तीन् शुक्राश्मर्य्यौ च शोधते ॥४१॥
तैर्मूत्रमार्गे बलवान् शुक्राशयविशुद्धये ।
पुमान् सुतप्तो हृष्टाणा मांसानां कुक्कुटस्य च ॥ ४२ ॥
काम सकामाः सेवेत प्रमदा मददायिनीः ।
सिद्धैरुपक्रमैरेभिर्न चेच्छान्तिस्तदा भिषक् ॥ ४३ ॥
इति राजानमापृच्छ्य शस्त्रं साध्ववचारयेत् ।
अक्रियाया ध्रुवो मृत्युः क्रियायां संशयो भवेत् ॥४४॥
निश्चितस्यापि वैद्यस्य बहवः सिद्धकर्मणः ।
अथातुरमुपस्निग्धं शुद्धमीषच्च कर्शितम् ॥ ४५ ॥
अभ्यक्तस्विन्नवपुषमसृक्तं कृतमङ्गलम् ।
आजानुफलकस्थस्य नरस्याङ्के व्यपाश्रितम् ॥ ४६ ॥
पूर्वेण कायेनोत्तानं निषण्णं वस्त्रकुम्भले ।
ततोऽस्याकुञ्चिते जानुकूर्परे वाससा दृढम् ॥४७॥
सहाश्रयमनुष्येण बद्धस्याश्वासितस्य च ।
नाभेः समन्तादभ्यज्यादधस्तस्याश्च वामतः ॥ ४८ ॥
मृदित्वा मुष्टिना कामं यावदश्मर्य्यधोगता ।
तैलाक्ते वर्द्धितनखे तर्जनीमध्यमे ततः ॥ ४९ ॥
अदक्षिणे गुदेऽङ्गुल्यौ प्रणिधायानुसेवनीम् ।
आसाद्य बलयं नाभ्यामश्मरीं गुदमेढ्रयोः ॥ ५० ॥
कृत्वान्तरे तथा वस्तिं निर्बलीकमनायतम् ।

उत्पीडयेदङ्गुलिभ्यां यावद् ग्रन्थिरिवोन्नतम् ॥ ५१ ॥
शस्त्रं स्यात् सेवनीं मुक्त्वा यवमात्रेण पाटयेत्।
अश्ममानेन न यथा भिद्यते सा तथा हरेत् ॥ ५२ ॥
समग्रं सर्पवक्त्रेण स्त्रीणां वस्तिस्तु पार्श्वगः।
गर्भाशयाश्रयस्तासां शस्त्रमुत्सङ्गवत्ततः ॥ ५३ ॥
न्यसेदतोऽन्यथा ह्यासां मूत्रस्रावी व्रणो भवेत्।
मूत्रप्रसेकचरणान्नरस्याप्यपि चैकधा ॥ ५४ ॥
वस्तिभेदोऽश्मरीहेतुः सिद्धिं याति न तु द्विधा।
विशल्यमुष्णपानीयद्रोण्यां तमवगाहयेत् ॥ ५५ ॥
तथा न पूर्यतेऽस्रेण वस्तिः पूर्णे तु पीडयेत्।
मेढ्रतः क्षीरवृक्षाम्बु मूत्रं सशुद्धयेत्ततः ॥ ५६ ॥
कुर्याद् गुडस्य सौहित्यं मध्वाज्याक्तव्रणः पिबेत्।
द्वौ कालौ सघृतां कोष्णां यवागूं मूत्रशोधनैः ॥ ५७ ॥
चाह्न दशाहं पयसा गुडाक्तेनाल्पमोदनम्
भुञ्जीतोर्ध्वं फलाम्लैश्च रसैर्जाङ्गलचारिणाम् ॥ ५८ ॥
क्षीरवृक्षकषायेण व्रणं प्रक्षाल्य लेपयेत्।
प्रपौण्डरीकमञ्जिष्ठायष्ट्याह्वनयनौषधैः ॥ ५९ ॥
व्रणाभ्यङ्गं पचेत्तैलमेभिरेव निशान्वितैः।
दशाह स्वेदयेच्चैनं स्वमार्गं सप्तरात्रतः ॥ ६० ॥
मूत्रे लगच्छति दहेदश्मरीव्रणमग्निना।
स्वमार्गप्रतिपत्तौ तु स्वादुप्रायैरुपाचरेत् ॥ ६१ ॥
तं वस्तिभिर्न चारोहेद्यं रूढव्रणोऽपि सः।
नगनागाम्रवृक्षक्षीरथान्नाम्बु पिबेत सः ॥ ६२ ॥
मूत्रशुक्रवहौ वस्तिवृषणौ सेवनीं गुदम्।
मूत्रप्रसेकं योनिं च शस्त्रेणाष्टौ विवर्जयेत् ॥ ६३ ॥

द्वादशोऽध्यायः।

अथातः प्रमेहचिकित्सित व्याख्यास्यामः ॥

मेदिनो बलिनः कुर्य्यादादौ वमनरेचने।
स्निग्धस्य सर्षपारिष्टनिकुम्भाक्तकरञ्जकैः ॥ १ ॥
तैलैस्त्रिकण्टकाद्येन यथास्वं साधितेन वा।
स्नेहेन मुस्तदेवाह्वनागरप्रतिवापवत् ॥ २ ॥
सुरसादिकषायेण दद्यादास्थापनं ततः।
न्यग्रोधादेस्तु पित्तार्त्ते रसैः शुद्धं च तर्पयेत् ॥ ३ ॥
मूत्रग्रहरुजा गुल्मक्षयाद्यास्त्वपतर्पणात्।
ततोऽनुबन्धरक्षार्थं शमनानि प्रयोजयेत् ॥ ४ ॥
असंशोध्यस्य यान्येव सर्वमेहेषु पाययेत्।
धात्रीरसप्लुतां प्राह्णे हरिद्रां माक्षिकान्विताम् ॥ ५ ॥
दार्वीसुराह्वत्रिफला मुस्ता वा क्वथिता जले।
चित्रकत्रिफलादार्वीकटिङ्गान् वा समाक्षिकान्।
मधुयुक्तं गुडूच्या वा रसमामलकस्य वा ॥ ६ ॥
रोध्राभयातोयदकट्फलानां पाठाविडङ्गार्जुनधान्यकानाम्।
गायत्रिदार्वीक्रमिहृद्बचानां कल्के त्रयः क्षौद्रयुताः कषायाः ॥७॥
उशीररोध्रार्जुनचन्दनानां पटोलनिम्बामलकामृतानाम्।
रोध्राम्बुकालीयकधातकीनां पित्ते त्रयः क्षौद्रयुताः कषायाः॥८॥
यथास्वमेभिः पानान्न यवगोधूमभावनाः।
वातोल्बणेषु स्नेहाश्च प्रमेहेषु प्रकल्पयेत् ॥ ९ ॥
अपूरसक्तुवाट्यादिर्यवानां विकृतिर्हिता।
गवाश्वगुदमुक्तानामथवा वेणुजन्मनाम् ॥ १० ॥
क्षुद्रधान्यानि मुद्गाद्याः शालिजीर्णाः सषष्टिकाः।
श्रीकुक्कुटोऽल्पः खलकस्त्रिलसर्षपकिट्टजः ॥ ११ ॥

कपित्थं तिन्दुकं जम्बु स्तत् क्वता रागखाण्डवाः।
तिक्तं शाकं मधु श्रेष्ठा भक्ष्याः शुष्काः ससक्तवः॥ १२॥
धन्वमांसानि शूल्यानि परिशुष्कान्यवस्फुतिः।
मध्वरिष्टासवा जीर्णाः सीधुः पक्वरसोद्भवः॥ १३॥
तथासनादिसाराम्बुदर्भाम्भो माक्षिकोदकम्।
वासितेषु वराक्वाथे शर्वरीशोषितेष्वहः॥ १४॥
यवेषु सुक्वतान् सक्तून् सच्चौद्रान् सीधुना पिबेत्।
शालसप्ताह्वकम्पिल्लहृच्चक्राच्चकपित्थजम्॥ १५॥
रोहीतकं च कुसुमं मधुनाऽद्यात् सचूर्णितम्।
कफपित्तप्रमेहेषु पिबेज्जात्वीरसेन वा॥ १६॥
त्रिकण्टकनिशारोध्रसोमवल्क्लवचार्जुनैः।
पद्मकाश्मन्तकारिष्टचन्दनागुरुदीप्यकैः॥ १७॥
पटोलमुस्तमञ्जिष्ठासाद्रीभल्लातकैः पचेत्।
तैल वातकफे पित्ते घृतं मिश्रेषु मिश्रकम्॥ १८॥
दशमूलं शठीं दन्तीं सुराह्व द्विपुनर्नवम्।
मूल स्रुगर्कयो पथ्यां भूकदम्बमरुष्करम्॥ १९॥
करञ्जवरुणान्मूलं पिप्पल्याः पौष्करं च यत्।
पृथक् दशपलं प्रस्थान् यवकोलकुलत्थतः॥ २०॥
त्रींश्चाष्टगुणिते तोये विपचेत् पादवर्त्तिना।
तेन द्विपिप्पलीचव्यवचानिचुलरोहिषैः॥ २१॥
त्रिवृद्विडङ्गकम्पिल्लभार्ङ्गीबिल्वैश्च साधयेत्।
प्रस्थ घृताज्जयेत् सर्वान्स्नेहान् पिटिका विषम्॥ २२॥
पाण्डुविद्रधिगुल्मार्शःशोफशोषग्रहोदरम्।
श्वास कास वमि हृद्रि ग्रीहान वातशोणितम्॥ २३॥
कुष्ठोन्मादापस्मारं धान्वन्तरमिदं घृतम्।
शीघ्रमूर्वाशटीबिल्वभार्ङ्गीनतनखड्गवान्॥ २४॥

कलिङ्गकुष्ठकट्वीकाप्रियङ्गुतिविषाग्निकान्।
हे विशाले चतुर्जातं भूनिम्बकटुरोहिणीम् ॥ २५ ॥
यवानीं पौष्करं पाठां ग्रन्थिं चव्यं फलत्रयम्।
कर्षांशमम्बुकलशे पादशेषे सुते क्षिपेत् ॥ २६ ॥
द्वौ प्रस्थौ माक्षिकात् क्षिप्त्वा रक्षेत् पक्वमुपेक्षया।
रोध्रासवोऽयं मेहार्शःक्षितकुष्ठारुचिक्रमीन् ॥ २७ ॥
पाण्डुत्वक्ग्रहणीदोषं क्षूलतां च नियच्छति।
साधयेदसनादीनां पलानां विंशतिं पृथक् ॥ २८ ॥
द्विद्रोणेऽपां क्षिपेत् तत्र पादस्थे द्वे शते गुडात्।
क्षौद्रार्द्धकार्द्धं पलिकं वल्कार्कादि च कल्कितम् ॥ २९ ॥
तत् क्षौद्रपिप्पलीचूर्णं प्रदिग्धे घृतभाजने।
स्थितं दृढे जतुसृते यवराशौ निधापयेत् ॥ ३० ॥
खदिराङ्गारतप्तानि बहुशोऽत्र निमज्जयेत्।
तनूनि तीक्ष्णलोहस्य पत्राण्यालोहसंक्षयात् ॥ ३१ ॥
अयस्कृतिः स्थिता पीता पूर्वस्मादधिका गुणैः।
रूक्षमुद्वर्त्तनं गाढं व्यायामो निशि जागरः ॥ ३२ ॥
यच्चान्यत् श्लेष्मपित्तघ्नं बहिरन्तश्च तद्धितम्।
सुभावितां सारजलैस्तुलां पीत्वा शिलोद्भवात् ॥ ३३ ॥
सारांस्त्वनेव भुञ्जानः शालिजाङ्गलजैः रसैः।
सर्वानभिभवेन्मेहान् सुबहूपद्रवानपि ॥ ३४ ॥
गण्डमालार्बुदग्रन्थिश्लीपदश्लीपदान्तकुष्ठभगन्दरान्।
कृमिश्लीपदशोफांश्च परं चैतद्रसायनम् ॥ ३५ ॥
अधनश्छत्रपादत्ररहितो सुनिवर्त्तनः।
योजनानां शतं यायात् स्वनेद्वा सलिलाशयान् ॥ ३६ ॥
गोशकृन्न त्रवर्त्तिर्वा गोभिरेव सह भ्रमेत्।
हृद्यैर्दीप्ताग्निराहारैरमेदो मूत्रजैः क्रमम् ॥ ३७ ॥

शराविकाद्याः पिटिकाः शोफवत् समुपाचरेत् ।
अपक्का व्रणवत् पक्वास्त्वासा प्रायूप एव च ॥ ३८ ॥
क्षीरिवृक्षाम्बु पानाय वस्तमूत्रं च शस्यते ।
तीक्ष्णं च शोधनं प्रायो दुर्विरेच्या हि मेहिनः ॥ ३९ ॥
तैलमेलादिना कुर्य्याद्व्रणेन व्रणरोपणम् ।
उद्वर्त्तने कषायं तु वर्गेणारग्वधादिना ॥ ४० ॥
परिषेकोऽसनाद्येन पानान्ने वत्सकादिना ।
पाठा चित्रकशार्ङ्गेष्टा सारिवा कण्टकारिका ॥ ४१ ॥
सप्ताङ्गं कौटज मूल सोमवल्कं नृपद्रुमम् ।
सचूर्ण्यं मधुना लिह्यात् तद्वच्चूर्णं न वायसम् ॥ ४२ ॥
मधुमेहित्वमापन्नो भिषग्भिः परिवर्जितः ।
शिलाजतुतुलामद्यात् प्रमेहार्त्तः पुनर्नवः ॥ ४३ ॥

त्रयोदशोऽध्यायः ।

अथातो विद्रधिव्रणचिकित्सितं व्याख्यास्यामः ॥
विद्रधि सर्वमेवाम शोफवत् समुपाचरेत् ।
ग्रतं च हरेद्रक्तं पक्वे तु व्रणवत् क्रिया ॥ १ ॥
पञ्चमूलजलैर्धौतं वातिकं लवणोत्तरैः ।
भद्रादिवर्गयष्ट्याह्वतिलैरालेपयेद् व्रणम् ॥ २ ॥
वैरेचनिकयुक्तेन चैवृतेन विशोध्य च ।
विदारीवर्गसिद्धेन चैवृतेनैव रोपयेत् ॥ ३ ॥
क्षालितं क्षीरितोयेन लिम्पेद् यष्ट्यम्बुतातिलैः ।
पैत्तं घृतेन सिद्धेन मञ्जिष्ठोशीरपद्मकैः ॥ ४ ॥
पयस्या हरिणाश्रेष्ठायष्टीदुग्धैश्च रोपयेत् ।
न्यग्रोधादिप्रवालत्वक्फलैर्वा कफजं पुनः ॥ ५ ॥
आरग्वधाम्बुना धौतं सक्तुकुम्भनिशातिलैः ।

लिम्पेत् कुलत्थिका दन्ती त्रिवृच्छ्यामाग्निसिन्धुकैः ॥ ६ ॥
ससैन्धवैः सगोमूत्रैः स्नैहं कुर्वीत रोपणम् ।
रक्तागन्तूद्भवे कार्या पित्तविद्रधिवत् क्रिया ॥ ७ ॥
वरुणादिगणक्वाथमपक्वेऽभ्यन्तरे स्थिते ।
ऊषकादिप्रतीवापं पूर्वाह्णे विद्रधौ पिबेत् ॥ ८ ॥
घृतं विरेचनद्रव्यैः सिद्धं ताभ्यां च पाययेत् ।
निरूहं स्नेहवस्तिं च ताभ्यामेव प्रकल्पयेत् ॥ ९ ॥
पानभोजनलेपेषु मधुशिग्रुः प्रयोजितः ।
दत्तावापो यथादोषमपक्वं हन्ति विद्रधिम् ॥ १० ॥
त्रायन्तीत्रिफलानिम्बकटुकामधुकं समम् ।
त्रिवृत्पटोलमूलाभ्यां चत्वारोंऽशाः पृथक् पृथक् ॥ ११ ॥
मसूरान्त्रिस्तुषादष्टौ तत्क्वाथः सघृतो जयेत् ।
विद्रधिगुल्मवीसर्पदाहमोहमदज्वरान् ॥ १२ ॥
श्वयथूर्च्छाच्छर्दिहृद्रोगपित्तास्रकुष्ठकामलाः ।
कुडव क्वाथमाणायाः साध्यमष्टगुणेऽम्भसि ॥ १३ ॥
कुडव तद्रसाद्वात्रीस्वरसात् क्षीरतो घृतात् ।
कर्षांशं कल्कितं तिक्तात्रायन्तीधन्वयासकम् ॥ १४ ॥
मुस्तातामलकी वीरा जीवन्ती चन्दनोत्पलम् ।
यष्टेदेकत्र संयोज्य तद्घृतं पूर्ववद्गुणैः ॥ १५ ॥
द्राक्षा मधूक खर्जूर विदारी सशतावरी ।
पुरुषकाणि त्रिफला तत्क्वाथे पाचयेद् घृतम् ॥ १६ ॥
क्षीरेक्षुधात्रीनिर्यासे प्राणदाकल्कसंयुतम् ।
तच्छीतं शर्कराक्षौद्रपादिकं पूर्ववद्गुणैः ॥ १७ ॥
हरेच्छृङ्गादिभिरसृक् शिरया वा यथाम्बिकम् ।
विद्रधिं पच्यमानं च कोष्ठस्थं बहिरुन्नतम् ॥ १८ ॥
ज्ञात्वोपनाहयेत् शूले स्थिते तत्रैव पिच्छिले ।

हृत्पार्श्वपीडनात् सुप्तौ दाहादिष्वल्पकेषु च ॥ १९ ॥
पक्वः स्याद्विद्रधि भित्त्वा व्रणवत्तमुपाचरेत्।
अन्तर्भागस्य चाप्येतच्चिह्नं पक्वस्य विद्रधेः ॥ २० ॥
पक्वः स्रोतांसि सम्पूर्य्य स याल्लूनमधोऽथवा।
स्वयं प्रवृत्तं तं दोषमुपेक्षेत हिताशिनः ॥ २१ ॥
दशाहं द्वादशाहं वा रक्षन् भिषगुपद्रवान्।
असम्यग्वहति क्लेदे वरणादिसुखाम्भसा ॥२२॥
पाययेन्मधुशिग्रुं वा यवागूं तेन वा कृताम्।
यवकोलकुलत्थोत्थयूषैरन्नं च शस्यते ॥ २३ ॥
ऊर्द्धं दशाहात्पायन्तो सर्पिषा तैल्वकेन वा।
शोधयेद् बलतः गुडं मक्षौद्रं तिक्तकं पिबेत् ॥ २४ ॥
सर्वशो गुल्मवच्चैनं यथादोषमुपाचरेत्।
सर्वावस्थासु सर्वासु गुग्गुलुं विद्रधिषु च ॥ २५ ॥
कषायैर्योगिकैर्युक्त्या स्नेहैस्तद्विच्छिलाजतु।
पाकं च वारयेद् यत्नात् सिद्धिः पक्वे हि दैविकी ॥२६॥
अपि चाशु विदाहित्वाद् विद्रधिः सोऽभिधीयते।
सति चालोचयेन्मेहे प्रमेहाणां चिकित्सितम् ॥ २७ ॥
स्तनजे व्रणवत् सर्वं न त्वेनमुपनाहयेत्।
पाटयेत् पालयन् स्तन्यवाहिनीः क्षणाच्चूचुकौ ॥२८॥
सर्वास्वामाद्यवस्थासु निर्दुःखीत च तत् स्तनम्।
शोधयेत् त्रिवृतास्निग्धं वृद्धौ स्नेहैश्चलात्मकम् ॥२९॥
कोशाम्रतिल्वकैरण्डसुकुमारकमिश्रकैः।
ततोऽनिलघ्ननिर्यूहकल्कस्नेहैर्निरूहयेत् ॥ ३० ॥
रसेन भोजितं यष्टीतैलेनान्वासयेदनु।
स्वेदप्रलेपा वातघ्नाः पक्वे भित्त्वा व्रणक्रियाः ॥३१॥
पित्तरक्तोद्भवे वृद्धावामपक्वे यथायथम्।

शोफव्रणक्रियां कुर्य्यात् प्रतनं च हरेदसृक् ॥३२॥
गोमूत्रेण पिबेत् कल्कं श्वेषिके पीतदारुजम्।
विस्रापनाहृते चात्र शेषग्रन्थिक्रमो हितः ॥ ३३ ॥
पक्के च पाटिते तैलमिष्यते व्रणशोधनम्।
सुमनोरुष्कराङ्कोल्लसप्तपर्णेषु साधितम् ॥ ३४ ॥
पटोलनिम्बरजनीविडङ्गकुटजेषु च।
मेदोज मूत्रपिष्टेन सुस्विन्न सुरसादिना ॥ ३५ ॥
शिरोविरिक्तद्रव्यैर्वा वर्जयन् फलसेवनीम्।
दारयेद्दृढिपत्रेण सम्यङ्मेदसि सूढृते ॥ ३६ ॥
व्रणं माक्षीककासीससैन्धवप्रतिसारितम्।
सीव्येदभ्यञ्जनं चास्य योज्यं मेदोविशुद्धये ॥ ३७ ॥
मनःशिलैलासुमनोग्रन्थिभल्लातकैः कृतम्।
तैलमाव्रणसन्धानात् स्नेहस्वेदौ च शीलयेत् ॥ ३८ ॥
मूत्रज स्वेदित स्निग्धैर्वस्त्रपट्टेन वेष्टितम्।
विध्येदधस्तात् सेवन्याः स्रावयेच्च यथोदरम् ॥ ३९ ॥
व्रणञ्च स्थगिकाबद्धं रोपयेदन्नहेतुकै।
फलकोशमसम्प्राप्ते चिकित्सा वातवद्विदुः ॥ ४० ॥
यवेत् पुनर्नवतुला तथा दशपलाः पृथक्।
दशमूलपयस्याश्च गन्धै रण्डशतावरीः ॥ ४१ ॥
द्विदर्भशरकाशेक्षुमूलपोटगलान्विताः।
वहेपामष्टभागस्थे तत्र त्रिंशत्पलं गुडात् ॥ ४२ ॥
प्रस्थमेरण्डतैलस्य द्वौ घृतात्ययसस्थया।
आवपेद्दृढिपलाशञ्च क्षणात्तन्मूलसैन्धवम् ॥ ४३ ॥
यष्टीमधुकमृद्वीकायवानि नागराणि च।
तत्सिद्धं सुकुमाराख्यं सुकुमार रसायनम् ॥ ४४ ॥
वातातपाध्वयानादिपरिहार्य्यैर्व्यायन्व्रणम्।

प्रयोज्यं सुकुमाराणामोषधराणां सुखात्मनाम् ॥ ४५ ॥
नृणां खोदुन्दभर्तृणामलक्ष्मीकलिनाशनम्।
सर्वकालोपयोगेन कान्तिलावण्यपुष्टिदम् ॥ ४६ ॥
वर्त्मविद्रधिगुल्मार्शोयोनिमेढ्रानिलार्त्तिषु।
श्रोणीदरखुडप्लीहविड्विबन्धेषु चोत्तमम् ॥ ४७ ॥
यायाद्यदि न चेच्छान्तिं स्नेहरेकानुवासनैः।
वस्तिकर्म पुरः कृत्वा वङ्क्षणस्थं ततो दहेत् ॥ ४८ ॥
अग्निना मार्गरोधार्थं मरुतोऽर्द्धेन्दुवक्त्रया।
अङ्गुष्ठस्योपरिस्रावपीतं तन्तुसमञ्च यत् ॥ ४९ ॥
उत्क्षिप्य सूच्या तत् तिर्य्यग्दहेत् क्षिप्त्वा यतो गदः।
ततोऽन्यपार्श्वेऽन्यं त्वाङ्गुष्ठेहानामिकाङ्गुलैः ॥ ५० ॥
गुल्मेऽन्यैर्वातकफजे प्रोक्ष्य चाय विधिः स्मृतः।
कनिष्ठिकानामिकयोर्विध्वाच्यां च यतो गदः ॥ ५१ ॥

चतुर्दशोऽध्यायः।

अथातो गुल्मचिकित्सितं व्याख्यास्यामः ॥
गुल्मं वक्ष्यत्युद्वातं वातिकं तीव्रवेदनम्।
रूक्षस्नेतोद्भवं तैलैः साधयेद्वातरोगिकैः ॥ १ ॥
पानान्नान्वासनाभ्यङ्गैः स्निग्धस्य स्वेदमाचरेत्।
आनाहवेदनास्तम्भविबन्धेषु विशेषतः ॥ २ ॥
स्रोतसां मार्दवं कृत्वा जित्वा मारुतमुल्बणम्।
भित्त्वा विबन्धं स्निग्धस्य स्वेदो गुल्ममपोहति ॥ ३ ॥
स्नेहपानं हितं गुल्मे विशेषेणोर्द्धनाभिजे।
पक्वाशयगते वस्तिरुभयं जठराश्रये ॥ ४ ॥
दोषेऽग्नौ वातिके गुल्मे विबन्धेऽनिलवर्चसोः।
हृद्यान्नपानानि स्निग्धोष्णानि प्रदापयेत् ॥ ५ ॥

पुनः पुनः स्नेहपानं निरूहाः सानुवासनाः।
प्रयोज्या वातजे गुल्मे कफपित्तानुरक्षिणः॥ ६॥
वस्तिकर्म परं विद्याद् गुल्मघ्नं तद्धि मारुतम्।
स्वस्थाने प्रथमं जित्वा सद्यो गुल्ममपोहति॥ ७॥
तस्मादभीक्ष्णो गुल्मी निरूहैः सानुवासनैः।
प्रयुज्यमानैः शाम्यन्ति वातपित्तकफात्मकाः॥ ८॥
हिङ्गुसौवर्चलव्योषविडदाडिमदीप्यकैः।
युष्करात्राजिधान्याम्लवेतसक्षारचित्रकैः॥ ९॥
शठीवचाजगन्धैलासुरसैर्दधिसंयुतैः।
शूलानाहहरं सर्पिः साधयेदातगुल्मिनाम्॥ १०॥
हपुषोषणपृथ्वीकापञ्चकोलकदीप्यकैः।
साजाजिसैन्धवैर्दध्ना दुग्धेन च रसेन च॥ ११॥
दाडिमान्मूलकात् कोलात्पचेत् सर्पिर्निहन्ति तत्।
वातगुल्मोदरानाहपार्श्वहृत्कोष्ठवेदनाः॥ १२॥
योन्यर्शोग्रहणीदोषकासश्वासारुचिज्वरान्।
दशमूलं बलां कालां सुषवीं द्वौ पुनर्नवौ॥ १३॥
पौष्करैरण्डराम्राश्वगन्धभार्ङ्गीमृतांशठीः।
पचेद्दध्यपलाशच्च द्रोणेऽपां द्विपलोन्मितम्॥ १४॥
यवैः कोलैः कुलत्थैश्च माषैश्च प्रास्थिकैः सह।
क्वाथेऽस्मिन् दधिपात्रे च घृतप्रस्थं विपाचयेत्॥ १५॥
क्षारसैर्दाडिमाम्लातमातुलुङ्गोऽवैर्युतम्।
तथा तुषाम्बुधान्याम्लयुतैः क्षौद्रेण कल्कितैः॥ १६॥
भार्ङ्गीतुम्बुरुषड्ग्रन्थाग्रन्थिरास्नाग्निधान्यकैः।
यवानकयवान्यम्लवेतसासितजीरकैः॥ १७॥
अजाजीहिङ्गुहपुषाकारवीहपकोषकैः।
निकुम्भकुम्भमूर्वेभपिप्पलीविल्वदाडिमैः॥ १८॥

खदंष्ट्रालपुषेर्वारुबीजहिंस्राश्मभेदकैः।
मिसिद्दिचारसुरससारिवानोलिनीफलैः॥ १८॥
विकटुत्रिपटूपेतैर्दीपिकं तद् व्यपोहति।
रोगानाशुतरान् पूर्वान् कष्टानपि च श्लीलितम्॥२०॥
अपस्मारगरोन्मादमूत्राघातानिलामयान्।
भूषणत्रिफलाधान्यचविकावेल्लचित्रकैः॥ २१॥
कल्कीकृतैर्घृतं पक्वं सक्षीरं वातगुल्मजित्।
तुलां लशुनकन्दानां पृथक् पञ्चपलांशकम्॥ २२॥
पञ्चमूलं महच्चाम्बुभारार्द्धे तद्विपाचयेत्।
पादशेषं तदर्द्धेन दाडिमस्वरसं सुराम्॥ २३॥
धान्याम्लं दधि चादाय पिष्टांश्चार्द्धपलांशकान्।
भूषणत्रिफलाहिङ्गुयवानोचव्यदीप्यकान्॥ २४॥
साम्लवेतससिन्धूत्थदेवदारून् पचेद् घृतात्।
तैः प्रस्थं तत्परं सर्ववातगुल्मविकारजित्॥ २५॥
षट्पलं वा पिबेत् सर्पिर्यदुक्तं राजयक्ष्मणि।
प्रसन्नया वा क्षीरार्थः सुरया दाडिमेन वा॥ २६॥
घृते मारुतगुल्मघ्नः कार्य्यो दग्धः सरेण वा।
वातगुल्मे कफो हृद्यो हत्वाग्निमरुचिं यदि॥ २७॥
श्लक्ष्णासं गौरवं तन्द्रां जनयेदुल्लिखेत्तु तम्।
शूलानाहविबन्धेषु ज्ञात्वा सस्नेहमाशयम्॥ २८॥
निर्यूहचूर्णवटकाः प्रयोज्या घृतभेषजैः।
कोलदाडिमधर्माम्बुतक्रमद्याम्लकाञ्जिकैः॥ २९॥
मद्येन वा पिबेत् प्रातश्चूर्णान्यस्य वा पुरः।
चूर्णानि मातुलुङ्गस्य भावितान्यसकृद्रसे।
कुर्वीत कार्षुकतरान् वटकान् कफवातयोः॥ ३०॥
हिङ्गुवचाविजयापद्मगन्धादाडिमदीप्यकधान्यकपाठाः।

पुष्करमूलयष्ठीह्वपुषाग्निचारयुगत्रिपटुत्रिकटूनि ॥३१॥
साजाजिचव्यं सहतिन्तिडीकं सक्षेतसाम्लं विनिहन्ति चूर्णम्।
कृत्वार्श्ववस्तित्रिकयोनिपायुशूलानि वायामकफोद्भवानि ॥३२॥

कुच्छ्रान् गुल्मान् वातविण्मूत्रसङ्गं
कण्ठे बन्धं हृदयरुं पाण्डुरोगम्।
अग्न्यायत्तप्रीहदुर्नामहिक्मा-
वर्माध्मानश्वासकासाग्निसादान् ॥ ३३ ॥

लवणयवानीदीप्यककणनागरमुत्तरोत्तरं वृद्धम्।
सर्वसमांशहरीतकीचूर्णं वैश्वानरः साक्षात् ॥ ३४ ॥
त्रिकटुकमजमोदा सैन्धवं जीरके द्वे
समधरणधृतानामष्टमो हिङ्गुभागः।
प्रथमकवलभोज्यः सर्पिषा चूर्णकोऽयं
जनयति भृशमग्निं वातगुल्मं निहन्ति ॥ ३५ ॥
हिङ्गुत्रिविड्शुण्ठाजाजिविजयावाक्षाभिधानामयैः
चूर्णैः कुष्ठनिकुम्भमूलसहितैर्भागोत्तरं वर्द्धितैः।
पीतः कोष्णजलेन कोष्ठजरुजो गुल्मोदरादीनयं
शार्दूलः प्रसभं प्रमथ्य हरति व्याधीन् मृगौघानिव ॥३६॥
सिन्धूत्थपथ्याकणदीप्यकानां चूर्णानि तोयैः पिबता कवोष्णैः।
प्रयाति नाशं कफवातजन्मा नाराचनिर्भिन्न इवामयौघः ॥३७॥

पूतीकपत्रगजचिर्भटचव्यवह्नि-
व्योषं च संस्तरचितं लवणोपधानम्।
दग्ध्वा विचूर्ण्य दधिमस्तुयुतं प्रयोज्यं
गुल्मोदरश्वयथुपाण्डुगदोद्भवेषु ॥ ३८ ॥
हिङ्गु त्रिगुणं सैन्धवमस्मात् त्रिगुणं तु तैलमेरण्डम्।
तत् त्रिगुणरसोनरसं गुल्मोदरवर्धशूलघ्नम् ॥ ३९ ॥
मातुलुङ्गरसो हिङ्गु दाडिमं विडसैन्धवम्।

सुरामण्डेन पातव्यं वातगुल्मरुजापहम् ॥४०॥
शुण्ठ्याः कर्षं गुडस्य द्वौ धौतात् कृष्णतिलात् पलम्।
खादेदेकत्र सचूर्णं कोष्णक्षीरानुयोजितम् ॥ ४१ ॥
वातहृद्रोगगुल्मार्शोयोनिशूलशकृद्ग्रहान्।
पिबेदेरण्डतैलं तु वातगुल्मी प्रसन्नया ॥ ४२ ॥
श्लेष्मण्यनुबले वायौ पित्ते तु पयसा सह।
विड्भेदं यदि वा पित्तं सन्तापं वातगुल्मिनः ॥ ४३ ॥
कुर्य्याद्विरेचनीयोऽसौ सस्नेहैरानुलोमिकैः।
तापानुवृत्तावेव च रक्तं तस्याऽवसेचयेत् ॥ ४४ ॥
साधयेत् शुष्कशुष्कस्य लशुनस्य चतुःपलम्।
क्षीरोदकेऽष्टगुणिते क्षीरशेषं च पाचयेत् ॥ ४५ ॥
वातगुल्मसुदावर्त्तं गृध्रसीं विषमज्वरम्।
हृद्रोगं विद्रधिं शोषं साधयत्याशु तत् पयः ॥ ४६ ॥
तैलं प्रसन्नागोमूत्रमारनाल यवाग्रजः।
गुल्मं जठरमानाहं पीतमेकत्र साधयेत् ॥ ४७ ॥
चित्रकग्रन्थिकैरण्डशुण्ठीक्वाथः परं हितः।
शूलानाहविबन्धेषु सहिङ्गुविडसैन्धवः ॥ ४८ ॥
पुष्करैरण्डयोर्मूलं यवधान्ययवासकम्।
जलेन क्वथितं पीतं कोष्ठदाहरुजापहम् ॥ ४९ ॥
वाय्वाद्यैरण्डदर्भाणां मूलं दारु महौषधम्।
पीत निःक्वाथ्य तोयेन कोष्ठपृष्ठरुगर्तिजित् ॥ ५० ॥
घृताक्तं पयसाऽनल्पपञ्चमूलशृतेन वा।
वातगुल्मी पिबेद्धात्र्यसुदावर्त्तं तु भोजयेत् ॥ ५१ ॥
स्निग्धं पैप्पलिकैर्यूषैर्मूलकानां रसेन वा।
बहुविस्नारुतोऽश्नीयात् क्षीरेणोष्णेन यावकम् ॥५२॥
कुल्माषान् वा बहुस्नेहान् भक्षयेल्लवणोत्तरान्।

नीलिनीविल्वतादन्तीपथ्याकम्पिल्लकैः सह ॥ ५३ ॥
समलाय घृतं देयं सविडक्षारनागरम्।
नीलिनीं त्रिफलां रास्नां बलां कटुकरोहिणीम् ॥ ५४ ॥
पचेद्विडङ्गं व्याघ्रीं च पालिकानि जलाढके।
रसेऽष्टभागशेषे तु घृतप्रस्थं विपाचयेत् ॥ ५५ ॥
दध्नः प्रस्थेन संयोज्य सुधाक्षीरपलेन च।
ततो घृतपलं दद्याद्यवागूमण्डमिश्रितम् ॥ ५६ ॥
जीर्णे सम्यग्विरिक्तञ्च भोजयेद्रसभोजनम्।
गुल्मकुष्ठोदरव्यङ्गशोफपाण्डामयज्वरान् ॥ ५७ ॥
श्वित्रं प्लीहानमुन्मादं हन्त्येतं नीलिनीघृतम्।
कुक्कुटाञ्च मयूरांश्च तित्तिरीक्रौञ्चवर्त्तकाः ॥ ५८ ॥
शालयो मदिराः सर्पिर्वातगुल्मचिकित्सितम्।
मितमुष्णं द्रवं स्निग्धं भोजनं वातगुल्मिनाम् ॥ ५९ ॥
समण्डावारुणीपानं तप्तं वा धान्यकैर्जलम्।
स्निग्धोष्णेनोदिते गुल्मे पैत्तिके संशमनं हितम् ॥ ६० ॥
द्राक्षाभयागुडरसं कम्पिल्लं वा मधुद्रुतम्।
कल्पोक्तं रक्तपित्तोक्तं गुल्मे रूक्षोष्णजे पुनः ॥ ६१ ॥
परं संशमनं सर्पिस्तिक्तं वासाघृतं शृतम्।
तृणाख्यपञ्चकक्वाथे जीवनीयगणेन वा ॥ ६२ ॥
शृतं तेनैव वा क्षीरं न्यग्रोधादिगणेन वा।
तत्रापि संशमनं गुल्माच्छीघ्रमात्ययिके भिषक् ॥ ६३ ॥
वैरेचनिकसिद्धेन सर्पिषा पयसाऽपि वा।
रसेनामलकैश्चूर्णां घृतप्रस्थं विपाचयेत् ॥ ६४ ॥
पथ्यापादं पिबेत्सर्पिस्तत्सिद्धं पित्तगुल्मनुत्।
पिबेद्वा तैल्वकं सर्पिर्यच्चोक्तं पित्तविद्रधौ ॥ ६५ ॥
द्राक्षां पयस्यां मधुकं चन्दनं पद्मकं मधु।

पिबेत्तच्छृतोयेन पित्तगुल्मोपशान्तये ॥ ६६ ॥
द्विपलं वायमाणाया जलद्विप्रस्थसाधितम् ।
अष्टभागस्थितं पूतं कोष्णं क्षीरसमं पिबेत् ॥ ६७ ॥
पिबेदुपरि तस्योष्णं क्षीरमेव यथाबलम् ।
तेन निर्हृतदोषस्य गुल्मः शाम्यति पैत्तिकः ॥ ६८ ॥
दाहेऽभ्यङ्गो घृतैः शीतैः साज्यैर्लेपो हिमौषधैः ।
स्पर्शः सरोरुहां पत्रैः पात्रैश्च प्रचलज्जलैः ॥ ६९ ॥
विदाहपूर्वरूपेषु शूले वह्नेश्च मार्दवे ।
बहुशोऽपहरेद्रक्तं पित्तगुल्मे विशेषतः ॥ ७० ॥
छिन्नमूला विदह्यन्ते न गुल्मा यान्ति च क्षयम् ।
रक्तं हि व्यक्षतां याति तच्च नास्ति न चाऽस्ति रुक् ॥७१॥
हृतदोषं परिम्लानं जाङ्गलैस्तर्पितं रसैः ।
समाश्वस्तं सशेषार्त्तिं सर्पिरभ्यासयेत् पुनः ॥ ७२ ॥
रक्तपित्तातिवृत्तत्वात् क्रियामनुपलभ्य वा ।
गुल्मे पाकोन्मुखे सर्वा पित्तविद्रधिवत् क्रिया ॥ ७३ ॥
शालिगव्याजपयसा पटोली जाङ्गलं घृतम् ।
धात्रीपरूषकं द्राक्षा खर्जूरं दाडिमं सिताम् ॥ ७४ ॥
भोज्यं पानेऽम्बुबलया वृद्धत्यादौ च साधितम् ।
श्लेष्मजे वामयेत् पूर्वमवम्यमुपवासयेत् ॥ ७५ ॥
तिक्तोष्णकटुसंसर्ग्या वह्निं सन्धुक्षयेत्ततः ।
हिङ्ग्वादिभिश्च हिमुण्ढ्याहिङ्ग्वेतसैः ॥ ७६ ॥
निगूढं यदि वोन्नद्धं स्तिमितं कठिनं स्थिरम् ।
आनाहादियुतं गुल्मं संशोध्य विनयेदनु ॥ ७७ ॥
घृतं सचारकटुकं पातव्यं कफगुल्मिना ।
सव्योषक्षारलवणं सहिङ्गुविडदाडिमम् ॥ ७८ ॥
कफगुल्मं जयत्याशु दशमूलशृतं घृतम् ।

भल्लातकानां द्विपलं पञ्चमूलं पलोन्मितम् ॥ ७८ ॥
अम्लं तोयाढके साध्यं पादशेषेण तेन च।
तुल्यं घृतं तुल्यपयो विपचेदक्षसम्मितैः ॥ ८० ॥
बिडङ्गहिङ्गुसिन्धूत्थयावशूकशठीविडैः।
सद्दीपिरास्नायष्ट्याह्वषड्ग्रन्थाकणनागरैः ॥ ८१ ॥
एतद्भल्लातकघृतं कफगुल्महरं परम्।
श्लीहपाण्वामयश्वासग्रहणीरोगकासनुत् ॥ ८२ ॥
ततोऽस्य गुल्मे देहे च समस्ते स्वेदमाचरेत्।
सर्वत्र गुल्मे प्रथमं स्नेहस्वेदोपपादिते ॥ ८३ ॥
या क्रिया क्रियते याति सा सिद्धिं न विरूक्षिते।
स्निग्धस्विन्नशरीरस्य गुल्मे शैथिल्यमागते ॥ ८४ ॥
यथोक्ता घटिका न्यस्येद् गृहीतेऽपनयेच्च ताम्।
वस्त्रान्तरं ततः कृत्वा क्रिन्द्याद् गुल्मं प्रमाणवित् ॥८५॥
विमार्गाजपदादर्गैर्यथालाभं प्रपीड़येत्।
प्रमृज्याद् गुल्ममेवैकं न त्वन्यद्धृदयं स्पृशेत् ॥ ८६ ॥
तिलैरण्डातसीबीजसर्षपे परिलिप्य च।
श्लेष्मगुल्ममयस्याग्नैः सुखोष्णैः स्वेदयेत्ततः ॥ ८७ ॥
एव च विस्रुते स्थानात् कफगुल्मं विरेचनैः।
सस्नेहैर्वस्तिभिश्चैनं शोधयेद्दशमूलकैः ॥ ८८ ॥
पिप्पल्यामलकद्राक्षाश्यामाद्यैः पालिकैः पचेत्।
एरण्डतैलहविषोः प्रस्थौ पयसि षड्गुणे ॥ ८९ ॥
सिद्धोऽयं मिश्रकः स्नेहो गुल्मिनां रसनं हितम्।
हृद्विद्रधिशूलेषु वातव्याधिषु चामृतम् ॥ ९० ॥
पित्तेऽथा नीलिनीसर्पिर्भार्ङ्गया द्विपलीकया।
तथैव सुकुमाराख्यं घृतान्यौदरिकाणि वा ॥ ९१ ॥
द्रोणेऽम्भसः पचेदक्ष्या पलानां पञ्चविंशतिम्।

चित्रकस्य तथा पथ्यास्तावतीस्तद्रसे स्रुते ॥ ९२ ॥
द्विप्रस्थे साधयेत् पूते चिपेद्दन्तीसम गुडम् ।
तैलात्पलानि चत्वारि त्रिवृतायाश्च चूर्णतः ॥ ९३ ॥
कणाकर्षौ तथा शुण्ठ्याः सिद्धे लेहे तु शीतले ।
मधुतैलसम दद्याच्चतुर्जाताच्चतुर्थिकाम् ॥ ९४ ॥
अतो हरीतकीमेकां सावलेहपलामदन् ।
सुखं विरिच्यते स्निग्धो दोषप्रशमनामयः ॥ ९५ ॥
गुल्मार्शोग्रहणीदुर्नामशोफानाहगरोदरान् ।
कुष्ठोत्क्लेशारुचिप्लीहयकृत्कृमिविषमज्वरान् ॥ ९६ ॥
घ्नन्ति दन्तीहरीतक्यः पाण्डुतां च सकामलाम् ।
सुधाक्षीरद्रवं चूर्णं त्रिवृतायाः सुभावितम् ॥ ९७ ॥
कार्षिकं मधुसर्पिर्भ्यां लोढ्वा साधु विरिच्यते ।
कुष्ठश्यामात्रिवृद्दन्तीविजयाक्षारगुग्गुलुम् ॥ ९८ ॥
गोमूत्रेण पिबेदेकं तेन गुग्गुलुमेव वा ।
निरूहान् कल्पसिध्युक्तान् योजयेद् गुल्मनाशनान् ॥९९॥
क्षतमूलं महावास्तुं कठिनं स्तिमितं गुरुम् ।
मूढमांसं जयेद् गुल्मं चारारिष्टाग्निकर्मभिः ॥ १०० ॥
एकान्तरं द्व्यन्तरं वा विश्रमय्याथवा व्यहम् ।
शरीरदोषबलयोर्वर्द्धनक्षपणोद्यतः ॥ १०१ ॥
अर्शोऽश्मरीग्रहण्युक्ताः क्षारा योज्याः कफोल्बणे ।
देवदारुत्रिवृद्दन्तीकटुकापञ्चकोलकम् ॥ १०२ ॥
स्वर्जिकायावशूकाख्यौ श्वेतापाठोपकुञ्चिकाः ।
कुष्ठं सर्पसुगन्धां च द्व्यर्धांशं षट्पलं कम् ॥ १०३ ॥
पालिकं चूर्णितं तैलवसादधिघृताप्लुतम् ।
घटास्यान्तः पचेत् पक्वमग्निवर्चे घटे च तम् ॥ १०४ ॥
क्षारं गृहीत्वा क्षीराज्यतक्रमद्यादिभिः पिबेत् ।

गुल्मोदावर्त्तवर्चार्योजठरग्रहणीक्रमान् ॥ १०५ ॥
अपक्वारगरोन्मादयोनिशुक्रामयाश्मरी. ।
चारोऽगदोऽयं शमयेद्विषं चाक्षुभुजङ्गजम् ॥ १०६ ॥
स्नेहाणं मधुरं स्निग्धं रसक्षीरघृताशिनः ।
छित्त्वा भित्त्वाऽऽशय चारः चारत्वात्पातयत्यधः ॥१०७॥
मन्देऽग्नावरुचौ सात्म्यं मेदोः सन्नेहमश्नताम् ।
योजयेदासवारिष्टान्विगदान्मार्गशुद्धये ॥ १०८ ॥
शालयः षष्टिका जीर्णाः कुलत्था आढ़कं पलम् ।
चिरिविल्वाग्नितर्कारीयवानीवरणाङ्कुराः ॥ १०९ ॥
शिग्रुस्तरुणविल्वानि बालं शुष्कं च मूलकम् ।
बीजपूरकहिङ्गुम्लवेतसक्षारदाडिमम् ॥ ११० ॥
व्योषं तक्रं घृतं तैलं भक्ता पानं तु वारुणी ।
धान्याम्लं मस्तु तक्रं च यवानीविडचूर्णितम् ॥ १११ ॥
पञ्चमूलकृतं वारि जीर्णं माक्षीकमेव वा ।
पिप्पलीपिप्पलीमूलचित्रकाजाजीसैन्धवैः ॥ ११२ ॥
सुरा गुल्मं जयत्याशु जाङ्गलस्य विमिश्रिता ।
वमनैर्लङ्घनैः स्वेदैः सर्पिःपानैर्विरेचनैः ॥ ११३ ॥
वस्तिक्षारासवारिष्टगुल्मिकापथ्यभोजनैः ।
स्नैष्मिको बहुमूलत्वाद् यदि गुल्मो न शाम्यति ॥ ११४ ॥
तस्य दाहं कृते रक्ते कुर्यादग्न्यादिभिः ।
अथ गुल्मं सपर्यन्तं वाससान्तरितं भिषक् ॥ ११५ ॥
नाभिवस्त्यन्त्रहृदयं रोमराजीं च वर्जयेत् ।
नातिगाढं परिस्रवेच्छस्त्रेण ज्वलताऽथवा ॥ ११६ ॥
लोहेनाराग्निकोल्येन दारुणा तैन्दुकेन वा ।
ततोऽग्निवेगे शमिते शीतैर्व्रणे इव क्रिया ॥ ११७ ॥
आमान्वये तु पेयाद्यैः सम्यक्ष्याग्निं विलङ्घिते ।

स्वं स्वं कुर्य्यात् क्रमं मिश्रं मिश्रदोषे च कालवित् ॥११८॥
गतप्रसवकालायै नार्य्यै गुल्मेऽसृगुद्भवे।
स्निग्धस्विन्नशरीरायै दद्यात् स्नेहविरेचनम् ॥ ११९ ॥
तिलक्वाथो घृतगुड़व्योषभार्ङ्गीरजोऽन्वितः।
पानं रक्तभवे गुल्मे नष्टे पुष्पे च योषितः ॥ १२० ॥
भार्ङ्गीक्षाराकरञ्जत्वग्ग्रन्थिकामरदारुजम्।
चूर्णं तिलानां क्वाथेन पीतं गुल्मरुजापहम् ॥ १२१ ॥
पलाग्रधारपाचे द्वे द्वे पात्रे तैलसर्पिषोः।
गुल्मग्रन्थिव्रजननीं पक्वां मात्रां प्रयोजयेत् ॥ १२२ ॥
न प्रभियेत यद्येवं दद्याद्योनिविरेचनम्।
क्षारेण युक्तं पललं सुधाक्षीरेण वा ततः ॥ १२३ ॥
ताभ्यां वा भावितान् दद्याद् योनौ कटुकमल्लकान्।
वराहमल्लपित्ताभ्यां नक्तकान् वा सुभावितान् ॥१२४॥
किण्वं वा सगुडक्षारं दद्याद् योनौ विशुद्धये।
रक्तपित्तहरं क्षारं लेहयेन्मधुसर्पिषा ॥ १२५ ॥
लशुनं मदिरां तीक्ष्णां मल्लांश्चास्ये प्रयोजयेत्।
वस्तिं सक्षीरगोमूत्रं सक्षारं दशमूलिकम् ॥ १२६ ॥
अवर्त्तमाने रुधिरे हितं गुल्मप्रभेदनम्।
यमकाभ्यक्तदेहायाः प्रवृत्ते समुपेक्षणम् ॥ १२७ ॥
रसौदनस्तयाऽऽहारः पानं च तरुणी सुरा।
रुधिरेऽतिप्रवृत्ते तु रक्तपित्तहराः क्रियाः ॥ १२८ ॥
कार्य्या वातरुगार्त्तायाः सर्वा वातहराः पुनः।
अनाहादावुदावर्त्तबलासघ्नी यथायथम् ॥ १२९ ॥

पञ्चदशोऽध्यायः।

अथातः उदरचिकित्सितं व्याख्यास्यामः॥
दोषातिमात्रोपचयात् स्रोतोमार्गनिरोधनात्।
सम्भवत्युदरं तस्मात् नित्यमेनं विरेचयेत्॥ १॥
पाययेत्तैलमैरण्डं समूत्रं सपयोऽपि वा।
मासं द्वौ वाऽथवा गव्यं मूत्रं माहिषमेव वा॥ २॥
पिबेद् गोक्षीरभुक् स्नाहा करभीक्षीरवर्त्तनः।
दाहानाहातिढक्ष्मूर्च्छापरीतस्तु विशेषतः॥ ३॥
रूक्षाणां बहुवातानां दोषसञ्चयिकाङ्क्षिणाम्।
स्नेहनीयानि सर्पींषि जठरघ्नानि योजयेत्॥ ४॥
षट्पलं दशमूलाम्बु मस्तुद्राढकसाधितम्।
नागरं त्रिपलं प्रस्थ घृततैलात्तथाढकम्॥ ५॥
मस्तुनः साधयित्वैतत् पिबेत्सर्वोदरापहम्।
कफमारुतसम्भूते गुल्मे च परमं हितम्॥ ६॥
चतुर्गुणे जले मूत्रे द्विगुणे क्षीरकात्यले।
कल्के सिद्धं घृतप्रस्थं सक्षारं जठरी पिबेत्॥ ७॥
यवकोलकुलत्थानां पञ्चमूलस्य चाम्भसा।
सुरासौवीरकाभ्यां च सिद्धं वा पाययेद् घृतम्॥ ८॥
एभिः स्निग्धाय सञ्जाते बले शान्ते च मारुते।
स्रस्ते दोषाशये दद्यात्कल्पदृष्टं विरेचनम्॥ ९॥
पटोलमूलं त्रिफला निशां वेल्लं च कार्षिकम्।
कम्पिल्लनीलिनीकुम्भभागान् द्वित्रिचतुर्गुणान्॥ १०॥
पिबेत्तच्चूर्णं मूत्रेण पेयां पूर्वं ततो रसैः।
विरक्तो जाङ्गलैरद्यात्ततः षड्दिवसं पयः॥ ११॥
घृतं पिबेद् व्योषयुतं पीतमेवं पुनः पुनः।
हन्ति सर्वोदराण्येतच्चूर्णं जातोदकान्यपि॥ १२॥

मवाक्षीं शङ्खिनीं दन्तीं तिल्वकस्य त्वचं वचाम् ।
पिबेत्कर्कन्धुमृद्वीकाकोलाम्भोमूत्रसीधुभिः ॥ १३ ॥
यवानी हपुषाधान्य शतपुष्पोपकुञ्चिका ।
कारवी पिप्पलीमूलमजगन्धा शठी वचा ॥ १४ ॥
चित्रकाजाजिक व्योष स्वर्णक्षीरी फलत्रयम् ।
ह्रीबेरी पौष्करं मूलं कुष्ठ लवणपञ्चकम् ॥ १५ ॥
विडङ्गं च समांशानि दन्त्या भागत्रयं तथा ।
त्रिवृद्विशाले द्विगुणे सातला च चतुर्गुणा ॥ १६ ॥
एष नारायणो नाम चूर्णो रोगगणापहः ।
नैन प्राप्याभिवर्द्धन्ते रोगा विष्णुमिवासुराः ॥ १७ ॥
तक्रेणोदरिभिः पेयो गुल्मिभिर्वदराम्बुना ।
आनाहवाते सुरया वातरोगे प्रसन्नया ॥ १८ ॥
दधिमण्डेन विट्सङ्गे दाडिमाम्भोभिरर्शसि ।
परिकर्त्ते सहच्छाल्या कृष्णाम्बुभिरजीर्णके ॥ १९ ॥
भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे ।
हृद्रोगे ग्रहणीदोषे कुष्ठे मन्देऽनले ज्वरे ॥ २० ॥
दष्टाविषे मूलविषे सगरे कृत्रिमे विषे ।
यथार्हं स्निग्धकोष्ठेन पेयमेतद्विरेचनम् ॥ २१ ॥
हपुषां काञ्चनक्षीरीं त्रिफलां नीलिनीफलम् ।
त्रायन्तीं रोहिणीं तिक्ता सातलां त्रिवृतां वचाम् ॥२२॥
सैन्धवं काललवण पिप्पलीं चेति चूर्णयेत् ।
दाडिमत्रिफलामांसरससम्मूत्रसुखोदकैः ॥ २३ ॥
पेयोऽयं सर्वगुल्मेषु प्लीह्नि सर्वोदरेषु च ।
श्वित्रे कुष्ठेऽजरके सदने विषमेऽनले ॥ २४ ॥
शोफार्शःपाण्डुरोगेषु कामलाया हलीमके ।
वातपित्तकफांश्चाशु विरेकेण प्रसाधयेत् ॥ २५ ॥

नीलिनीं निचुल व्योषं क्षारौ लवणपञ्चकम्।
चित्रकं च पिबेच्चूर्णं सर्पिषोदरगुल्मनुत् ॥ २६ ॥
पूर्ववच्च पिबेद् दुग्धं क्षामः शुद्धोऽन्तरान्तरा।
कारभं शल्यमाजं वा दद्यादात्ययिके गदे ॥ २७ ॥
स्नेहमेव विरेकार्थं दुर्बलेभ्यो विशेषतः।
हरीतकीसूक्ष्मरजः प्रस्थयुक्तं घृताढकम् ॥ २८ ॥
अग्नौ विलाप्य मथितं खजेन यवपल्लके।
निधापयेत्ततो मासादुद्धृतं गालितं पचेत् ॥२९॥
हरीतकीनां क्वाथेन दशा चास्लेन संयुतम्।
उदरं गरमष्ठीलामानाह गुल्मविद्रधिम् ॥ ३० ॥
हन्त्येतत्कुष्ठमुन्मादमपस्मारं च पानतः।
स्नुक्क्षीरयुक्ताद्गोक्षीराच्छृतशीतात् खजाहतात् ॥३१॥
यत्नातमाज्यं स्नुक्क्षीरसिद्धं तच्च तथागुणम्।
क्षीरद्रोणं सुधाक्षीरप्रस्थार्द्धेन युतं दधि ॥ ३२ ॥
जातं मथित्वा तत्सर्पिस्त्रिद्विसिद्धं च तद्गुणम्।
तथा सिद्धं घृतप्रस्थं पयस्यष्टगुणे पिबेत् ॥ ३३ ॥
स्नुक्क्षीरपलकल्केन त्रिवृता षट्पलेन च।
एषां वानु पिबेत् पेयां रसं स्वादु पयोऽथवा ॥ ३४ ॥
घृते जीर्णे विरिक्तश्च कोष्णं नागरसाधितम्।
पिबेदम्बु ततः पेयां ततो यूषं कुलत्थजम् ॥ ३५ ॥
पिबेद्भूयस्त्र्यहं त्वेवं भूयो वाऽप्रतिभोजितः।
पुनः पुनः पिबेत् सर्पिरानुपूर्व्याऽनयैव च ॥ ३६ ॥
घृतान्येतानि सिद्धानि विदध्यात् कुशलो भिषक्।
गुल्मानां गरदोषाणामुदराणां च शान्तये ॥ ३७ ॥
पीलुकल्कापसिद्धं वा घृतमानाहभेदनम्।
तैल्वकं नीलिनीं सर्पिः स्नेहं वा भिन्नकं पिबेत् ॥ ३८ ॥

हृतदोषः क्रमादश्नन् लघुशाल्योदनं प्रति ।
उपयुञ्जीत जठरी दोषशेषनिवृत्तये ॥ ३८ ॥
हरीतकीसहस्रं वा गोमूत्रेण पयोऽनुपः ।
सहस्रं पिप्पलीनां वा स्रुक्क्षीरेण सुभावितम् ॥४०॥
पिप्पलीं वर्द्धमानां वा क्षीराशी वा शिलाजतु ।
तद्वद्वा गुग्गुलुं क्षीरं तुल्यार्द्रकरसं तथा ॥ ४१ ॥
चित्रकामरदारुभ्यां कल्कं क्षीरेण वा पिबेत् ।
मासं युक्तस्तथा हस्तिपिप्पली विश्वभेषजम् ॥ ४२ ॥
विडङ्गं चित्रको दन्ती चव्यं व्योषं च तैः पयः ।
कल्कैः कोलसमैः पीत्वा प्रवृद्धमुदरं जयेत् ॥ ४३ ॥
भोज्यं भुञ्जीत वा मांसं सुहीक्षीरघृतान्वितम् ।
उत्कारिकां वा स्रुक्क्षीरपीतपथ्याकणाक्षताम् ॥४४॥
पार्श्वशूलमुपस्तम्भहृद्ग्रहं च सभीरणः ।
यदि कुर्य्यात् ततस्तैलं बिल्वक्षारान्वितं पिबेत् ॥४५॥
पक्वं वा टिण्टुकबलापलाशं तिलजालजैः ।
क्षारैः कदल्यपामार्गतर्कारिजैः पृथक् कृतैः ॥ ४६ ॥
कफे वातेन पित्ते वा ताभ्यां वाप्याहतेऽनिले ।
बलिनः स्नैषधं युक्तं तैलमैरण्डजं हितम् ॥ ४७ ॥
देवदारुपलाशार्कहस्तिपिप्पलीशिग्रुकैः ।
साश्वकर्णैः सगोमूत्रैः प्रदिह्यादुदरं बहिः ॥ ४८ ॥
हस्तिकालीवचाशुण्ठीपञ्चमूलपुनर्नवात् ।
वर्षाभूधान्यकुष्ठाच्च क्वाथैर्मूत्रैश्च सेचयेत् ॥ ४९ ॥
विरिक्तं स्नानमुदरं स्वेदितं साम्लसादिभिः ।
वाससा वेष्टयेदेवं वायुर्नाऽऽभापयेत् पुनः ॥ ५० ॥
सुविरिक्तस्य यस्य स्यादाध्मानं पुनरेव तम् ।
सस्निग्धैरम्ललवणैर्निरूहैः समुपाचरेत् ॥ ५१ ॥

सोपस्तम्भश्चापि वायुराधमति यं नरम्।
तीक्ष्णाः सक्षारगोमूत्राः शस्यन्ते तस्य वस्तयः ॥५२॥
इति सामान्यतः प्रोक्ताः सिद्धा जठरिणां क्रियाः।
वातोदरेऽथ बलिनं विदार्य्यादिशृतं घृतम् ॥ ५३ ॥
पाययेत् तु ततः स्निग्धं स्वेदिताङ्गं विरेचयेत्।
बहुशस्तैल्वकेनैनं सर्पिषा मिश्रकेण वा ॥ ५४ ॥
क्षते ससर्जने क्षीरं बलार्थमवचारयेत्।
प्रागुत्क्लेशाच्चिवर्त्तेत बले लब्धे क्रमात् पयः ॥५५॥
यूषैः रसैर्वा मन्दाम्ललवणैरिन्धितानलम्।
सोदावर्त्तं पुनः स्निग्धं स्विन्नमास्थापयेत् ततः ॥ ५६ ॥
तीक्ष्णाधोभागयुक्तेन दारुमूलिकवस्तिना।
तिलोरुबूकतैलेन वातघ्नाम्लशृतेन च ॥ ५७ ॥
स्फुरणाक्षेपसन्ध्यस्थिपार्श्वपृष्ठचिकार्त्तिषु।
रूक्षं बहुशकृद्धातं दीप्ताग्निमनुवासयेत् ॥ ५८ ॥
अविरेच्यस्य शमना वस्तिक्षीरघृतादयः।
बलिनं स्वादुसिद्धेन पैत्ते संस्नेह्य सर्पिषा ॥ ५९ ॥
श्यामात्रिभण्डीत्रिफलाविपक्वेन विरेचयेत्।
सितामधुघृताढ्येन निरूढोऽस्य ततो हितः ॥ ६० ॥
न्यग्रोधादिकषायेण स्नेहवस्तिश्च तच्छृतः।
दुर्बलं त्वनुवास्यादौ शोधयेत् क्षीरवस्तिभिः ॥ ६१ ॥
जाते त्वग्निबले स्निग्धं भूयो भूयो विरेचयेत्।
क्षीरेण सविडुत्कल्के नीरुबूकशृतेन तम् ॥ ६२ ॥
सातलात्रायमाणाभ्यां शृतेनारग्वधेन वा।
सकफे वा समूत्रेण सतिक्ताक्ष्येण सानिले ॥ ६३ ॥
पयसान्यतमेनैषां विदार्य्यादिशृतेन वा।
भुञ्जीत जठरं चास्य पायसेनोपनाहयेत् ॥ ६४ ॥

पुनः क्षीरं पुनर्वस्तिं पुनरेव विरेचनम्।
क्रमेण ध्रुवमातिष्ठन्यतः पित्तोदरं जयेत् ॥ ६५ ॥
वत्सकादि विपक्वेन कफे संसर्जने सर्पिषा।
स्निग्धं सूक्ष्मक्षीरसिद्धेन बलवन्तं विरेचितम् ॥ ६६ ॥
संसर्जयेत् कटुक्षारयुक्तैरन्नैः कफापहैः।
मूत्रक्षारषणतैलाक्तो निरूहोऽस्य ततो हितः ॥ ६७ ॥
मुष्ककादिकषायेण स्नेहवस्तिश्च तच्छृतः।
भोजनं व्योषदुग्धेन कौलत्थेन रसेन वा ॥ ६८ ॥
स्तैमित्यारुचिक्लासैर्मन्देऽग्नौ मद्यपाय च।
दद्यादरिष्टान् क्षारांश्च कफस्थानस्थिरोदरे ॥ ६९ ॥
छिन्नपक्वे त्रिफलां देवदारु निशाद्वयम्।
भल्लातकं शिग्रुफलं कटुकां तिक्तकं वचाम् ॥ ७० ॥
शुण्ठीं माद्रीं घनं कुष्ठं क्षरलं षट्पञ्चकम्।
दाहयेज्जर्जरीकृत्य दधिस्नेहचतुष्कवत् ॥ ७१ ॥
अन्तर्धूमं ततः क्षाराद्विडालपदकं पिबेत्।
मदिरादधिमण्डोष्णजलारिष्टसुरासवैः ॥ ७२ ॥
उदरं गुल्ममष्ठीलां तून्यौ कोफ विषूचिकाम्।
प्लीहच्छर्दीगुदजानुदावर्त्तं च नाशयेत् ॥ ७३ ॥
जयेदरिष्टगोमूत्रचूर्णायस्कृतिपानतः।
सक्षारतैलपानैश्च दुर्बलस्य कफोदरम् ॥ ७४ ॥
ज्यनाह्य ससिद्धार्थकिण्वैर्वीजैश्च मूलकात्।
कल्कितैरुदरस्थे दमभोक्ष्ण चात्र योजयेत् ॥ ७५ ॥
सन्निपातोदरे कुर्य्यान्नातिक्षीणबलानले।
दोषोद्रेकानुरोधेन प्रत्याख्याय क्रियामिमाम् ॥ ७६ ॥
दन्तीद्रवन्तीफलजं तैलं पाने च शस्यते।
क्रियानिहस्ते जठरे त्रिदोषे तु विशेषतः ॥ ७७ ॥

दद्यादाप्तुच्छ्य तज्ज्ञातीन् पातुं मद्येन कल्पितम्।
मूलं काकादनीगुञ्जाकरवीरकसम्भवम् ॥ ७८ ॥
पानभोजनसंयुक्तं दद्याद् वा स्थावरं विषम्।
यस्मिन् वा कुपितः सर्पो विमुञ्चति फले विषम् ॥ ७९ ॥
तेनास्य दोषसङ्घातः क्षिप्रो लीनो विमार्गगः।
बहिः प्रवर्त्तते भिन्नो विषेणाशु प्रमाथिना ॥ ८० ॥
तथा व्रजत्यगदतां शरीरान्तरमेव वा।
क्षुतदोषं तु शीताम्बु स्नातं तं पाययेत् पयः ॥ ८१ ॥
पेयां वा लिह्यतः शाकं मण्डूक्या वास्तुकस्य वा।
कालशाकं यवाख्यं वा खादेत् खरससाधितम् ॥ ८२ ॥
निरन्नलवणस्नेहं स्विन्नास्विन्नमनन्नभुक्।
मासमेकं ततश्चैवं दृषितः स्वरस पिबेत् ॥ ८३ ॥
एव विनिर्हृते शाकैर्दोषे मासात् परं ततः।
दुर्बलाय प्रयुञ्जीत प्राणभृत् कारभं पयः ॥ ८४ ॥
क्षीरोदरे यथादोषं स्निग्धस्य स्वेदितस्य च।
शिरां मुक्तवतो दध्ना वामबाहौ विमोक्षयेत् ॥ ८५ ॥
लब्धे बले च भूयोऽपि स्नेहपीतं विशोधितम्।
समुद्रशुक्तिज क्षारं पयसा पाययेत्तथा ॥ ८६ ॥
श्लक्ष्णपूतं विडकणाचूर्णाढ्यं नक्तमालजम्।
सोभाक्षनस्य वा क्वाथं सैन्धवाग्निकणान्वितम् ॥ ८७ ॥
हिङ्ग्वादिचूर्णं क्षाराढ्यं युञ्जीत च यथाबलम्।
पिप्पली नागरं दन्ती समांशं द्विगुणाभयम् ॥ ८८ ॥
विडार्द्धांशयुतं चूर्णमिदमुष्णाम्बु ना पिबेत्।
विडङ्गं चित्रकं सक्तून् सघृतान् सैन्धवं वचाम्।
दग्ध्वा कपाले पयसा गुञ्जाक्षीहापहं पिबेत् ॥ ८९ ॥
तैलोन्मिश्रैर्बदरकपत्रैः संमर्दितैः समुपनद्धः।

मुग्धेन पीडितोऽनु याति प्लीहा पयोभुजो नाशम् ॥८०॥
रोहीतकलताः क्वाथ्याः खण्डशः साभयाजले ॥८१॥
मूत्रे वाऽसुत्रुधात्तत्तु समरात्रस्थित पिबेत्।
कामला प्लीहगुल्मार्शः कृमिमेहोदरापहम् ॥८२॥
रोहीतकत्वचः कृत्वा पलानां पञ्चविंशतिम्।
कोलद्विप्रस्थसंयुक्तं कषायमुपकल्पयेत् ॥८३॥
यालिकैः पञ्चकोलैस्तु तैः समस्तैश्च तुल्यया।
हरीतकत्वचा पिष्टैर्घृतप्रस्थं विपाचयेत् ॥८४॥
प्लीहाभिवृद्धिं शमयत्यें तदाशु प्रयोजितम्।
कदल्यास्त्रिलनालानां क्षारेण क्षुरकस्य च ॥८५॥
तैलं पक्वं जयेत्पानात् प्लीहानं कफवातजम्।
अग्नौ गुल्मविधिना योजयेदग्निकर्म च ॥८६॥
अप्राप्तपिच्छासलिले प्लीह्नि वातकफोल्वणे।
पैत्तिके जीवनीयानि सर्पीं षि क्षीरवस्तयः ॥८७॥
रक्तावसेकः संशुद्धिः क्षीरपानं च शस्यते।
यकृति प्लीहवत्कर्म दक्षिणे तु भुजे शिराम् ॥८८॥
स्विन्नाय बद्धोदरिणे मूत्रतीक्ष्णौषधान्वितम्।
सतैलं लवणं दद्यान्निरूहं सानुवासनम् ॥८९॥
परिस्रंसीनि चान्नानि तीक्ष्णं चास्मै विरेचनम्।
उदावर्त्तहरं कर्म कार्यं यच्चानिलापहम् ॥१००॥
छिद्रोदरस्थते स्नेहात् स्नेहोदरवदाचरेत्।
जातं जातं जलं साध्यमेवं तद्यापयेद्भिषक् ॥१०१॥
अपां दोषहराण्यादौ योजयेदुदकोदरे।
मूत्रयुक्तानि तीक्ष्णानि विविधक्षारवन्ति च ॥१०२॥
दीपनीयैः कफघ्नैश्च तमाहारैरुपाचरेत्।
क्षारं क्षागकरीषाणां शृतं मूत्रेऽग्निना पचेत् ॥१०३॥

घनीभवति तस्मिंश्च कर्षांशं चूर्णितं क्षिपेत्।
पिप्पलीपिप्पलीमूलं शुण्ठीलवणपञ्चकम् ॥ १०३ ॥
निकुम्भकुम्भनिर्फलास्वर्णक्षीरीविषाणिकाः।
स्वर्जिकाक्षारषड्ग्रन्थासातलायवशूकजम् ॥ १०४ ॥
कोलाभा गुटिकाः कृत्वा ततः सौवीरकाप्लुताः।
पिबेदजरके शोफे प्रहृद्वे चोदकोदरे ॥ १०५ ॥
इत्यौषधैरप्रशमे त्रिषु वृद्धोदरादिषु।
प्रयुञ्जीत भिषक् शस्त्रमार्त्तबन्धुनृपार्थितः ॥ १०७ ॥
स्निग्धस्विन्नतनोर्नाभेरधोवृत्तोन्नतान्त्रयोः।
पाटयेदुदरं मुक्त्वा वामतश्चतुरङ्गुलात् ॥ १०८ ॥
चतुरङ्गुलमानं तु निष्कास्यान्त्राणि तेन च।
निरीक्ष्यापनयेद् बालमलजेपोपलादिकम् ॥ १०९ ॥
छिद्रे तु शस्त्रमुद्धृत्य विशोध्यान्त्र परिस्रवम्।
मर्कोटदंशयेच्छिद्रं तेषु लग्नेषु चाहरेत् ॥ ११० ॥
कार्यं मूर्ध्नीऽनु चान्त्राणि यथास्थानं निवेशयेत्।
अक्तानि मधुसर्पिर्भ्यामथ सीव्येद् बहिर्व्रणम् ॥ १११ ॥
ततः क्षणमुदालिप्य वध्नीयाद् यष्टिमिश्रया।
निवातस्थः पयोभुक्तिः स्नेहद्रोण्यां वसेत्ततः ॥ ११२ ॥
सजले जठरे तैलैरभ्यक्तस्यानिलापहैः।
स्निग्धस्वेदोष्णाम्बुना कक्षमुदरे परिवेष्टिते ॥ ११३ ॥
बद्धच्छिद्रोदितस्थाने विध्येदङ्गुलमात्रकम्।
निधाय तस्मिन्नाडीं च स्रावयेदल्पमल्पशः ॥ ११४ ॥
अथास्य नाडीमाकृष्य तैलेन लवणेन च।
व्रणमभ्यज्य बद्ध्वा च वेष्टयेद्वाससोदरम् ॥ ११५ ॥
तृतीयेऽह्नि चतुर्थे वा यावदार्षोऽङ्ग दिनम्।
तस्य विश्रम्य विश्रम्य स्रावयेदल्पशो जलम् ॥ ११६ ॥

विशेष्टयेद्दाढ़तरं जठरं च श्रथाशयम् ।
निःसुते लक्षितः पेयामस्नेहलवणां पिबेत् ॥ ११७ ॥
स्यात् क्षीरवृत्तिः षण्मासांस्त्रीन् पेयां पयसा पिबेत् ।
त्रींश्चान्यान् पयसैवाद्यात् फलाम्लेन रसेन वा ॥ ११८ ॥
अल्पशः स्नेहलवणं जीर्णं श्यामाकौद्रवम् ।
प्रयतो वत्सरेणैवं विजयेत् तज्जलोदरम् ॥ ११९ ॥
वर्ज्येषु यत्नितो दिष्टे नात्यदिष्टे जितेन्द्रियः ।
सर्वमेवोदरं प्रायो दोषसङ्घातजं यतः ॥ १२० ॥
अतो वातादिशमनी क्रिया सर्वा प्रशस्यते ।
वह्निर्मन्दत्वमायाति दोषैः कुक्षौ प्रपूरिते ॥ १२१ ॥
तस्माद्भोज्यानि भोज्यानि दीपनानि लघूनि च ।
सपञ्चमूलान्यल्पाम्लपटुस्नेहकटूनि च ॥ १२२ ॥
भावितानां गवां मूत्रे षष्टिकानां च तण्डुलैः ।
यवागूं पयसा सिद्धां प्रकाम भोजयेन्नरम् ॥ १२३ ॥
पिबेदिक्षुरसं चानु जठराणां निवृत्तये ।
स्वं स्वं स्थानं व्रजन्त्येषां वातपित्तकफास्तथा ॥ १२४ ॥
अत्यर्थोष्णाम्ललवण रूक्षं व्याहि हिमं गुरु ।
गुडं तैलकृतं शाकं वारिपानावगाहयोः ॥ १२५ ॥
आयासाध्वदिवास्वप्नयानानि च परित्यजेत् ।
नात्यर्थस्नान्द्रं मधुरं तक्रं पाने प्रशस्यते ॥ १२६ ॥
सकणालवणं वाते पित्ते सौषण्यशर्करम् ।
यवानीसैन्धवाजाजीमधुव्योषैः कफोदरे ॥ १२७ ॥
क्षारषण्टारलवणैः संयुतं निचयोदरे ।
मधुतैलवचाशुण्ठीयताक्षाकुष्ठसैन्धवैः ॥ १२८ ॥
पीड्यि बद्धे तु हपुषायवानीपटुजादिभिः ।
सक्षौद्रा माक्षिकं क्षिप्ते व्योषवत् सलिलोदरे ॥ १२९ ॥

गौरवारोचकानाहमन्दवह्न्यतिसारिणाम्।
तक्रं वातकफार्त्तानामस्तत्वाय कल्पते ॥ १३० ॥
प्रयोगाणां च सर्वेषामनुचीरं प्रयोजयेत्।
स्थैर्य्यकृत् सर्वधातूनां बल्यं दोषानुबन्धकृत्।
भेषजोपचिताङ्गानां चीरमेवामृतायते ॥ १३१ ॥

षोड़शोऽध्यायः।

अथातः पाण्डुरोगचिकित्सितं व्याख्यास्यामः ॥
पाण्डामयी पिबेत् सर्पिरादौ कल्याणकाह्वयम्।
पञ्चगव्यं महातिक्तं घृतं वाऽरग्वधादिना ॥ १ ॥
दाडिमात् कुडवौ धान्यात् कुडवार्द्धं पलं पलम्।
चित्रकाच्छृङ्गवेराच्च पिप्पल्यर्द्धपलं च तैः ॥ २ ॥
कल्कितैर्विंशतिपलं घृतस्य सलिलाढ़के।
सिद्धं हृत्पाण्डुगुल्मार्शःप्लीहवातकफार्त्तिनुत् ॥ ३ ॥
दीपनं श्वासकासघ्नं मूढ़वातानुलोमनम्।
दुःखप्रसविनीनां च बन्ध्यानां च प्रशस्यते ॥ ४ ॥
स्नेहितं वामयेत्तीक्ष्णैः पुनः स्निग्धं च शोधयेत्।
पयसा मूत्रयुक्तेन बहुशः केवलेन वा ॥ ५ ॥
दन्तीपलरसे क्षौद्रे कार्षमर्द्धाञ्जलिमासुतम्।
द्राक्षाञ्जलिं वा स्रुदितं तत् पिबेत् पाण्डुरोगजित् ॥ ६ ॥
मूत्रेण पिष्टां पथ्यां वा तद्विद्धं वा फलत्रयम्।
स्वर्णक्षीरीविहच्छ्यामाभद्रदारुमहौषधम् ॥ ७ ॥
गोमूत्राञ्जलिना पिष्टं घृतं तेनैव वा पिबेत्।
साधितं क्षीरमेभिर्वा पिबेद्दोषानुलोमनम् ॥ ८ ॥
मूत्रे स्थितं वा सप्ताहं पयसाऽयोरजः पिबेत्।
क्षीणं क्षीरेण भुञ्जीत रसेन मधुरेण वा ॥ ९ ॥

गुडस्योभयतो लिह्यात् पथ्यां मधुघृतद्रुताम्।
विशालां कटुकां मुस्तां कुष्ठं दारुकलिङ्गकः॥ १०॥
कर्षांशाद्विपिचुर्मूर्वा कर्षार्द्धांशा घुणप्रिया।
पीत्वा तच्चूर्णमम्भोभिः सुखैर्लिह्यात् ततो मधु॥ ११॥
पाण्डुरोगं ज्वरं दाहं कासं श्वासमरोचकम्।
गुल्मानाहामवातांश्च रक्तपित्तं च तज्जयेत्॥ १२॥
वासागुडूचीत्रिफलाकट्वीभूनिम्बनिम्बजः।
क्वाथः क्षौद्रयुतो हन्ति पाण्डुपित्तास्रकामलाः॥ १३॥
व्योषाग्निवेल्लत्रिफलामुस्तैस्तुल्यमयोरजः।
चूर्णितं तक्रमध्वाज्यकोष्णाम्भोभिः प्रयोजितम्॥१४॥
कामलापाण्डुहृद्रोगकुष्ठार्शोमेहनाशनम्।
गुडनागरमण्डूरतिलांशान्मानतः समान्॥ १५॥
पिप्पलीद्विगुणान् दद्याद् गुटिकां पाण्डुरोगिणे।
ताप्य दार्व्यास्त्वचं चव्य ग्रन्थिकं देवदारु च॥१६॥
व्योषादि नवकं चैतच्चूर्णयेद् द्विगुणं ततः।
मण्डूरं चाञ्जननिभं सर्वतोऽष्टगुणेऽथ तत्॥ १७॥
पृथग् विपक्वे गोमूत्रे वटकीकरणक्षमे।
प्रक्षिप्य वटकान् कुर्य्यात् तान् खादेत्तक्रभोजनः॥१८॥
एते मण्डूरवटकाः प्राणदाः पाण्डुरोगिणाम्।
कुष्ठान्यजरकं शोफमरुस्तम्भमरोचकम्॥ १९॥
अर्शांसि कामलां मेहान् प्लीहानं शमयन्ति च।
ताप्यादिजतुरौप्यायोमलाः पञ्चपलाः पृथक्॥ २०॥
चित्रकत्रिफलाव्योषविडङ्गैः पालिकैः सह।
शर्कराष्टपलोन्मिश्रा चूर्णिता मधुना द्रुताः॥ २१॥
पाण्डुरोगं विषं कासं यक्ष्माणं विषमं ज्वरम्।
कुष्ठान्यजरकं मेहं शोफं श्वासमरोचकम्॥ २२॥

विशेषाद्दन्त्यपस्मारं कामलां गुदजानि च ।
कौटजत्रिफलानिम्बपटोलघननागरैः ॥ २३ ॥
भावितानि दशाहानि रसैर्द्वित्रिगुणानि वा ।
शिलाजतुपलान्यष्टौ तावती सितशर्करा ॥ २४ ॥
त्वक्क्षीरीपिप्पलीधात्रीकर्कटाख्याः पलोन्मिताः ।
निर्दग्धाः फलमूलाभ्यां पञ्च युक्त्या त्रिजातकम् ॥२५॥
मधु त्रिपलसंयुक्तं कुर्य्यादक्षसमान् गुडान् ।
दाडिमाम्बुपयःपक्षिरसतोयसुरासवान् ॥ २६ ॥
तान् भक्षयित्वानुपिबेत्त्रिरन्नो भुक्त एव वा ।
पाण्डुकुष्ठज्वरप्लीहतमकार्शोभगन्दरम् ॥ २७ ॥
हृन्मूलपूतीशुक्राग्निदोषशोषगरोदरम् ।
कासास्रगुदरपित्तास्रक्श्वोफगुल्मगलामयान् ॥ २८ ॥
मेहवर्त्मभ्रमान् हन्युः सर्वदोषहराः शिवाः ।
द्राक्षाप्रस्थं कषायस्य शर्कराष्टतुला तथा ॥ २९ ॥
द्विपलं मधुकं शुण्ठीत्वक्क्षीरीं च विचूर्णितम् ।
धात्रीफलरसे द्रोणे तत् क्षिप्त्वा लेहवत्पचेत् ॥ ३० ॥
शीतान्मधुप्रस्थयुतान् लिह्यात् पाणितलं ततः ।
हलीमकं पाण्डुरोगं कामलाञ्च नियच्छति ॥ ३१ ॥
कनीयः पञ्चमूलाम्बु श्रस्यते पानभोजने ।
पाण्डूनां कामलार्त्तानां मृद्वीकामलकाद्रसः ॥ ३२ ॥
इति सामान्यतः प्रोक्त पाण्डुरोगभिषग्जितम् ।
विकल्प्य योज्यं विदुषा पृथग्दोषबलं प्रति ॥ ३३ ॥
श्लेष्मप्रायं पवनजे तिक्तशीतन्तु पैत्तिके ।
श्लैष्मिके कटुरूक्षोष्णं विमिश्र सान्निपातिके ॥ ३४ ॥
वृद्धं निर्यातयेत् कायात्तीक्ष्णैः संशोधनैः पुरः ।
बलाधानानि सर्पींषि शुद्धे कोष्ठे तु योजयेत् ॥ ३५ ॥

व्योषविल्वद्विरजनीत्रिफलाद्विपुनर्नवम् ।
मुस्तान्ययोरजः पाठा विड्ङं देवदारु च ॥ ३६ ॥
हरिद्रालो च भार्ङ्गी च सर्जीरेस्तैः श्रृतं घृतम् ।
सर्वान् प्रशमयत्याशु विकारान्मृत्तिकाकृतान् ॥ ३७ ॥
तद्वत् केसरयष्ट्याह्वपिप्पलीत्वीरशाड्वलैः ।
मृद्भक्षणाय तल्लोल्ये वितरेद्भावितां मृदम् ॥ ३८ ॥
वेल्लाग्निनिम्बप्रसवैः पाठया मूर्वयाथवा ।
सद्वैद्यभिन्नदोषानुगमाद्योज्यं च भेषजम् ॥ ३९ ॥
कामलायां तु पित्तघ्नं पाण्डुरोगाविरोधि यत् ।
पथ्याशतरसे पथ्याद्वन्ताद्यैश्शतकल्पितैः ॥ ४० ॥
प्रस्थः सिद्धो घृताद्भुक्षकामलापाण्डुरोगनुत् ।
आरग्वधं रसेनेक्षोर्विदार्य्यामलकस्य वा ॥ ४१ ॥
सत्रिषणं बिल्वमात्रं पाययेत् कामलापहम् ।
पिबेन्निकुम्भकल्कं वा द्विगुणं शीतवारिणा ॥ ४२ ॥
कुम्भस्य चूर्णं सक्षौद्रं त्रैफलेन रसेन वा ।
त्रिफलाया गुडूच्या वा दार्व्या निम्बस्य वा रसम् ॥४३॥
प्रातः प्रातर्मधुयुतं कामलार्त्ताय योजयेत् ।
निशागैरिकधात्रीभिः कामलापहमञ्जनम् ॥ ४४ ॥
तिलपिष्टनिभं यस्तु कामलावान् सृजेन्मलम् ।
कफरूक्षपथं तस्य पित्त कफहरैर्जयेत् ॥ ४५ ॥
रूक्षशीतगुरुस्वादुव्यायामबलनिग्रहैः ।
कफसमूर्च्छितो वायुर्यदा पित्तं बहिः क्षिपेत् ॥ ४६ ॥
हारिद्रनेत्रमूत्रत्वक्खे तवर्चास्तदा नरः ।
भवेत् साटोपविष्टम्भो गुरुणा हृदयेन च ॥ ४७ ॥
दौर्ब्बल्याल्पाग्निपार्श्वार्त्तिहिध्माश्वासारुचिज्वरैः ।
क्रमेणाल्पेऽनुषज्येत पित्ते शाखासमाश्रिते ॥ ४८ ॥

रसैस्तं रूक्षकटुकैः शिखितित्तिरिदक्षजैः।
शुष्कमूलकजैर्यूषैः कुलत्थोत्थैश्च भोजयेत् ॥ ४९ ॥
शुण्याम्लतीक्ष्णकटुकलवणोष्णाश्च शस्यते।
सबीजपूरकरस लिह्याद् व्योषं तथाग्नयम् ॥ ५० ॥
स्व पित्तमेति तेनास्य शुक्रदग्ध्यनुरज्यते।
वायुश्च याति प्रशमं सहाटोपाद्युपद्रवैः ॥ ५१ ॥
निहृत्तोपद्रवस्यास्य कार्यः कामलिको विधिः।
गोमूत्रेण पिबेत् कुम्भकामलाया शिलाजतु ॥ ५२ ॥
मासं माक्षिकधातुं वा किट्टं चाप्यहिरण्यजम्।
गुडूचीस्वरसक्षीरसाधितेन हलीमकी ॥ ५३ ॥
महिषीहविषा स्निग्धः पिबेद्वाक्षीरसेन तु।
विहृतां तद्विरिक्तोऽन्यात् स्वादु पित्तानिलापहम् ॥ ५४ ॥
द्राक्षालेहञ्च पूर्वोक्तं सर्पींषि मधुराणि च।
यापनान् क्षीरवस्तींश्च शीलयेत् सानुवासनान् ॥ ५५ ॥
माद्वीकारिष्टयोगाश्च पिबेद्युक्त्याग्निहृद्धवे।
कासिक वामयालेह पिप्पलीमधुक बलाम् ॥ ५६ ॥
पयसा च प्रयुञ्जीत यथादोष यथाबलम्।
पाण्डुरोगेषु कुशल. शोफोक्तञ्च क्रियाक्रमम् ॥ ५७ ॥

सप्तदशोऽध्यायः।

अथातः क्षयपाण्डुचिकित्सित व्याख्यास्यामः ॥
सर्वत्र सर्वाङ्गसरे दोषजे क्षयपाण्डौ पुरा।
सामे विशोषितो भुक्त्वा लघुकोष्णाम्भसा पिबेत् ॥ १ ॥
नागरातिविषादारुविडङ्गेन्द्रयवोषणम्।
अथवा विजयाशुण्ठीदेवदारुपुनर्नवम् ॥ २ ॥
नवायसं वा दोषाढ्य. शुद्धैश्च मूत्रहरीतकीः।

वराक्काथेन कटुकाकुम्भायस्थूषणानि वा ॥ ३ ॥
अथवा गुग्गुलुं तद्वज्जतु वा शैलसम्भवम्।
मन्दाग्निः श्लीपदामगुरुभिन्नविबद्धविट् ॥ ४ ॥
तक्रं सौवर्चलव्योषचौद्रयुक्तं गुडाभयम्।
तक्रानुपानमथवा तद्वद्वा गुडनागरम् ॥ ५ ॥
आर्द्रकं वा समगुडं प्रकुञ्चार्द्धविवर्द्धितम्।
पर पञ्चपलं मासं यूषक्षीररसाशनः ॥ ६ ॥
गुल्मोदरार्शःश्वयथुप्रमेहान् श्वासप्रतिश्यालसकाविपाकान्।
सकामलाश्लीपदमनोविकारान् कासं कफञ्चैव जयेत्प्रयोगः ॥७॥
घृतमार्द्रकनागरस्य कल्कस्वरसाभ्यां पयसा च साधयित्वा।
श्वयथुञ्चवथूदराग्निसादैरभिभूतोऽपि पिबन् भवेत्प्ररोगः ॥ ८ ॥
निरामो बलवर्णमलः पिबेच्छ्वयथुपीड़ितः।
त्रिकटुत्रिवृतादन्तीचित्रकैः साधितं पयः ॥ ९ ॥
मूत्र गोर्वा महिष्या वा सक्षीर क्षीरभोजनः।
सप्ताहं मासमथवा स्यादुष्ट्रीक्षीरवर्त्तनः ॥ १० ॥
यवानकं यवक्षारं यवानीं पञ्चकोलकम्।
मरिचं दाड़िमं पाठां धानकामम्लवेतसम् ॥ ११ ॥
बालबिल्वञ्च कर्षांशं साधयेत् सलिलाढ़के।
तेन पक्वो घृतप्रस्थः श्लीपार्शोगुल्ममेहहा ॥ १२ ॥
दग्धत्रिवृत्कगर्भाहा घृतं तत्तक्रसंयुतम्।
पक्वं सचित्रकं तद्वद् गुणैर्युञ्जाच्च कालवित् ॥ १३ ॥
धान्यन्तरं महातिक्तं कल्याणमभयाघृतम्।
दशमूलकषायस्थ कांसे पथ्याशतं पचेत् ॥ १४ ॥
दत्त्वा गुडतुलां तस्मिन् लेहे दद्यादिचूर्णितम्।
त्रिजातकं त्रिकटुकं किञ्चिच्च यवशूकजम्।
प्रस्थार्द्धञ्च हिमे क्षौद्रात्तं निहन्त्युपयोजितम् ॥ १५ ॥

प्रवृद्धशोफज्वरमेहगुल्मकार्श्वोमवातास्रकरक्तपित्तम्।
वैवर्ण्यमूत्रानिलशुक्रदोषश्वासारुचिप्लीहगरोदरञ्च ॥ १६ ॥
पुराणयवशाल्यन्न दशमूलाम्बुसाधितम्।
अल्पमल्प पटुस्नेहं भोजनं क्षयशोर्हितम् ॥ १७ ॥
क्षारव्योषान्वितैर्मांसैः कौलत्थैः सकणैः रसैः।
तथा जाङ्गलजैः कूर्मगोधाशल्यकजैरपि ॥ १८ ॥
अनन्नं मथितं पाने मद्यान्यौषधवन्ति च।
अजाजीशठीजीवन्ती कारवी पौष्करान्विकैः ॥ १९ ॥
विल्वमध्ययवक्षारवृक्षाम्लैर्बदरोन्मितैः।
कृता पेयाऽज्यतैलाभ्यां युक्तिभृष्टा परं हिता ॥ २० ॥
शोफातिसारकृद्रोगगुल्मार्शोऽग्निमेहिनाम्।
गुडैस्त्वक्च पाठायाः पञ्चकोलेन साधिता ॥ २१ ॥
श्वेतैयकुष्ठे क्षौमेयरेणुकागुरुपद्मकैः।
श्रीवेष्टकनखस्पृक्कादेवदारुप्रियङ्गुभिः ॥ २२ ॥
मांसी मागधिका वन्यधान्यध्यामकबालकैः।
चतुर्जातकतालीसमुस्तागन्धपलांशकैः ॥ २३ ॥
कुर्यादभ्यञ्जनं तैलं लेप स्नानाय मृदकम्।
स्नान वा निम्बवर्षाभूनक्तमालार्कवारिणा ॥ २४ ॥
एकाङ्गशोफे वर्षाभूकरवीरकिंशुकैः।
विशालाबिल्वकारोह्यनलिकादेवदारुभिः ॥ २५ ॥
हिस्राकोशातकीमाद्रीतालपर्णीजयन्तिभिः।
स्थूलकाकादनीशालनाकुलीवृषपर्णीभिः ॥ २६ ॥
वृद्धिर्द्विहस्तिकर्णैश्च सुखोष्णैर्लेपनं हितम्।
अथानिलोत्थे क्षयथौ मासार्धं घृतं पिबेत् ॥ २७ ॥
तैलमैरण्डजं वातविड्विबन्धे तदेव तु।
प्राग्भक्तं पयसा युक्तं रसैर्वा कारयेत् तथा ॥ २८ ॥

स्वेदाभ्यङ्गान् समीरघ्नान् लेपमेकाङ्गगे पुनः।
मातुलुङ्गाग्निमन्थेन शुण्ठीहिङ्गुसरास्नयैः॥ २८॥
पैत्ते तिक्तं पिबेत् सर्पिर्न्यग्रोधादेन वा शृतम्।
क्षीरं वृद्दाहमोहेषु लेपाभ्यङ्गाश्च शीतलाः॥ ३०॥
पटोलमूलत्रायन्तीयष्ट्याह्वकटुकाभयाः।
दारुदार्वीहिमं दन्ती विशाला निचुलं कणा॥ ३१॥
तैः क्वाथः सघृतः पीतो हन्त्यन्तस्तापवद्भ्रमान्।
ससन्निपातवीसर्पशोफदाहविषज्वरान्॥ ३२॥
आरग्वधादिना सिद्धं तैलं क्षीरेऽथवा पिबेत्।
स्रोतोविबन्धे मन्देऽग्नावरुचौ स्निग्धिताशयः॥ ३३॥
क्षारचूर्णासवारिष्टमूत्रतक्राणि शीलयेत्।
क्षणापुराणपिण्याकशिग्रुत्वक्सिक्ततातसीः॥ ३४॥
प्रलेपोन्मर्दने युक्ताः सुखोष्णा सूक्ष्मकल्किताः।
स्नानमूक्षासि स्निग्धे कुष्ठतगरिचित्रकैः॥ ३५॥
कुलत्थनागराभ्यां वा चण्डागुरुविलेपने।
कालाजशृङ्गीसरलवस्तगन्धाह्वयाद्वयाः॥ ३६॥
एकैषिका च लेपः स्यात् क्षयथावेकगात्रजे।
यथादोषं यथासन्नं शुद्धिं रक्तावसेचनम्।
कुर्वीत मिश्रदोषे तु दोषोद्रेकबलात् क्रियाम्॥ ३७॥
अजाजिपाठाघनपञ्चकोलव्याघ्रीरजन्यः सुखतोयपीताः।
शोफं त्रिदोषं चिरजं प्रवृद्धं निघ्नन्ति भूनिम्बमहौषधैश्च॥३८॥
अमृताद्वितयं सिवाटिकां सुरकाष्ठं सपुरं सगोजलम्।
क्षयथूदरकुष्ठपाण्डुतालमिमेहोर्ध्वकफानिलापहम्॥ ३९॥
इति निजमधिकृत्य पथ्यमुक्तं क्षतजनिते क्षतजं विशोधनीयम्।
श्रुतिहिमघृतलेपसेकरेकैर्विषजनिते विषजिच्च शोफ दृष्टम्॥४०॥

ग्राम्यानूपं पिशितमबलं शुष्कशाकं तिलान्नं

गोड़ं पिष्टान्नं दधि सलवणं विज्जलं मद्यमन्नम्।
धानाबल्लूरसमशमनमक्षो गुर्वसात्म्यं विदाहि
स्वप्नं रात्रौ क्षयथुगदवान् वर्जयेन्मैथुनं च ॥ ४१ ॥

अष्टादशोऽध्यायः।

अथातो विसर्पचिकित्सितं व्याख्यास्यामः ॥
आदावेव विसर्पेषु हितं लङ्घनरूक्षणम्।
रक्तावसेको वमनं विरेकः स्नेहेन न तु ॥ १ ॥
प्रच्छर्दनं विसर्पघ्नं सयष्टीन्द्रयवं फलम्।
पटोलपिप्पलीनिम्बपल्लवैर्वा समन्वितम् ॥ २ ॥
रसेन युक्तं त्रायन्त्या द्राक्षायास्त्रैफलेन वा।
विरेचनं त्रिवृच्चूर्णं पयसा सर्पिषाऽथवा ॥ ३ ॥
योज्यं कोष्ठगते दोषे विशेषेण विशोधनम्॥
अविशोध्यस्य दोषोऽल्पे शमनं चन्दनोत्पलम् ॥ ४ ॥
मस्तुनिम्बपटोलं वा पटोलादिकमेव वा।
सारिवामलकोशीरमुस्तं वा क्वथितं जले ॥ ५ ॥
दुरालभा पर्पटक गुडूचीं विश्वभेषजम्।
पाक्यं शीतकषायं वा तृष्णावीसर्पवान् पिबेत् ॥ ६ ॥
द्वावीपटोलकटुकामसूरत्रिफलास्तथा।
सनिम्बयष्टीत्रायन्तीः क्वथिता घृतमूर्च्छिताः ॥ ७ ॥
शाखादुष्टे तु रुधिरे रक्तमेवादितो हरेत्।
त्वग्मांसस्नायुसंक्लेदो रक्तक्लेदाद्धि जायते ॥ ८ ॥
निरामे श्लेष्मणि क्षीणे वातपित्तोत्तरे हितम्।
घृतं तिक्तं महातिक्तं शृतं वा त्रायमाणया ॥ ९ ॥
निर्हृतेऽस्रे विशुद्धेऽन्तर्दोषे त्वग्मांससन्धिगे।
बहिःक्रियाः प्रदेहाद्याः सद्यो वीसर्पशान्तये ॥ १० ॥

शताङ्गामुस्तवाराहीवशार्ङ्गगलधान्यकम् ।
सुराह्वा कृष्णगन्धा च कुष्ठं वा लेपनं बले ॥ ११ ॥
न्यग्रोधादिगणः पित्ते तथा पद्मोत्पलादिकम् ।
न्यग्रोधपादास्तरुणाः कदलीगर्भसंयुताः ॥ १२ ॥
विसग्रन्थिश्च लेपः स्यात् शतधौतघृताप्लुतः ।
पद्मिनीकर्दमः शीतः पिष्टं मौक्तिकमेव वा ॥ १३ ॥
शङ्खः प्रवाल शुक्तिर्वा गैरिकं वा घृतान्वितम् ।
त्रिफलापद्मकोशीरसमङ्गाकरवीरकम् ॥ १४ ॥
नलमूलान्यनन्ता च लेपः श्लेष्मविसर्पहा ।
धवसप्ताह्वखदिरदेवदारुकुरण्टकम् ॥ १५ ॥
समुस्तारग्वधं लेपो वर्गो वा वरुणादिकः ।
आरग्वधस्य पत्राणि त्वचः श्लेष्मान्तकोद्भवाः ॥ १६ ॥
इन्द्राणीशाक काकाह्वाशिरीषकुसुमानि च ।
सेकव्रणाभ्यङ्गहविर्लेपचूर्णान् यथायथम् ॥ १७ ॥
एतैरेवौषधैः कुर्याद्वायौ लेपा घृताधिकाः ।
कफस्थानगते सामे पित्तस्थानगतेऽथवा ॥ १८ ॥
आशीतोष्णा हिता रूक्षा रक्तपित्ते घृतान्विताः ।
अत्यर्थशीतास्तनवस्तनुवस्त्रान्तरास्थिताः ॥ १९ ॥
योज्याः क्षणे क्षणेऽन्येऽन्ये मन्दवीर्यास्त एव च ।
सृष्टदोषे संसृष्टमेतत् कर्म प्रशस्यते ॥ २० ॥
शतधौतघृतेनाग्निं प्रदिह्यात् केवलेन वा ।
सेचयेद् घृतमण्डेन शीतेन मधुकाम्बुना ॥ २१ ॥
शीताम्भसाम्भोजजलैः क्षीरेणेक्षुरसेन वा ।
पानलेपनसेकेषु महातिक्तां परं हितम् ॥ २२ ॥
ग्रन्थाख्ये रक्तपित्तघ्नं कृत्वा सम्यग् यथोदितम् ।
कफानिलघ्नं कर्मेष्टं पिण्डस्वेदोपनाहनम् ॥ २३ ॥

ग्रन्थिवीसर्पशूले तु तैलेनोष्णेन सेचयेत् ।
दशमूलविपक्वेन तद्वन्मूत्रैर्जलेन वा ॥ २४ ॥
सुखोष्णया प्रदिह्याद्वा पिष्टया लवणान्वया ।
नक्तमालत्वचा शुष्कमूलकैः कलिनाऽथवा ॥ २५ ॥
दन्तीचित्रकमूलत्वक्सौधार्कपयसी गुडः ।
भल्लातकास्थिक्षारोऽसृक्क्षपो भिन्द्यात् शिलामपि ॥ २६ ॥
बहिर्मार्गाश्रितं ग्रन्थिं किं पुनः कफसम्भवम् ।
दीर्घकालस्थितं ग्रन्थिमेभिर्भिन्द्याच्च भेषजैः ॥ २७ ॥
मूलकानां कुलत्थानां यूषैः सचारदाड़िमैः ।
गोधूमान्नैर्यवान्नैश्च ससीधुमधुशर्करैः ॥ २८ ॥
सक्षौद्रैर्वारुणीमण्डैर्मातुलुङ्गरसान्वितैः ।
त्रिफलायाः प्रयोगैश्च पिप्पल्याः क्षौद्रसंयुतैः ॥ २९ ॥
देवदारुगुडूच्योश्च प्रयोगैर्गिरिजस्य च ।
मुस्तभल्लातसक्तूनां प्रयोगैर्माक्षिकस्य च ॥ ३० ॥
धूमैर्विरेकैः शिरसः पूर्वोक्तैर्गुल्मभेदनैः ।
तप्तायोहेमलवणपाषाणादिप्रपीडनैः ॥ ३१ ॥
आभिः क्रियाभिः सिद्धाभिर्विविधाभिर्बले स्थितः ।
ग्रन्थिः पाषाणकठिनो यदि नैवोपशाम्यति ॥ ३२ ॥
अथास्य दाहः क्षारेण शरेर्हेम्नापि वा हितः ।
पाक्तिभिः पाचयित्वा तु पाटयित्वा तमुद्धरेत् ॥ ३३ ॥
मोक्षयेद् बहुशश्चास्य रक्तमुत्क्लेशमागतम् ।
पुनश्चापहृते रक्ते वातघ्नैरजितौषधम् ॥ ३४ ॥
प्रक्लिन्ने दाहपाकाभ्यां वाह्यान्तर्व्रणवत् क्रिया ।
दार्वीविडङ्गकम्पिल्लैः सिद्धं तैलं व्रणे हितम् ॥ ३५ ॥
दूर्वास्वरससिद्धं तु कफपित्तोत्तरे घृतम् ।
एकतः सर्वकर्माणि रक्तमोक्षणमेकतः ॥ ३६ ॥

विसर्पो न ह्यसंसृष्ट सोऽसृपित्तेन जायते।
रक्तमेवाश्रयत्यास्य बहुशोऽसृं हरेदतः॥ ३७॥
न घृतं बहुदोषाय देयं यत्र विरेचनम्।
तेन दोषो ह्युपस्तब्धस्त्वग्रक्तपिशितं पचेत्॥ ३८॥

एकोनविंशोऽध्यायः।

अथातः कुष्ठचिकित्सितं व्याख्यास्यामः॥
कुष्ठिन स्नेहपानेन पूर्वं सर्वमुपाचरेत्।
तत्र वातोत्तरे तैलं घृतं वा साधितं हितम्॥ १॥
दशमूलामृतैरण्डशाङ्ष्टाभेषसृक्किभिः।
पटोलनिम्बकटुकादार्वीपाठादुरालभाः॥ २॥
पर्पटं त्रायमाणाञ्च पलांशं पाचयेदपाम्।
द्राढकेऽष्टांशशेषेण तेन कर्षोन्मितैस्तथा॥ ३॥
त्रायन्तीमुस्तभूनिम्बकलिङ्गकणचन्दनैः।
सर्पिषो द्वादशपलं पचेत्तत्तिक्तकं जयेत्॥ ४॥
पित्तकुष्ठपरीसर्पपिटिकादाहलड्भ्रमान्।
कण्डुपाण्डुत्वमयान् गण्डान् दुष्टव्रणोपचोः॥५॥
विस्फोटविद्रधीगुल्मार्शोफोन्मादमदानपि।
क्षुद्रोगतिमिरव्यङ्गग्रहणीश्लित्वकामलाः॥ ६॥
भगन्दरमपस्मारमुदरं प्रदरं गरम्।
अर्शोऽसृपित्तमन्यांश्च सुकृच्छ्रान् पित्तजान् गदान्॥७॥
सप्तच्छदः पर्पटकः शम्याकः कटुका वचा।
त्रिफला पञ्चकं पाठा रजन्यौ सारिवे कणे॥८॥
निम्बचन्दनयष्ट्याह्वविशालेन्द्रयवामृताः।
किराततिक्तकं सेव्यं वृषो मूर्वा शतावरी॥ ९॥
पटोलातिविषामुस्तात्रायन्तीधन्वयासकम्।

तैर्जलेऽष्टगुणे सर्पिर्द्विगुणामलकोरसे ॥ १० ॥
सिद्धं तिक्तान्महातिक्तं गुणैरभ्यधिकं मतम् ।
कफोत्तरे घृतं सिद्धं निम्बसप्तच्छदित्वकैः ॥ ११ ॥
कुष्ठोषणवचाशालप्रियालचतुरङ्गुलैः ।
सर्वेषु चारुष्करजं तीवरं सार्षपं पिबेत् ॥ १२ ॥
स्नेहं घृतं वा कृमिजित्पथाभल्लातकैः श्रुतम् ।
आरग्वधस्य मूलेन शतकृत्वः श्रुतं घृतम् ॥ १३ ॥
पिबन् कुष्ठं जयत्याशु भजन् सखदिरं जलम् ।
एभिरेव यथास्वं च स्नेहैरभ्यञ्जनं हितम् ॥ १४ ॥
स्निग्धस्य शोधनं योज्यं विसर्पे यदुदाहृतम् ।
ललाटहस्तपादेषु शिरास्वास्य विमोक्षयेत् ॥ १५ ॥
प्रच्छानमल्पके कुष्ठे शृङ्गाद्याश्च यथायथम् ।
स्नेहैराप्याययेच्चैनं कुष्ठघ्नैरन्तरान्तरा ॥ १६ ॥
सुकरक्तविरिक्तस्य रिक्तकोष्ठस्य कुष्ठिनः ।
प्रभञ्जनस्तथा ह्यस्य न स्याद् देहप्रभञ्जनः ॥ १७ ॥
वासामृतानिम्बवरापटोलव्याघ्रीकरञ्जोदककल्कपक्वम् ।
सर्पिर्विसर्पज्वरकामलास्रकुष्ठापहं वज्रकमामनन्ति ॥ १८ ॥
त्रिफलात्रिकटुद्विकण्टकारिकटुकाकुम्भनिकुम्भराजवृक्षैः ।
सवचातिविषाग्निकैः सपाठैः पिचुभागैर्नवबल्वदुग्धमुख्या ॥१९॥
पिष्टैः सिद्धं सर्पिषः प्रस्थमेभिः
क्रूरे कोष्ठे स्नेहन रेचनं च ।
कुष्ठश्वित्रग्रीहवर्षाश्मगुल्मान्
हन्यात् कृच्छ्रांस्तन्महावज्रकाख्यम् ॥ २० ॥
दन्त्याढकमपां द्रोणे पक्त्वा तेन घृतं पचेत् ।
धामार्गवपले पीतं तदूर्ध्वाधो विशुद्धिकृत् ॥ २१ ॥
आवर्तकीतुलां द्रोणे पचेदष्टांशशेषितम् ।

तन्मूलैस्तत्र निर्यूहे घृतप्रस्थं विपाचयेत् ॥ २२ ॥
पीत्वा तदेकदिवसान्तरितं सुजीर्णे
भुञ्जीत कोद्रवसुसंस्कृतकाञ्जिकेन ।
कुष्ठं किलासमपचीञ्च विजेतुमिच्छन्
इच्छन् प्रजाञ्च विपुला ग्रहणं स्मृतिञ्च ॥ २३ ॥
यष्टेर्लीलीतकवसा क्षौद्रजातीरसान्विता ।
कुष्ठघ्नी समसर्पिर्वा सगायत्र्यासनोदका ॥ २४ ॥
शालयो यवगोधूमाः कोरदूषाः प्रियङ्गवः ।
मुद्गा मसूरास्तुवरी तिक्तशाकानि जाङ्गलम् ॥ २५ ॥
वरापटोलखदिरनिम्बारुष्करयोजितम् ।
मद्यान्यौषधगर्भाणि मथितं चेक्षुराजिमत् ॥ २६ ॥
अन्नपानं हितं कुष्ठे न त्वम्ललवणोषणम् ।
दधिदुग्धगुडानूपतिलमाषांस्त्यजेत्तराम् ॥ २७ ॥
पटोलमूलत्रिफलाविशाला पृथक्त्रिभागाः पचितत्रिशाणाः ।
स्युस्तायमाणा कटुरोहिणी च भागार्द्धिके नागरपादयुक्ते ॥२८॥
एतत्पलं जर्जरितं विपक्वं जले पिबेद् व्योषविशोधनाय ।
जीर्णे रसैर्धन्वमृगद्विजानां पुराणशाल्योदनमाददीत ॥ २९ ॥
कुष्ठं किलासं ग्रहणीप्रदोषमर्शांसि कृच्छ्राणि हलीमकञ्च ।
षड्रात्रियोगेन निहन्ति चैतद् दुष्टवस्तिशूलं विषमज्वरञ्च ॥३०॥
विडङ्गसारामलकाभयानां पलत्रयं त्रीणि पलानि कुर्यात् ।
गुडस्य च द्वादशमासमेष जितात्मनां हन्त्युपयुज्यमानः ॥३१॥
कुष्ठं श्वित्रं श्वासकासोदरार्शोमेहप्लीहग्रन्थ्यरुक्जन्तुगुल्मान् ।
सिद्ध योग प्राह यत्नो मुमुक्षोर्भिक्षोः प्राणान्माणिभद्रः किलेमम्
॥ ३२ ॥
भूनिम्बनिम्बत्रिफलापद्मकातिविषाकणाः ।
मूर्वापटोलीद्विनिशापाठातिक्तेन्द्रवारुणीः ॥ ३३ ॥

सकलिङ्गवचास्तुल्या द्विगुणाश्च यथोत्तरम्।
लिह्याद्गन्तीत्रिवृद्दन्त्याक्षीसूर्णिता मधुसर्पिषा ॥ ३४ ॥
कुष्ठमेहप्रसुप्तीनां परमं स्यात्तदौषधम्।
वराविड्ङ्गकृष्णा वा लिह्यात्तैलाज्यमाक्षिकैः ॥ ३५ ॥
काकोदुम्बरिकावेल्लनिम्बाश्वत्थोषकल्कवान्।
हन्ति त्वक्निर्यूहः पानात्सर्वांस्वगामयान् ॥ ३६ ॥
कुटजाग्निनिम्बनृपतरुखदिरासनसप्तपर्णनिर्यूहे।
सिद्धा मधुघृतयुक्ताः कुष्ठघ्नीर्भक्षयेदभयाः ॥ ३७ ॥
दार्वीखदिरनिम्बानां त्वक्क्वाथः कुष्ठसूदनः ॥ ३८ ॥
निशोत्तमानिम्बपटोलमूलतिक्तावचालोहितयष्टिकाभिः।
कृतः कषायः कफपित्तकुष्ठं सुसेवितो घर्म इवोच्छिनत्ति ॥ ३९ ॥
एभिरेव च सृतं घृतमुख्यं भेषजैर्जयति मारुतकुष्ठम्।
कल्पयेत् खदिरनिम्बगुडूचीदेवदारुरजनीः पृथगेवम् ॥ ४० ॥

पाठादार्वीविड्भिरुणेष्टाकटुकाभि-
र्मूत्रे युक्तं शक्रयवैर्योषणजं च।
कुष्ठी पीत्वा मासमरुक् स्याद् गुदकीली
मेही शोफी पाण्डुरजीर्णी कृमिमांश्च ॥ ४१ ॥

लाङ्गलादन्तीमधुरसवरार्दीपिपाठाविडङ्गं
प्रत्यक्पुष्पीत्रिकटुरजनीसप्तपर्णाटरूषम्।
रक्तानिम्बं सुरतरुकृतं पद्ममूली च चूर्णं
पीत्वा मासं जयति हितभुग्गव्यमूत्रेण कुष्ठम् ॥ ४२ ॥

निशाकृष्णानागरवेल्लतीवरं
सवङ्गताप्यं क्रमशो विवर्द्धितम्।
गवाश्वमूत्रं पीतं वटकीकृतं तथा
निहन्ति कुष्ठानि सुदारुणान्यपि ॥ ४३ ॥

त्रिकटूत्तमातिलारुष्कराज्यमार्क्षिकसितोपला विहिता।

गुलिका रसायनं स्यात्कुष्ठजिच्च हृद्या च समसमा ॥४४॥
चन्द्रशकलाग्निरजनीविड्ङ्गतुवराख्यरुष्करविफलाभिः ।
वटका गुडांशकृताः समस्तकुष्ठानि नाशयन्त्यभ्यस्ताः ॥४५॥
विडङ्गभल्लातकवाकुचीनां सहीपिवाराहिहरीतकीनाम् ।
सलाङ्गलीक्षणतिलोपकुल्या गुडेन पिण्डी विनिहन्ति कुष्ठम् ॥४६॥
शशाङ्कलेखा सविडङ्गमूला सपिप्पलीका महुताग्रमूला ।
सयोमला सामलका सतैला कुष्ठानि कृच्छ्राणि निहन्ति लीढा ॥४७॥

यष्ट्यातिलगुडैः पिण्डी कुष्ठं सारुष्करैर्जयेत् ।
गुडारुष्करजन्तुघ्नसोमराजीकृताऽथवा ॥ ४८ ॥
विड्ङ्गाद्रिजतु क्षौद्रं सर्पिष्मत् खादिरं रजः ।
किटिभखित्वदद्रुघ्नं खादेन्नित्यहिताशनः ॥ ४९ ॥
सितातैलकृताभ्यासो धात्र्यायामलपिप्पलीः ।
लिहानः सर्वकुष्ठानि जयत्यतिगुरूण्यपि ॥ ५० ॥
मुस्तं व्योष त्रिफला मञ्जिष्ठादारुपद्मसूले द्वे ।
समच्छदनिम्बत्वक् सविशालाचित्रको मूर्वा ॥ ५१ ॥
चूर्णं तर्पणभागैर्नवभिः संयोजितं समध्वंसम् ।
नित्यं कुष्ठनिबर्हणमेतत् प्रायोगिकं खादेत् ॥ ५२ ॥
श्वयथुं सपाण्डुरोगं खित्र ग्रहणीप्रदोषमर्शांसि ।
वर्ष्मभगन्दरपिडकाकण्डूकोठापचीर्हन्ति ॥ ५३ ॥
रसायनप्रयोगेण तुवराख्यानि शीलयेत् ।
भल्लातकं वाकुचिकां वह्निमूलं शिलाद्वयम् ॥ ५४ ॥
इति दोषे विजिते ऽन्तस्त्वक्स्थे शमनं बहिः प्रलेपादि हितम् ।
तीक्ष्णालेपोत्क्लिष्टं कुष्ठं हि विवृद्धिमेति मलिने देहे ॥ ५५ ॥
क्षिरकठिनमण्डलानां कुष्ठानां पोटलैर्हितः स्वेदः ।
स्निग्धोत्लन्नं कुष्ठं शस्त्रैर्लिखितं प्रलेपनैर्लिम्पेत् ॥ ५६ ॥

येषु न शस्त्रं क्रमते स्पर्शेन्द्रियनाशनेषु कुष्ठेषु ।
तेषु निपात्यः क्षारो रक्तं दोषं च विस्राव्यम् ॥ ५७ ॥
लेपोऽतिकठिने परुषे सुप्ते कुष्ठे स्थिरे पुराणे च ।
पीतागदस्य कार्यो विषैः समन्त्रो गदैश्चानु ॥ ५८ ॥
स्तब्धातिसुप्तसुप्तान्यस्वेदनकुण्डलानि कुष्ठानि ।
दृष्टानि शुष्कगोमयफेनकशस्त्रैः प्रदेह्यानि ॥ ५९ ॥
मुस्ताविफलामदन करञ्ज आरग्वधकलिङ्गयवाः ।
सप्ताह्नकुष्ठफलिनीदार्व्यसिद्धार्थकं स्नानम् ॥ ६० ॥
एष कषायो वमनं विरेचनं वर्षकरस्तथोद्वर्षः ।
त्वग्दोषकुष्ठशोफप्रबोधनः पाण्डुरोगघ्नः ॥ ६१ ॥
करवीरनिम्बकुटजाक्ष्म्याकाश्चित्रकाच्च मूलानाम् ।
मूत्रे दर्वीलेपीक्काथो लेपेन कुष्ठघ्नः ॥ ६२ ॥
श्वेतकरवीरमूलं कुटजकरञ्जात् फलं त्वचो दार्व्याः ।
सुमनःप्रवालयुक्तो लेपः कुष्ठापहः सिद्धः ॥ ६३ ॥
शैरिषीत्वक्पुष्पं कार्पासाराजवृक्षपत्राणि ।
पिष्टा च काकमाची चतुर्विधः कुष्ठहा लेपः ॥ ६४ ॥
व्योषमर्षपनिशागरहधूमैर्यावशूकपटुचित्रककुष्ठैः ।
कोलमात्रगुटिकाङ्गविषांशाः श्वित्रकुष्ठहरणो वरलेपः ॥ ६५ ॥
निम्ब हरिद्रे सुरसं पटोल कुष्ठाश्वगन्धे सुरदारुशिग्रु ।
ससर्षपं तुम्बरुधान्यवन्ध्यं चण्डावचूर्णानि समानि कुर्यात् ६६ ॥

तैस्तक्रपिष्टैः प्रथमं शरीरं
तैलाक्तमुद्वर्त्तयितुं यतेत ।
तेनास्यकण्डूपिटिकाः सकोठाः
कुष्ठानि शोफाश्च शमं व्रजन्ति ॥ ६७ ॥

मुस्तामृतासङ्गकटङ्कटेरीकासीसकम्पिल्लककुष्ठरोध्राः ।
गन्धोपलः सर्जरसो विड़ङ्गं मनःशिलालीकरवीरकत्वक् ॥ ६८ ॥

तैलाक्तगात्रस्य कृतानि चूर्णै-
र्लेतानि दद्याद्वचूर्णनार्थम् ।
दुष्टं सकण्डूः किटिभानि यामा
विचर्चिका चेति तथा न सन्ति ॥ ६८ ॥
सुगन्धे सर्षपात् कल्कः कुकूलानलपाचितः ।
लेपाद्विचर्चिकां हन्ति रागवेग इव त्वपाम् ॥७०॥
मनःशिलालेमरिचानि तैलमार्कं पयः कुष्ठहरः प्रदेहः ।
तथा करञ्जप्रपुनाटबीज कुष्ठान्वित गोसलिलेन पिष्टम् ॥७१॥
गुग्गुलुमरिचविडङ्गैः सर्षपकासीससर्जरससुस्तैः ।
श्वेतार्कालगन्धैर्मनःशिलाकुष्ठकम्पिल्लैः ॥ ७२ ॥
त्रिभयाहरिद्रासहितैश्चाक्रिकतैलेन मिश्रितैरेभिः ।
दिनकरकराभितप्तैः कुष्ठं दृष्टञ्च नष्टञ्च ॥ ७३ ॥
मरिचं तमालपत्रं कुष्ठ समनःशिलं सकासीसम् ।
तैलेन युक्तमुषितं सप्ताह भाजने ताम्रे ॥७४॥
तेनाञ्जित सिध्मसप्ताहाद् घर्मसेविनोऽपैति ।
मासाच्चयं किलासं स्नानेन विना विशुद्धस्य ॥ ७५ ॥
मयूरकक्षारजले सप्तकृत्वः परिस्रुते ।
सिद्धं ज्योतिष्मतीतैलमभ्यङ्गात् सिध्मनाशनम् ॥७६॥
वायसजङ्घामूलं वमनीपत्राणि मूलकाद् बीजम् ।
तक्रेण भौमवारे लेपः सिध्मापहः सिद्धः ॥ ७७ ॥
ओवन्तीमञ्जिष्ठादार्वी कम्पिल्लकं पयस्तुल्यम् ।
एष घृततैलपाकः सिद्धः सिद्धे च सर्जरसः ॥७८ ॥
देयः समधूच्छिष्टो विपादिका तेन नश्यति क्षुद्रा ।
चर्मैककुष्ठकिटिभं कुष्ठं शाम्यत्यलसकं च ॥ ७९ ॥
मूलं सप्ताह्वात्त्वक् शिरीषाच्छमारात्
अर्काच्चालत्वाच्चित्रकास्फोतनिम्बात् ।

वीज कारञ्जं सार्षपं प्रापुनाटं
श्रेष्ठा जन्तुघ्नं चूषक हे हरिद्रे ॥ ८० ॥
तिलतैलं साधितं तैः समूत्रैः
त्वग्दोषाणां दुष्टनाडीव्रणानाम् ।
अभ्यङ्गेन श्वेतवातोद्भवाना
नाशायालं वज्रकं वज्रतुल्यम् ॥ ८१ ॥
एरण्डतार्क्ष्यघननीपकदम्बभार्ङ्गी-
कम्पिल्लवेल्लफलिनीसुरवारुणीभिः ।
निर्गुण्डारुष्करसुराह्वसुवर्णदुग्धा-
श्वेतार्कगुग्गुलुशिलापटुतालविल्वैः ॥ ८२ ॥
तुल्यस्नुगर्कदुग्धं सिद्धं तैलं सृतं महावज्रम् ।
अतिशयितवज्रकगुणं क्षिप्रार्शोग्रन्थिमालाघ्नम् ॥ ८३ ॥
कुष्ठाखुमारभृङ्गार्कमूलस्नुक्क्षीरसैन्धवैः ।
तैलं सिद्धं विषावापमभ्यङ्गात् कुष्ठजित्परम् ॥ ८४ ॥
सिद्धं सिक्थकसिन्दूरपुरतुल्यकतार्क्ष्यजैः ।
कच्छूं विचर्चिकां वाऽऽशु कटुतैलं नियच्छति ॥ ८५ ॥
लाक्षाव्योष प्रापुनाटश्च वीज
सज्योवेष्टं कुष्ठसिद्धार्थकाश्च ।
तक्रोन्मिश्रः स्याद्धरिद्रा च लेपो
दद्रुघ्नो मूलकोत्थश्च वीजम् ॥ ८६ ॥
चित्रकसोभाञ्जनकौ गुडूच्यपामार्गदेवदारूणि ।
खदिरो धवश्च लेपः श्यामा दन्ती द्रवन्ती च ॥ ८७ ॥
लाक्षारसाञ्जनैलापुनर्नवा चेति कृष्णिनां लेपाः ।
दधिमण्डयुताः पादैः षट् प्रोक्ता मारुतकफघ्नाः ॥८८॥
जलवाप्यलोहकेसरपद्मकचन्दनमृणालानि ।
भागोत्तराणि सिद्धः प्रलेपनं पित्तकफकुष्ठे ॥ ८९ ॥

तिक्तघृतैर्धौतघृतैरभ्यङ्गो दह्यमानकुष्ठेषु।
तैलैश्चन्दनमधुकप्रपौण्डरीकोत्पलयुतैश्च ॥ ९० ॥
क्लेदे प्रपतति चाङ्गे दाहे विस्फोटके च चर्मदले।
शीताः प्रदेहलेपा व्यधनविरेकौ घृतं तिक्तम् ॥ ९१ ॥
खदिरत्रपनिम्बकुटजाः श्रेष्ठाः कृमिजित् पटोलमधुपर्ण्यः।
अन्तर्बहिः प्रयुक्ताः कृमिकुष्ठनुदः सगोमूत्राः ॥ ९२ ॥
वातोत्तरेषु सर्पिर्वमनं श्लेष्मोत्तरेषु कुष्ठेषु।
पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनं चाग्र्यम् ॥ ९३ ॥
ये लेपाः कुष्ठानां युज्यन्ते निर्हृतासृदोषाणाम्।
संशोधिताशयानां सद्यः सिद्धिर्भवति तेषाम् ॥ ९४ ॥
दोषे हृतेऽपनीते रक्ते बाह्याभ्यन्तरे कृते शमने।
श्लेष्मे च कालयुक्ते न कुष्ठमतिवर्त्तते साध्यम् ॥ ९५ ॥
बहुदोषः संशोध्यः कुष्ठी बहुशोऽनुरक्षता प्राणान्।
दोषे ह्यतिमात्रहृते वायुर्हन्यादबलमाशु ॥ ९६ ॥

पश्चात् पक्वाच्छर्दनान्यभ्युपेयात्
मासान्मासाच्छोधनान्यप्यधस्तात्।
शुद्धिर्मूर्ध्नि स्यात् त्रिरात्रात् त्रिरात्रात्
षष्ठे षष्ठे मास्यसृग्मोक्षणानि ॥ ९७ ॥

यो दुर्वान्तो दुर्विरिक्तोऽथवा स्यात्
कुष्ठी दोषैरुद्धतैर्व्याप्यतेऽसौ।
निःसन्देहं यात्यसाध्यत्वमेवं
तस्मात् कृत्स्नान्निर्हरेदस्य दोषान् ॥ ९८ ॥

व्रतदमयमसेवात्यागशीलाभियोगः
द्विजसुरगुरुपूजा सर्वसत्त्वेषु मैत्री।
शिवाग्निवसुततारासूर्यराराधनानि
प्रकटितमलपापं कुष्ठमुन्मूलयन्ति ॥ ९९ ॥

विंशोऽध्यायः ।

अथातः श्वित्रकृमिचिकित्सितं व्याख्यास्यामः ॥

कुष्ठादपि बीभत्सं यच्छीघ्रतरञ्च याप्यसाध्यत्वम् ।
श्वित्रमतस्तच्छान्त्यै: यतेत दीप्ते यथा भवने ॥ १ ॥
संशोधनं विशेषात् प्रयोजयेत् पूर्वमेव देहस्य ।
श्वित्रे संसनमग्र्यं मलयूरस इष्यते सगुडः ॥ २ ॥
तं पीत्वा भक्ततनुर्यथाबलं सूर्यपादसन्तापम् ।
सेवेत विरिक्ततनुस्त्र्यहं पिपासुः पिबेत् पेयाम् ॥ ३ ॥
श्वित्रिङ्गे ये स्फोटा जायन्ते कण्टकेन तान् भिन्द्यात् ।
स्फोटेषु निस्रुतेषु तु प्रातः प्रातः पिबेत् त्रिदिनम् ॥४॥
मलयमसनं प्रियङ्गुं शतपुष्पां चाम्भसा समुत्क्वाथ्य ।
पलाशं वा क्षारं यथाबलं क्षौद्रितोपेतम् ॥ ५ ॥
पल्म्वबलवल्कलनिर्यूहेणेन्दुराजिकाकल्कम् ।
पीत्वोष्णस्थितस्य जाते स्फोटे तक्रेण भोजनं निर्व्रणम् ॥६॥
गव्यं मूत्रं चित्रकत्र्योषयुक्तं
सर्पिः कुम्भे स्थापितं क्षौद्रमिश्रम् ।
पक्षादूर्ध्वं श्वित्रिभिः पेयमेतत्
कार्यं चास्मै कुष्ठदृष्टं विधानम् ॥ ७ ॥
मार्कं मथवा खादेद् भृष्टं तैलेन लोहपात्रस्थम् ।
बीजकशृतञ्च दुग्धं तदनु पिबेच्छ्वित्रनाशाय ॥ ८ ॥
पूतीकार्कव्याधिघातक्षुद्दोनां
मूत्रे पिष्टाः पल्लवा जातिजाश्च ।
घ्नन्त्याशेषाच्छ्वित्रदुर्नामदद्रू-
श्यामाकोठान् दुष्टनाडीव्रणांश्च ॥ ९ ॥
क्षैपं दुग्धं चर्म मातङ्गजं वा

क्षिप्ते चेपस्तैलयुक्तो वरिष्ठः ।
पूतिः कीटो राजहंसोद्भवेन
चारेणाक्तः क्षिप्रमेकोऽपि हन्ति ॥ १० ॥
रात्रौ गोमूत्रे चासितान् जर्जराङ्गान्
अह्नि छायायां शोषयेत् स्फोटहेतून् ।
एवं वारांस्त्रींस्तैस्ततः श्लक्ष्णपिष्टैः
सुह्वा क्षीरेण क्षिप्तनाशाय लेपः ॥ ११ ॥
अक्षतैलक्लतो लेपः कृष्णसर्पोद्भवा मषी ।
शिखिपित्तं तथा दग्धं क्षीवेरं वा तदाप्लुतम् ॥ १२ ॥
कुडवो वल्गुजबीजाद्धरितालचतुर्थभागसंमिश्रः ।
मूत्रेण गवां पिष्टः सवर्णकरणं परं क्षिप्ते ॥ १३ ॥
क्षीते सुदग्धे गजलिण्डजे च गजस्य मूत्रेण परिप्लुते च ।
द्रोणप्रमाणे दशभागयुक्तं दत्त्वा पचेद्बीजमवल्गुजानाम् ॥१४॥
क्षिप्तं जयेच्चिक्कणतां गतेन
तेन प्रलिम्पन् बहुशः प्रदुष्टम् ।
कुष्ठं मषीं वा तिलकालकं वा
यद्वा व्रणे स्यादधिमांसजातम् ॥ १५ ॥
भल्लातकद्वीपिसुधार्कमूलं गुञ्जाफलक्षारषणङ्गचूर्णम् ।
तुल्यं सकुष्ठं लवणानि पञ्च क्षारद्वयं लाङ्गलिकाश्च पञ्च ॥१६॥
स्वर्कदुग्धे घनमायसस्थं शलाकया तद्विदधीत लेपम् ।
कुष्ठे किलासे तिलकालकेषु मांसेषु दुर्नामसु चर्मकीले ॥१७॥
शुद्धा शोणितमोक्षैर्विरूक्षणैर्भक्षणैश्च सत्त्वानाम् ।
क्षिप्तं कस्यचिदेव प्रशाम्यति क्षीणपापस्य ॥ १८ ॥

एकविंशोऽध्यायः।

अथातः कृमिचिकित्सितं व्याख्यास्यामः॥

स्निग्धस्विन्ने गुडक्षीरमस्यार्द्रैः कृमिणोदरे।
उत्क्लेशितकृमिकफे शर्वरीं तां सुखोषिते॥ १॥
सुरसादिगणं मूत्रे क्वाथयित्वार्द्धवारिणि।
तं कषायं कणागालकृमिजित् कल्कयोजितम्॥ २॥
सतैलखर्जिकाचारं युञ्जाद् वस्तिं ततोऽहनि।
तस्मिन्नेव निरूढं तं पाययेत विरेचनम्॥ ३॥
त्रिवृत्कल्कं फलकषाकषायालोडितं ततः।
ऊर्ध्वाधः शोधिते कुर्य्यात् पञ्चकोलयुतं क्रमम्॥ ४॥
कटुतिक्तकषायाणां कषायैः परिषेचनम्।
काले विड्भक्तैलेन ततस्तमनुवासयेत्॥ ५॥
शिरोरोगनिषेधोक्तमाचरेन्मूर्द्धगेष्वनु।
उद्वृत्तितिक्तकटुकमल्पस्नेहञ्च भोजनम्॥ ६॥
विड्भक्तकृष्णामरिचपिप्पलीमूलशिग्रुभिः।
पिबेत् सखर्जिकाचारं यवागूं तक्रसाधिताम्॥७॥
रसं शिरोषाकिणिहिपारिभद्रककेम्बुकात्।
पलाशबीजपत्तूरपूतिकाद्वा पृथक् पिबेत्॥ ८॥
सक्षौद्र सुरसादीन् वा लिह्यात् क्षौद्रयुतान् पृथक्
शतक्लोऽश्वविट्चूर्णं विड्भक्ताम्बुभावितम्॥ ९॥
कृमिमान्मधुना लिह्याज्जावितं वा वरारसैः।
शिरोगतेषु कृमिषु चूर्णं प्रधमनञ्च तत्॥ १०॥
आखुकर्णीकिसलयैः सुपिष्टैः पिष्टमिश्रितैः।
पक्त्वा पूपलिकां खादेद्दाल्याम्लञ्च पिबेदनु॥ ११॥
सपञ्चकोललवणमसान्द्रं तक्रमेव वा।
सौम्यमार्कवनिर्गुण्डीपल्लवेष्वप्ययं विधिः॥ १२॥

विडङ्गचूर्णमिश्रैर्वा पिष्टैर्भक्ष्यान् प्रकल्पयेत् ।
विडङ्गतण्डुलैर्युक्तमद्वांश्चैरातपस्थितम् ॥ १३ ॥
दिनमात्रक्षरं तैलं पाने वस्तौ च योजयेत् ।
सुराक्षसरलस्नेहं पृथगेवं प्रकल्पयेत् ॥ १४ ॥
पुरीषजेषु सुतरां दद्याद् वस्तिविरेचने ।
शिरोविरेकं वमनं शमनं कफजन्मसु ॥ १५ ॥
रक्तजानां प्रतीकारं कुर्य्यात् कुष्ठचिकित्सितात् ।
द्वन्द्वलुप्तविधिश्चात्र विधेयो रोमभोजिषु ॥ १६ ॥

क्षीराणि मांसानि घृतं गुडश्च
दधीनि शाकानि च पर्णवन्ति ।
समासतोऽम्लान्मधुरान् रसांश्च
क्रमेण जिह्मासुः परिवर्जयेच्च ॥ १७ ॥

द्वाविंशोऽध्यायः ।

अथातो वातव्याधिचिकित्सितं व्याख्यास्यामः ॥
केवल निरुपस्तम्भमादौ स्नेहैरुपाचरेत् ।
वायुं सर्पिर्वसामज्जातैलपानैर्नरं ततः ॥ १ ॥
स्नेहाक्रान्तं समाश्वास्य पयोभिः स्नेहयेत् पुनः ।
यूषैर्म्राम्योदकानूपरसैर्वा स्नेहसंयुतैः ॥ २ ॥
पायसैः कृसरैः साम्लैलवणैः सानुवासनैः ।
वातघ्नैस्वर्पणैश्चान्नैः सुस्निग्धैः स्नेहयेत्ततः ॥ ३ ॥
स्नेह्यक्तं स्नेहसंयुक्तैः शङ्कराद्यैः पुनः पुनः ।
स्नेहाक्तं स्विन्नमङ्गेषु वक्त्रं स्रोत्रं सवेदनम् ॥४॥
यत्नेष्टमानामयितुं सुखमेव हि शक्यते ।
शुष्काण्यपि हि काष्ठानि स्नेहस्वेदोपपादनैः ॥५॥
शक्यं कर्मण्यतां नेतुं किमु मात्राणि जीवताम् ।

हर्षतोदरुगायामशोकस्तम्भग्रहादयः ॥ ६ ॥
स्निग्धस्याशु प्रशाम्यन्ति मार्दवं चोपजायते।
स्नेहश्च धातून् संशुष्कान् पुष्णात्याशु प्रयोजितः ॥ ७ ॥
बलमग्निबलं पुष्टिं प्राणं चास्याभिवर्द्धयेत्।
असक्तं पुनः स्नेहैः स्वेदैश्च प्रतिपादयेत् ॥ ८ ॥
तथा स्नेहमृदौ कोष्ठे न तिष्ठन्त्यनिलामयाः।
यद्येतेन सदोषत्वात् कर्मणा न प्रशाम्यति ॥ ९ ॥
मृदुभिः स्नेहसंयुक्तैर्भेषजैस्तं विशोधयेत्।
घृतं तिल्वकसिद्धं वा सातलासिद्धमेव वा ॥ १० ॥
पयसैरण्डतैलं वा पिबेद्दोषहरं शिवम्।
स्निग्धाम्ललवणोष्णाद्यैराहारैर्हि मलस्थितः ॥ ११ ॥
स्रोतो रुद्ध्वाऽनिलं रुध्यात्तस्मात्तमनुलोमयेत्।
दुर्बलो यो विरेच्यः स्यात्तं निरूहैरुपाचरेत् ॥ १२ ॥
दीपनैः पाचनीयैर्वा भोज्यैर्वा तद्युतैर्नरम्।
संशुद्धोत्थिते चाग्नौ स्नेहस्वेदौ पुनर्हितौ ॥ १३ ॥
आमाशयगते वायौ वमितप्रतिभोजिते।
सुखाम्बुना षट्चरणं वचादिं वा प्रयोजयेत् ॥ १४ ॥
सम्यक्चितेऽग्नौ परतो विधिः केवलवातिकः।
मध्यात्रामिप्रदेशस्थे सिद्धान् बिल्वशलाटुभिः ॥ १५ ॥
वस्तिकर्म त्वधोनाभेः शस्यते वावपीडकः।
कोष्ठगे चारचूर्णाद्या हिताः पाचनदीपनाः ॥ १६ ॥
हृत्स्थे पयः क्षीरासिद्धं शिरोवस्तिः शिरोगते।
स्नेहिकं नावनं धूमः श्रोत्रादीनाञ्च तर्पणम् ॥ १७ ॥
स्वेदाभ्यङ्गानि वातानि हृद्यं चान्नं लघ्वशिते।
शीताः प्रदेहा रक्तस्थे विरेको रक्तमोक्षणम् ॥ १८ ॥
विरेको मांसमेदःस्थे निरूहाः शमनानि च।

वाह्याभ्यन्तरतः स्नेहैरग्निमज्जागतं जयेत् ॥ १८ ॥
प्रहर्षोऽन्नच्च शुक्रस्थे बलशुक्रकरं हितम् ।
विबद्धमार्गं दृष्ट्वा तु शुक्रं दद्याद्विरेचनम् ॥ २० ॥
विरिक्तं प्रतिभुक्तच्च पूर्वोक्तां कारयेत् क्रियाम् ।
गर्भे शुष्के तु वातेन बालानां च विशुष्यताम् ॥ २१ ॥
सिताकाश्मर्य्यमधुकैः सिद्धसुत्थापने पयः ।
स्रावसम्बिशिरःप्राप्ते स्नेहदाहोपनाहनम् ॥ २२ ॥
तैलं सङ्कुचितेऽभ्यङ्गे माषसैन्धवसाधितम् ।
आगारधूमलवणतैलैर्लेपः सुतेऽस्रजि ॥ २३ ॥
सुप्तेऽङ्गे वेष्टयुक्ते तु कर्त्तव्यमुपनाहनम् ।
अथापतानकेनार्त्तमस्रस्राचमवेपनम् ॥ २४ ॥
अस्तब्धमेढ्रमस्वेद वहिरायामवर्जितम् ।
अखट्वाघातिनं चैनं त्वरितं समुपाचरेत् ॥ २५ ॥
तत्र प्रागेव सुस्निग्धं स्विन्नाङ्गे तीक्ष्णनावनम् ।
स्रोतोविशुद्धये युञ्जादच्छपानं ततो घृतम् ॥ २६ ॥
विदार्य्यादिगणक्वाथदधिक्षीररसैः शृतम् ।
नातिमात्रं तथा वायुर्व्याप्नोति सहसैव वा ॥ २७ ॥
कुलत्थयवकोलानि भद्रदार्वादिकं गणम् ।
निःक्वाथ्यानूपमांसच्च तेनाम्लैः पयसापि च ॥ २८ ॥
स्वादु स्कन्धप्रतीवापं महास्नेह विपाचयेत् ।
सेकाभ्यङ्गावगाहान्नपाननस्यानुवासनैः ॥ २९ ॥
संहन्ति वातं ते ते च स्नेहस्वेदाः सुयोजिताः ।
वेगान्तरेषु मूर्द्धानमसक्तच्चास्य रेचयेत् ॥ ३० ॥
अवपीडैः प्रधमनैस्तीक्ष्णैः श्लेष्मनिवर्हणैः ।
श्लेष्मसासु विमुक्तासु तथा संज्ञां स विन्दति ।
सौवर्चलाभयाव्योषसिद्धं सर्पिश्चलेऽधिके ॥ ३१ ॥

पलाष्टकं तिक्तकतो वरायाः प्रस्थं पलांशं गुरुपञ्चमूलम् ।
सैरण्डसिंहीक्षिप्तं घटेऽपां पक्त्वा पचेत्तादृतेन तेन ॥ ३२ ॥
दग्धः पाचे यावशूकात्रिविल्वैः सर्पिःप्रस्थं हन्ति तत्सेव्यमानम् ।
दुष्टान् वातानेकसर्वाङ्गसस्थान्योनिव्यापद्भ्रंशवर्चोदरघ्नं ॥ ३३ ॥

विधिस्तिल्वकवज्ज्ञेयो गम्भाकाशोकयोरपि ।
चिकित्सितमिदं कुर्याच्छुद्धवातापतानके ॥ ३४ ॥
संसृष्टदोषे सस्नेहं चूर्णयित्वा कफान्विते ।
तुम्बरुरुक्षभयाहिङ्गुपौष्करं लवणत्रयम् ॥ ३५ ॥
यवक्षाराम्बुना पेयं हृत्पार्श्वार्त्तिपतन्त्रके ।
हिङ्गु सौवर्चलं शुण्ठी दाडिमं साम्लवेतसम् ॥ ३६ ॥
पिबेद्वा श्लेष्मपवनहृद्रोगोक्तञ्च भक्षयेत् ।
आयामयोरर्दितवद् बाह्याभ्यन्तरयोः क्रिया ॥ ३७ ॥
तैलद्रोण्याञ्च शयनमान्तरोऽत्र सुदुस्तरः ।
विवर्णदन्तवदनः सस्ताङ्गो नष्टचेतनः ॥ ३८ ॥
प्रस्विन्यश्च धनुष्कश्री दशरात्रं न जीवति ।
वैगुण्यतोऽन्यथा जीवन्नन्देषु विनतो जडः ॥ ३९ ॥
खञ्जः कुणिः पक्षहतः पङ्गुलो विकलोऽथवा ।
हनुसंसे हनुस्निग्धस्विन्नो स्वस्थानमानयेत् ॥ ४० ॥
उन्नामयेच्च कुशलश्चिबुकं विहते मुखे ।
नामयेत् सहते श्लेष्मेकायामवदाचरेत् ॥ ४१ ॥
जिह्वास्तम्भे यथावस्थं कार्यं वातचिकित्सितम् ।
अर्दिते लावनं मूर्ध्नि तैलं श्रोत्राक्षितर्पणम् ॥ ४२ ॥
सशोफे वमनं दाहरागयुक्ते शिराव्यधः ।
स्नेहनं स्नेहसंयुक्तं पक्षाघाते विरेचनम् ॥ ४३ ॥
अवबाही हितं नस्य स्नेहश्चोत्तरभक्तिकः ।
कृतस्तम्भे न च स्नेहो न च संशोधनं हितम् ॥ ४४ ॥

श्लेष्मामदोवाहुल्याद्युक्त्या तत्त्वपणान्यतः।
कुर्याद्रूक्षोपचारञ्च यवश्यामाकोद्रवाः॥ ४५॥
शाकैरलवणैः शस्ताः किञ्चित्तैलैर्जलैः शृतैः।
जाङ्गलैरल्पतैर्मांसैर्मध्वरिष्टपायिनः॥ ४६॥
वत्सकादिर्हरिद्रादिर्वचादिर्वा ससैन्धवैः।
आमवाते सुखाम्भोभिः पेयः षट्चरणोऽथवा॥ ४७॥
लिह्यात् क्षौद्रेण वा श्रेष्ठाचव्यतिक्तकणाघनान्।
कल्कं समधु वा चव्यपथ्याग्निसुरदारुजम्॥ ४८॥
मूत्रैर्वा श्रीलयेत्पथ्यां गुग्गुलुं गिरिसम्भवम्।
व्योषाग्निमुस्तत्रिफलाविडङ्गैर्गुग्गुलुं समम्॥ ४९॥
खादन् सर्वान् जयेद् व्याधीन् मेदःश्लेष्मामवातजान्।
श्राम्यत्यें वं कफाक्रान्तः समेदस्कः प्रभञ्जनः॥ ५०॥
क्षारमूत्रान्वितान् स्नेहान् सेकानुवर्त्तनानि च।
कुर्याल्लिह्याच्च मूत्राढ्यैः करञ्जफलसर्षपैः॥ ५१॥
मूलैर्वाप्यर्कतर्कारीनिम्बजैः ससुराह्वयैः।
सक्षौद्रसर्षपापक्वलोष्टवल्मीकमृत्तिकैः॥ ५२॥
कफक्षयार्थं व्यायामे सह्ये चैनं प्रवर्त्तयेत्।
स्थलान्युल्लङ्घयेन्नारीः शक्तितः परिशीलयेत्॥ ५३॥
स्थिरतोयं सरः क्षेमं प्रतिस्रोतो नदीं तरेत्।
श्लेष्मदःक्षये चात्र स्नेहादीनवचारयेत्।
स्थानदूष्यादि चालोच्य कार्य्या शेषेष्वपि क्रिया॥ ५४॥
सहचरं सुरदारुसनागरं क्वथितमम्भसि तैलविश्रितम्।
पवनपीडितदेहगतिः पिबेद् द्रुतविलम्बितगोभवतीच्छया॥ ५५॥
रास्नामहौषधद्वीपिपिप्पलीशठीपौष्करम्।
पिष्ट्वा विपाचयेत् सर्पिर्वातरोगहरं परम्॥ ५६॥
निम्बत्वक्पटोलनिदिग्धिकानां

भागान् पृथग् दशपलान् विपचेद्दृढेऽग्नौ।
अष्टांशशेषितरसेन पुनश्च तेन
प्रस्थं घृतस्य विपचेत् पिचुभागकल्कैः॥ ५७॥
पाठाविडङ्गसुरदारुगजोपकुल्या-
द्विचारनागरनिशामिशिचव्यकुष्ठैः।
तेजोवतीमरिचवत्सकदीप्यकाग्नि-
रोहिण्यरुष्करवचाकणमूलयुक्तैः॥ ५८॥
मञ्जिष्ठयातिविषया विषया यवान्या
संशुद्धगुग्गुलुपलैरपि पञ्चसङ्ख्यैः।
तल्लेवितं प्रथमति प्रवलं समीरं
सन्ध्यस्थिमज्जगतमप्यथ कुष्ठमीदृक्॥ ५९॥
नाड़ीव्रणार्बुदभगन्दरगण्डमाला-
जत्रूर्ध्वसर्वगदगुल्मगुदोत्थमेहान्।
यच्मारुचिश्वसनपीनसकासशोफ-
घृत्पाण्डुरोगमदविद्रधिवातरक्तम्॥ ६०॥
बलाविल्वस्थिते क्षीरे घृतमस्थं विपाचयेत्।
तस्य शक्तिः प्रकुर्वो वा नस्यं वाते शिरोगते॥ ६१॥
तद्वल्लिङ्गा वसा नक्रमत्स्यकूर्मचलूकजा।
विशेषेण प्रयोक्तव्या केवले मारुतिश्वनि॥ ६२॥
जीर्णं पिण्याकमप्यस्य मूलं पृथक् च
क्वाथ्यं क्वाथाभ्यामेकतस्तैलमाभ्याम्।
क्षीरादष्टांशं पाचयेत् तेन पानात्
वाता नश्येयुः श्लेष्मयुक्ताविशेषात्॥ ६३॥
प्रसारिणी तुलाक्वाथे तैलप्रस्थं पयः समम्।
द्विमेदामिश्रिमञ्जिष्ठाकुष्ठारास्नाकुचन्दनैः॥ ६४॥
जीवकर्षभकाकोलीयुगुलामरदारुभिः।

कल्कितैर्विपचेत् पर्वमारुतामयनाशनम् ॥ ६५ ॥
समूलशाखस्य सहाचरस्य तुलां तमेतां दशमूलतश्च ।
पलानि पञ्चाशदभीक्ष्णतश्च पादावशेषं विपचेद्दृढेऽपाम् ॥ ६६ ॥
तत्र सैन्धनखकुष्ठहिमैलास्रक्प्रियङ्गुनलिकाम्बुशिलाजैः ।
लोहितानलदलोहसुराह्वैः कोपनाभिशितुरुष्कनतैश्च ॥ ६७ ॥

तुल्यक्षीरम्यालिकैस्तैलपात्रं सिद्धं
कृच्छ्रान् शीलितं हन्ति वातान् ।
कम्पाक्षेपस्तम्भशोषादियुक्तान्
गुल्मोन्मादौ पीनसं योनिरोगान् ॥ ६८ ॥

सहाचरतुलायास्तु रसे तैलाढकं पचेत् ।
मूलकल्काद्दशपलं पयो दत्त्वा चतुर्गुणम् ॥ ६९ ॥
अथवा नतषड्ग्रन्थास्थिराकुष्ठसुराह्वयान् ।
सैलाननलदशैलेयशताह्वारक्तचन्दनान् ॥ ७० ॥
सिद्धेऽस्मिन् शर्कराचूर्णादष्टादशपलं क्षिपेत् ।
मेढ्रस्य सम्मतं तैलं तत्कृच्छ्राननिलामयान् ॥ ७१ ॥
वातकुण्डलिकोन्मादगुल्मवर्ष्मादिकान् जयेत् ।
बलाशत क्षिप्तरुहापादं राज्ञाष्टभागिकम् ॥ ७२ ॥
जलाढकं शते पक्वा शतभागस्थिते रसे ।
दधिमस्त्विक्षुनिर्यासशुक्लैस्तैलाढकं समैः ॥ ७३ ॥
पचेत्साजपयोऽर्धांशं कल्कैरिमैः पलोन्मितैः ।
ग्रन्थीसरलदार्वेलामञ्जिष्ठागुरुचन्दनैः ॥ ७४ ॥
पद्मकातिबलामुस्ताशूर्पपर्णीह्रेणुभिः ।
यष्ट्याह्वसुरसव्याघ्रनखवर्षभकजीवकैः ॥ ७५ ॥
पलाग्ररसकस्तूरीनोलिकाजातिकोशकैः ।
स्रक्काकुङ्कुमशैलेयजातिकाकट्फलाम्बुभिः ॥ ७६ ॥
त्वक्कुन्दरुक्कर्पूरतुरुष्कश्रीनिवासकैः ।

लवङ्गनखकङ्कोलकुष्ठमांसीप्रियङ्गुभिः ॥ ७७ ॥
स्थौणेयतगरध्यामवचामदनकम्पिल्लैः।
सनागकेसरैः सिद्धे दद्याच्चात्रावतारिते ॥ ७८ ॥
पत्रकल्कं ततः पूतं विधिना तत्रयोजितम्।
कासश्वासज्वरच्छर्दिमूर्च्छागुल्मक्षतक्षयान् ॥ ७९ ॥
प्लीहशोषमसारमलक्ष्मीं च प्रणाशयेत्।
बलातैलमिदं श्रेष्ठं वातव्याधिविनाशनम् ॥ ८० ॥

पाने नस्येऽन्वासनेऽभ्यञ्जने च
स्नेहाः काले सम्यगीते प्रयुक्ताः।
दुष्टान् वातानाशु शान्तिं नयेयुः
वन्ध्या नारीः पुत्रभाजश्च कुर्युः ॥ ८१ ॥

स्नेहस्वेदैर्द्रुतः श्लेष्मा यदा पक्वाशये स्थितः।
पित्तं वा दर्शयेद्रूपं वस्तिभिस्तं विनिर्जयेत् ॥ ८२ ॥

त्रयोविंशोऽध्यायः।

अथातो वातशोणितचिकित्सितं व्याख्यास्यामः ॥
वातशोणितिनो रक्तं स्निग्धस्य बहुशो हरेत्।
अल्पाल्पं पालयन् वायुं यथादोषं यथाबलम् ॥ १ ॥
रुग्णागतोददाहेषु जलौकाभिर्विनिर्हरेत्।
मृदुतुम्बैश्चिमिचिमाकण्डूरुग्दूयनान्वितम् ॥ २ ॥
प्रच्छानेन शिराभिर्वा देशादेशान्तरं व्रजेत्।
अङ्गम्लानौ तु न स्राव्यं रूक्षं वातोत्तरं च यत् ॥ ३ ॥
गम्भीरं क्षयथुं स्तब्धं कम्पसुप्तिशिरामयान्।
म्लानिमन्याक्षवातोत्थान् कुर्याद्दायुरसृक्क्षयात् ॥ ४ ॥
विरेच्यः स्नेहयित्वा तु स्नेहयुक्तैर्विरेचनैः।
वातोत्तरे वातरक्ते पुराणं पाययेद् घृतम् ॥ ५ ॥

श्रावणीचीरकाकोलीक्षीरिणीजीवकैः समैः।
सिद्धं सर्षपकैः सर्पिः सक्षीरं वातरक्तनुत् ॥ ६ ॥
द्राक्षामधूकवारिभ्यां सिद्धं वा ससितोपलम्।
घृतं पिबेत्तथा क्षीरं गुडूचीस्वरसे श्रृतम् ॥ ७ ॥
तैलं पयः शर्कराक्षं पाययेद्वासमूर्च्छितम्।
बलाशतावरीरास्नादशमूलैः सपीलुभिः ॥ ८ ॥
श्यामैरण्डस्थिराभिश्च वातार्त्तिघ्नं श्रृतं पयः।
धारोष्णं मूत्रयुक्तं वा क्षीरं दोषानुलोमनम् ॥ ९ ॥
पैत्ते पक्वा वरीतिक्ता पटोलत्रिफलामृताः।
पिबेद् घृतं वा क्षीरं वा स्वादु तिक्तकसाधितम् ॥१०॥
क्षीरेणैरण्डतैलं च प्रयोगेण पिबेन्नरः।
बहुदोषो विरिक्तार्थं जीर्णे क्षीरोदनाशनः ॥ ११ ॥
कषायमभयानां वा पाययेद् घृतभर्जितम्।
क्षीरानुपानं विदतात्चूर्णं द्राक्षारसेन वा ॥ १२ ॥
निर्हरेद्वा मलं तस्य सघृतैः क्षीरवस्तिभिः।
न हि वस्तिसमं किञ्चिद्वातरक्तचिकित्सितम् ॥ १३ ॥
विशेषात्पायुपार्श्वोरुपर्वास्थिजठरान्त्रिषु।
मुस्तद्राक्षाहरिद्राणां पिबेत् क्वाथं कफोल्बणे ॥१४॥
सक्षौद्रं त्रिफलाया वा गडूचीं वा यथा तथा।
यथार्हस्नेहपीतं च वामितं मृदु रूक्षयेत् ॥ १५ ॥
त्रिफलाव्योषपत्रैलाखक्षीरीचित्रकं वचाम्।
विडङ्गं पिप्पलीमूलं लोमशं दृषकं त्वचम् ॥ १६ ॥
ऋद्धिं लाङ्गलिकं चव्यं समभागानि पेषयेत्।
कल्कैर्लिह्यायसीं पात्रीं मध्याह्ने भक्षयेदिदम् ॥ १७ ॥
वातासृ सर्वदोषेऽपि परं शूलान्विते हितम्।
कोकिलाक्षकनिर्यूहः पीतस्तच्छाकभोजिना ॥ १८ ॥

क्षपाभ्यास इव क्रोधं वातरक्तं नियच्छति ।
पञ्चमूलस्य धात्र्या वा रसैर्लोतकीं वसाम् ॥ १९ ॥
खुडं सुरूढमभ्यङ्गे ब्रह्मचारी पिबन् जयेत् ।
इत्याभ्यन्तरमुद्दिष्टं कर्म बाह्यमतः परम् ॥ २० ॥
आरनालाढके तैलं पादसर्जरसं घृतम् ।
प्रभूते खजितं तोये ज्वरदाहार्त्तिनुत्परम् ॥ २१ ॥
समधूच्छिष्टमञ्जिष्ठं ससर्जरससारिवम् ।
पिण्डतैलं तदभ्यङ्गाद्वातरक्तरुजापहम् ॥ २२ ॥
दग्धमूले घृतं क्षीरं सद्यः शूलनिवारणम् ।
परिषेकोऽनिलप्राये तद्वत्कोष्णेन सर्पिषा ॥ २३ ॥
स्नेहैर्मधुरसिद्धैर्वा चतुर्भिः परिषेचयेत् ।
स्नाय्वाक्षेपकशूलार्त्तं कोष्णैर्दाहे तु शीतलैः ॥ २४ ॥
तद्वद्व्याधिकच्छांगैः क्षीरैस्तैलविमिश्रितैः ।
निक्वाथैर्जीवनीयानां पञ्चमूलस्य वा लघोः ॥ २५ ॥
द्राक्षेक्षुरसमद्यानि दधिमस्त्वम्लकाञ्जिकम् ।
सेकार्थं तण्डुलक्षौद्रं शर्कराभ्यञ्जने हितम् ॥ २६ ॥
प्रियाः प्रियंवदा नार्य्यश्चन्दनार्द्रकरस्तनाः ।
स्वर्णगौताः सुखस्पर्शा घ्नन्ति दाहं रुजं क्लमम् ॥ २७ ॥
सरागे सरुजे दाहे रक्तं हृत्वा प्रलेपयेत् ।
प्रपौण्डरीकमञ्जिष्ठादार्वीमधुकचन्दनैः ॥ २८ ॥
ससितोपलकासेक्षुमसूरैरकसक्तुभिः ।
लेपो रुग्दाहघोसर्परागमोफनिबर्हणः ॥ २९ ॥
वातघ्नैः साधितः स्निग्धः क्षीरी सुप्तपायसः ।
तिलसर्षपपिण्डैश्च शूलघ्नमुपनाहनम् ॥ ३० ॥
औदका प्रसहानूपवेसवाराः सुसंस्कृताः ।
जीवनीयौषधसिद्धैर्घृतैः स्युरुपनाहने ॥ ३१ ॥

स्तम्भतोदरुगायामशोफाङ्गग्रहनाशनाः ।
जीवनीयौषधैः सिद्धाः सपयस्का वसाऽपि वा ॥३२॥
घृतं सहचरान् मूलं जीवन्तो क्षागलं पयः ।
लेपः पिष्टा तिलास्तद्वद् घृष्टाः पयसि निर्वृताः ॥३३॥
क्षीरपिष्टशुमालेपमेरण्डस्य फलानि वा ।
कुर्य्यात् शूलनिघ्नत्वर्थं शताह्वां वाऽनिलेऽधिके ॥ ३४ ॥
मूलचारसुरापक्वं घृतमभ्यञ्जने हितम् ।
सिद्धं समधुशुक्ता वा सेकाभ्यङ्गाः कफोत्तरे ॥ ३५ ॥
गृहधूमो वचा कुष्ठं शताह्वा रजनीद्वयम् ।
प्रलेपः शूलनुद्वातरक्ते वातकफोत्तरे ॥ ३६ ॥
मधुत्रिगोर्हितं तद्वद् बीजं धान्याम्लसंयुतम् ।
मुहूर्त्तलिप्तमस्त्रं च सिद्धेद्वातकफोत्तरे ॥ ३७ ॥
उत्तानं लेपनाभ्यङ्गपरिषेकावगाहनैः ।
विरेकास्थापनैः स्नेहपानैर्गम्भीरमाचरेत् ॥ ३८ ॥
वातस्रे श्लोत्तरे कोष्णा लेपाद्यास्तत्र शीतलैः ।
विदाहशोफरुक्क्लेदविह्वलैः स्तम्भनाङ्गवेत् ॥ ३९ ॥
पित्तरक्तोत्तरे वातरक्ते लेपादयो हिमाः ।
उष्णैः प्रलेपोपनाहाग्नि दाहपरणोद्भवः ॥ ४० ॥
मधुयष्ट्याः पलशतं कषाये चादशेषिते ।
तैलाढ़के समक्षीरं पचेत्कल्कैः पलोन्मितैः ॥ ४१ ॥
स्थिरातामलकीदूर्वापयस्याभीरुचन्दनैः ।
लोध्र रसपदीमांसीद्विमेदामधुपर्णीभिः ॥ ४२ ॥
काकोलीक्षीरकाकोलीश्लक्ष्णपुष्पार्द्धिपद्मकैः ।
जीवन्तीजीवर्षभकत्वक्पत्रनखबालकैः ॥ ४३ ॥
प्रपौण्डरीकमञ्जिष्ठासारिवेन्द्रीवितुन्नकैः ।
चतुःप्रयोगं वातासृक्पित्तदाहज्वरार्त्तिनुत् ॥ ४४ ॥

बलाकल्ककषायाभ्यां तैलं क्षीरसमं पचेत्।
सहस्रशतपाकं तद्वातासृग्वातरोगनुत् ॥ ४५ ॥
रसायनं मुख्यतममिन्द्रियाणां प्रसादनम्।
जीवनं बृंहणं स्वर्य्यं शुक्रासृग्दोषनाशनम् ॥ ४६ ॥
कुपिते मार्गसंरोधान्मेदसो वा कफस्य वा।
अतिवृद्धानिले शस्तमादौ स्नेहनबृंहणम् ॥ ४७ ॥
कृत्वा तन्त्राज्यवातोक्तं वातघ्नौषधिकं ततः।
भेषजं स्नेहनं कुर्य्याद्यच्च रक्तप्रसादनम् ॥ ४८ ॥
प्राणादिकोपे युगपद्यथोद्दिष्टं यथामयम्।
यथासन्नञ्च भैषज्यं विकल्प्यं स्याद् यथाबलम् ॥ ४९ ॥
नीते निरामतां सामे स्वेदलङ्घनपाचनैः।
रूक्षैश्चालेपसेकाद्यैः कुर्य्यात् केवलवातनुत् ॥ ५० ॥
शोषाक्षेपणसङ्कोचस्तम्भस्वपनकम्पनम्।
हनुसंसोऽर्दितं खौञ्च्यं पाङ्गुत्वं खुडवातता ॥ ५१ ॥
सन्धिच्युतिः पक्षवधो मेदोमज्जास्थिगा गदाः।
एते स्थानस्य गाम्भीर्य्यात्सिध्येयुर्यत्नतो न वा ॥ ५२ ॥
तस्माज्ज्ञात्वैवानेतान् बलिनो निरुपद्रवान्।
वायौ पित्तावृते शीतसुखाश्च बहुशः क्रियाम् ॥ ५३ ॥
व्यत्यासाद् योजयेत्सर्पिर्जीवनीयञ्च पाययेत्।
धन्वमांसं यवाः शालिर्विरेकः क्षीरवान्मृदुः ॥ ५४ ॥
सक्षीरा वस्तयः क्षीरं पञ्चमूलबलाश्रृतम्।
कालेऽनुवासनं तैलं मधुरौषधसाधितम् ॥ ५५ ॥
यष्टीमधुबलातैलघृतक्षीरैश्च सेचनम्।
पञ्चमूलकषायेण वारिणा शीतलेन च ॥ ५६ ॥
कफावृते यवाद्यानि जाङ्गला मृगपक्षिणः।
स्वेदास्त्रीक्ष्णा निरूहाश्च वमनं सविरेचनम् ॥ ५७ ॥

पुराणसर्पिस्तैलञ्च तिलसर्षपजं हितम्।
संसृष्टे कफपित्ताभ्यां पित्तमादौ विनिर्जयेत् ॥ ५८ ॥
कारयेद्रक्तसंसृष्टे वाते श्रोणितिकीं क्रियाम्।
स्वेदाभ्यङ्गरसाः क्षीरं स्नेहो मांसाहृते हितः ॥ ५९ ॥
प्रमेहमेदोवाताघ्नमाढ्यवाते भिषग्जितम्।
महास्रोतोऽस्थिमज्जस्थे पूर्वोक्तं रेतसाहृते ॥ ६० ॥
अन्नाहृते पाचनीयं वमनं दीपनं लघु।
मूत्राहृते मूत्रलानि स्वेदा उत्तरवस्तयः ॥ ६१ ॥
एरण्डतैलं वर्चःस्थे वस्तिस्नेहाश्च भेदिनः।
कफपित्तविरुद्धं यद्यच्च वातानुलोमनम् ॥ ६२ ॥
सर्वस्थानाहृते त्वाशु तत्कार्यं मातरिश्वनि।
अनभिष्यन्दि च स्निग्धं स्रोतसां शुद्धिकारणम् ॥ ६३ ॥
पाचना वस्तयः प्रायो मधुराः सानुवासनाः।
प्रसमीक्ष्य बलाधिक्यं मृदुकायविरेचनम् ॥ ६४ ॥
रसायनानां सर्वेषामुपयोगः प्रशस्यते।
गिलाहस्य विशेषेण पयसा शुद्धगुग्गुलोः ॥ ६५ ॥
लेहो वा भार्ङ्गवस्तद्वदेकादशसितासितः।
अपाने त्वाहृते सर्वं दीपनं ग्राहिभेषजम् ॥ ६६ ॥
वातानुलोमनं कार्यं मूत्राशयविशोधनम्।
इति सङ्क्षेपतः प्रोक्तमाहृतानां चिकित्सितम् ॥ ६७ ॥
प्राणादीनां भिषक्कुर्याद्धितकर्म स्वयमेव तत्।
उदानं योजयेदूर्ध्वमपानं चानुलोमयेत् ॥ ६८ ॥
समानं शमयेद्विद्यात्क्षिधा व्यानं च योजयेत्।
प्राणो रक्ष्यश्चतुर्भ्योऽपि तत्स्थितौ देहसंस्थितिः ॥ ६९ ॥
स्वं स्वं स्थानं नयेदेवं वृत्तान्वातान्विमार्गगान्।
सर्वं चावरणं पित्तरक्तसंसर्गवर्जितम् ॥ ७० ॥

रसायनविधानेन लघुनो हन्ति शोणितः।
पित्ताहते पित्तहरं मरुतस्यानुलोमनम् ॥ ७१ ॥
रक्ताहतेऽपि तद्वच्च खुडोक्तं यच्च भेषजम्।
रक्तपित्तानिलहरं विविधञ्च रसायनम् ॥ ७२ ॥
यथानिदानं निर्दिष्टमिति सम्यक्चिकित्सितम्।
आयुर्वेदफलं ज्ञानमेतल्लक्ष्योऽर्त्तिनाशनम् ॥ ७३ ॥
चिकित्सितं हितं पथ्यं प्रायश्चित्तं भिषग्जितम्।
भेषजं शमनं शस्तं पर्य्यायैः स्मृतमौषधम् ॥ ७४ ॥

अष्टाङ्गहृदयसंहितायां

कल्पस्थानम् ।



प्रथमोऽध्यायः ।

अथातो वमनकल्पं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ।

वमने मदन श्रेष्ठं त्रिवृन्मूलं विरेचने ।
नित्यमन्यस्य तु व्याधिविशेषेण विशिष्टता ॥ १ ॥
फलानि तानि पाण्डूनि न चातिहरितान्यपि ।
आदायाङ्गे प्रशस्तर्त्वे मध्ये ग्रीष्मवसन्तयोः ॥ २ ॥
प्रमृज्य कुशमुक्तोष्यां क्षिप्त्वा बध्वा प्रलेपयेत् ।
गोमयेनानुमुक्तोलीं धान्यमध्ये निधापयेत् ॥ ३ ॥
मृदुभूतानि मध्विष्टगन्धानि कुशवेष्टनात् ।
निष्कृष्य निर्गतेऽष्टाहे शोषयेत्तान्यथातपे ॥ ४ ॥
तेषां ततः सुशुष्काणामुद्धृत्य फलपिप्पलीः ।
दधिमध्वाज्यपललैर्मृदित्वा शोषयेत्पुनः ॥ ५ ॥
ततः सुगुप्तं संस्थाप्य कार्यकाले प्रयोजयेत् ।
अथादाय ततो मात्रां जर्जरीकृत्य वासयेत् ॥ ६ ॥
शर्वरीं मधुयष्ट्या वा कोविदारस्य वा जले ।
कर्वुदारस्य बिम्बस्य वा नीपस्य विदुलस्य वा ॥ ७ ॥
शणपुष्पस्य वा सदापुष्पस्य वा प्रत्यक्पुष्पीदकेऽथवा ।
ततः पिबेत्प्रकाम तं प्रातर्मृदितगालितम् ॥ ८ ॥

सूत्रोदितेन विधिना साधु तेन तथा वमेत् ।
श्लेष्मज्वरप्रतिश्यायगुल्मान्तर्विद्रधीषु च ॥ ९ ॥
प्रच्छर्दयेदिशेषेण यावत्पित्तस्य दर्शनम् ।
फलपिप्पलचूर्णं वा क्वाथेन स्वेन भावितम् ॥ १० ॥
त्रिभागत्रिफलाचूर्णं कोविदारादिवारिणा ।
पिबेज्ज्वरारुचिष्वेव गण्डापचर्बुदोदरी ॥ ११ ॥
पित्ते कफस्थानगते जीमूतादिजलेन तत् ।
हृद्ग्रहेऽधोऽस्रपित्ते च क्षीरं तत्पिप्पलीशृतम् ॥ १२ ॥
क्षीरैर्यौ वा कफच्छर्दिप्रसेकतमकेषु तु ।
दध्युत्तरं वा दधि वा तत् सुतक्षीरसम्भवम् ॥ १३ ॥
फलादिक्वाथकल्काभ्यां सिद्धं तत्सिद्धदुग्धजम् ।
सर्पिः कफाभिभूतेऽग्नौ गुल्महृद्ग्रहे च वामनम् ॥ १४ ॥
स्वरसं फलमज्जो वा भल्लातकविधिश्शृतम् ।
आदर्वीलेपनात्सिद्धं लोढ्वा प्रच्छर्दयेत्सुखम् ॥ १५ ॥
तं लेह्यभोज्येषु तत्कषायाश्च योजयेत् ।
वत्सकादिप्रतीवापः कषायः फलमज्जजः ॥ १६ ॥
निम्बार्कान्यतरक्वाथसमायुक्तो नियच्छति ।
बद्धमूलानपि व्याधीन् सर्वान् सन्तर्पणोद्भवान् ॥ १७ ॥
राटपुष्पफलश्लक्ष्णचूर्णैर्माल्यं सुरूचितम् ।
वमेन्नस्यैरसादीनां हृतौ जिघ्रन् सुखं सुखी ॥ १८ ॥
एवमेव फलाभावे कल्पं पुष्पं शलाटु वा ।
जीमूताद्याश्च फलवत् जीमूतन्तु विशेषतः ॥ १९ ॥
प्रयोक्तव्यं ज्वरश्वासकासहिक्मादिरोगिणाम् ।
पयः पुर्ष्यं स्यन्दि निर्वृत्ते फले पेयापयस्कृताः ॥ २० ॥
लोमशं क्षीरसन्तानं दध्युत्तरमलोमशं ।
स्थिते पयसि दध्यम्लं जाते हरितपाण्डुके ॥ २१ ॥

आसुत्य वारुणीमण्डं पिबेन्मृदितगालितम् ।
कफादरोचके कासे पाण्डुत्वे राजयक्ष्मणि ॥ २२ ॥
इयञ्च कल्पना कार्य्या तुम्बीकोशातकीष्वपि ।
पर्य्यागतानां शुष्काणां फलानां वेणिजन्मनाम् ॥ २३ ॥
चूर्णस्य पयसा शुक्तिं वातपित्तार्दितः पिबेत् ।
द्वे वा त्रीण्यपि वाऽऽपोथ्य क्वाथे तिक्तोत्तमस्य वा ॥ २४ ॥
आरग्वधादिनवकादासुत्यान्यतमस्य वा ।
विमृद्य पूत त क्वाथ पित्तश्लेष्मज्वरी पिबेत् ॥ २५ ॥
जीमूतचूर्णं कल्कं वा पिबेच्छीतेन वारिणा ।
ज्वरे पैत्ते क्वोष्णेन कफवातात्कफादपि ॥ २६ ॥
कासश्वासविषच्छर्दिज्वरार्थे कफकर्शिते ।
इक्ष्वाकुर्वमने शस्तः प्रताम्यति च मानवे ॥ २७ ॥
फलपुष्पविहीनस्य प्रवालैस्तस्य साधितम् ।
पित्तश्लेष्मज्वरे क्षीरं पित्तोद्रिक्ते प्रयोजयेत् ॥ २८ ॥
घृतमध्ये फले जीर्णे स्थितं क्षीरं यदा दधि ।
स्यात्तदा कफजे कासश्वासे वम्य च पाचयेत् ॥ २९ ॥
मस्तुना वा फलात्मध्यं पाण्डुकुष्ठविषार्दितः ।
तेन तक्रं विपक्वं वा पिबेत् समधुसैन्धवम् ॥ ३० ॥
भावयित्वाजदुग्धेन बीजं तेनैव वा पिबेत् ।
विषमुल्मोदरग्रन्थिगण्डेषु क्षीपदेषु च ॥ ३१ ॥
सक्तुभिर्वा पिबेन्मन्थं तुम्बीस्वरसभावितैः ।
कफोद्भवे ज्वरे कासे गलरोगेष्वरोचके ॥ ३२ ॥
गुल्मे ज्वरे प्रसक्ते च कल्कं मांसरसैः पिबेत् ।
नरः साधु वमत्येवं न च दौर्बल्यमश्नुते ॥ ३३ ॥
तुम्बाः फलरसैः शुष्कैः सपुष्पैरवचूर्णितम् ।
छर्दयेन्नाल्पमाघ्राय गन्धसम्पत्सुखोचितः ॥ ३४ ॥

कासगुल्मोदरगरे वाते श्लेष्माशयस्थिते ।
कफे च कण्ठवक्त्रस्थे कफमेदोयजेषु च ॥ ३५ ॥
धामार्गवो गदेष्विष्टः स्थिरेषु च महत्सु च ।
जीवकर्षभकौ वीरा कपिकच्छूशतावरी ॥ ३६ ॥
काकोली श्रावणी मेदा महामेदा मधूलिका ।
तद्रजोभिः पृथग् लेह्या धामार्गवरजोऽन्विताः ॥ ३७ ॥
कासे हृदयदाहे च शस्ता मधुसिताप्लुताः ।
ते सुखाम्भोऽनुपानाः स्युः पित्तोष्मसहिते कफे ॥ ३८ ॥
धान्यतुम्बरयूषेण कल्कस्तस्य विषापहः ।
विम्बयाः पुनर्नवाया वा कासमर्दस्य वा रसे ॥ ३९ ॥
एकं धामार्गवं द्वे वा मानसे मृदितं पिबेत् ।
तच्छृतक्षीरजं सर्पिः साधितं वा फलादिभिः ॥ ४० ॥
श्लेष्डोऽतिकटुतीक्ष्णोष्णः प्रगाढेषु प्रशस्यते ।
कुष्ठपाण्ड्वामयश्लीपहृद्रोफगुल्मगरादिषु ॥ ४१ ॥
पृथक् फलादिषट्कस्य क्वाथे मांसमनूपजम् ।
कोशातक्या समं सिद्धं तद्रसं लवणं पिबेत् ॥ ४२ ॥
फलादिपिप्पलीतुल्यं सिद्धं श्लेष्डरसेऽथवा ।
श्लेष्डक्वाथे पिबेत् सिद्धं मिश्रमिक्षुरसेन वा ॥ ४३ ॥
कुटजं सुकुमारेषु पित्तरक्तकफोदये ।
ज्वरे विसर्पे हृद्रोगे खुड़े कुष्ठे च पूजितम् ॥ ४४ ॥
सर्षपाणां मधूकानां तोयेन लवणस्य वा ।
पाययेत् कौटज बीज युक्त क्षीरयाऽथवा ॥ ४५ ॥
सप्ताह वार्कदुग्धाक्तं तच्चूर्णं पाययेत् पृथक् ।
फलजीमूतकेक्ष्वाकुजीवन्तीजीवकोदनैः ॥ ४६ ॥
वमनौषधमुख्यानामिति कल्पदिगीरिता ।
बीजेनानेन मतिमानन्यान्यपि च कल्पयेत् ॥ ४७ ॥

द्वितीयोऽध्यायः ।

अथातो विरेचनकल्पं व्याख्यास्यामः ।

कषाया मधुरा रूक्षा विपाके कटुका लघुः ।
कफपित्तप्रशमनी रौक्ष्याच्चानिलकोपनी ॥ १ ॥
सेदानीमौषधैर्युक्ता वातपित्तकफापहैः ।
कल्पवैशेष्यमासाद्य जायते सर्वरोगजित् ॥ २ ॥
द्विधा ख्यातश्च तन्मूल श्यामं श्यामारुणं लघुः ।
लघुदाख्य वरतर निरपायं सुखं तयोः ॥ ३ ॥
सुकुमारे शिशौ वृद्धे मृदुकोष्ठे च तद्धितम् ।
मूर्च्छा संमोहहृल्लासकण्ठकर्षणचक्षणप्रदम् ॥ ४ ॥
श्याम तीक्ष्णगुणत्वादतस्तदपि शस्यते ।
क्रूरे कोष्ठे बहौ दोषे क्लेशक्षमिणि चातुरे ॥ ५ ॥
गम्भीरानुगतं श्लक्ष्णमतिर्यग्विसृतञ्च यत् ।
गृहीत्वा विसृजेत् काष्ठं त्वचं शुष्कां निधापयेत् ॥ ६ ॥
अथ काले तु तच्चूर्णं किञ्चिन्नागरसैन्धवम् ।
वातामये पिबेदक्षैः पित्ते साज्यासितामधु ॥ ७ ॥
क्षीरद्राक्षेक्षुकाश्मर्य्यस्वादुस्कन्धवरारसैः ।
कफामये पीलुरसमूत्रमद्याम्लकाञ्जिकैः ॥ ८ ॥
पञ्चकोलादिचूर्णैश्च युक्त्या युक्तं कफापहैः ।
लघुत्कल्ककषायेण साधितः ससितो हिमः ॥ ९ ॥
मधुत्रिजातसंयुक्तो लेह्यो हृद्यं विरेचनम् ।
अजगन्धातुगाक्षीरी विदारी शर्करा लघुः ॥ १० ॥
चूर्णितं मधुसर्पिर्भ्यां लीढ्वा साधु विरिच्यते ।
सन्निपातज्वरस्तम्भपिपासादाहपीडितः ॥ ११ ॥
लिम्पेदन्तस्त्रिलवणया द्विधा कृत्वेक्षुगण्डिकाः ।

एकीकृत्य पचेत् स्निग्धं पुटपाकेन भक्षयेत् ॥ १२ ॥
त्वगेलाभ्यां समा नीली तैस्त्रिवृत्तैश्च शर्करा ।
चूर्णं फलरसक्षौद्रसक्तुभिस्तर्पणं पिबेत् ॥ १३ ॥
वातपित्तकफोत्थेषु रोगेष्वल्पानलेषु च ।
नरेषु सुकुमारेषु निरपायं विरेचनम् ॥ १४ ॥
विडङ्गतण्डुलवरायावशूककणान्वितम् ।
सर्वेभ्योऽर्धेन तल्लीढं मध्वाज्येन गुडेन वा ॥ १५ ॥
गुल्मं प्लीहोदरं कासं हलीमकमरोचकम् ।
कफवातकृतांश्चान्यान् परिमार्ष्टि गदान् बहून् ॥ १६ ॥
विडङ्गपिप्पलीमूलचित्रकाधान्यचित्रकम् ।
मरीचेन्द्रयवाजाजीपिप्पलीहस्तिपिप्पलीः ॥ १७ ॥
दीप्यकं पञ्चलवणं चूर्णितं कार्षिकं पृथक् ।
तिलतैलत्रिवृच्चूर्णभागौ चाष्टपलोन्मितौ ॥ १८ ॥
धात्रीफलरसप्रस्थांस्त्रीन् गुडार्धतुलान्वितान् ।
पक्त्वा मृदग्निना खादेत्ततो मात्रामयन्त्रणः ॥ १९ ॥
कुष्ठार्शः कामलागुल्ममेहोदरभगन्दरान् ।
ग्रहणीपाण्डुरोगांश्च हन्ति पुंसवनं च सः ॥ २० ॥
गुडः कल्याणको नाम सर्वेष्वृतुषु यौगिकः ।
व्योषत्रिजातकाम्भोदक्रमिघ्नामलकैस्त्रिवृत् ॥ २१ ॥
सर्वैः समा समसिताः क्षौद्रेण गुटिकाः कृताः ।
सूत्रकृच्छ्रज्वरच्छर्दिकासशोषभ्रमक्षये ॥ २२ ॥
तापे पण्डामयेऽल्पेऽग्नौ शस्ताः सर्वविषेषु च ।
त्रिवृता कौटजं बीजं पिप्पलीविश्वभेषजम् ॥ २३ ॥
क्षौद्रद्राक्षारसोपेतं वर्षाकाले विरेचनम् ।
त्रिवृद्दुरालभामुस्तशर्करोदीच्यचन्दनम् ॥ २४ ॥
द्राक्षाम्बुना सयष्ट्याह्वं सातलं जलदात्यये ।

त्रिवृतां चित्रकं पाठामजाजीं सरलं वचाम् ॥ २५ ॥
स्वर्णक्षीरीं च हैमन्ते चूर्णमुष्णाम्बुना पिबेत् ।
त्रिवृता शर्करातुल्या ग्रीष्मकाले विरेचनम् ॥ २६ ॥
त्रिवृत्त्रायन्तिहपुषासातलाकटुरोहिणीः ।
स्वर्णक्षीरीं च सचूर्णं गोमूत्रे भावयेत् त्र्यहम् ॥ २७ ॥
एष सर्वर्तुको योग. स्निग्धानां मलदोषहृत् ।
श्यामात्रिवृद्दुरालभाहस्तिपिप्पलिवत्सकम् ॥ २८ ॥
नीलिनी कटुका मुस्ता श्रेष्ठायुक्तं सचूर्णितम् ।
रसाज्योष्णाम्बुभिः शस्तं रूक्षाणामपि सर्वदा ॥ २९ ॥
ज्वरहृद्रोगवातास्रगुदावर्त्तादिरोगिषु ।
राजहृच्चोऽधकि पथ्यो मृदुर्मधुरशीतलः ॥ ३० ॥
बाले वृद्धे क्षते क्षीणे सुकुमारे च मानवे ।
योज्यो मृदुनपायित्वादिशेषाच्चतुरङ्गुलः ॥ ३१ ॥
फलकाले परिणत फलं तस्य समाहरेत् ।
तेषां गुणवतां भार सिकतासु विनिक्षिपेत् ॥ ३२ ॥
सप्तरात्रात् समुद्धृत्य शोषयेच्चातपे ततः ।
ततो भञ्जानमुद्धृत्य शुचौ पात्रे निधापयेत् ॥ ३३ ॥
द्वाचारसेन तं दद्याद्दाहोदावर्त्तपीडिते ।
चतुर्वर्षं सुखं बाले यावद्दा दशवार्षिके ॥ ३४ ॥
चतुरङ्गुलमज्जो वा कषायं पाययेद्विमम् ।
दधिमण्डसुरामण्डधात्रीफलरसैः पृथक् ॥ ३५ ॥
सौवीरकेण वा युक्तं कल्केन क्षैद्रतेन वा ।
दन्तीकषाये तन्मज्जो गुडं जीर्णं च निक्षिपेत् ॥ ३६ ॥
तमरिष्टं स्थितं मांसं पाययेत् पक्षमेव वा ।
त्वचं तिल्वकमूलस्य त्वक्षाभ्यन्तरवत्कलम् ॥ ३७ ॥
विशोष्य चूर्णयित्वा च द्वौ भागौ गालयेत्ततः ।

रोध्रस्यैव कषायेण तृतीयं तेन भावयेत् ॥ ३८ ॥
कषाये दशमूलस्य तं भागं भावितं पुनः ।
शुष्कं चूर्णं पुनः कृत्वा ततः पाणितलं पिबेत् ॥ ३९ ॥
मस्तुमूत्रसुरामण्डकोलधात्रीफलाम्बुभिः ।
तिल्वकस्य कषायेण कल्केन च सशर्करः ॥ ४० ॥
सघृतः साधितो लेहः स च श्रेष्ठ विरेचनम् ।
सुधा भिनत्ति दोषाणां महान्तमपि सञ्चयम् ॥ ४१ ॥
आखेव कष्टविभ्रंशान्नैव तां कल्पयेदतः ।
मृती कोष्ठेऽबले बाले स्थविरे दीर्घरोगिणि ॥ ४२ ॥
कल्पया गुल्मोदरगरत्वग्रोगमधुमेहिषु ।
पाण्डौ दूषिविषे शोफे दोषविभ्रान्तचेतसि ॥ ४३ ॥
सा श्रेष्ठा कण्टकैस्तीक्ष्णैर्बहुभिश्च समाचिता ।
द्विवर्षां वा त्रिवर्षां वा गिरिरान्ते विशेषतः ॥ ४४ ॥
तां पाटयित्वा शस्त्रेण क्षीरमुद्धारयेत्ततः ।
बिल्वादीनां वृहत्यौर्वा क्वाथेन समभेकशः ॥ ४५ ॥
मिश्रयित्वा सुधाक्षीरं ततोऽङ्गारेषु शोषयेत् ।
पिबेत् कृत्वा तु गुटिकां मस्तुमूत्रसुरादिभिः ॥ ४६ ॥
बिल्वतादीन्नवरां सर्पक्षीरीं ससातलाम् ।
सप्ताहं सुक्पयःपीतान् रसेनाज्येन वा पिबेत् ॥ ४७ ॥
तद्वद्रोधोत्तमाकुम्भनिकुम्भादीन् गुडाम्बुना ।
नातिशुष्कं फलं ग्राह्यं शङ्खिन्या निस्तुषीकृतम् ॥ ४८ ॥
सप्तलायास्तथा मूलं ते तु तीक्ष्णविकाषिणी ।
श्लेष्मामयोदरगरश्वयथ्वादिषु कल्पयेत् ॥ ४९ ॥
अक्षमात्रं तयोः पिण्डं मदिरालवणान्वितम् ।
हृद्रोगे वातकफजे तद्वन्मूले प्रयोजयेत् ॥ ५० ॥
दन्तिदन्तस्थिरं स्थूलं मूलं दन्तीद्रवन्तिजम् ।

आताम्रश्यावतीक्ष्णोष्णमाशुकारि विकाशि च ॥ ५१ ॥
गुरुप्रकोपि वातस्य पित्तश्लेष्मविलायनम्।
तत्क्षौद्रपिप्पलीलिप्तं स्वेद्यं मृद्भर्भवेष्टितम् ॥ ५२ ॥
शोथं मन्दातपेऽग्न्यर्कौ हृतो ह्यस्य विकासिताम्।
तत्पिबेन्मस्तुमदिरातक्रपीलुरसासवैः ॥ ५३ ॥
अभिष्यन्दतनुर्गुल्मी प्रमेही जठरी गरी।
गोशृगाजरसैः पाण्डु कृमिकोष्ठी भगन्दरी ॥ ५४ ॥
सिद्धं तत्क्वाथकल्काभ्यां दशमूलरसेन च।
विसर्पविद्रध्यलजीकक्षादाहान् जयेद् घृतम् ॥ ५५ ॥
तैलं तु गुल्ममेहार्शो विबन्धकफमारुतान्।
महास्नेहः शक्तच्छुक्रवातसङ्गानिलव्यथाः ॥ ५६ ॥
विरेचने मुख्यतमा नवैते स्निग्धतादयः।
हरीतकीमपि स्निग्धविधानेनोपकल्पयेत् ॥ ५७ ॥
गुडस्याष्टपले पथ्या विंशतिः स्यात्पलं पलम्।
दन्तीचित्रकयोः कर्षौ पिप्पलीस्निग्धतोदश ॥ ५८ ॥
प्रकल्प्य मोदकानेवं दशमे दशमेऽहनि।
उष्णाम्भोऽनुपिबेत्खादेत्तान् सर्वान्विधिनाऽमुना ॥ ५९ ॥
एते निःपरिहाराः स्युः सर्वव्याधिनिबर्हणाः।
विशेषाद्ग्रहणीपाण्डुकण्डूकोठार्शसां हिताः ॥ ६० ॥
अल्पस्यापि महार्थत्वं प्रभूतस्याल्पकर्मताम्।
कुर्यात् सश्लेषविश्लेषकालसंस्कारयुक्तिभिः ॥ ६१ ॥
त्वक्केसराम्रातकदाडिमैलासितापलामाचिकमातुलिङ्गैः।
मद्यैश्च तैस्तैश्च मनोऽनुकूलैर्युक्तानि देयानि विरेचनानि ॥ ६२ ॥

तृतीयोऽध्यायः।

अथातो वमनविरेचनव्यापत्सिद्धिं व्याख्यास्यामः।

वमनं मृदुकोष्ठेन क्षुद्वताल्पकफेन वा ।
अतितीक्ष्णहिमस्नीकमजीर्णे दुर्बलेन वा ॥ १ ॥
पीत प्रयात्यधस्तस्मिन्विष्टब्धानिर्मलोदयः ।
वामयेत्त पुनः स्निग्धं स्मरन् पूर्वमतिक्रमम् ॥ २ ॥
अजीर्णिनः श्लेष्मवतो व्रजत्यूर्ध्वं विरेचनम् ।
अतितीक्ष्णोष्णलवणमहृद्यमतिभूरि वा ।
तत्र पूर्वोदिता व्यापत्सिद्धिश्च न तथापि चेत् ॥ ३ ॥
आशये तिष्ठति ततस्तृतीय नावचारयेत् ।
अन्यत्र साम्यात् क्षुद्याद्वा भेषजान्निरपायतः ॥ ४ ॥
अस्निग्धस्विन्नदेहस्य पुराणं रूक्षमौषधम् ।
दोषानुत्क्लेश्य निर्हर्त्तुमशक्यं जनयेद्गदान् ॥ ५ ॥
विभ्रमं क्षयथु हिक्मा तमसो दर्शन क्लमम् ।
पिण्डिकोद्वेष्टन कण्डूमूर्वोः सादं विवर्णताम् ॥ ६ ॥
स्निग्धस्विन्नस्य वात्यल्प दोषाग्नेर्जीर्णभौषधम् ।
शीतैर्वा स्तब्धमामे वा समुत्क्लेश्य हरेच्चलान् ॥ ७ ॥
तानेव जनयेद्रोगानयोगः सर्व एव सः ।
त तैललवणाभ्यक्तं स्विन्न प्रस्तरशङ्करैः ॥ ८ ॥
निरूढ़ जाङ्गलरसैर्भोजयित्वाऽनुवासयेत् ।
फलमागधिकादारुसिद्धतैलेन मात्रया ॥ ९ ॥
स्निग्धं वातहरैः स्नेहैः पुनस्तीक्ष्णेन शोधयेत् ।
बहुदोषस्य रूक्षस्य मन्दाग्नेरल्पभौषधम् ॥ १० ॥
सोदावर्त्तस्य चोत्क्लेश्य दोषान्मार्गं निरुध्य तैः ।
भृशमाध्मापयेन्नाभि पृष्ठपार्श्वशिरोरुजम् ॥ ११ ॥
श्वास विण्मूत्रवाताना सङ्गं कुर्य्याच्च दारुणम् ।
अभ्यङ्गस्वेदवर्त्त्यादिसनिरूहानुवासनम् ॥ १२ ॥
उदावर्त्तहरं सर्वं कर्म्माधातस्य शस्यते ।

पञ्चमूलयवक्षारवचाभूतिकसैन्धवैः ॥ १३ ॥
यवागूः सक्ततासूलविबन्धानाहनाशनी ।
पिप्पलीदाडिमक्षारहिङ्गुशुण्ठ्यम्लवेतसान् ॥ १४ ॥
ससैन्धवान् पिबेत् मद्यैः सर्पिषोष्णोदकेन वा ।
प्रवाहिकापरिस्रावे वेदनापरिकर्त्तने ॥ १५ ॥
पीतौषधस्य वेगानां निग्रहान्मारुतादयः ।
कुपिता हृदयं गत्वा घोरं कुर्वन्ति हृद्ग्रहम् ॥ १६ ॥
हिक्कापार्श्वरुजाकासदैन्यलालास्त्रिविभ्रमैः ।
जिह्वां खादति निःसञ्ज्ञो दन्तान् कटकटाययन् ॥ १७ ॥
न गच्छेद्विभ्रमं तत्र वामयेदाशु तं भिषक् ।
मधुरैः पित्तमूर्च्छार्त्तं कटुभिः कफमूर्च्छितम् ॥ १८ ॥
पाचनीयैस्ततश्चास्य दोषशेषं विपाचयेत् ।
कायाग्निञ्च बलं चास्य क्रमेणाभिप्रवर्त्तयेत् ॥ १९ ॥
पवनेनातिवमतो हृदयं यस्य पीड्यते ।
तस्मै स्निग्धाम्ललवणं दद्यात्पित्तकफेऽन्यथा ॥ २० ॥
पीतौषधस्य वेगानां निग्रहेण कफेन वा ।
रुद्धोऽति वा विशुद्धस्य रुद्ध्वात्मङ्गानि मारुतः ॥ २१ ॥
स्तम्भवेपथुनिस्तोदसादोद्वेष्टार्त्तिभेदनैः ।
तत्र वातहरं सर्वं स्नेहस्वेदादि शस्यते ॥ २२ ॥
बहुतीक्ष्णक्षुधार्त्तस्य मृदुकोष्ठस्य भेषजम् ।
हृत्वाऽऽशु विट्पित्तकफान् धातूनास्रावयेद्बलात् ॥ २३ ॥
तत्रातियोगमधुरैः शेषमौषधमुल्लिखेत् ।
यो याति वमनैरेको विरेके वमन मृदु ॥ २४ ॥
परिषेकावगाह्याद्यैः सुशीतैः स्तम्भयेच्च तम् ।
अञ्जनं चन्दनोशीरमज्जासृक्शर्करोदकम् ॥ २५ ॥
लाजचूर्णैः पिबेन्मन्थमतियोगहरं परम् ।

वमनस्यातियोगे तु शीताम्बुपरिषेचितः ॥ २६ ॥
पिबेत् फलरसैर्मन्थं सघृतक्षौद्रशर्करम् ।
सोद्गारायां भृशं कुर्यां मूर्वाया धान्यमुस्तयोः ॥ २७ ॥
समधूकाञ्जनं चूर्णं लेहयेन्मधुसयुतम् ।
वमनेऽन्तःप्रविष्टाया जिह्वायां कवलग्रहाः ॥ २८ ॥
स्निग्धाम्ललवणा हृद्या यूषमांसरसा हिता ।
फलान्यम्लानि खादेयुस्तस्य चान्येऽग्रतो नराः ॥ २९ ॥
निसृतान्तु तिलद्राक्षाकल्कलिप्तां प्रवेशयेत् ।
वाग्ग्रहानिलरोगेषु घृतमांसोपसाधिताम् ॥ ३० ॥
यवागूं तनुकां दद्यात् स्नेहस्वेदौ च कालवित् ।
अतियोगाच्च भैषज्यं जीवं हरति शोणितम् ॥ ३१ ॥
तज्जीवादानमित्युक्तमादत्ते जीवितं यतः ।
शुने काकाय वा दद्यात्तेनाक्तमसृजा सह ॥ ३२ ॥
भुक्ते तस्मिन् वदेज्जीवमभुक्ते पित्तमादिशेत् ।
शुक्लं वा भावितं वस्त्रमावानं कोष्णवारिणा ॥ ३३ ॥
प्रक्षालितं विवर्णं स्यात्पित्ते शुद्धन्तु शोणिते ।
तृष्णामूर्च्छामदार्त्तस्य कुर्यादामरणं क्रियाम् ॥ ३४ ॥
रक्तपित्तातिसारघ्नीं तस्याशु प्राणरक्षणीम् ।
मृगगोमहिषाजानां सद्यस्कं जीवतामसृक् ॥ ३५ ॥
पिबेज्जीवाभिसन्धान जीव तद्ह्याशु यच्छति ।
तदेव दर्भसृदितं रक्तं बस्तौ निषेचयेत् ॥ ३६ ॥
श्यामाकाश्मर्य्यमधुकदूर्वाशीरैः श्रृत पयः ।
घृतमण्डाञ्जनयुतं बस्तिं वा योजयेद्भिषक् ॥ ३७ ॥
पिच्छाबस्तिं सुशीतं वा घृतमण्डानुवासनम् ।
गुदं भ्रष्टं कषायैश्च स्तम्भयित्वा प्रवेशयेत् ।
विसंज्ञं श्रावयेत्साम वेणुगीतादिनिस्वनम् ॥ ३८ ॥

चतुर्थोऽध्यायः ।

अथातो दोषहरणसाकल्यं वस्तिकर्म व्याख्यास्यामः ।

बलां गुडूचीं त्रिफलां सराल्लां द्विपञ्चमूलञ्च पलोन्मितानि ।
अष्टौ पलान्यर्द्धतुलाञ्च मांसाच्छागात्पचेदपां चतुर्थशेषम् ॥१॥
पूतीयवानीफलबिल्वकुष्ठवचाशताह्वाघनपिप्पलीनाम् ।
कल्कैर्गुडक्षौद्रघृतैः सतैलैर्युक्तः सुखोष्णो लवणान्वितश्च ॥ २ ॥
बस्तिः परं सर्वगदप्रमाथी स्वस्थे हितो जीवनबृंहणश्च ।
वस्तौ च यस्मिन् पठितो न कल्कः सर्वत्र दद्यादमुमेव तत्र ॥३॥
द्विपञ्चमूलस्य रसोऽम्लयुक्तः सच्छागमांसस्य स पूर्वकल्कः ।
त्रिस्नेहयुक्तः प्रवरो निरूहः सर्वानिलव्याधिहरः प्रदिष्टः ॥ ४ ॥
बला पटोलो लघुपञ्चमूल त्रायन्तिकैरण्डयवात् सुसिद्धात् ।
प्रस्थोरसाच्छागरसार्द्धयुक्तं साध्यः पुनः प्रस्थसमः स यावत् ॥५॥
प्रियङ्गुकृष्णाघनकल्कयुक्तः सतैलसर्पिर्मधुसैन्धवश्च ।
स्याद्दीपनो मांसबलप्रदश्च चतुर्बलं चोपदधाति सद्यः ॥ ६ ॥
एरण्डमूलात् त्रिपलं पलाशात्तथा पलांशं लघुपञ्चमूलम् ।
राल्लाबलाच्छिन्नरुहाश्वगन्धापुनर्नवारग्वधदेवदारु ॥ ७ ॥
पलानि चाष्टौ सलिलाढकाभ्यां विपाचयेदष्टमशेषितेऽस्मिन् ।
वचाशताह्वापुषाप्रियङ्गुयष्टीकणावल्गकबीजमुस्तम् ॥ ८ ॥
दद्यात् सुपिष्टं सहतार्द्धशैलमक्षप्रमाणं लवणांशयुक्तम् ।
समाक्षिकस्तैलयुतः समूलो वस्तिर्जयेल्लेखनदीपनोऽसौ ॥ ९ ॥
जङ्घोरुपादत्रिकपृष्ठकोष्ठक्षुद्गुह्यशूलं गुरुतां विबन्धम् ।
गुल्माश्मवर्ध्मग्रहणीगुदोत्थांस्तांस्तांश्च रोगान् कफवातजातान् १०
यष्ट्याह्वरोध्राभयचन्दनैश्च घृतं पयोऽग्र्यं कमलोत्पलैश्च ।
सशर्कराक्षौद्रघृतं सुशीतं पित्तामयान् हन्ति सजीवनीयम् ॥११
राल्लां वृषं लोहितिकामनन्तां बलां कनीयस्तृणपञ्चमूलौ ।

गोपाङ्गनाचन्दनयष्ट्यर्धियष्ट्याह्वरोध्राणि पलार्धकानि ॥ १२ ॥
निःक्वाथ्य तोयेन रसेन तेन शृतं पयोऽर्धाढकमभ्रहीनम् ।
जीवन्तिमेदर्धिवरीविदारीवीराद्विकाकोलिकसेरुकाभिः ॥१३॥
सितोपलाजीवकपद्मरेणुप्रपौण्डरीकोत्पलपुष्करीकैः ।
लोहात्मगुप्तामधुयष्टिकाभिर्नागाह्वगुञ्जातकचन्दनैश्च ॥ १४ ॥
पिष्टैर्घृतक्षौद्रयुतैर्निरूह्य ससैन्धवं शीतलमेव दद्यात् ।
प्रत्यागते धन्वरसेन शालीन् क्षीरेण वाऽद्यात्परिषिक्तगात्रः ॥१५
दाहातिसारप्रदरास्रपित्तहृत्पाण्डुरोगान् विषमज्वरञ्च ।
सगुल्ममूत्रग्रहकामलादीन् सर्वामयान् पित्तकृतान्निहन्ति ॥१६
कोशातकारग्वधदेवदारुमूर्वाखदष्ट्राकुटजार्कपाठाः ।
पञ्चा कुलत्थान् बृहतीञ्च तोये रसस्य तस्य प्रसृता दश स्युः १७
तान् सर्षपैलामदनैः सकुष्ठैरक्षप्रमाणैः प्रसृतैश्च युक्तान् ।
क्षौद्रस्य तैलस्य फलाम्लयस्य क्षारस्य तैलस्य ससर्पिषश्च ॥ १८ ॥
दद्यान्निरूह कफरोगिताय मन्दाग्नये चाशनविद्विषे च ।
वक्ष्ये मृदून् स्नेहकृतो निरूहान् सुखोचितानां प्रसृतैः पृथक्स्युः १९

अथेमान् सुकुमाराणां निरूहान् स्नेहवान् मृदून् ।
कर्मणा विप्लुतानान्तु वक्ष्यामि प्रसृतैः पृथक् ॥ २० ॥
क्षौराद् द्वौ प्रसृतौ कार्य्यौ मधुतैलघृतात् त्रयः ।
खजेन मथितो बस्तिर्वातघ्नो बलवर्णकृत् ॥ २१ ॥
एकैकः प्रसृतस्तैलप्रसन्नाक्षौद्रसर्पिषाम् ।
बिल्वादिमूलकाथाद् द्वौ कौलत्थाद् द्वौ स वातजित् ॥२२॥
पटोलनिम्बभूतीकरास्नासप्तच्छदाश्मसः ।
प्रसृतः पृथगाज्याच्च बस्तिः सर्षपकल्कवान् ॥ २३ ॥
सपञ्चतिक्तोऽभिषन्दक्रमिकुष्ठप्रमेहहा ।
चत्वारस्तैलगोमूत्रदधिमण्डाम्लकाञ्जिकात् ॥ २४ ॥
प्रसृताः सर्षपैः पिष्टैर्विट्सङ्गानाहभेदनः ।

यवस्थेक्षुस्थिरारास्नाविदारीक्षौद्रसर्पिषाम् ॥ २५ ॥
एकैकः प्रसृतो वस्तिः कृष्णाकल्को व्रणत्वकृत् ।
सिद्धवस्तीनतो वक्ष्ये सर्वदा यान् प्रयोजयेत् ॥ २६ ॥
निर्व्यापदो बहुफलान् बलपुष्टिकरान् सुखान् ।
मधुतैले समे कर्षः सैन्धवाद्विपिचुर्मिसिः ॥ २७ ॥
एरण्डमूलक्वाथेन निरूहो मधुतैलिकः ।
रसायन प्रमेहार्शःकृमिगुल्मान्त्रवृद्धिनुत् ॥ २८ ॥
सयष्टिमधुकश्चैष चक्षुष्यो रक्तपित्तजित् ।
यापनो घनकल्केन मधुतैलरसाज्यवान् ॥ २९ ॥
पायुजङ्घोरुव्रणवस्तिमेहनशूलजित् ।
प्रसृतांशैर्घृतक्षौद्रवसातैलैः प्रकल्पयेत् ॥ ३० ॥
एरण्डमूलनिःक्वाथो मधुतैलः ससैन्धवः ।
एष युक्तरथो वस्तिः सवचापिप्पलीफलः ॥ ३१ ॥
सक्वाथो मधुषड्ग्रन्थाशताह्वाहिङ्गुसैन्धवः ।
सुरदारुवचारास्नावस्तिर्दोषहरः परः ॥ ३२ ॥
पञ्चमूलस्य निःक्वाथस्तैलं मागधिका मधु ।
ससैन्धवः समधुकः सिद्धवस्तिरिति स्मृतः ॥ ३३ ॥
द्विपञ्चमूलबिल्वफलविल्वानि पाचयेत् ।
गोमूत्रेण च पिष्टैश्च पाठावल्लकतोयदैः ॥ ३४ ॥
सफलैः क्षौद्रतैलाभ्यां क्षारेण लवणेन च ।
युक्तो वस्तिः कफव्याधिपाण्डुरोगविसूचिषु ॥ ३५ ॥
शुक्रानिलविबन्धेषु वस्त्याटोपे च पूजितः ।
मुस्तापाठामृतैरण्डबलारास्नापुनर्नवा ॥ ३६ ॥
मञ्जिष्ठारग्वधोशीरत्रायमाणाश्चरोहिणीः ।
कनीयः पञ्चमूलञ्च पालिकं मदनाष्टकम् ॥ ३७ ॥
जलाढके पचेत्तच्च पादशेष परिस्रुतम् ।

क्षीरद्विप्रस्थसंयुक्तं क्षीरशेषं पुनः पचेत् ॥ ३८ ॥
सपादजाङ्गलरसः ससर्पिर्मधुसैन्धवः ।
पिष्टैर्यष्टिमिसिग्धामाकलिङ्गकरसाञ्जनैः ॥ ३९ ॥
वस्तिः सुखोष्णो मांसाग्निबलशुक्रविवर्धनः ।
वातासृङ्मोहमेहार्शो गुल्मविण्मूत्रसग्रहम् ॥ ३० ॥
विषमज्वरविसर्पवर्त्मोत्थानप्रवाहिकाः ।
वङ्क्षणोरुकटीकुक्षिमन्याश्रोत्रशिरोरुजः ॥ ४१ ॥
हन्यादसृग्दरोन्मादशोफकासाश्मकुष्ठलान् ।
चक्षुष्यः पुत्रदो राज्ञां यापनानां रसायनम् ॥ ४२ ॥
मृगाणां लघुवर्ष्मणां दशमूलस्य चाम्भसा ।
पृषतामिसिगान्धेयीकल्कैर्वातहरः परम् ॥ ४३ ॥
निरूहोऽत्यर्थबृंहण्य महास्नेहसमन्वितः ।
मयूरं पक्षपित्तास्त्रपादविट्तुण्डवर्जितम् ॥ ४४ ॥
लघुना पञ्चमूलेन पालिकेन समन्वितम् ।
पक्त्वा क्षीरजले क्षीरशेषं सघृतमाक्षिकम् ॥ ४५ ॥
तद्विदारीकषायष्टीशृताक्षाफलकल्कवत् ।
वस्तिरौषत्पटुयुतः परमं बलशुक्रकृत् ॥ ४६ ॥
कल्पनेयं पृथक् कार्या तित्तिरिप्रभृतिष्वपि ।
विष्किरेषु समस्तेषु प्रतुदग्रसहेषु च ॥ ४७ ॥
जलचारिषु तद्वच्च मत्स्येषु क्षीरवर्जिता ।
गोधानकुलमर्जारग्रन्थकीन्दुरजं पलम् ॥ ४८ ॥
पृथक् दशपलं क्षीरे पञ्चमूलच्च साधयेत् ।
तत्पयः फलवैदेहीकल्कद्विलवणान्वितम् ॥ ४९ ॥
ससितातैलमध्वाज्यो वस्तिर्योज्यो रसायनम् ।
व्यायाममथितोरस्कक्षीणेन्द्रिय बलौजसाम् ॥ ५० ॥
विबद्धशुक्रविण्मूत्रखुड्वातविकारिणाम् ।

गजवाजिरथक्षोभभग्नजर्जरितात्मनाम् ॥ ५१ ॥
पुनर्नवत्वं कुरुते वाजीकरणसत्तमः ।
सिद्धेन पयसा भोज्यमात्मगुप्तोद्भटे चुरैः ॥ ५२ ॥
स्नेहांश्चायन्त्रणान् सिद्धान् सिद्धद्रव्यैः प्रकल्पयेत् ।
दोषघ्नाः सपरीहारा वक्ष्यन्ते स्नेहवस्तयः ॥ ५३ ॥
दशमूलं बलां रास्नामश्वगन्धां पुनर्नवाम् ।
गुडूचेरण्डभूतीकभार्ङ्गीं दुष्करोहिषम् ॥ ५४ ॥
शतावरीं सहचरं काकनासां पलांशकम् ।
यवमाषातसीकोलकुलत्थान् प्रस्तोन्मितान् ॥ ५५ ॥
वहे विपाच्य तोयस्य द्रोणशेषेण तेन च ।
पचेत्तैलाढकं पेयैर्जीवनीयैः पलोन्मितैः ॥ ५६ ॥
अनुवासनमित्येतत्सर्ववातविकारनुत् ।
अनुपानं वसा तद्वज्जीवनीयोपसाधिता ॥ ५७ ॥
शताह्वाचिरिबिल्वाम्लैस्तैलं सिद्धं समीरणे ।
सैन्धवेनाग्निवर्णेन तप्तं वाऽनिलजिद् घृतम् ॥ ५८ ॥
जीवन्तीं मदनं मेदां श्रावणीं मधुकं बलाम् ।
शताह्वर्षभकौ कृष्णां काकनासां शतावरीम् ॥ ५९ ॥
खगुप्तां क्षीरकाकोलीं कर्कटाख्यां शठीं वचाम् ।
पिष्ट्वा तैलघृतक्षीरे साधयेत्तच्चतुर्गुणे ॥ ६० ॥
बृंहणं वातपित्तघ्नं बलशुक्राग्निवर्धनम् ।
रजःशुक्रामयहरं पुत्रीयमनुवासनम् ॥ ६१ ॥
सैन्धवं मदनं कुष्ठं शताह्वानिचुलौ वचा ।
क्षीरविदारी मधुक भार्ङ्गी देवदारुसकट्फलम् ॥ ६२ ॥
नागरं पुष्करं मेदा चविका चित्रकः शठी ।
विडङ्गातिविषा श्यामा हरेणुर्नीलिनी स्थिरा ॥ ६३ ॥
बिल्वाजमोदचपला दन्ती रास्ना च तैः समैः ।

साध्यमेरण्डतैलं वा तैलं वा कफरोगनुत् ॥ ६४ ॥
वर्षोदावर्तगुल्मार्शः प्लीहमेहाध्यमारुतान् ।
आनाहमश्मरीं चाशु हन्यात्तदनुवासनम् ॥ ६५ ॥
साधितं पञ्चमूलेन तैलं बिल्वादिनाऽथवा ।
कफघ्नं कल्पयेत्तैलं द्रव्यैर्वा कफघातिभिः ॥ ६६ ॥
पलैरष्टगुणैश्चाम्लैः सिद्धमास्थापनं कफे ।
मृदुवस्तिजडीभूते तीक्ष्णोऽन्यो वस्तिरिष्यते ॥ ६७ ॥
तीक्ष्णैर्विकर्षितः स्निग्धो मधुरः शिशिरो मृदुः ।
तीक्ष्णत्वं मूत्रपील्वग्निलवणक्षारसर्षपैः ।
प्राप्तकाल विधातव्य घृतक्षीरेषु मार्दवम् ॥ ६८ ॥
बलकालरोगदोषप्रकृतीः प्रविभज्य योजितो वस्तिः ।
स्वैः स्वैरौषधवर्गैः स्वान् स्वान् रोगान्निवर्तयति ॥ ६९
उष्णार्त्तानां शीतान्शीतार्त्तानां तथा सुखोष्णांश्च ।
तद्योग्यौषधयुक्तान् वस्तीन् सम्यक्प्र युञ्जीत ॥ ७० ॥
वस्तीन्न तीक्ष्णवीर्यान् दद्याद्व्याधिषु विशोधनीयेषु ।
मेदस्विनो विशोध्या ये च नराः कुष्ठमेहार्त्ताः ॥ ७१ ॥
न क्षीणक्षतदुर्बलमूर्च्छितक्लमशुष्कशूद्रदेहानाम् ।
दद्याद्विशोधनीयान् दोषनिबद्धायुषो ये च ॥ ७२ ॥

पञ्चमोऽध्यायः ।

अथातो वस्तिव्यापत्सिद्धिं व्याख्यास्यामः ।

अस्निग्धस्वेदस्य गुरुकोष्ठस्य योजितः ।
शीतोऽल्पस्नेहलवणद्रव्यमात्रो घनोऽपि वा ॥ १ ॥
वस्तिः सङ्क्षोभ्य तं दोषं दुर्बलत्वादनिर्हरन् ।
करोत्ययोगं तेन स्यादातमूत्रशकृद्ग्रहः ॥ २ ॥

नाभिवस्तिरुजादाहो मूत्रक्षेपक्षयव्यथाः ।
कण्डूर्गण्डानि वैवर्ण्यमरतिर्वङ्क्षिमार्दवम् ॥ ३ ॥
क्वाथद्वय प्राग्विहितं मध्यदोषेऽतिसारिणि ।
उष्णस्य तस्याढ्यैकस्य तत्र पानं प्रशस्यते ॥ ४ ॥
फलवर्त्यस्तथा स्वेदाः कालं ज्ञात्वा विरेचनम् ।
बिल्वमूलत्रिवृद्दारुयवकोलकुलत्थवान् ॥ ५ ॥
सुरादिमास्तत्र वस्तिः स प्राक्पेयस्तमानयेत् ।
युक्तोऽल्पवीर्य्यो दोषाढ्ये रूक्षे क्रूराशयेऽथवा ॥ ६ ॥
वस्तिर्दोषावृतो रुद्धमार्गो रुन्ध्यात्समीरणम् ।
सविमार्गोऽनिलः कुर्य्यादाधानं मर्मपीडनम् ॥ ७ ॥
विदाहं गुदकोष्ठस्य मुष्कवङ्क्षणवेदनाम् ।
रुणद्धि हृदयं शूलैरितश्चेतश्च धावति ॥ ८ ॥
स्नेहाक्तस्विन्नगात्रस्य तत्र वर्त्तिं प्रयोजयेत् ।
बिल्वादिश्च निरूहः स्यात् पीलुसर्षपमूत्रवान् ॥ ९ ॥
सरलामरदारुभ्यां साधितं वाऽनुवासनम् ।
कुर्वतो वेगसरोधं पीडितो वाऽतिमात्रया ॥ १० ॥
स्निग्धलवणोष्णो वा बस्तिरल्पोऽल्पभेषजः ।
मृदुर्वा मारुतेनोर्ध्वं विक्षिप्तो मुखनासिकात् ॥ ११ ॥
निरेति मूर्च्छाहृल्लासतोदाहादीन् प्रवर्त्तयन् ।
मूर्च्छाविकार दृष्टस्य सिञ्चेच्छीताम्बुना मुखम् ॥ १२ ॥
व्यजेदाक्रमनाश्वास प्राणायामञ्च कारयेत् ।
पृष्ठपार्श्वोदरं मृद्ध्यात्करैरुष्णैरधोमुखम् ॥ १३ ॥
केशेषूत्क्षिप्य धुन्वीत भीषयेद्बालदंष्ट्रिभिः ।
शब्दोल्काराजपुरुषैर्वस्तिरेति तथा ह्यधः ॥ १४ ॥
पाणिवस्त्रैर्गलापीड़ं कुर्य्यान्न म्रियते यथा ।
प्राणोदाननिरोधाद्धि सुप्रसिद्धतरायनः ॥ १५ ॥

अपानः पवनो वस्तिं तमाश्वेवापकर्षति ।
कुष्ठक्रमुककल्कञ्च पाययेताम्लसंयुतम् ॥ १६ ॥
औष्ण्यात्तैक्ष्ण्यात्सरत्वाच्च वस्तिं सोऽस्यानुलोमयेत् ।
गोमूत्रेण त्रिवृत्पथ्याकल्कं वाधोऽनुलोमनम् ॥ १७ ॥
पक्वाशयस्थिते स्निग्धे निरूढे दशमूलिकैः ।
यवकोलकुलत्थैश्च विधेयो मूत्रसाधितैः ॥ १८ ॥
वस्तिर्गोमूत्रसिद्धैर्वा साकृता वंशपल्लवैः ।
पूतीकरञ्जत्वक्पत्रशठीदेवाह्वरोहिषैः ॥ १९ ॥
सतैलगुडसिन्धूत्थविरेकौषधकल्कवान् ।
बिल्वादिपञ्चमूलेन सिद्धो वस्तिरुरः स्थिते ॥ २० ॥
शिरःस्थे नावनं धूमःप्रच्छार्द्यं सर्षपैः शिरः ।
वस्तिरत्युष्णतीक्ष्णाम्लघनोऽतिस्नेहितस्य वा ॥ २१ ॥
अल्पे दोषे मृदौ कोष्ठे प्रयुक्तो वा पुनः पुनः ।
अतियोगत्वमापन्नो भवेत्कुक्षिरुजाकरः ॥ २२ ॥
विरेचनातियोगेन सतुल्याकृतिसाधनः ।
वस्तिः क्षाराम्लतीक्ष्णोष्णलवणः पैत्तिकस्य वा ॥ २३ ॥
गुदं दहन् लिखन् च्छिखन् करोत्यस्य परिस्रवम् ।
सविदग्धं स्रवत्यस्रं वर्णैः पित्तञ्च भूरिभिः ॥ २४ ॥
बहुशश्चातिवेगेन मोहं गच्छति सोऽसकृत् ।
रक्तपित्तातिसारघ्नी क्रिया तत्र प्रशस्यते ॥ २५ ॥
दाहादिषु त्रिवृत्कल्कं मृद्वीकावारिणा पिबेत् ।
तद्धि पित्तशकृद्धातून् हृत्वा दाहादिकान् जयेत् ॥ २६ ॥
विशुद्धश्च पिबेच्छीतां यवागूं शर्करायुताम् ।
युञ्जाद्धातिविरिक्तस्य क्षीणविट्कस्य भोजनम् ॥ २७ ॥
माषयूषेण कुल्माषान् पानं दध्यथवा सुराम् ।
सिद्धिर्वस्त्यापदामेवं स्नेहवस्तेस्तु वक्ष्यते ॥ २८ ॥

शीतोऽल्पो वाऽधिके वाते पित्तेत्युष्णः कफे मृदुः ।
अतिभुक्ते गुरुर्वर्च्चः मध्येऽल्पबलस्तथा ॥ २९ ॥
दत्तस्नेराहृतस्नेहो नायात्यभिभवादपि ।
स्तम्भोरुसदनाध्मानज्वरशूलाङ्गमर्दनैः ॥ ३० ॥
पार्श्वरुग्वेष्टनैर्विद्याद्वायुना स्नेहमाहृतम् ।
स्निग्धाम्ललवणोष्णैस्तं राज्ञापीतद्रुतैलिकैः ॥ ३१ ॥
सौवीरकसुराकोलकुलत्थयवसाधितैः ।
निरूहैर्निर्हरेत्सम्यक् समूत्रैः पञ्चमूलकैः ॥ ३२ ॥
ताभ्यामेव च तैलाभ्यां सायं भुक्तेऽनुवासयेत् ।
हृद्दाहरागसम्मोहवैवर्ण्यतमकज्वरैः ॥ ३३ ॥
विद्यात्पित्ताहृतं स्वादुतिक्तैस्तं वस्तिभिर्हरेत् ।
तन्द्राशीतज्वरालस्य प्रसेकारुचिगौरवैः ॥ ३४ ॥
समूर्च्छाग्लानिभिर्विद्याच्छ्लेष्मणा स्नेहमाहृतम् ।
कषायतिक्तकटुकैः सुरामूत्रोपसाधितैः ॥ ३५ ॥
फलतैलयुतैः सास्रैर्वस्तिभिस्तं विनिर्हरेत् ।
हृद्दिसम्मूर्च्छारुचिग्लानिशूलनिद्राङ्गमर्दनैः ॥ ३६ ॥
आमलिङ्गैः सदाहैस्तं विद्यादत्यशनाहृतम् ।
कटूनां लवणानां च क्वाथैश्चूर्णैश्च पाचनम् ॥ ३७ ॥
मृदुर्विरेकः सर्वं च तत्रामविहितं हितम् ।
विण्मूत्रानिलसङ्गार्त्तिगुरुत्वाध्मानहृद्ग्रहैः ॥ ३८ ॥
स्नेहं विद्याहृतं ज्ञात्वा स्नेहस्वेदै सवर्त्तिभिः ।
श्यामाबिल्वादिभिश्चैव निरूहैः सानुवासनैः ॥ ३९ ॥
निर्हरेद्विधिना सम्यगुदावर्त्तहरेण च ।
अभुक्ते शूनपायौ वा पेयामात्राश्रितस्य च ॥ ४० ॥
गुदे प्रणिहितः स्नेहो वेगाद्बावत्यनाहृतः ।
ऊर्द्धं कायं ततः कण्ठादूर्द्धेभ्यः खेभ्य एत्यपि ॥ ४१

मूत्रश्यामाविदग्धास्रिद्धो यवकोलकुलत्थवान् ।
तस्मिंस्तैलो देयः स्यान्निरूहः सानुवासनः ॥ ४२ ॥
कण्ठादागच्छतस्तम्भकण्ठग्रहविरेचनैः ।
छर्दिघ्नीभिः क्रियाभिश्च तस्य कुर्यान्निवर्हणम् ॥ ४३ ॥
नापक्वं प्रणयेत् स्नेहं गुदं सद्युपलिम्पति ।
ततः कुर्यात्प्रदरमोहकण्डूशोफान् क्रियाऽपि वा ॥ ४४ ॥
तीक्ष्णो वस्तिस्तथा तैलमर्कपत्ररसे श्रुतम् ।
अनुच्छास्य तु बद्धे वा दत्ते निःशेष एव च ॥ ४५ ॥
प्रविश्य क्षुभितो वायुः शूलतोदकरो भवेत् ।
तत्राभ्यङ्गो गुदे स्वेदो वातघ्नान्यशनानि च ॥ ४६ ॥
द्रुतं प्रणीते निष्कृष्टे सङ्कोचश्चिस एव वा ।
स्याल्लटीगुदजङ्घोरुवस्तिस्तम्भार्त्तिभेदनम् ॥ ४७ ॥
भोजनं तत्र वातघ्नं स्वेदाभ्यङ्गाः सवस्तयः ।
पीड्यमानेऽन्तरा मुक्ते गुदे प्रतिहतोऽनिलः ॥ ४८ ॥
उरःशिरोरुजं सादमूर्ध्वं च जनयेद् बली ।
वस्ति स्यात्तत्र बिल्वादिफलः श्यामादिमूत्रवान् ॥ ४९ ॥
अतिप्रपीडितः कोष्ठे तिष्ठत्यायाति वा गलम् ।
तत्र वस्तिर्विरेकश्च गलपीड़ादिकर्म च ॥ ५० ॥
वमनाद्यैर्विशुद्धस्य श्लथदेहबलानलम् ।
यथाण्डं तरुणं पूर्णं तैलपात्रं यथा तथा ॥ ५१ ॥
भिषक् प्रयत्नतो रक्षेत्सर्वस्मादपवादतः ।
दद्याच्चाधुरहृद्यानि ततोऽम्ललवणौ रसौ ॥ ५२ ॥
स्वादुतिक्तौ ततो भूयः कषायकटुकौ ततः ।
अन्योऽन्यप्रत्यनीकानां रसानां स्निग्धरूक्षयोः ॥ ५३ ॥
व्यत्यासादुपयोगेन क्रमात्तं प्रकृतिं नयेत् ।
सर्वं सहः स्थिरबलो विज्ञेयः प्रकृतिं गतः ॥ ५४ ॥

षष्ठोऽध्यायः ।

अथातो भेषजकल्प व्याख्यास्यामः ।

धन्वसाधारणे देशे समे सन्मृत्तिके शुचौ ।
श्मशानचैत्यायतनखभ्रवल्मीकवर्जिते ॥ १ ॥
नदी प्रदक्षिणजले कुशरोहिषसंस्कृते ।
अफालकृष्टेऽनाक्रान्ते पादपैर्बलवत्तरैः ॥ २ ॥
ग्रस्यते भेषज जातं युक्तं वर्षरसादिभिः ।
जन्त्वदग्धं दवादग्धमविदग्धञ्च वैकृतैः ॥ ३ ॥
भूतैश्छायातपाम्बुद्यैर्यथाकालञ्च सेवितम् ।
अवगाढमहामूलमुदीचीं दिशमाश्रितम् ॥ ४ ॥
अथ कल्याणचरितः स्नातः शुचिरुपोषितः ।
शस्त्रीयादौषधं सुस्थं स्थित काले च कल्पयेत् ॥ ५ ॥
सक्षीरं तदसम्पत्तावनतिक्रान्तवत्सरम् ।
ऋते गुडघृतक्षौद्रधान्यकृष्णाविडङ्गतः ॥ ६ ॥
पयो वाष्कयणं ग्राह्यं विस्मृत्य तच्च नीरुजम् ।
वयो बलवतां धातुपिच्छशृङ्गखुरादिकम् ॥ ७ ॥
कषाययोनयः पञ्च रसा लवणवर्जिताः ।
रसः कल्कः श्रृतः शीतः फाण्टश्चेति प्रकल्पना ॥ ८ ॥
पञ्चधैव कषायाणां पूर्वं पूर्वं बलाधिका ।
सद्यः समुद्धृतात् क्षुण्णात् यः स्रवेत्पटपीडितात् ॥ ९ ॥
स्वरसः स समुद्दिष्टः कल्कः पिष्टो द्रवाप्लुतः ।
चूर्णोऽप्लुतः श्रृतः क्वाथः शीतो रात्रिं द्रवे स्थितः ॥ १० ॥
सद्योऽभिषुतपूतस्तु फाण्टस्तन्मानकल्पने ।
युक्तग्राह्यग्राह्यादिबलतस्तथा च वचनं मुनेः ॥ ११ ॥
मात्राया न व्यवस्थाऽस्ति व्याधिं कोष्ठं बलं वयः ।

आलोच्य देशकालौ च योज्या तद्वच्च कल्पना ॥ १२ ॥
मध्यन्तु मानं निर्दिष्टं स्वरसस्य चतुःपलम् ।
पेयस्य कर्षमालोड्यं तद्वस्त्र पलत्रये ॥ १३ ॥
क्वाथं द्रव्यपले कुर्य्यात् प्रस्थार्धं पादशेषितम् ।
शीतं पले पलैः षड्भिः चतुर्भिश्च ततोऽपरम् ॥ १४ ॥
स्नेहपाकेत्वमानोक्तौ चतुर्गुणविवर्द्धितम् ।
कल्कस्नेहद्रव योज्यम् अधीते शौनकः पुनः ॥ १५ ॥
स्नेहे सिद्धप्रति सिद्धाम्बुनिःक्वाथस्वरसैः क्रमात् ।
कल्कस्य योजयेदंशं चतुर्थं षष्ठमष्टमम् ॥ १६ ॥
पृथक् स्नेहसमं दद्यात्पञ्चप्रभृति तु द्रवम् ।
नाङ्गुलिग्राहिता कल्के न स्नेहेऽग्नौ सशब्दता ॥ १७ ॥
वर्णादिसम्यक्च यदा तथैनं शीघ्रमाहरेत् ।
घृतस्य फेनोपशमस्तैलस्य तु तदुद्भवः ॥ १८ ॥
स्नेहस्य तन्तुमत्तासु मज्जसं शरणं न च ।
पाकस्तु त्रिविधो मन्दस्निग्धः खरस्निग्धः ॥ १९ ॥
मन्दः कल्कसमे किञ्चिच्चिक्कणो मदनोपमे ।
किञ्चित्क्वोदति क्वणे च वर्त्तमाने च पश्चिमः ॥ २० ॥
दग्धोऽत ऊर्द्धं निष्कार्य्यः स्यादामस्त्वग्निसादकृत् ।
मृदुर्नखे खरोऽभ्यङ्गे पाने वस्तौ च चिक्कणः ॥ २१ ॥
प्राण पाणितलं मुष्टिः कुड़वं प्रस्थमाढ़कम् ।
द्रोणं वहन्त्र क्रमशो विजानीयाच्चतुर्गुणम् ॥ २२ ॥
द्विगुणं योजयेदार्द्रं कुडवादि तथा द्रवम् ।
पेषणालोड़ने वारि स्नेहपाके च निर्द्रवे ॥ २३ ॥
कल्पयेत्तदृशान् भागान् प्रमाणं यत्र नोदितम् ।
कल्कीकुर्य्याच्च भैषज्यमनिरूपितकल्पनम् ॥ २४ ॥
द्वौ प्राणौ वटकः कोलं वदरं द्रङ्क्षणश्च तौ ।

अर्चं पिचुः पाणितलं सुवर्णं कवलग्रहः ॥ २५ ॥
कर्षो विड़ालपदकं तिन्दुकः प्राणिमानिका ।
शब्दान्यत्वमभिन्नेऽर्थे शुक्तिरष्टमिकापिचू ॥ २६ ॥
पलं प्रकुञ्चो विल्वश्च मुष्टिरास्र चतुर्थिका ।
द्वे पले प्रसृतस्त्री द्वावञ्जलिस्त्री तु मानिका ॥ २७ ॥
आढक भाजनं कंसो द्रोणः कुम्भो घटोमणम् ।
तुलापलशतं तानि विंशतिर्भार उच्यते ॥ २८ ॥
हिमवद्विन्ध्यशैलाभ्यां प्रायो व्याप्ता वसुन्धरा ।
सौम्य पथ्यश्च तत्रायमाग्नेयं वैन्ध्यमौषधम् ॥ २९ ॥

अष्टाङ्गहृदयसंहितायां

उत्तरस्थानम् ।

प्रथमोऽध्यायः ।

अथातो बालोपचरणीयमध्यायं व्याख्यास्यामः ।

इति ह स्माहुरात्रेयादयो महर्षयः ।

जातमात्रं विशोध्योल्वाद्दालं सैन्धवसर्पिषा ।
प्रसूतिक्लेशितं चानु बलातैलेन सेचयेत् ॥ १ ॥
अश्मनोर्वादनं चास्य कर्णमूले समाचरेत् ।
अथास्य दक्षिणे कर्णे मन्त्रमुच्चारयेदिमम् ॥ २ ॥
"अङ्गादङ्गात्सम्भवसि हृदयादभिजायसे ।"
"आत्मा वै पुत्रनामासि स जीव शरदां शतम्" ॥ ३ ॥

"शतायुः शतवर्षोऽसि दीर्घमायुरवाप्नुहि।"
"नक्षत्राणि दिशो रात्रिरहश्च त्वाभिरक्षतु" ॥ ४ ॥
स्वस्थीभूतस्य नाभिञ्च सूत्रेण चतुरङ्गुलात्।
बद्ध्वोर्द्धं वर्द्धयित्वा च ग्रीवायामवसञ्छयेत् ॥ ५ ॥
नाभिञ्च कुष्ठतैलेन सेचयेत् स्नपयेदनु।
क्षीरवृक्षकषायेण सर्वगन्धोदकेन वा ॥ ६ ॥
कोष्णेन तप्तरजततपनीयनिमज्जनैः।
ततो दक्षिणतर्जन्या तालूनस्यावगुण्ठयेत् ॥ ७ ॥
शिरसि स्नेहपिचुना प्राश्य चास्य प्रयोजयेत्।
त्रुरेणुमात्रं मेधायुर्बलार्थमभिमन्त्रितम् ॥ ८ ॥
ऐन्द्रीब्राह्मीवचाशङ्खपुष्पीकल्कं घृत मधु।
चामीकरवचाब्राह्मीताप्यपथ्या रजीकृताः ॥ ९ ॥
लिह्यान्मधुघृतोपेता हैमधात्रीरजोऽथवा।
गर्भाम्भः सैन्धववता सर्षिषा वामयेत्ततः ॥ १० ॥
प्राजापत्येन विधिना जातकर्माणि कारयेत्।
शिराणां हृदयस्थानां विह्वलत्वात् प्रसूतितः ॥ ११ ॥
तृतीयेऽह्नि चतुर्थे वा स्त्रीणां स्तन्य प्रवर्त्तते।
प्रथमे दिवसे तस्मात्तिक्तं मधुसर्पिषी ॥ १२ ॥
अनन्तामिश्रिते मन्त्रपाविते प्राशयेच्छिशुम्।
द्वितीये लक्ष्मणासिद्धं तृतीये च घृतं ततः ॥ १३ ॥
प्राङ्निषिद्धस्तनस्यास्य तत्पाणितलसम्मितम्।
स्तन्यानुपानं द्वौ कालौ नवनीत प्रयोजयेत् ॥ १४ ॥
मातुरेव पिबेत् स्तन्य तत्पर देहवृद्धये।
स्तन्यधात्र्यावुभे कार्य्ये तदसम्पदि वत्सले ॥ १५ ॥
अव्यङ्गे ब्रह्मचारिण्यौ वर्णप्रकृतितः समे।
नीरुजे मध्यवयसौ जीवद्वत्से न लोलुपे ॥ १६ ॥

हितहारविहारेण यत्नादुपचरेच्च ते ।
शुक्लौधलङ्घनायासाः स्तन्यनाशस्य हेतवः ॥ १७ ॥
स्तन्यस्य सौधुवर्ज्यानि मद्यान्यानूपजा रसाः ।
क्षीरं क्षीरौषध्यः शोकादेश्च विपर्ययः ॥ १८ ॥
विरुद्धाहारभुक्तायाः क्षुधितायाश्च चेतसः ।
प्रदुष्टधातोर्गर्भिण्याः स्तन्यं रोगकरं शिशोः ॥ १९ ॥
स्तन्याभावे पयस्कामं गव्यं वा तद्गुणं पिबेत् ।
क्षीरेण पञ्चमूलेन स्थिरया वा सितायुतम् ॥ २० ॥
षष्ठीं निशां विशेषेण कृतरक्षाबलिक्रियाः ।
जागर्युर्बान्धवास्तस्य दधतः परमां मुदम् ॥ २१ ॥
दशमे दिवसे पूर्णे विधिभिः स्वकुलोचितैः ।
कारयेत् सूतिकोत्थानं नाम बालस्य चार्चितम् ॥ २२ ॥
बिभ्रतोऽङ्गैर्मनोह्लादरोचनागुरुचन्दनम् ।
नक्षत्रदेवतायुक्तं बान्धवं वा समाक्षरम् ॥ २३ ॥
ततः प्रकृतिभेदोक्तरूपैरायुःपरीक्षणम् ।
प्रागुदक्शिरसः कुर्याद् बालस्य ज्ञानवान् भिषक् ॥ २४ ॥
शुचिधौतोपधानानि निर्बलौनि मृदूनि च ।
शय्यास्तरणवासांसि रक्षोघ्नैर्धूपितानि च ॥ २५ ॥
काको विश्रस्तः शस्तश्च धूपने त्रिहृतान्वितः ।
जीवत्खड्गादिशृङ्गोत्थान् सदा बालः शुभान् मणीन् ॥२६॥
धारयेदौषधीः श्रेष्ठा ब्राह्मीरुद्रौजीवकादिकाः ।
हस्ताभ्यां ग्रीवया मूर्ध्ना विशेषात् सतत वचाम् ॥ २७ ॥
आयुर्मेधास्मृतिस्वास्थ्यकरीं रक्षोऽभिरक्षिणीम् ।
पञ्चमे मासि पुण्येऽह्नि धरण्यामुपवेशयेत् ॥ २८ ॥
षष्ठेऽन्नप्राशन मासि क्रमात्तच्च प्रयोजयेत् ।
षट्सप्तमाष्टमासेषु नीरुजस्य शुभेऽहनि ॥ २९ ॥

कर्णौ हिमागमे विध्येत् धात्रग्रङ्खस्य सान्वयन् ।
प्राग्दक्षिण कुमारस्य भिषग्वामं तु योषितः ॥ ३० ॥
दक्षिणेन दधत्सूचीं पालिमन्येन पाणिना ।
मध्यतः कर्णपीठस्य किञ्चिद्गण्डाश्रय प्रति ॥ ३१ ॥
जरायुमात्रप्रच्छन्ने रविरश्मावभासिते ।
घृतस्य निश्चलं सम्यगलक्तकरसाङ्किते ॥ ३२ ॥
बिध्येद्वैवक्रते छिद्रे सकृदेकर्जुलाघवात् ।
नोर्ध्वं न पार्श्वतो नाधः शिरास्तत्र हि संश्रिताः ॥ ३३ ॥
कालिका मर्मरी रक्ता तद्व्यधाद्रागरुग् ज्वराः ।
सशोफदाहसंरम्भमन्थास्तम्भापतानकाः ॥ ३४ ॥
तेषां यथामयं शुर्याद् विभज्याशु चिकित्सितम् ।
स्यन्ने व्यधान्न रुधिरं न रुग्रागादिसम्भवः ॥ ३५ ॥
स्नेहाक्त सूच्यनुस्यूतं सूत्रं चानु निधापयेत् ।
आमे तैलेन सिञ्चेच्च बहलां तद्दारया ॥ ३६ ॥
विध्येत्पालीं हितभुजः सन्धार्य्याथ स्रवीयसी ।
वर्त्तिस्त्राहात्ततो रूढं वर्द्धयेत शनैः शनैः ॥ ३७ ॥
अथैनं जातदशनं क्रमेणापनयेत् स्तनात् ।
पूर्वोक्तं योजयेत् क्षीरमन्न च लघु हृद्यम् ॥ ३८ ॥
प्रियालमज्जमधुकमधुलाजासितोत्पलैः ।
अपस्तनस्य संयोज्यः प्रीणनो मोदकः शिशोः ॥ ३९ ॥
दीपनो बालबिल्वैलाशर्करालाजसक्तुभिः ।
संग्राहीधातुकीपुष्पशर्करालाजतर्पणैः ॥ ४० ॥
रोगांश्चास्य जयेत् सौम्यैर्भेषजैरविषादकैः ।
अन्यत्रात्ययिकाद्व्याधेर्विरेक सुतरां त्यजेत् ॥ ४१ ॥
वासयेच्चाविधेयं तं वस्त्रं गृह्णन्ति हि ग्रहाः ।
वस्त्रवातात्परस्पर्शात् पालयेच्छङ्कितांश्च तम् ॥ ४२ ॥

ब्राह्मीसिद्धार्थकवचासारिवाकुष्ठसैन्धवैः ।
सकणैः साधितं पीतं वाङ्मेधास्मृतिकृद् घृतम् ॥ ४३ ॥
आयुष्यं पामरक्षोघ्नं भूतोन्मादनिबर्हणम् ।
वचेन्दुलेखा मण्डूकी शङ्खपुष्पी शतावरी ॥ ४४ ॥
ब्रह्मसोमामृताब्राह्मीः कल्कीकृत्य पलांशिकाः ।
अष्टाङ्ग विपचेत्सर्पिः प्रस्थं क्षीरं चतुर्गुणम् ॥ ४५ ॥
तत्पीतं धन्यमायुष्यं वाङ्मेधास्मृतिबुद्धिकृत् ।
अजाक्षीराभयाक्षीपपाठोग्राशिग्रुसैन्धवैः ॥ ४६ ॥
सिद्धं सारस्वतं सर्पिर्वाङ्मेधास्मृतिवह्निकृत् ।
वचामृताग्रठीपथ्याशङ्खिनीविल्वनागरैः ॥ ४७ ॥
अपामार्गेण च घृतं साधितं पूर्ववद्गुणैः ।
हैमक्षेतवचाकुष्ठमर्कपुष्पी सकाञ्चना ॥ ४८ ॥
हैममल्याचकः शङ्खः कौण्ड्यैः कनकं वचा ।
चत्वार एते पादोक्ताः प्राश्या मधुघृतप्लुताः ॥ ४९ ॥
वर्षं लौढ़ा वपुर्मेधाबलवर्णकराः शुभाः ।
वचायष्ट्याह्वसिन्धूत्थपथ्यानागरदीप्यकैः ॥ ५० ॥
शुद्ध्यते वाग्ग्रहविलीढ़ैः सकुष्ठकणजीरकैः ।

द्वितीयोऽध्यायः ।

अथातो बालामयप्रतिषेधं व्याख्यास्यामः ।
त्रिविधः कथितो बालः क्षीरान्नोभयवर्त्तनः ।
स्वास्थ्य ताभ्यामदुष्टाभ्यां दुष्टाभ्यां रोगसम्भवः ॥ १ ॥
यदङ्गिरिक्ततां याति न च दोषैरधिष्ठितम् ।
तद्विशुद्धं पयो वाताद्दुष्टं तु स्रवतेऽभितः ॥ २ ॥
कषायं फेनिलं रूक्षं वर्चो मूत्रविबन्धकृत् ।
पित्तादुदुष्टास्लकटुकं पीतरात्यक्षि दाहकृत् ॥ ३ ॥

कफात्सलवणं सान्द्रं जले मज्जति पिच्छिलम् ।
संसृष्टलिङ्गं संसर्गात्त्रिलिङ्गं सान्निपातिकम् ॥ ४ ॥
यथा स्वलिङ्गांस्तद्व्याधीन् जनयत्युपयोजितम् ।
शिशोस्तीक्ष्णामतीक्ष्णां च रोदनात्तत्त्यजेद्भुजम् ॥ ५ ॥
सोऽयं सृग्वेङ्मृगं देशं यत्र च स्पर्शनात्तमः ।
तत्र विद्याद्भुज मूर्ध्नि रुजं चाक्षिनिमीलनात् ॥ ६ ॥
हृदि जिह्मौष्ठदशनश्वासमुष्टिनिपीड़ितैः ।
कोष्ठे विबन्धवमथुस्तनदग्धान्त्रकूजनैः ॥ ७ ॥
आध्मानपृष्ठनमनजठरोन्नमनैरपि ।
बस्तौ गुह्ये च विण्मूत्रसङ्गचासदिगीक्षणैः ॥ ८ ॥
अथ धात्वाः क्रियां कुर्य्याद्यथादोषं यथामयम् ।
तत्र वातात्मके स्तन्ये दशमूल व्रताह पिबेत् ॥ ९ ॥
अथवाग्निवचापाठाकटुकाकुष्ठदीप्यकम् ।
समार्ङ्गीदारुसरलहपुषिकालीकणेषणम् ॥ १० ॥
ततः पिबेदन्यतमं वातव्याधिहरं घृतम् ।
अनुचाच्छसुरामिवं स्निग्ध मृदु विरेचयेत् ॥ ११ ॥
बस्तिकर्म्म ततः कुर्य्यात् स्वेदादींश्चानिलापहान् ।
रास्नाजमोदासरलदेवदारुरजोऽन्वितम् ॥ १२ ॥
बालो लिह्याद् घृत तैर्वा विपक्वं ससितोत्पलम् ।
पित्तदुष्टे सृताभीरुपटोलीनिम्बचन्दनम् ॥ १३ ॥
धात्री कुमारश्च पिबेत् क्वाथयित्वा ससारिवम् ।
अथवा त्रिफलामुस्तभूनिम्बकटुरोहिणीः ॥ १४ ॥
सारिवादिं पटोलादिं पद्मकादिं तथा गणम् ।
घृताभ्येभिश्च सिद्धानि पित्तघ्नं च विरेचनम् ॥ १५ ॥
श्रीतांश्चाभ्यङ्गलेपादीन् युञ्जयात् श्लेष्मात्मके पुनः ।
यच्चान्नसैन्धवयुतं कुमार पाययेद् घृतम् ॥ १६ ॥

सिन्धूत्थपिप्पलीमद्वा पिष्टैः क्षौद्रयुतैरथ ।
राठपुष्पैः स्तनौ लिम्पेच्छिशोश्च दशनच्छदौ ॥ १७ ॥
सुखमेवं वमेद्बालस्तीक्ष्णैर्धात्रीं तु वामयेत् ।
अथाचरितसंसर्गी मुस्तादिं क्वथित पिबेत् ॥ १८ ॥
तद्वत्तगरपृथ्वीकासुरदारुकलिङ्गकान् ।
अथवातिविषामुस्तषड्ग्रन्थापञ्चकोलकम् ॥ १९ ॥
स्तन्ये विदोषमलिने दुर्गन्ध्यामं जलोपमम् ।
विवर्णमच्छ विच्छिन्नं फेनिलं चोपवेश्यते ॥ २० ॥
शङ्खनाभ्यथावर्णं मूत्र पीतं सितं घनम् ।
ज्वरारोचकहृट्च्छर्दिशुष्कोद्गारविजृम्भिकाः ॥ २१ ॥
अङ्गभङ्गोऽङ्गविक्षेपः कूजनं वेपथुर्भ्रमः ।
घ्राणाच्छिमुखपाकाद्या जायन्तेऽन्येऽपि तं गदम् ॥ २२ ॥
क्षीरालसकमित्याहुरत्यय चातिदारुणम् ।
तत्राशु धात्रीं बालञ्च वमनेनोपपादयेत् ॥ २३ ॥
विहितायां च संसर्ग्यां वचादिं योजयेद्गणम् ।
निशादि वाथवा माद्रीपाठातिक्ताघनामयान् ॥ २४ ॥
पाठाशुण्ठ्यमृतातिक्ततिक्तादेवाङ्गसारिवाः ।
समुस्तमूर्वेन्द्रयवाः स्तन्यदोषहराः परम् ॥ २५ ॥
अनुबन्धे यथाव्याधि प्रतिकुर्वीत कालवित् ।
दन्तोद्भेदश्च रोगाणां सर्वेषामपि कारणम् ॥ २६ ॥
विशेषाज्ज्वरविड्भेदकासच्छर्दिशिरोरुजाम् ।
अतिस्यन्दस्य पोथक्या विसर्पस्य च जायते ॥ २७ ॥
पृष्ठभङ्गे विडालानां बर्हिणां च शिखोद्गमे ।
दन्तोद्भवे च बालानां नहि किञ्चिन्न दूयते ॥ २८ ॥
यथादोषं यथारोगं यथोद्रेकं यथाशयम् ।
विभज्य देशकालादींस्तत्र योज्य भिषग्जितम् ॥ २९ ॥

त एव दोषा दूष्याश्च ज्वराद्या व्याधयश्च यत् ।
अतस्तदेव भैषज्यं मात्रा त्वस्य कनीयसी ॥ ३० ॥
सौकुमार्य्याल्पकायत्वात्सर्वान्नानुपसेवनात् ।
स्निग्धा एव सदा बाला घृतक्षीरनिषेवणात् ॥ ३१ ॥
सद्यःस्नान्वमनं तस्मात्पाययेन्मतिमान् मृदु ।
स्नान्वस्य ह्यन्न वमयेत् क्षीरक्षीरान्नसेविनम् ॥ ३२ ॥
पीतवन्तं तनुं पेयामन्नादं घृतसंयुताम् ।
बस्ति साध्ये विरेकेण मर्श्येन प्रतिमर्श्यनम् ॥ ३३ ॥
युञ्ज्याद्विरेचनादीस्तु धात्र्या एव यथोदितान् ।
मूर्वाव्योषवराकोलजम्बुत्वग्दारुसर्षपाः ॥ ३४ ॥
सपाठा मधुना लौढाः स्नान्यदोषहराः परम् ।
दन्तपाली समधुना चूर्णेन प्रतिसारयेत् ॥ ३५ ॥
पिप्पली धातुकीपुष्पधात्रीफलकृतेन वा ।
लावतित्तिरवह्नूररजःपुष्परसप्लुतम् ॥ ३६ ॥
द्रुतं करोति बालानां दन्तकेसरवन्मुखम् ।
वचाद्विबृहतीपाठाकटुकातिविषाधनैः ॥ ३७ ॥
मधुरैश्च घृतं सिद्धं सिद्धं दशनजन्मनि ।
रजनी दारुसरलश्रेयसी बृहतीद्वयम् ॥ ३८ ॥
पृश्निपर्णी शताह्वा च लौढं माक्षिकसर्पिषा ।
ग्रहणीदोषनुच्छ्रेष्ठं मारुतस्यानुलोमनम् ॥ ३९ ॥
अतीसारज्वरश्वासकामलापाण्डुकासनुत् ।
बालस्य सर्वरोगेषु पूजितं बलवर्णदम् ॥ ४० ॥
समङ्गधातुकीरोध्रकुटजवटबलाह्वयैः ।
महासहाक्षुद्रसहाक्षुद्रबिल्वशलाटुभिः ॥ ४१ ॥
सकार्पासीफलैस्तोये साधितैः साधितं घृतम् ।
क्षीरमस्तुयुतं हन्ति शीघ्रं दन्तोद्भवोद्भवान् ॥ ४२ ॥

विविधानामयानेतद्दृद्धकाश्यपनिर्मितम् ।
दन्तोद्भवेषु रोगेषु न बालमतियन्त्रयेत् ॥ ४३ ॥
स्वयमप्युपशाम्यन्ति जातदन्तस्य यद्गदाः ।
अत्यङ्ग. स्वप्नशीताम्बुस्नैग्धिकस्त्र्यसेविनः ॥ ४४ ॥
शिशोः कफेन रुद्धेषु स्रोतःसु रसवाहिषु ।
अरोचकः प्रतिश्यायो ज्वरः कासश्च जायते ॥ ४५ ॥
कुमारः शुष्यति ततः स्निग्धशुक्लमुखेक्षणः ।
सैन्धवव्योषशार्ङ्गेष्टापाठागिरिकदम्बकान् ॥ ४६ ॥
शुष्यतो मधुसर्पिर्भ्यामरुच्यादिषु योजयेत् ।
अशोकरोहिणीयुक्तं पञ्चकोलं च चूर्णितम् ॥ ४७ ॥
बदरीधातकीधात्रीचूर्णं वा सर्पिषा प्लुतम् ।
स्थिरावचाद्विहृहतीकाकोलीपिप्पलीनतैः ॥ ४८ ॥
निचुलोत्पलवर्षाभूभार्ङ्गीमुस्तैश्च कार्षिकैः ।
सिद्धं प्रस्थार्धमाज्यस्य स्रोतसां शोधनं परम् ॥ ४९ ॥
सिद्धस्वगन्धा सुरसा कणागर्भं च तद्गुणम् ।
यष्ट्याह्वपिप्पलीरोध्रपद्मकोत्पलचन्दनैः ॥ ५० ॥
तालीसमारिवाभ्यां च साधितं शोषजिद्घृतम् ।
शृङ्गीमधूलिकाभार्गीपिप्पलीदेवदारुभिः ॥ ५१ ॥
अश्वगन्धाद्विकाकोलीरास्नर्षभकजीवकैः ।
सूपपर्णीविडङ्गैश्च कल्कितैः साधितं घृतम् ॥ ५२ ॥
शशोत्तमाङ्गनिर्यूहे शुष्यतः पुष्टिकृत्परम् ।
वचावयस्थातगरकायस्थाचोरकैः श्रुतम् ॥ ५३ ॥
वस्तमूत्रसुराभ्यां च तैलमभ्यञ्जने हितम् ।
लाक्षारससमं तैलप्रस्थं मस्तुचतुर्गुणम् ॥ ५४ ॥
अश्वगन्धानिशादारुकौन्तिकुष्ठाब्दचन्दनैः ।
सभूर्वारोहिणीराम्राम्रताम्रामधुकैः समैः ॥ ५५ ॥

सिद्धं लाक्षादिकं नाम तैलमभ्यञ्जनादिदम् ।
बल्यं ज्वरक्षयोन्मादश्वासापस्मारवातनुत् ॥ ५६ ॥
यच्चराक्षसभूतघ्नं गर्भिणीना च शस्यते ।
मधुनाऽतिविषाशृङ्गीपिप्पलीर्लेहयेच्छिशुम् ॥ ५७ ॥
एकां वातिविषां कासज्वरच्छर्दिरुपद्रुतम् ।
पीत पीत वमति यः स्तन्य त मधुसर्पिषा ॥ ५८ ॥
हिवार्त्ताकीफलरस पञ्चकोल च लेहयेत् ।
पिप्पलीपञ्चलवणक्रमिजित्पारिभद्रकम् ॥ ५९ ॥
तद्वल्लिह्यात्तथा व्योष मधी वा रोमचर्मणाम् ।
लाभतः शल्यकश्वाविद्गोधर्क्षशिखिजन्मनाम् ॥ ६० ॥
खदिरार्जुनतालीसकुष्ठचन्दनजे रसे ।
सक्षौद्र साधितं सर्पिर्वमथुं विनियच्छति ॥ ६१ ॥
सदन्तो जायते यस्तु दन्ताः प्राग्यस्य चोत्तराः ।
कुर्वीत तस्मिन्नुत्पाते शान्तिकञ्च द्विजातये ॥ ६२ ॥
दद्यात् सदक्षिण बाल नैगमेषञ्च पूजयेत् ।
तालुमासे कफः क्रुद्धः कुरुते तालुकण्टकम् ॥ ६३ ॥
तेन तालुप्रदेशस्य निम्नता मूर्ध्नि जायते ।
तालुपातस्तनद्वेषः क्षुच्छात्यान शक्रद्ग्रवम् ॥ ६४ ॥
दृढ़ास्यकण्डूचिरुजा ग्रीवादूईरता वमिः ।
तत्नीत्क्षिप्य यवक्षारक्षौद्राभ्या प्रतिसारयेत् ॥ ६५ ॥
तालु तद्वत्क्षणाशुण्ठीगोशकृद्रससैन्धवैः ।
शृङ्गवेरनिशाशृङ्गं कल्कितं वटपल्लवैः ॥ ६६ ॥
बध्वा गोशकृता लिप्तं कुकूले स्वेदयेत्ततः ।
रसेन लिम्पेत्ताल्वास्य नेत्रे च परिषेचयेत् ॥ ६७ ॥
हरीतकीवचाकुष्ठकल्कं माक्षिकसंयुतम् ।
पीत्वा कुमारः स्तन्येन मुच्यते तालुकण्टकात् ॥ ६८ ॥

मलोपलेपात् स्वेदाद्वा गुदे रक्तकफोद्भवः ।
तास्रो व्रणोऽन्तः कण्डूमान् जायते भूर्य्युपद्रवः ॥ ६८ ॥
केचित्तं मातृकादोषं वदन्त्यन्येऽपि पूतनम् ।
प्रष्टारुर्गुदकुन्दं च केचिच्च तमनामिकम् ॥ ७० ॥
तत्र धात्र्याः पयः शोध्यं पित्तश्लेष्महरौषधैः ।
घृतशीतं च शीताम्बुयुक्तमन्तरपानकम् ॥ ७१ ॥
सक्षौद्रतार्क्ष्यशैलेन व्रणं तेन च लेपयेत् ।
त्रिफलावदरीप्लक्षत्वक्क्वाथपरिषेचितम् ॥ ७२ ॥
कासीसरोचनातूत्थमनोह्वालरसाञ्जनैः ।
लेपयेदम्लपिष्टैर्वा चर्णितैर्वावचूर्णयेत् ॥ ७३ ॥
सुस्नग्धैरथवा यष्टीशृङ्गवीरकाञ्जनैः ।
सारिवाशङ्खनाभिभ्यामथनस्य त्वचाऽथवा ॥ ७४ ॥
रागकण्डूत्कटे कुर्य्याद्रक्तस्राव जलौकसा ।
सर्वत्र पित्तव्रणजिच्छस्यते गुदकुट्टके ॥ ७५ ॥
पाठावेल्लद्विरजनीमुस्तभार्ङ्गीपुनर्नवैः ।
सबिल्वत्रुटयवैः सर्पिर्वृश्चिकालीयुतैः शृतम् ॥ ७६ ॥
लिहानो मात्रया रोगैर्मुच्यते मृत्तिकोद्भवैः ।
व्याधेर्यस्य भैषज्यं स्तनस्तेन प्रलेपयेत् ।
स्थितो मुहूर्त्तं धौतो नु पीतस्तं तं जयेद्गदम् ॥ ७७ ॥

तृतीयोऽध्यायः ।

अथातो बालग्रहप्रतिषेधं व्याख्यास्यामः ।
पुरा गुहस्य रक्षार्थं निर्मिता शूलपाणिना ।
मनुष्यविग्रहाः पञ्च सप्त स्त्रीविग्रहा ग्रहाः ॥ १ ॥
स्कन्दो विशाखो मेषाख्यः स्वग्रहः पितृसंज्ञितः ।
शकुनिः पूतना शीतपूतना दृष्टिपूतना ॥ २ ॥

मुखमण्डलिका तद्वद्रेवती शुष्करेवती ।
तेषां ग्रहीष्यतां रूपं प्रततं रोदनं ज्वरः ॥ ३ ॥
सामान्य रूपमुच्छ्वासजृम्भाभूयोपदीनताः ।
फेनस्रावीर्ध्वदृष्ट्योष्ठदन्तदंशप्रजागराः ॥ ४ ॥
रोदन कूजनं स्तन्यविद्वेषस्वरवैकृतम् ।
नखैरकस्मात्परितः स्वधात्रग्रविलेखनम् ॥ ५ ॥
तत्रैकनयनस्रावी शिरो विक्षिपते मुहुः ।
हृतैकपक्षः स्तब्धाङ्गः सस्वेदो नतकन्धरः ॥ ६ ॥
दन्तखादी स्तनद्वेषी वस्यन् रोदिति विस्वरः ।
वक्त्रवक्त्रो वमेल्लालां भृशमूर्ध्वं निरीक्षते ॥ ७ ॥
वसासृग्मज्जिरुद्विग्नो बद्धमुष्टिश्चक्षुच्छिशुः ।
चलितैकाक्षिगण्डभ्रूः संरक्तोभयलोचनः ॥ ८ ॥
स्कन्दार्त्तस्तेन वैकल्यं मरणं वा भवेद्ध्रुवम् ।
संज्ञानाशो मुहुः केशलुञ्चनं कन्धरानतिः ॥ ९ ॥
विनम्य जृम्भमाणस्य शक्रस्यूत्रप्रवर्त्तनम् ।
फेनोद्वमनमूर्ध्वं चाहस्तभ्रूपादनर्त्तनम् ॥ १० ॥
स्तनस्रजिह्वासन्दंशसंरम्भज्वरजागराः ।
पूयशोणितगन्धश्च स्कन्दापस्मारलक्षणम् ॥ ११ ॥
आध्मानं पाणिपादास्यस्यन्दन फेननिर्वमः ।
हृष्टमुष्टिवमातीसारस्वरदैन्यविवर्णताः ॥ १२ ॥
कूजनं स्वनन छर्दिः कासहिध्माप्रजागराः ।
ओष्ठदंशाङ्गसङ्कोचस्तब्धवस्तामगन्धिताः ॥ १३ ॥
ऊर्ध्वं निरीक्ष्य हसनं मध्ये विनमन ज्वरः ।
मूर्च्छैकनेत्रशोफश्च नैगमेषग्रहाकृतिः ॥ १४ ॥
कफो दूषितरोमत्वं स्वेदश्चुर्निमीलनम् ।
बहिरायामनं जिह्वादंशोऽन्तःकण्ठकूजनम् ॥ १५ ॥

धावनं विट्सगन्धत्वं क्रोशनं श्वानवच्छ्वनि।
रोमहर्षौ मुहुश्वासः सहसा रोदन ज्वरः॥ १६॥
कासातिसारवमथुजृम्भाटट्टश्ववगन्धिताः।
अङ्गेष्वाक्षेपविक्षेपः शोषस्तम्भविवर्णताः॥ १७॥
मुष्टिबन्धः स्रुतिश्चाक्ष्णोर्बालस्य स्युः पित्तगृहे।
सस्ताङ्गत्वमतीसारो जिह्वातालुगले व्रणाः॥ १८॥
स्फोटाः सदाहरुक्पाकाः सन्धिषु स्युः पुनः पुनः।
निश्यक्षि प्रविलीयन्ते पाको वक्त्रे गुदेऽपि वा॥ १९॥
भय शकुनिगन्धित्वं ज्वरश्च शकुनिग्रहे।
पूतनायां वमिः कम्पस्तन्द्रा रात्रौ प्रजागरः॥ २०॥
हिध्माध्मानं शकृद्भेदः पिपासा मूत्रनिग्रहः।
सस्तहृष्टाङ्गरोमत्वं काकवत्पूतिगन्धिता॥ २१॥
शीतपूतनया कम्पो रोदनं तिर्यगीक्षणम्।
तृष्णान्वकूजोऽतीसारो वसावद्विस्रगन्धिता॥ २२॥
पार्श्वस्थैकस्य शीतत्वमुष्णत्वमपरस्य च।
अम्बपूतनया छर्दिर्ज्वरः कासोऽल्पवह्निता॥ २३॥
वर्चसो भेदवैवर्ण्ये दौर्गन्ध्यान्यङ्गशोषणम्।
दृष्टिसादोऽतिरुक्कण्डूयोथकीजक्रमशून्यताः॥ २४॥
हिध्मोद्वेगस्तनद्विषवैवर्ण्यं स्वरतीक्ष्णता।
वेपथुर्मत्स्यगन्धित्वमथवा सास्रगन्धिता॥ २५॥
मुखमण्डितया पाणिपादस्य रमणीयता।
सिराभिरसिताभाभिराचितोदरता ज्वरः॥ २६॥
अरोचकोऽङ्गग्लपनं गोमूत्रसमगन्धिता।
रेवत्यां श्यावनीलत्वं कर्णनासाक्षिमर्दनम्॥ २७॥
कासहिध्माक्षिविक्षेपवक्रवक्त्वरक्तताः।
वस्तगन्धो ज्वरः शोषः पुरीषं हरितं द्रवम्॥ २८॥

जायते शुष्करेवत्यां क्रमात् सर्वाङ्गसंक्षयः ।
केशशातोऽन्नविद्वेषः स्वरदैन्यं विवर्णता ॥ २९ ॥
रोदनं गात्रगन्धित्वं दीर्घकालानुवर्त्तनम् ।
उदरे ग्रन्थयो वृत्ता यस्य नानाविधाः शकृत् ॥ ३० ॥
जिह्वायाः निम्नता मध्ये श्यावं तालु च तं त्यजेत् ।
भुञ्जानोऽन्नं बहुविधं यो बालः परिहीयते ॥ ३१ ॥
तृष्णागृहीतश्चामाक्षो हन्ति तं शुष्करेवती ।
हिंसारत्यर्चनाकाङ्क्षा ग्रहग्रहणकारणम् ॥ ३२ ॥
तत्र हिंसात्मके बालो महान् वा स्तब्धनासिकः ।
क्षतजिह्वं क्षणेद् वाढमसुखी साश्रुलोचनः ॥ ३३ ॥
दुर्वर्णो हीनवचनः पूतिगन्धिश्च जायते ।
क्षामो मूत्रपुरीषं स्वं सृजति न जुगुप्सते ॥ ३४ ॥
हस्तौ चोद्यम्य संरब्धो हन्यात्मानं तथा परम् ।
तद्वच्च शस्त्रकाष्ठाद्यैरग्निं वा दीप्तमाविशेत् ॥ ३५ ॥
अप्सु मज्जेत्पतेत्कूपे कुर्यादन्यच्च तद्विधम् ।
तृड्दाहमोहान् पूयस्य छर्दनञ्च प्रवर्त्तयेत् ॥ ३६ ॥
रक्तञ्च सर्वमार्गेभ्यो रिष्टोत्पत्तिश्च तं त्यजेत् ।
रहः क्षीरतिसंलापगन्धस्रग्भूषणप्रियः ॥ ३७ ॥
हृष्टः शान्तश्च दुःसाध्यो रतिकामेन पीडितः ।
दीनः परिस्रुतेक्षं शुष्कौष्ठगलतालुकः ॥ ३८ ॥
शङ्कितं वीक्षते रौति ध्यायत्यायाति दीनताम् ।
अन्नमन्नाभिलाषेऽपि दत्तं नाति बुभुक्षते ॥ ३९ ॥
गृहीतं बलिकामेन तं विद्यात्सुखसाधनम् ।
हन्तुकामं जयेद्धोमैः सिद्धमन्त्रप्रवर्त्तितैः ॥ ४० ॥
इतरो तु यथाकामं रतिबल्यादिदानतः ।
अथ साध्यग्रहं बालं विविक्ते शरणे स्थितम् ॥ ४१ ॥

त्रिरङ्गः सिक्तसंसृष्टे सदा सन्निहितानले ।
विकीर्णभूतिकुसुमपत्रबीजान्वसर्षपे ॥ ४२ ॥
रक्तोन्नतैलज्वलितप्रदीपहतपाप्मनि ।
व्यवायमद्यपिशितनिवृत्तपरिचारके ॥ ४३ ॥
पुराणसर्पिषाभ्यक्त परिषिक्त सुखाम्बुना ।
साधितेन बलानिम्बवैजयन्तीनृपद्रुमैः ॥ ४४ ॥
परिभद्रककट्वङ्गजम्बूवरुणकट्फलैः ।
कपोतवङ्कापामार्गपाटलामधुशिग्रुभिः ॥ ४५ ॥
काकजङ्घामहाश्वेताकापित्थक्षीरपादपैः ।
सकदम्बकरञ्जैश्च धूप स्नातस्य चाचरेत् ॥ ४६ ॥
द्वीपिव्याघ्राहिसिंहर्क्षचर्मभिर्धूपितमिश्रितैः ।
पूतीदशाङ्गौसिद्धार्थवचाभल्लातदीप्यकैः ॥ ४७ ॥
सकुष्ठैः सगृहधूमैः सर्वग्रहविमोचनः ।
वचाहिङ्गुविडङ्गानि सैन्धव गजपिप्पली ॥ ४८ ॥
पाठा प्रतिविषा व्योष दशाङ्गः कश्यपोदितः ।
सर्षपानिम्बपत्राणि मूलमश्वखुरा वचा ॥ ४९ ॥
भूर्जपत्रं घृतं धूपः सर्वग्रहनिवारणः ।
अनन्तास्राम्बितगरं मरिचं मधुरो गणः ॥ ५० ॥
शृगालविन्ना मुस्ता च कल्कितैस्तैर्घृतं पचेत् ।
दशमूलरसक्षीरं युक्तं तद्ग्रहजित्परम् ॥ ५१ ॥
रास्नाध्वंशुमतीबृहत्पञ्चमूलवचाघनात् ।
क्वाथे सर्पिः पचेत्पिष्टैः सारिवाव्योषचित्रकैः ॥ ५२ ॥
पाठाविडङ्गमधुकपयस्याहिङ्गुदारुभिः ।
सग्रन्थिकैः सेन्द्रयवैः शिग्रोस्तत्सतत हितम् ॥ ५३ ॥
सर्वरोगग्रहहर दीपन बलवर्णदम् ।
सारिवासुरभीव्राह्मीशङ्खिनीकृष्णसर्षपैः ॥ ५४ ॥

वचाश्वगन्धासुरसायुक्तैः सर्पिर्विपाचयेत् ।
तन्नाशयेद् ग्रहान् सर्वान् पानेनाभ्यञ्जनेन च ॥ ५५ ॥
गोशृङ्गलोमबालाहिनिर्मोकहृषदश्मविट् ।
निम्बपत्राज्यकटुका मदनं हृहतीद्वयम् ॥ ५६ ॥
कार्पासास्थियवच्छागरोमदेवाह्वसर्षपम् ।
मयूरपत्रश्रीवासं तुषकेशं सरामठम् ॥ ५७ ॥
सङ्गाण्डे वस्तमूत्रेण भावित श्लक्ष्णचूर्णितम् ।
धूपनार्थं हितं सर्वं भूतेषु विषमे ज्वरे ॥ ५८ ॥
दृष्टानि भूतविद्यायां वक्ष्यन्ते यानि तानि च ।
युञ्जीत तथा बलि होमं स्वपनं मन्त्रतन्त्रवित् ॥ ५९ ॥
पूतीकरञ्जलक्पत्र चौरिभ्यो वर्वरादपि ।
तुम्बीविशालारलुकाश्मभेदिल्वकपित्थकाः ॥ ६० ॥
उत्क्वाथ्य तोयं तद्रात्रौ बालानां स्नपन शिवम् ।
अनुबध्नात्यथा क्रूरं ग्रहापायेऽप्युपद्रवान् ।
बालामयनिषेधोक्तभेषजैः समुपाचरेत् ॥ ६१ ॥

इत्यष्टाङ्गहृदये कौमारतन्त्रं द्वितीयं समाप्तम् ।

चतुर्थोऽध्यायः ।

अथातो भूतविज्ञानं व्याख्यास्यामः ।

लक्षयेज्ज्ञानविज्ञानवाक्चेष्टाबलपौरुषम् ।
पुरुषेऽपौरुष यत्र तत्र भूतग्रह वदेत् ॥ १ ॥
भूतस्य रूपप्रकृतिभाषागत्यादिचेष्टितैः ।
यस्यानुकारं कुरुते तेनाविष्ट तमादिशेत् ॥ २ ॥
सोऽष्टादशविधो देवदानवादिविभेदतः ।
हेतुस्तदनुषक्तौ तु सद्यः पूर्वकृतोऽथवा ॥ ३ ॥

प्रज्ञापराधः सुतरां तेन कामादिजन्मना ।
सुप्तधर्मव्रताचारः पूज्यानप्यतिवर्त्तते ॥ ४ ॥
तं तथा भिन्नमर्य्याद पापमात्मोपघातिनम् ।
देवादयोऽप्यनुघ्नन्ति ग्रहाश्छिद्रप्रहारिणः ॥ ५ ॥
छिद्र पापक्रियारब्धः पाकोऽनिष्टस्य कर्मणः ।
एकस्य शून्येऽवस्थान श्मशानादिषु वा निशि ॥ ६ ॥
दिग्वासस्त्वं गुरोर्निन्दा स्त्रीरविधिसेवनम् ।
अशुचेर्देवतार्चादिपरसूतकसङ्करः ॥ ७ ॥
होममन्त्रबलीज्यानां विगुणं परिकर्म च ।
समासाद्दिनचर्य्यादिप्रोक्ताचारव्यतिक्रमः ॥ ८ ॥
ग्रहन्ति शुक्लप्रतिपत् त्रयोदश्योः सुरा नरम् ।
शुक्लत्रयोदशीकृष्णद्वादश्योर्दानवा ग्रहाः ॥ ९ ॥
गन्धर्वास्तु चतुर्दश्यां द्वादश्यां चोरगाः पुनः ।
पञ्चम्यां शुक्लसप्तम्येकादश्योस्तु धनेश्वराः ॥ १० ॥
शुक्लाष्टपञ्चमीपूर्णमासीषु ब्रह्मराक्षसाः ।
कृष्णे रक्षःपिशाचाद्या नवद्वादशपर्वसु ॥ ११ ॥
दशमावास्ययोरष्टनवम्योः पितरोऽपरे ।
गुरुद्विजादयः प्रायः कालं सन्ध्यासु लक्षयेत् ॥ १२ ॥
फुल्लपद्मोपममुखं सौम्यदृष्टिमकोपनम् ।
अल्पवाक् स्वेदविण्मूत्रं भोजनानभिलाषिणम् ॥ १३ ॥
देवद्विजातिपरमं शुचिसंस्कृतवादिनम् ।
मीलयन्तं चिरान्नेत्रे सुरभि वरदायिनम् ॥ १४ ॥
शुक्लमाल्याम्बरसरिच्छैलोच्चभवनप्रियम् ।
अनिद्रमप्रधृष्यञ्च विद्याहेवशीकृतम् ॥ १५ ॥
जिह्मदृष्टि दुरात्मानं गुरुदेवद्विजद्विषम् ।
निर्भय मानिन शूर क्रोधन व्यवसायिनम् ॥ १६ ॥

रुद्रं स्कन्दो विशाखोऽहमिन्द्रोऽहमिति वादिनम् ।
सुरामांसरुचिं विद्यात् दैत्यग्रहगृहीतकम् ॥ १७ ॥
स्वाचारं सुरभिं हृष्टं गीतनर्त्तनकारिणम् ।
स्नानोद्यानरुचिं रक्तवस्त्रमाल्यानुलेपनम् ॥ १८ ॥
शृङ्गारलीलाभिरतं गन्धर्वाध्युषितं वदेत् ।
रक्ताक्षं क्रोधनं स्तब्धदृष्टिं वक्रगतिं चलम् ॥ १९ ॥
श्वसन्तमनिशं जिह्वालालिनं सृक्किणीलिहम् ।
प्रियदुग्धगुडस्नानमधोवदनशायिनम् ॥ २० ॥
उरगाधिष्ठितं विद्यात् त्रस्यन्तं चातपत्रतः ।
विप्लुतं त्रस्तरक्ताक्षं शुभगन्धं सुतेजसम् ॥ २१ ॥
प्रियनृत्यकथागीतस्नानमाल्यानुलेपनम् ।
मत्स्यमांसरुचिं हृष्टं नष्टं बलिनमव्ययम् ॥ २२ ॥
चलिताग्रकरं कस्मै किं ददामीति वादिनम् ।
रहस्यभाषिणं वैद्यद्विजातिपरिभाविनम् ॥ २३ ॥
अल्परोषं द्रुतगतिं विद्यादृक्षगृहीतकम् ।
हास्यनृत्यप्रियं रौद्रचेष्टं छिद्रप्रहारिणम् ॥ २४ ॥
आक्रोशिनं शीघ्रगतिं देवद्विजभिषग्द्विषम् ।
आत्मानं काष्ठशस्त्राद्यैर्घ्नन्तं भोः शब्दवादिनम् ॥ २५ ॥
शास्त्रवेदपठं विद्याद् गृहीतं ब्रह्मराक्षसैः ।
सक्रोधदृष्टिं भ्रकुटिमुद्वहन्तं ससम्भ्रमम् ॥ २६ ॥
प्रहरन्तं प्रधावन्तं शब्दन्तं भैरवाननम् ।
अद्याद्दिनापि बलिनं नष्टनिद्रं निशाचरम् ॥ २७ ॥
निर्लज्जमशुचिं शूरं क्रूरं परुषभाषिणम् ।
रोषणं रक्तमाल्यस्त्रीरक्तमद्यामिषप्रियम् ॥ २८ ॥
दृष्ट्वा च रक्तं मांसं वा लिहानं दशनच्छदौ ।
हसन्तमन्नकाले च राक्षसाधिष्ठितं वदेत् ॥ २९ ॥

अस्वस्थचित्तं नैकत्र तिष्ठन्तं परिधाविनम् ।
उच्छिष्टनृत्यगान्धर्वहासमद्यामिषप्रियम् ॥ ३० ॥
निर्भर्त्सनाद्दीनमुखं रुदन्तमनिमित्ततः ।
नखैर्लिखन्तमात्मान रूक्षध्वस्तवपु स्वरम् ॥ ३१ ॥
आवेदयन्त दुःखानि सम्बद्धाबद्धभाषिणम् ।
नष्टस्मृतिं शून्यरतिं लोल नग्न मलीमसम् ॥ ३२ ॥
रथ्याचैलपरीधान तृणमालाविभूषणम् ।
आरोहयन्तं काष्ठाश्व तथा सङ्करकूटकम् ॥ ३३ ॥
ब्रह्मराक्षस पिशाचेन विजानीयादधिष्ठितम् ।
प्रेताकृतिक्रियागन्ध भीतमाहारविद्विषम् ॥ ३४ ॥
तृणच्छिदश्च प्रेतेन गृहीत नरमादिशेत् ।
बहुप्रलाप क्षणास्थं प्रविलम्बितयायिनम् ॥ ३५ ॥
शूनप्रलम्बदशन कूष्माण्डाधिष्ठितं वदेत् ।
गृहीत्वा काष्ठलोष्टादि भ्रमन्त चीरवाससम् ॥ ३६ ॥
नग्न भावन्तमुत्रस्तदृष्टिं तृणविभूषणम् ।
श्मशानशून्यायतन रथ्यैकद्रुमसेविनम् ॥ ३७ ॥
तिलान्नमद्यमांसेषु सतत सक्तलोचनम् ।
निषादाधिष्ठित विद्याद्वदन्तं परुषाणि च ॥ ३८ ॥
याचन्तमुदकं चान्नं त्रस्तालोहितलोचनम् ।
उग्रवाक्यञ्च जानीयान्नरमौकिरणार्दितम् ॥ ३९ ॥
गन्धमाल्यरतिं सत्यवादिन परिवेषिनम् ।
बहुच्छिद्रञ्च जानीयाद्वेतालेन वशीकृतम् ॥ ४० ॥
अप्रसन्नदृशं दीनवदन शुष्कतालुकम् ।
चलन्नयनपक्ष्माण निद्रालुं मन्दपावकम् ॥ ४१ ॥
अपसव्यपरीधानं तिलमांसगुडप्रियम् ।
स्खलन्तञ्च च जानीयात् पितृग्रहवशीकृतम् ॥ ४२ ॥

गुरुबुद्धर्षिसिद्धाभिशापचिन्तानुरूपतः ।
व्याहाराहारचेष्टाभिर्यथास्वं तद्ग्रहं वदेत् ॥ ४३ ॥
कुमारबृन्दानुगतं नग्नमुद्धतमूर्द्धजम् ।
अस्वस्थमनसं दैन्यं कालिकं तं ग्रहं त्यजेत् ॥ ४४ ॥

पञ्चमोऽध्यायः ।

अथातो भूतप्रतिषेधं व्याख्यास्यामः ।

भूतं जयेदहिंसेच्छं जपहोमबलिव्रतैः ।
तपःशीलसमाधानज्ञानदानदयादिभिः ॥ १ ॥
हिङ्गुव्योषालनेपालीलशुनार्कजटाजटाः ।
अजलोमी सगोलोमी भूतकेशी वचा लता ॥ २ ॥
कुक्कुटी सर्पगन्धाख्या तिलाः कालविषाणिके ।
वज्रप्रोक्तावयस्था च गृङ्गी मोहनवल्ल्यपि ॥ ३ ॥
स्रोतोजाञ्जनरत्नोष्णं रत्नोष्णं चान्यदौषधम् ।
खराश्वश्वाविदुष्ट्रार्चगोधानकुलशल्यकान् ॥ ४ ॥
द्वीपिमार्जारगोसिंहव्याघ्रसामुद्रसत्वतः ।
चर्मपित्तहृदिजनखा वर्गेऽस्मिन् साधयेद्धृतम् ॥ ५ ॥
पुराणमथवा तैलं नवं तत्याननस्यथोः ।
अभ्यङ्गे च प्रयोक्तव्यमेषां चूर्णञ्च धूपने ॥ ६ ॥
एभिश्च गुटिकां युञ्जादञ्जने सावपीडने ।
प्रलेपे कल्कमेतेषां क्वाथञ्च परिषेचने ॥ ७ ॥
प्रयोगोऽयं ग्रहोन्मादान् सापस्मारांश्चमं नयेत् ।
गजाह्वा पिप्पलीमूलव्योषामलकसर्षपान् ॥ ८ ॥
गोधानकुलमार्जारभक्षपित्तप्रपेषितान् ।
नावनाभ्यङ्गसेकेषु विदध्यात् ग्रहापहान् ॥ ९ ॥

सिद्धार्थकवचा हिङ्गु प्रियङ्गु रजनीद्वयम् ।
मञ्जिष्ठा श्वेतकटभी वचा श्वेताद्रिकर्णिका ॥ १० ॥
निम्बस्य पत्रं बीजन्तु नक्तमालशिरीषयोः ।
सुराङ्ग व्रूषण सर्पिर्गोमूत्रे तैश्चतुर्गुणे ॥ ११ ॥
सिद्धं सिद्धार्थक नाम पाने नस्ये च योजितम् ।
ग्रहान् सर्वान्निहन्त्याशु विशेषादासुरान् ग्रहान् ॥ १२ ॥
कृत्यालक्ष्मीविषोन्मादज्वरापस्मारपाप्म च ।
एभिरेवौषधैर्वस्तवारिणा कल्पितो गदः ॥ १३ ॥
पाननस्याञ्जनालेपस्नानो घर्षणयोजितः ।
गुणैः पूर्ववदुद्दिष्टो राजद्वारे च सिद्धिकृत् ॥ १४ ॥
सिद्धार्थकव्योषवचाश्वगन्धानिशाद्वयं हिङ्गुपलाण्डुकन्दम् ।
बीजं करञ्जात्कुसुमं शिरीषात् फलञ्च वल्कश्च कपित्थवृक्षात् ॥१५
समाणिमन्थं सनतं सकुष्ठं श्योनाकमूलं किणिही सिता च ।
वस्तस्य मूत्रेण विभावितं तत्पिक्तेन गव्येन गुड़ान् विदध्यात् १६
दुष्टव्रणोन्मादतमो निशान्धानुद्वृत्तकान् वारिनिमग्नदेहान् ।
दिग्धाहतान् दर्पितसर्पदष्टांस्ते साधयन्त्यञ्जननस्य लेपैः ॥१७॥
कार्पासास्थिमयूरपिच्छवृहतीनिर्माल्यपिण्डीतक-
त्वक्पासीवृकदग्धविट् तुषवचाकेशाहिनिर्मोचनैः ।
नागेन्द्रद्विजशृङ्गहिङ्गुमरिचैस्तुल्यैः कृतं धूपनं
स्कन्दोन्मादपिशाचराक्षसासुरावेशज्वरघ्नं परम् ॥ १८ ॥
त्रिकटुकदलकुङ्कुमग्रन्थिकक्षारसिंही
निशादारुसिद्धार्थयुग्माम्बुशुक्राद्वयैः ।
सितलशुनफलत्वयोशीरतिक्तावचा
तुत्थयष्टीबलालोहितैलाशिलापद्मकैः ॥
दधितगरमधूकसारप्रियाङ्गा
निशाख्याविषातार्क्ष्यशैलैः सचव्यामयैः ।

कल्कितैर्घृतमभिनवमशेषमूत्राश्वसिद्धमतं
भूतरावाह्वय पानतस्तदुग्रहघ्नं परम् ॥ १९ ॥
नतमधुकरञ्जलाचापटोलीसमङ्गावचा-
पाटलीहिङ्गुसिद्धार्थसिंहीनिशायुग्लतारोहिणी ।
वदरकटुफलविकाकाण्डदारुक्रमिघ्ना-
जगन्धामराङ्गोल्लकोशातकौशिग्रुनिम्बाम्बुदेन्द्राह्वयैः ।
गदशुक्ततरुपुष्पबीजोग्रयष्ट्यद्रिकर्णीनिकुम्भाग्नि-
बिल्वैः समैः कल्कितैर्मूत्रवर्गेण सिद्धं घृतम् ।
विधिविनिहितमाशु सर्वैः क्रमैर्योजितं हन्ति सर्व-
ग्रहोन्मादकुष्ठज्वरांस्तन्महाभूतराव स्मृतम् ॥ २० ॥
ग्रहा गृह्णन्ति ये येषु तेषां तेषु विशेषतः ।
दिनेषु बलिहोमादीन् प्रयुञ्जीत चिकित्सकः ॥ २१ ॥
स्नानवस्त्रवसामांसमद्यक्षीरगुडादि च ।
रोचते यद्यदा येभ्यस्तत्तेषामाहरेत्तदा ॥ २२ ॥
रक्तानि गन्धमाल्यानि बीजानि मधुसर्पिषी ।
भक्ष्याश्च सर्वे सर्वेषां सामान्यो विधिरित्ययम् ॥ २३ ॥
सुरर्षिगुरुवृद्धेभ्यः सिद्धेभ्यश्च सुरालये ।
दिश्युत्तरस्यां तत्रापि देवायोपहरेद् बलिम् ॥ २४ ॥
पश्चिमायां यथाकालं दैत्यभूताय चत्वरे ।
गन्धर्वाय गवां मार्गे सवस्त्राभरणं बलिम् ॥ २५ ॥
पितृनागग्रहे नद्यां नागेभ्यः पूर्वदक्षिणे ।
यक्षाय यक्षायतने सरितोर्वा समागमे ॥ २६ ॥
चतुष्पथे राक्षसाय भीमेषु गहनेषु च ।
रक्षसां दक्षिणस्यां तु पूर्वस्यां ब्रह्मरक्षसाम् ॥ २७ ॥
शून्यालये पिशाचाय पश्चिमां दिशमाश्रिते ।
शुचिशुक्लानि माल्यानि गन्धाः क्षीरयमोदनम् ॥ २८ ॥

दधिच्छत्रञ्च धवल देवानां बलिरिष्यते ।
हिङ्गुसर्षपषड्ग्रन्थ्याव्योषैरर्द्धपलोन्मितैः ॥ २८ ॥
चतुर्गुणे गवां मूत्रे घृतप्रस्थं विपाचयेत् ।
तत्याननावनाभ्यङ्गैर्दैवग्रहविमोक्षणम् ॥ ३० ॥
नस्याञ्जन वचाहिङ्गुलशुन वस्तवारिणा ।
दैत्ये बलिर्बहुफलः सोशीरकमलोत्पलः ॥ ३१ ॥
नागानां सुमनोलाजगुडापूपगुडौदनैः ।
परमान्नमधुक्षीरकृष्णसृक्नागकेसरैः ॥ ३२ ॥
वचापद्मपुरोशीररक्तोत्पलदलैर्बलिः ।
श्वेतपद्मञ्च रोध्रञ्च तगर नागसर्षपाः ॥ ३३ ॥
शीतेन वारिणा पिष्टं नावनाञ्जनयोर्हितम् ।
यक्षाणां क्षीरदध्याज्यमिश्रकोदनगुग्गुलुः ॥ ३४ ॥
देवदारूत्पल पद्ममुशीरं वस्त्रकाञ्चनम् ।
हिरण्यञ्च बलिर्योज्यो सूत्राज्यक्षीरमेकतः ॥ ३५ ॥
सिद्ध समोन्मितं पाननावनाभ्यञ्जने हितम् ।
हरीतकी हरिद्रे द्वे लशुनो मरिचं वचा ॥ ३६ ॥
निम्बपत्रञ्च वस्ताम्बुकल्कितं नावनाञ्जनम् ।
ब्रह्मरक्षोबलिःसिद्धं यवानां पूर्णमाढ़कम् ॥ ३७ ॥
तोयस्य कुम्भः पललं कृतं वस्त्र विलेपनम् ।
गायत्रीविंशतिपलक्काथेऽर्द्धपलिकैः पचेत् ॥ ३८ ॥
त्रुषणत्रिफलाहिङ्गुषड्ग्रन्थ्यामिश्रिसर्षपैः ।
सनिम्बपत्रलशुनैः कुडवान् सप्तसर्पिषः ॥ ३९ ॥
गोमूत्रे त्रिगुणे पाने नस्याभ्यङ्गेषु तद्धितम् ।
रक्षसां पलल शुक्ल कुसुम मिश्रकौदनम् ॥ ४० ॥
बलिः पक्वाममांसानि निष्पावा रुधिरोक्षिताः ।
नक्तमालशिरीषत्वड्मूलपुष्पफलानि च ॥ ४१ ॥

तद्वच्च कृष्णपाटल्या बिल्वमूल कटुत्रिकम् ।
हिङ्गुनिर्यासिद्धार्थलशुनामलकीफलम् ॥ ४२ ॥
नावनाञ्जनयोर्योज्यो वस्तमूत्रद्रुतो गदः ।
एभिरेव घृत सिद्धं गवां मूत्रे चतुर्गुणे ॥ ४३ ॥
रक्षोग्रहान् वारयते पानाभ्यञ्जननावनैः ।
पिशाचानां बलिः सीधुपिण्याकः पललं दधि ॥ ४४ ॥
मूलकं लवणं सर्पिः सभूतोदनयावकम् ।
हरिद्राद्वयमञ्जिष्ठामिञ्जिसैन्धवनागरम् ॥ ४५ ॥
हिङ्गुप्रियङ्गुत्रिकटुरसोनत्रिफला वचा ।
पाटलाश्वेतकटभीशिरीषकुसुमैर्घृतम् ॥ ४६ ॥
गोमूत्रपादिकं सिद्धं पानाभ्यञ्जनयोर्हितम् ।
वस्ताम्बुपिष्टैस्तैरेव योज्यमञ्जननावनम् ॥ ४७ ॥
देवर्षिपितृगन्धर्वं तीक्ष्णं नस्यादि वर्जयेत् ।
सर्पिःपानादिसद्वह्निन् भैषज्यमवचारयेत् ॥ ४८ ॥
ऋते पिशाचान् सर्वेषु प्रतिकूलञ्च नाचरेत् ।
सवैद्यमातुरं घ्नन्ति क्रुद्धास्ते हि महौजसः ॥ ४९ ॥
ईश्वरं द्वादशभुजं नाथमार्य्यावलोकितम् ।
सर्वव्याधिचिकित्सन्तं जपन् सर्वग्रहान् जयेत् ॥ ५० ॥
तथोन्मादानपस्मारादन्यं वा चित्तविप्लवम् ।
महाविद्याञ्च मायूरीं शुचि तं श्रावयेत् सदा ॥ ५१ ॥
भूतेशं पूजयेत् स्थाणु प्रमथाख्यांश्च तद्गणान् ।
जपन् सिद्धांश्च तन्मन्त्रान् ग्रहान् सर्वानपोहति ॥ ५२ ॥
यच्चानन्तरयोः किञ्चिद् वक्ष्यतेऽध्याययोर्हितम् ।
यच्चोक्तमिह तत्सर्वं प्रयुञ्जीत परस्परम् ॥ ५३ ॥

षष्ठोऽध्यायः ।

अथात उन्मादप्रतिषेधं व्याख्यास्यामः ।

उन्मादाः षट् पृथग्दोषनिचयाधिविषोद्भवाः ।
उन्मादो नाम मनसो दोषैरुन्मार्गगैर्मदः ॥ १ ॥
शारीरमानसैर्दुष्टैरहितादत्र यानतः ।
विकृतासात्म्यसमलाद्विषमादुपयोगतः ॥ २ ॥
विषमस्याल्पसत्त्वस्य व्याधिवेगसमुद्भवात् ।
क्षीणस्य चेष्टावैषम्यात्पुज्यपूजाव्यतिक्रमात् ॥ ३ ॥
आधिभिश्चित्तविभ्रंशाद् विषेणोपविषेण च ।
एभिर्विहीनसत्त्वस्य हृदि दोषाः प्रदूषिताः ॥ ४ ॥
धियो विधाय कालुष्यं हृत्वा मार्गान् मनोवहान् ।
उन्मादं कुर्वते तेन धीविज्ञानस्मृतिभ्रमात् ॥ ५ ॥
देहो दुःखसुखभ्रष्टो भ्रष्टसारथिवद्रथः ।
भ्रमत्यचिन्तितारम्भ तत्र वातात् क्लशाङ्गता ॥ ६ ॥
अस्थाने रोदनाक्रोशहसितस्मितनर्त्तनम् ।
गीतवादित्रवागङ्गविक्षेपास्फोटनानि च ॥ ७ ॥
असाम्प्रावेणुवीणादिशब्दानुकरणं मुहुः ।
आस्यात्फेनागमोऽजस्रमटनं बहुभाषिता ॥ ८ ॥
अलङ्कारोऽनलङ्कारैरयानैर्गमनोद्यम ।
गद्विरव्यवहार्य्येषु तल्लाभे वावमानता ॥ ९ ॥
उत्पिण्डितारुणाक्षित्व जीर्णे चान्ने गदोद्भवः ।
पित्तात्क्षान्तर्ज्जनं क्रोधो मुष्टिलोष्टाद्यभिद्रवः ॥ १० ॥
शीतच्छायोदकाकाङ्क्षा नग्नत्वं पीतवर्णता ।
अमत्यज्वलनज्वालातारकादीपदर्शनम् ॥ ११ ॥
कफादरोचकस्कर्दिरल्पेहाहारवाक्यता ।

स्त्रीकामता रहःप्रीतिर्लालासिक्तास्यकच्युतिः ॥ १२ ॥
वैभत्स्य शौचविद्वेषो निद्राक्षयथुरानने ।
उन्मादो बलवान् रात्रौ भुक्तमात्रे च जायते ॥ १३ ॥
सर्वायतनसस्थानसन्निपाते तदात्मकम् ।
उन्मादं दारुणं विद्यात् तं भिषक् परिवर्जयेत् ॥ १४ ॥
धनकान्तादिनाशेन दुःसहेनाभिषङ्गवान् ।
पाण्डुर्दीनो मुहुर्मुह्यन् हा हेति परिदेवते ॥ १५ ॥
रोदित्यकस्मात् म्रियते तद्गुणान् बहु मन्यते ।
शोकक्लिष्टमना ध्यायन् जागरूको विचेष्टते ॥ १६ ॥
विषेण श्यामवदनो नष्टच्छायाबलेन्द्रियः ।
वेगान्तरेऽपि संभ्रान्तो रक्षाचास्य विवर्जयेत् ॥ १७ ॥
अथानिलज उन्मादे स्नेहपानं प्रयोजयेत् ।
पूर्वमाहृतमार्गे तु सस्नेहं मृदु शोधनम् ॥ १८ ॥
कफपित्तभवेऽप्यादौ वमनं सविरेचनम् ।
स्निग्धस्विन्नस्य वस्तिश्च शिरसः सविरेचनम् ॥ १९ ॥
तथास्य शुद्धदेहस्य प्रसादं लभते मनः ।
इत्थमप्यनुवृत्तौ तु तीक्ष्णं नावनमञ्जनम् ॥ २० ॥
हर्षणाश्वासनोत्त्रासभयताडनतर्जनम् ।
अभ्यङ्गोद्वर्तनालेपधूमपानञ्च सर्पिषः ॥ २१ ॥
युञ्ज्याच्चानि हि शुद्धस्य नयन्ति प्रकृतिं मनः ।
हिङ्गुसौवर्चलव्योषैर्द्विपलांशैर्घृताढकम् ॥ २२ ॥
सिद्धं समूत्रमुन्मादभूतापस्मारनुत्परम् ।
द्वौ प्रस्थौ स्वरसाद् ब्राह्म्या घृतप्रस्थश्च साधितम् ॥ २३ ॥
व्योषश्यामात्रिवृद्दन्तीशङ्खपुष्पीनृपद्रुमैः ।
ससप्तलाक्षमिहरैः कल्कितैरक्षसम्मितैः ॥ २४ ॥
पलद्वयं प्रयुञ्जीत परं मात्राचतुष्पलम् ।

उन्मादकुष्ठापस्मारहरं बल्यायुस्तप्रदम् ॥ २५ ॥
वाक्स्वरस्मृतिमेधाकृद् धन्य ब्राह्मीघृतं स्मृतम् ।
वराविशालाभद्रेलादेवदार्वेलवालुकैः ॥ २६ ॥
द्विसारिवाद्विरजनीद्विस्थिराफलिनी नतैः ।
हृहतीकुष्ठमञ्जिष्ठानागकेशरदाडिमैः ॥ २७ ॥
वेल्लतालीसपत्रैलामालतीमुकुलोत्पलैः ।
सदन्तीपद्मकट्विमै कर्षांशैः सर्पिषः पचेत् ॥ २८ ॥
प्रस्थं भूतग्रहोन्मादकासापस्मारपाप्मसु ।
पाण्डुकण्डुविषे शोफे मोहे मेहे गरे ज्वरे ॥ २९ ॥
अरेतस्य प्रजसि वा दैवोपहतचेतसि ।
अमेधसि स्खलद्वाचि स्मृतिकामेऽल्पपावके ॥ ३० ॥
बल्य मङ्गल्यमायुष्य कान्तिसौभाग्यपुष्टिदम् ।
कल्याणकमिद सर्पिः श्रेष्ठं पुंसवनेषु च ॥ ३१ ॥
एभ्यो द्विसारिवादीनि जले पक्वैकविंशतिः ।
रसे तस्मिन् पचेत्सर्पिर्गृष्टिक्षीरचतुर्गुणम् ॥ ३२ ॥
वीरादिमेदाकाकोलीकपिकच्छूविषाणिभिः ।
सूर्पपर्णीयुतैरेतन्महाकल्याणकं परम् ॥ ३३ ॥
बृंहण सन्निपातघ्नं पूर्वस्मादधिक गुणैः ।
जटिला पूतना केशी चारटी मर्कटी वचा ॥ ३४ ॥
लायमाणा जया वीरा चोरकः कटुरोहिणी ।
कायस्था शूकरी कृत्ता अतिच्छत्रा पलङ्कषा ॥ ३५ ॥
महापुरुषदन्ता च वनस्था नाकुलीद्वयम् ।
कटम्भरा वृश्चिकाली शालिपर्णी च तैर्घृतम् ॥ ३६ ॥
सिद्धं चातुर्थिकोन्मादग्रहापस्मारनाशनम् ।
महापैशाचकं नाम घृतमेतद्यथामृतम् ॥ ३७ ॥
बुद्धिमेधास्मृतिकरं बालानां चाङ्गवर्द्धनम् ।

ब्राह्मीमैन्द्रीविडङ्गानि व्योषं हिङ्गु जटां सुराम् ॥ ३८ ॥
रास्नां विश्वाश्वां लशुनं विषघ्नां सुरसां वचाम् ।
ज्योतिष्मतीं नागविश्वामनन्तां सहरीतकीम् ॥ ३९ ॥
काञ्जीक्ष्च हस्तिमूत्रेण पिष्ट्वा च्छायाविशोषिता ।
वर्त्तिर्नस्याञ्जनालेपधूपैरुन्मादसूदनी ॥ ४० ॥
अवपीडाश्च विविधाः सर्षपाः स्नेहसंयुताः ।
कटुतैलेन चाभ्यङ्गो मापयेच्चास्य तद्रजः ॥ ४१ ॥
सहिङ्गुस्तीक्ष्णधूमश्च सूत्रस्थानोदितो हितः ।
शृगालगृध्रकोलूकजलूकाद्यवस्तजैः ॥ ४२ ॥
मूत्रपित्तशकृल्लोमनखचर्मभिराचरेत् ।
धूपधूमाञ्जनाभ्यङ्गप्रदेहपरिषेचनम् ॥ ४३ ॥
धूपयेत् सततं चैनं खगोमत्स्यैस्तु पूतिभिः ।
वातश्लेष्मात्मके प्रायः पैत्तिके तु प्रशस्यते ॥ ४४ ॥
तिक्तकं जीवनीयञ्च सर्पिः स्नेहञ्च मिश्रकः ।
शिशिरान्नपानानि मधुराणि लघूनि च ॥ ४५ ॥
विध्येच्छिरां यथोक्तां वा दक्षः मेध्यामिषस्य वा ।
निवाते शाययेदेव मुच्यते मतिविभ्रमात् ॥ ४६ ॥
प्रक्षिप्यासलिले कूपे शोषयेद्वा बुभुक्षया ।
आश्वासयेत् सुहृत्तं वा वाक्यैर्धर्मार्थसंहितैः ॥ ४७ ॥
ब्रूयादिष्टविनाशं वा दर्शयेदद्भुतानि वा ।
बद्धं सर्षपतैलाक्तं न्यस्तं चोत्तानमातपे ॥ ४८ ॥
कपिकच्छ्वथवा तप्तैर्लोहितैलजलैः स्पृशेत् ।
कशाभिस्ताड़यित्वा वा बद्धं ग्रभ्रे विनिक्षिपेत् ॥ ४९ ॥
अथवा वीतशस्त्राग्निजने सन्तुमसे गृहे ।
सर्पेणोद्धतदंष्ट्रेण दान्तैः सिंहैर्गजैश्च तम् ॥ ५० ॥
अथवा राजपुरुषा बद्धिर्नीत्वा सुसंयुतम् ।

भाययेयुर्वधेनैनं तर्जयन्तो नृपाज्ञया ॥ ५१ ॥
देहदुःखभयेभ्यो हि परं प्राणभयं मतम् ।
तेन याति शमं तस्य सर्वतो विप्लुतं मनः ॥ ५२ ॥
सिद्धा क्रिया प्रयोज्येय देशकालाद्यपेक्षया ।
इष्टद्रव्यविनाशात्तु मनो यस्योपहन्यते ॥ ५३ ॥
तस्य तत्सदृशप्राप्तिः शास्त्राश्वासैः शमं नयेत् ।
कामशोकभयक्रोधहर्षेर्ष्यालोभसम्भवान् ॥ ५४ ॥
परस्परप्रतिद्वन्द्वैरेभिरेव शमं नयेत् ।
भूतानुबन्धमीक्षेत प्रोक्तालिङ्गाधिकाकृतिम् ॥ ५५ ॥
यद्युन्मादे ततः कुर्य्याद् भूतनिर्दिष्टमौषधम् ।
बलिञ्च दद्यात्पललं यावकं सक्तुपिण्डिकाम् ॥ ५६ ॥
स्निग्धं मधुरमाहारं तण्डुलान् रुधिरोक्षितान् ।
पक्वामकानि मांसानि सुरामैरेयमासवम् ॥ ५७ ॥
अतिमुक्तस्य पुष्पाणि जात्वा सहचरस्य च ।
चतुष्पथे गवां तीर्थे नदीनां सङ्गमेषु च ॥ ५८ ॥
निवृत्तामिषमद्यो यो हिताशी प्रयतः शुचिः ।
निजागन्तुभिरुन्मादैः सत्ववान्न स युज्यते ॥ ५९ ॥
प्रसाद इन्द्रियार्थानां बुध्यात्ममनसां तथा ।
धातूनां प्रकृतिस्थत्वं विगतोन्मादलक्षणम् ॥ ६० ॥

सप्तमोऽध्यायः ।

अथातोऽपस्मारप्रतिषेधं व्याख्यास्यामः ।

स्मृत्यपायो ह्यपस्मारः सन्निसत्त्वाभिसंप्लवात् ।
जायतेऽभिहते चित्ते चिन्ताशोकभयादिभिः ॥ १ ॥
उन्मादवत् प्रकुपितैश्चित्तदेहगतैर्मलैः ।

हृते सत्त्वे हृदि व्याप्ते सञ्ज्ञावाहिषु खेषु च ॥ २ ॥
तमोविशन्मूढमतिर्वीभत्साः कुरुते क्रियाः ।
दन्तान् खादन् वमन् फेनं हस्तौ पादौ च विक्षिपन् ॥ ३ ॥
पश्यन्नसन्ति रूपाणि प्रस्खलन् पतति क्षितौ ।
विजिह्माक्षिभ्रुवो दोषवेगेऽतीते विबुध्यते ॥ ४ ॥
कालान्तरेण स पुनस्त्वेवमेव विचेष्टते ।
अपस्मारश्चतुर्भेदो वातात्यैर्निचयेन तु ॥ ५ ॥
रूपमुत्पित्स्यमानेऽस्मिन् हृत्कम्पः शून्यता भ्रमः ।
तमसो दर्शनं ध्यान भ्रूव्युदासोऽक्षिवैकृतम् ॥ ६ ॥
अशब्दश्रवण स्वेदो लालासिङ्घाणकश्रुतिः ।
अविपाकोऽरुचिर्मूर्च्छा कुक्षाटोपो बलक्षयः ॥ ७ ॥
निद्रानाशोऽङ्गमर्दस्तृट् स्वप्ने गान सनर्त्तनम् ।
पानं मद्यस्य तैलस्य तयोरेव च मेहनम् ॥ ८ ॥
तत्र वातात् स्फुरत्यक्थि प्रपतश्च मुहुर्मुहुः ।
अपस्मारेति सञ्ज्ञां च लभते विस्वर रुदन् ॥ ९ ॥
उत्पिण्डिताक्षः श्वसिति फेनं वमति कम्पते ।
आविध्यति शिरोदन्तान् दशत्याक्षातकन्धरः ॥ १० ॥
परितो विक्षिपत्यङ्ग विषम विनताङ्गुलिः ।
रूक्षश्यावारुणाक्षित्वङ्नखास्यः क्षणमीक्षते ॥ ११ ॥
चपल परुष रूपं विरूपं विकृताननम् ।
अपस्मरति पित्तेन मुहुः सञ्ज्ञाञ्च विन्दति ॥ १२ ॥
पीतफेनाक्षिवक्त्रत्वगास्फालयति मेदिनीम् ।
भैरवादीप्तरूपितरूपदर्शी तृषान्वितः ॥ १३ ॥
कफात्क्षिरेण ग्रहण चिरेणैव विबोधनम् ।
चेष्टाल्पा भूयसी लाला शुक्लनेत्रनखास्यता ॥ १४ ॥
शुक्लाभरूपदर्शित्वं सर्वलिङ्गन्तु वर्जयेत् ।

अथाहृतानां धीचित्तबृंहत्स्नानां प्राक्प्रबोधनम् ॥ १५ ॥
तीक्ष्णै: कुर्यादपस्मारे कर्मभिर्वमनादिभि: ।
वातिक वस्तिभूयिष्ठै: पैत्त प्रायो विरेचनै: ॥ १६ ॥
श्लैष्मिक वमनप्रायैरपस्मारमुपाचरेत् ।
सर्वतस्तु विशुद्धस्य सम्यगाश्वासितस्य च ॥ १७ ॥
अपस्मारविमोक्षार्थं योगान् संशमनान् शृणु ।
गोमयस्वरसक्षीरदधिमूत्रै: शृत हवि: ॥ १८ ॥
अपस्मारज्वरोन्मादकामलान्तकर पिबेत् ।
द्विपञ्चमूलत्रिफलाद्विनिशाकुटजत्वच: ॥ १९ ॥
सप्तपर्णमपामार्गं नीलिनीं कटुरोहिणीम् ।
शम्याकपुष्करजटाफल्गुमूलदुरालभा: ॥ २० ॥
द्विपला: सलिलद्रोणे पक्त्वा पादावशेषिते ।
भार्ङ्गीपाठाढ़कीकुम्भनिकुम्भव्योषरोहिषै: ॥ २१ ॥
मूर्वाभूतिकभूनिम्बत्रेयसीसारिवाद्वयै: ।
मदयन्त्यग्निनिचुलैरक्षांशै: सर्पिष पचेत् ॥ २२ ॥
प्रस्थ तद्वद्वै: पूर्वै: पञ्चगव्यमिदं महत् ।
ज्वरापस्मारजठरभगन्दरहर परम् ॥ २३ ॥
शोफार्श: कामलापाण्डुगुल्मकासग्रहापहम् ।
ब्राह्मीरसवचाकुष्ठशङ्खपुष्पीशृत घृतम् ॥ २४ ॥
पुराणं मेध्यमुन्मादालक्ष्मापस्मारपाप्मजित् ।
तैलप्रस्थ घृतप्रस्थ जीवनीयै: पलोन्मितै: ॥ २५ ॥
क्षीरद्रोणे पचेत् सिद्धमपस्मारविमोक्षणम् ।
कसे क्षीरेक्षुरसयो: काश्मर्य्येऽष्टगुणे रसे ॥ २६ ॥
कार्षिकैर्जीवनीयैश्च सर्पि:प्रस्थं विपाचयेत् ॥ ।
वातपित्तोद्भव क्षिप्रमपस्मारं निहन्ति तत् ॥ २७ ॥
तद्वत्कासविदारीक्षुकुशकाथशृत पय: ।

कुमारुष्कस्वरसे सर्पिरष्टादशगुणे श्रृतम् ॥ २८ ॥
यष्टीकल्कमपस्मारहरं धीवाक्स्वरप्रदम् ।
कपिलानां गवां पित्तं नावनं परमं हितम् ॥ २९ ॥
खशृगालविडालानां सिंहादीनाञ्च पूजितम् ।
गोधानकुलनागानां हृषभर्क्षगवामपि ॥ ३० ॥
पित्तेषु साधितं तैलं नस्येऽभ्यङ्गे च शस्यते ।
त्रिफलाव्योषपीतद्रुयवक्षारफणिज्जकैः ॥ ३१ ॥
श्यामापामार्गकारञ्जबीजैस्तैलं विपाचितम् ।
वस्तमूत्रे हितं नस्यं चूर्णं वाधापयेद्भिषक् ॥ ३२ ॥
न कुलीलूकमार्जारगृध्रकोटाहिकाकजैः ।
तुण्डैः पक्षैः पुरीषैश्च धूमस्य प्रयोजयेत् ॥ ३३ ॥
शीलयेत्तैललशुनं पयसा वा घृतावरीम् ।
ब्राह्मीरसं कुष्ठरसं वचां वा मधुसंयुताम् ॥ ३४ ॥
सम क्रुद्धैरपस्मारो दोषैः शारीरमानसैः ।
यज्जायते यतश्चैष महामर्मसमाश्रयः ॥ ३५ ॥
तस्माद्रसायनैरेनं दुश्चिकित्स्यमुपाचरेत् ।
तदार्त्तं चाग्नितोयादेर्विषमात्पालयेत् सदा ॥ ३६ ॥
मुक्तं मनोविकारेण त्वमित्थं कृतवानिति ।
न ब्रूयाद्विषयैरिष्टैः क्लिष्टं चेतोऽस्य हृंहयेत् ॥ ३७ ॥

इत्यष्टाङ्गहृदये भूततन्त्रे द्वितीयं समाप्तम् ।

अष्टमोऽध्यायः ।

अथातो वर्त्मरोगविज्ञानीयमध्यायं व्याख्यास्यामः ।
सर्वरोगनिदानोक्तैरहितैः कुपिता मलाः ।
अचक्षुष्यैर्विशेषेण प्रायः पित्तानुसारिणः ॥ १ ॥
शिराभिरूर्ध्वं प्रसृता नेत्रावयवमाश्रिता ।
वर्त्मसन्धि सितं कृष्णं दृष्टिं वा सर्वमेव वा ॥ २ ॥

रोगान् कुर्य्युश्चलस्तत्र प्राप्य वर्त्माश्रया शिराः ।
सुसोत्थितस्य कुरुते वर्त्मस्तब्धं सवेदनम् ॥ ३ ॥
पांशुपूर्णाभनेत्रत्वं कृच्छ्रोन्मिलनमस्रु च ।
विमर्दनात्स्याच्च शमं कृच्छ्रोन्मील वदन्ति तम् ॥ ४ ॥
चालयन्वर्त्मनी वायुर्निमेषोन्मेषणं मुहुः ।
करोत्यरुङ् निमेषोऽसौ वर्त्म यत्तु निमील्यते ॥ ५ ॥
विमुक्तसन्धि निश्चेष्टं हीनं वातहतं हि तत् ।
कृष्णाः पित्तेन बह्व्योऽन्तर्वर्त्मकुम्भीकवीजवत् ॥ ६ ॥
आध्मायन्ते पुनर्भिन्ना पिटिकाः कुम्भिसञ्ज्ञिताः ।
सदाहक्लेदनिस्तोदं रक्ताभं स्यर्शनाक्षमम् ॥ ७ ॥
पित्तेन जायते वर्त्म पित्तोत्क्लिष्टमुशन्ति तत् ।
करोति कण्डूं दाहञ्च पित्तं पक्ष्मान्तमाश्रितम् ॥ ८ ॥
पक्ष्मणां शातनं चापि पक्ष्मशातं वदन्ति तम् ।
पीथक्यः पिटिकाः श्वेताः सर्षपाभाः घनाः कफात् ॥ ९ ॥
शोफोपदेहहृत्कण्डूपिच्छलास्रुसमन्विताः ।
कफोत्क्लिष्टं भवेद्वर्त्म स्तब्धक्लेदोपदेहवत् ॥ १० ॥
ग्रन्थिः पाण्डुररुक्पाकः कण्डुमान् कठिनः कफात् ।
कोलमात्रः सलगणः किञ्चिदल्पस्ततोऽपि वा ॥ ११ ॥
रक्तारक्तेन पिटिकास्तत्तुल्यपिटिकाचिताः ।
उत्सङ्गाख्यास्तथोत्क्लिष्टं राजिमत् स्यर्शनाक्षमम् ॥ १२ ॥
अर्शोऽधिमांसं वर्त्मान्तः स्तब्धं स्निग्धं सदाहरुक् ।
रक्तं रक्तेन तत्स्रावी छिन्नं छिन्नञ्च वर्द्धते ॥ १३ ॥
मध्ये वा वर्त्मनोऽन्ते वा कण्डूपारुष्यवती स्थिरा ।
मुद्गमात्रासृजा ताम्रा पिटिकाक्षिननामिका ॥ १४ ॥
दोषैर्वर्त्म बहिः शून यदन्तः सूक्ष्मखाचितम् ।
सस्रावमन्तरुदकं विसाभं विसवर्त्म तत् ॥ १५ ॥

यद्वर्त्मोत्क्लिष्टमुत्क्लिष्टमकस्मात् म्लानतामियात् ।
रक्तदोषभयोत्क्लेशाद् वदन्त्युत्क्लिष्टवर्त्म तत् ॥ १६ ॥
श्यामवर्त्म मलैः सास्रैः श्यावं रुक्क्लेदशोफवत् ।
क्लिष्टाख्यवर्त्मनी श्लिष्टे कण्डूश्वयथुरागिणी ॥ १७ ॥
वर्त्मनोऽन्तः खरा रूक्षाः पिटिकाः सिकतोपमाः ।
सिकतावर्त्म कथ्यन्तु कर्दमं कर्दमोपमम् ॥ १८ ॥
बहलं बहलैर्मांसैः सवर्णैश्चीयते समैः ।
कुकूणकः शिशोरेव दन्तोत्पत्तिनिमित्तजः ॥ १९ ॥
स्यात्तेन शिशुरुच्छूनताम्राक्षो वीक्षणाक्षमः ।
स वर्त्मशूलपैच्छिल्यकर्णनासाक्षिमर्दनैः ॥ २० ॥
पक्ष्मोपरोधे सङ्कोचो वर्त्मना जायते तथा ।
खरतान्तर्मुखत्वञ्च लोम्नामन्यानि वा पुनः ॥ २१ ॥
कण्टकैरिव तीक्ष्णाग्रैर्दृष्टं तैरस्रि सूयते ।
ऊष्यते चानिलाद्विड्वाद्वः शान्तिरुद्भूतैः ॥ २२ ॥
कनीनके बहिर्वर्त्म कठिनो ग्रन्थिरुन्नतः ।
ताम्रः पक्कोऽस्रपूयास्रुदलच्याधायते मुहुः ॥ २३ ॥
वर्त्मान्तर्मांसपिण्डाभः श्वयथुर्ग्रथितो रुजः ।
सास्रैः स्यादर्बुदो दोषैर्विषमो वाप्यतस्त्रलः ॥ २४ ॥
चतुर्विंशतिरित्येते व्याधयो वर्त्मसंश्रयाः ।
साध्योऽत्र भेषजैः साध्यो ह्यौ ततोऽर्शश्च वर्जयेत् ॥ २५ ॥
पक्ष्मोपरोधो याप्यः स्याच्छेषांश्छस्त्रेण साधयेत् ।
कुट्यैत्पक्ष्मसदनं छिन्द्यात्तेष्वपि चार्बुदम् ॥ २६ ॥
भिन्द्याल्लगणकुम्भीकाविसोत्सङ्गाञ्जनालजीः ।
पोथकीश्यावसिकताश्लिष्टोत्क्लिष्टचतुष्टयम् ।
सकर्दमं सबद्दलं विलिखेत्सकुकूणकम् ॥ २७ ॥

नवमोऽध्यायः ।

अथातो वर्त्मरोगप्रतिषेध व्याख्यास्यामः ।

क्षच्छोन्मीले पुराणाज्यं द्राक्षाकल्काम्बुसाधितम् ।
ससित योजयेत् स्निग्धं नस्यधूमाञ्जनादि च ॥ १ ॥
कुम्भीकावर्त्म लिखित सैन्धवप्रतिसारितम् ।
यष्टीधात्रीपटोलीनां क्वाथेन परिषेचयेत् ॥ २ ॥
निवातेऽधिष्ठितस्याग्नेः शुद्धस्योत्तानशायिनः ।
बहि क्षौणाम्बुतप्तेन स्वेदितं वर्त्म वाससा ॥ ३ ॥
निर्भुज्य वस्त्रान्तरित वामाङ्गुष्ठाङ्गुलीधृतम् ।
न सस्ते चलति वा वर्त्मैवं सर्वतस्तत ॥ ४ ॥
मण्डलाग्रेण तन्निर्य्यक्कृत्वा शस्त्रपदाङ्कितम् ।
लिखेत्तेनैव पत्रैर्वा शाकशेफालिकादिजैः ॥ ५ ॥
फेनेन तोयराशेर्वा पिच्छुना प्रसृजन्नसृक् ।
स्थिते रक्ते सुलिखितं सक्षौद्रैः प्रतिसारयेत् ॥ ६ ॥
यत् स्वमुक्तैरनु च प्रक्षाल्योष्णेन वारिणा ।
घृतेनासिक्तमभ्यक्त बध्नीयान्मधुसर्पिषा ॥ ७ ॥
ऊर्द्ध्वाधः कर्णयोर्दत्त्वा पिण्डीश्च यवसक्तुभिः ।
द्वितीयेऽहनि मुक्तस्य परिषेकं यथायथम् ॥ ८ ॥
कुर्य्यात् चतुर्थे नस्यादीन्मुञ्चेदेवाक्षि पञ्चमे ।
समं नखनिभं शोफकण्डूघर्षाद्यपीडितम् ॥ ९ ॥
विद्यान्मुलिखित वर्त्म लिखेद् भूयो विपर्य्यये ।
रुक्पक्ष्मवर्त्मसदनं सञ्जनादतिलेखनात् ॥ १० ॥
स्नेहस्वेदादिकस्तस्मिन्निष्टो वातहरः क्रमः ।
अभ्यज्य नवनीतेन क्षेत्तरोध्र प्रलेपयेत् ॥ ११ ॥
एरण्डमूलकल्केन पुटपाके पचेत्ततः ।

स्निग्धं प्रक्षालितं शुष्कं चूर्णितं पोटलीकृतम् ॥ १२ ॥
स्त्रियाः क्षीरेण कृष्णाया वा मृक्षितं नेत्रसेचनम् ।
शालितण्डुलकल्केन लिप्तं तद्वत्परिष्कृतम् ॥ १३ ॥
कुर्य्यान्नेत्रेऽतिलिखिते मृदितं दधिमस्तुना ।
केवलेनापि वा सेकं मस्तुना जाङ्गलाशिनः ॥ १४ ॥
पिटिकां व्रीहिवक्त्रेण भित्त्वा तु कठिनोन्नताम् ।
निष्पीडयेदनु विधिः परिशेषस्तु पूर्ववत् ॥ १५ ॥
लेखने भेदने चाय क्रमः सर्वत्र वर्त्मनि ।
पित्तास्रोत्क्लिष्टयोः स्वादुस्कन्धसिद्धेन सर्पिषा ॥ १६ ॥
शिराविमोक्षः स्निग्धस्य विहच्छ्रेष्ठं विरेचनम् ।
लिखिते स्रुतरक्ते च वर्त्मनि क्षालनं हितम् ॥ १७ ॥
यष्टीकषायः सेकस्तु क्षीरं चन्दनसाधितम् ।
पक्ष्मणां सदने सूच्या रोमकूपान् विकुट्टयेत् ॥ १८ ॥
ग्राहयेद्वा जलौकोभिः पयसेक्षुरसेन वा ।
वमनं नावनं सर्पिः स्रुतं मधुरशीतलैः ॥ १९ ॥
सचूर्णं पुष्पकासीसं भावयेत् सुरसारसैः ।
ताम्रे दशाह परमं पक्ष्मशातं तदञ्जनम् ॥ २० ॥
पोथकीर्लिखिताः शुण्ठीसैन्धवप्रतिसारिताः ।
उष्णाम्बुक्षालिताः सिञ्चेत् खदिराढ़किंशिशुभिः ॥ २१ ॥
मक्षिकैर्दिनिशाश्रेष्ठामधुकैर्वा समाक्षिकैः ।
कफोत्क्लिष्टे विलिखिते सक्षौद्रैः प्रतिसारणम् ॥ २२ ॥
सूक्ष्मैः सैन्धवकासीसमनोह्वाकणतार्क्ष्यजैः ।
वमनाञ्जननस्यादि सर्वञ्च कफजिद्धितम् ॥ २३ ॥
कर्त्तव्य लगणेष्वेतद्यान्तावग्निना दहेत् ।
कुकूणे खदिरश्रेष्ठानिम्बपत्रैः स्रुतं घृतम् ॥ २४ ॥
पीत्वा धात्री वमेत् कृष्णायष्टीसर्षपसैन्धवैः ।

अभयापिप्पलीद्राक्षाक्वाथेनैनां विरेचयेत् ॥ २५ ॥
मुस्ताहरिद्रानीलीकृष्णाकल्कं नालेपयेत् स्तनौ ।
धूपयेत्सर्षपैः साज्यैः शुद्धां क्वाथञ्च पाययेत् ॥ २६ ॥
यष्टीमधुस्तमधूकागुडूचीत्रिफलोद्भवम् ।
शिशोस्तु लिखित वर्त्म सुतास्तन्याम्बुजन्मभिः ॥ २७ ॥
धात्र्यश्मन्तकजम्बूत्थपत्रक्वाथेन सेचयेत् ।
प्रायः क्षीरघृताशित्वाद् बालानां श्लेष्मजा गदाः ॥ २८ ॥
तस्माद्वमनमेवाग्रे सर्वव्याधिषु पूजितम् ।
सिन्धूत्थकृष्णापामार्गबीजाज्यस्तन्यमाक्षिकम् ॥ २९ ॥
चूर्णो वचायाः सक्षौद्रो मदनं मधुकान्वितम् ।
क्षीरं क्षीरान्नभक्षञ्च भजतः क्रमशः शिशोः ॥ ३० ॥
वमनं सर्वरोगेषु विशेषेण कुकूणके ।
सप्तलारससिद्धाज्यं योज्यं चोभयशोधनम् ॥ ३१ ॥
त्रिनिशारोध्रयष्ट्याह्वरोहिणीनिम्बपल्लवैः ।
कुकूणके हिता वर्त्तिः पिष्टैस्ताम्बरजोन्वितैः ॥ ३२ ॥
क्षीरक्षौद्रघृतोपेतं दग्धं वा लोहितं रजः ।
एलारसोनकृतकयष्टीक्षौद्रफणिज्झकैः ॥ ३३ ॥
वर्त्तिः कुकूणपोथक्योः सुरापिष्टैः सकट्फलैः ।
पक्ष्मरोधे प्रहर्षेषु शुद्धदेहस्य रोमसु ॥ ३४ ॥
उत्सृज्य द्वौ भ्रुवोऽधस्ताद्भागौ भागञ्च पक्ष्मतः ।
यवमात्रं यवाकार तिर्यक्छित्त्वाऽऽर्द्रवाससा ॥ ३५ ॥
अपनेयमसृक् तस्मिन्नल्पीभवति शोणितम् ।
सीव्येत्कुटिलया सूच्या सूक्ष्ममात्रान्तरैः पदैः ॥ ३६ ॥
बध्वा ललाटे पट्टञ्च तत्र सीवनसूत्रकम् ।
नातिगाढ़ञ्च तं सूच्या निश्चिपेदथ योजयेत् ॥ ३७ ॥
मधुसर्पिः कवलिकां न चास्मिन् बन्धमाचरेत् ।

न्यग्रोधादिकषायैश्च सक्षौद्रैः सेचयेद्भृशम् ॥ ३८ ॥
पञ्चमे दिवसे सूत्रमपनीयावचूर्णयेत् ।
गैरिकेण व्रणं युञ्जात्तीक्ष्णं नस्याञ्जनादि च ॥ ३९ ॥
दहेदग्नौ निर्भुज्य वर्त्मदोषाश्रया बलीम् ।
सन्दंशेनाधिकं पक्ष्म हृत्वा तस्याश्रयं दहेत् ॥ ४० ॥
सूच्यग्रेणाग्निवर्णेन दाहो बाह्यालजे पुनः ।
भिन्नस्य क्षारवह्निभ्यां सुच्छिन्नस्यार्बुदस्य च ॥ ४१ ॥

दशमोऽध्यायः ।

अथातः सन्धिसितासितरोगविज्ञानमाख्यास्यते ।
वायुः क्रुद्धः शिराः प्राप्य जलाभं जलवाहिनीः ।
अश्रु स्रावयते वर्त्म शुक्लसन्धेः कनीनकात् ॥ १ ॥
तेन नेत्रं सरुग्रागशोफं स्यात्स जलास्रवः ।
कफात्कफस्रवे श्वेतं पिच्छिलं बहलं द्रवेत् ॥ २ ॥
कफेन शोफस्तीक्ष्णाग्रैः क्षारबुद्बुदकोपमैः ।
पृथुमूलबलैः स्निग्धैः सवर्णैर्मृदुपिच्छिलैः ॥ ३ ॥
महापाकैः कण्डूमानुपनाहैः स नीरुजः ।
रक्तात् रक्तस्रवे ताम्रं बहुष्णं चाश्रु संस्रवेत् ॥ ४ ॥
वर्त्मसन्ध्याश्रया शुक्ले पिटिका दाहशूलिनी ।
ताम्रा मुद्गोपमा भिन्ना रक्तं स्रवति पर्वणि ॥ ५ ॥
पूयास्रावे मलाः सास्रवर्त्मसन्धेः कनीनकात् ।
स्रावयन्ति मुहुः पूयं सास्रत्वङ्मांसपाकतः ॥ ६ ॥
पूयालसो व्रणः सूक्ष्मः शोफसंरम्भपूर्वकः ।
कनीनसन्ध्यावाश्रायी पूयास्रावी सवेदनः ॥ ७ ॥
कनीनस्यान्तरलजो शोफो रक्तोदद्राहवान् ।
अपाङ्गे वा कनीने वा कण्डूपाकरुपोटवान् ॥ ८ ॥

पूयास्रावी कृमिग्रन्थिर्ग्रन्थिकृमियुतोऽर्त्तिमान् ।
उपनाहकृमिग्रन्थिपूयालसकपर्वणी. ॥ ९ ॥
शस्त्रेण साधयेत्पञ्चसालजी नास्रवांस्त्यजेत् ।
पित्तं कुर्य्यात्सिते विन्दूनसितश्यावपीतकान् ॥ १० ॥
मलाक्तादर्शतुल्यं वा सर्वं शुक्लं सदाहरुक् ।
रोगोऽयं शुक्लिकासंज्ञः सशुक्लेऽहर्दाह्ज्वरः ॥ ११ ॥
कफाच्छुक्लं समं श्वेतं चिरवृद्ध्यधिमांसकम् ।
शुक्लार्म्म शोफस्वरुजः सवर्णं बहलं मृदु ॥ १२ ॥
गुरुः स्निग्धोऽम्बुविन्दाभो बलासग्रथितं स्मृतम् ।
बिन्दुभिः पिष्टधवलैरुत्सन्नैः पिष्टकं वदेत् ॥ २३ ॥
रक्तराजीततं शुक्लमुष्णते यस्त्ववेदनम् ।
अशोफाश्रूपदेहं च शिरोत्पातः सशोणितात् ॥ १४ ॥
उपेक्षितः शिरोत्पातो राजीस्ता एव वर्द्धयन् ।
कुर्य्यात्तासं शिराहर्षं तेनाक्ष्युद्वीक्षणाक्षमम् ॥ १५ ॥
शिराजालं शिराजालं वृहद्वृत्तं घनोन्नतम् ।
शोणितार्म्मसमं श्लक्ष्णं पद्माभमधिमांसकम् ॥ १६ ॥
नीरुक् श्लक्ष्णोऽर्ज्जुनं विन्दुः शशलोहितलोहितः ।
वृद्धाशुवृद्धारुक्षांस प्रस्तारिश्यावलोहितम् ॥ १७ ॥
प्रस्तार्य्यर्म्ममलैः सास्रैः स्रावार्मं स्रावसन्निभम् ।
शुक्लासृक्पिण्डवच्छ्यावं यन्मांसं बहलं पृथु ॥ १८ ॥
अधिमांसार्मं तद्दाहघर्षवन्त्यः शिराहृताः ।
कृष्णास्रावाः शिरासंज्ञाः पिटिकाः सर्षपोपमाः ॥ १९ ॥
शुक्लहर्षशिरोत्पातपिष्टकग्रथितार्ज्जुनम् ।
साधयेदौषधैः षट्क शेषं शस्त्रेण सप्तकम् ॥ २० ॥
नवोत्थं तदपि द्रव्यैः अर्मोक्त यच्च षड्विधा ।
तच्छेद्यमसितप्रायं मांसस्रावशिराहृतम् ॥ २१ ॥

चर्मौदालवदुच्छ्रायि दृष्टिप्राप्तं च वर्जयेत् ।
पित्तं कृष्णेऽथवा दृष्टौ शुक्लं तोदाश्रुरागवत् ॥ २२ ॥
क्लित्त्वा त्वचं जनयति तेन स्यात् कृष्णमण्डलम् ।
पक्वजम्बूनिभं किञ्चिन्निम्नच्च क्षतशुक्लकम् ॥ २३ ॥
तत् कृच्छ्रसाध्यं याप्यं तु द्वितीयपटलव्यधात्,
तत्र तोदादिबाहुल्यं सूचिविद्धाभकृष्णता ॥ २४ ॥
तृतीयपटलच्छेदादसाध्यं निचितं व्रणैः ।
शङ्खशुक्लं कफाच्छ्यावं नातिरुक् शुक्लशुक्लकम् ॥ २५ ॥
आताम्रपिच्छिलास्रावरुगाताम्रपिटिकातिरुक् ।
अजाविट् सदृशोच्छ्रायकाष्णर्यावर्ज्यासृजाजका ॥ २६ ॥
शिराशुक्लं मलैः सर्वैः स्रावि दुष्टं कृष्णमण्डलम् ।
सतोददाहताम्राभिः शिराभिरवतन्यते ॥ २७ ॥
अनिमित्तोष्णशीताच्छघनासृक् च तत्त्यजेत् ।
दोषैः सर्वैः सकृत् कृष्णं नीयते शुक्लरूपताम् ॥ २८ ॥
धवलाम्भोपलिप्ताभं निष्पावार्द्धदलाकृति ।
अतितीव्ररुजारागदाहस्रावयथुपीडितम् ॥ २९ ॥
पाकात्ययेन तच्छुक्लं वर्जयेत्तीव्रवेदनम् ।
यस्य वाऽऽक्षिञ्जनाभोऽन्तःस्रावं यद्वा सलोहितम् ॥ ३० ॥
अत्युत्सेधावगाढं वा सास्रुनाड्रीव्रणाहतम् ।
पुराणं विषमं मध्ये विच्छिन्नं यच्च शुक्लकम् ।
पञ्चैत्युक्ता गदाः कृष्णे साध्यासाध्यविभागतः ॥ ३१ ॥

एकादशोऽध्यायः ।

अथातः सन्धिसितासितरोगप्रतिषेधं व्याख्यास्यामः ।
उपनाह्य भिषक् स्विन्नं भिन्नं व्रीहिमुखेन च ।
लेखयेच्चण्डलाग्रेण ततश्च प्रतिसारयेत् ॥ १ ॥

पिप्पलीचौद्रसिन्धूत्थैर्बध्नीयात् पूर्ववत्ततः।
पटोलपत्रामलकक्काथेनाक्षोतयेच्च तम् ॥ २ ॥
पर्वणी वडिशेनात्ता बाह्यसन्धिविभागतः।
हृद्विपत्रेण वर्त्मार्द्धं स्यादृजुगतिरन्यथा ॥ ३ ॥
चिकित्सा चार्मवत्क्षौद्रसैन्धवप्रतिसारिता।
पूयालसे शिरां विध्येत्ततस्तमुपनाहयेत् ॥ ४ ॥
कुर्वीत चाक्षिपाकोक्तं सर्वं कर्म्म यथाविधि।
सैन्धवार्द्रकाकासीसलोहताम्रैः सचूर्णितैः ॥ ५ ॥
चूर्णाञ्जनं प्रयुञ्जीत सक्षौद्रैर्वा रसक्रियाम्।
क्रमिग्रन्थिं करीषेण स्विन्न भित्त्वा विलिख्य च ॥ ६ ॥
त्रिफलाक्षौद्रकासीससैन्धवैः प्रतिसारयेत्।
पित्ताभिष्यन्दवच्छुक्तिं बलासाक्षयपिष्टकौ ॥ ७ ॥
कफाभिष्यन्दवन्मुक्त्वा शिराव्यधमुपाचरेत्।
बीजपूररसाक्तञ्च व्योषकट्फलमञ्जनम् ॥ ८ ॥
जातीमुकुलसिन्धूत्थदेवदारुमहौषधैः।
पिष्टैः प्रसन्नया वर्त्तिः शोफकण्डूघ्नमञ्जनम् ॥ ९ ॥
रक्तस्यन्दवदुत्पातहर्षजालार्जुनक्रिया।
शिरोत्पाते विशेषेण घृतमाक्षिकमञ्जनम् ॥ १० ॥
शिराहर्षे तु मधुना श्लक्ष्णघृष्टं रसाञ्जनम्।
अर्जुने शर्करामस्तुक्षौद्रैराश्योतनं हितम् ॥ ११ ॥
स्फटिकः कुङ्कुमं शङ्खो मधुको मधुनाञ्जनम्।
मधुना चाञ्जनं शङ्खः फेनो वा सितया सह ॥ १२ ॥
अर्मोक्तं पञ्चधा तत्तु न तु धूमाविलञ्च यत्।
रक्तं दधिनिभं यच्च शुक्लवर्त्तस्य भेषजम् ॥ १३ ॥
उत्तानस्येतरत् स्विन्न ससिन्धूत्थेन चाञ्जितम्।
रसेन बीजपूरस्य निमील्याक्षि विमर्दयेत् ॥ १४ ॥

दृश्यं संरोधिताक्षस्य प्रचलेऽर्माधिमांसके ।
घृतस्य निश्चलं मूर्ध्नि वर्त्मनोश्च विशेषतः ॥ १५ ॥
अपाङ्गमोक्षमाणस्य हृन्नेर्मणिकनीनकात् ।
बली स्याद्यत्र तत्रार्मं वड़िशेनावलम्बितम् ॥ १६ ॥
नात्यायत मुचुण्ड्या वा सूच्या सूत्रेण वा ततः ।
समन्तान्मण्डलाग्रेण मोचयेदथ माक्षिकम् ॥ १७ ॥
कनीनकमुपानीय चतुर्भागावशेषितम् ।
छिन्द्यात्कनीनके रक्तेद्दाहिनोश्वास्रुवाहिनीः ॥ १८ ॥
कनीनकव्यधादस्रनाडी चाक्ष्णि प्रवर्त्तते ।
हृन्नेर्मणि तथाऽपाङ्गात्पश्यतोऽस्य कनीनकात् ॥ १९ ॥
सम्यक् छिन्ने मधुव्योषसैन्धवप्रतिसारितम् ।
उष्णेन सर्पिषा सिक्तमभ्यक्तं मधुसर्पिषा ॥ २० ॥
बध्नीयात्सेचयेच्चैनं तृतीयादिदिनेषु च ।
करञ्जबीजसिद्धेन क्षीरेण क्वथितेस्तथा ॥ २१ ॥
सच्चीद्रैर्दिनिशारोध्रपटोलीयष्टिकिंशुकैः ।
कुरण्टमुकुलोपेतैर्मुच्येदेवाक्षि समये ॥ २२ ॥
सम्यक् छिन्ने भवेत्स्वास्थ्यं हीनातिच्छेदजान् गदान् ।
सेकाञ्जनप्रभृतिभिर्जयेल्लेखनहर्षणैः ॥ २३ ॥
सितामनःशिलाशैलसवर्णोत्पलनागरम् ।
अर्द्धकर्षोन्मितं तार्क्ष्यं पलार्द्धेन मधुप्लुतम् ॥ २४ ॥
अञ्जनं श्लेष्मतिमिरपिल्लशुक्लार्मशोषजित् ।
त्रिफलैकतमद्रव्यत्वचं पानीयकल्कितम् ॥ २५ ॥
शरावपिहितां दग्ध्वा कपाले चूर्णयेत्ततः ।
पृथक्शेषौषधरसैः पृथगेव च भाविता ॥ २६ ॥
सा मषी शोषिता पेष्या भूयो हिलवणान्विता ।
लौहेतान्यञ्जनान्याहुर्लेखनानि परे निमिः ॥ २७ ॥

शिराजाले शिरायास्तु कठिनालेखनौषधैः ।
न सिद्धात्यर्मवर्त्मानां पिटिकानाञ्च साधनम् ॥ २८ ॥
दोषानुरोधाच्छुक्रेषु स्निग्धरूक्षं वराहृतम् ।
तिक्तं मूर्द्धमस्तक्स्रावो रेकसेकादि चेष्यते ॥ २९ ॥
त्रिस्त्रिर्वृद्धारिणा पक्वं क्षतशुक्रे घृतं पिबेत् ।
शिरया तु हरेद्रक्तं जलौकोभिश्च लोचनात् ॥ ३० ॥
सिद्धेनोत्पलकाकोलीद्राक्षायष्टिविदारिभिः ।
सर्पिषेनाजपयसा सेचनं सलिलेन वा ॥ ३१ ॥
रागाश्रुवेदनाशान्तौ परं लेखनमञ्जनम् ।
वर्त्तयो जातिमुकुलत्वाचागैरिकचन्दनैः ॥ ३२ ॥
प्रसादयन्ति पित्तास्रं घ्नन्ति च क्षतशुक्रकम् ।
दन्तैर्दन्तिवराहोष्ट्रगवाश्वाजखरोद्भवैः ॥ ३३ ॥
सशङ्खमौक्तिकाम्भोधिफेनैर्मरिचपादिकैः ।
क्षतशुक्रमपि व्यापि दन्तवर्त्तिर्निवर्त्तयेत् ॥ ३४ ॥
तमालपत्रं गोदन्तशङ्खफेनोऽस्थि गार्दभम् ।
ताम्रञ्च वस्तिमूत्रेण सर्वशुक्रकनाशिनी ॥ ३५ ॥
रक्तानि दन्ताः शृङ्गाणि धातवस्त्यूषणं त्रुटिः ।
करञ्जबीजं लशुनो वणसादि च भेषजम् ॥ ३६ ॥
सव्रणाव्रणगम्भीरत्वक्स्थशुक्रघ्नमञ्जनम् ।
निम्नमुन्नमयेत् स्नेहपाननस्यरसाञ्जनैः ॥ ३७ ॥
सरुजं नीरुजं क्षिप्युटपाकेन शुक्लकम् ।
शुक्लशुक्ले निशायष्टीसारिवाशावराम्भसा ॥ ३८ ॥
सेचनं रोध्रपोटल्या कोष्णाम्भोमन्थयाऽथवा ।
वृहतीमूलयष्ट्याह्वतास्रसैन्धवनागरैः ॥ ३९ ॥
धात्रीफलाम्बुना पिष्टैर्लेपितं ताम्रभाजनम् ।
यवाम्लामलकीपत्रैर्बहुशो धूपयेत्ततः ॥ ४० ॥

तत्र कुर्वीत गुटिकास्ता जलक्षौद्रप्रेषिताः ।
महानीला इति ख्याताः शुक्लशुक्रहराः परम् ॥ ४१ ॥
स्थिरे शुक्रे घने चास्य बहुशोपहरेदसृक् ।
शिरःकायविरेकांश्च पुटपाकांश्च भूरिशः ॥ ४२ ॥
कुर्य्यान्मरिचवैदेहीशिरीषफलसैन्धवैः ।
घर्षणं त्रिफलाक्काथपीतेन लवणेन वा ॥ ४३ ॥
कुर्य्यादञ्जनयोगौ वा श्लोकार्द्धगदिताविमौ ।
शङ्खकोलास्थिकतकद्राक्षामधुकमाक्षिकैः ॥ ४४ ॥
सुरादन्तार्णवमलैः शिरीषकुसुमान्वितैः ।
धात्रीफणिज्झकरसे चारो लाङ्गलिकोद्भवः ॥ ४५ ॥
उषितः शोषितश्चूर्णः शुक्रहर्षणमञ्जनम् ।
मुद्गा वा निस्तुषाः पिष्टाः शङ्खक्षौद्रसमा युताः ॥ ४६ ॥
सारो मधूकाम्बुमान् मज्जा वाक्षात्तमाक्षिका ।
गोखराश्वोष्ट्रदशनाः शङ्खः फेनः समुद्रजः ॥ ४७ ॥
वर्त्तिर्जुनतोयेन कृष्णशुक्रकनाशिनी ।
उत्पन्नं वा सशल्यं वा शुक्रं बालादिभिर्लिखेत् ॥ ४८ ॥
मिराशुक्रे त्वदृष्टिघ्ने चिकित्सा व्रणशुक्रवत् ।
पुण्ड्रयष्ट्याह्वकाकोलीसिंहीलोहनिशाञ्जनम् ॥ ४९ ॥
कल्कितं छागदुग्धेन सघृतैर्धूपितं यवैः ।
वाचीपत्रैश्च पर्य्यायाद्वर्त्तिर्नेत्राञ्जनं परम् ॥ ५० ॥
अशान्तावर्मवच्छस्त्रमजकाख्ये च योजयेत् ।
अजकायामसाध्यायां शुक्रेऽन्यत्र च तद्विधैः ॥ ५१ ॥
वेदनोपशम स्नेहपानास्रक्स्रावणादिभिः ।
कुर्य्याद्दोषबलतां जेतु शुक्रस्योल्लेखसाधनम् ॥ ५२ ॥
नालिकेरास्थिभल्लाततालवशकरीरजम् ।
भस्माङ्गैः स्रावयेत्ताभिर्भावयेत्क्षारभास्थिजम् ॥ ५३ ॥

चूर्णं शुक्लेष्वसाध्येषु तद्वैवर्ण्येन्नमञ्जनम् ।
साध्येषु साधनायालमिदमेव च शोलितम् ॥ ५४ ॥
अजकां पार्श्वतो विध्वा सूत्वा विस्राव्य शोदकम् ।
समं प्रपीड्याङ्गुष्ठेन वसार्द्रेणानुपूरयेत् ॥ ५५ ॥
व्रणं गोमांसचूर्णेन बद्धं बद्धं विमुच्य च ।
सप्तरात्रात् व्रणे रूढे क्षणभागे समे स्थिरे ॥ ५६ ॥
स्नेहाञ्जनञ्च कर्त्तव्यं नस्यञ्च क्षीरसर्पिषा ।
तथापि पुनराधाने भेदच्छेदादिकां क्रियाम् ।
युक्त्या कुर्य्याद्यथा नातिच्छेदेन स्यान्निमज्जनम् ॥ ५७ ॥
नित्यञ्च शुक्लेषु घृतं यथास्वं पाने च मर्शे च हृतं विदध्यात् ।
न क्षीयते लब्धबला तथान्तस्तीक्ष्णाञ्जनैर्हृक् सततं प्रयुक्तैः ॥ ५८ ॥

द्वादशोऽध्यायः ।

अथातो दृष्टिरोगविज्ञानीयमध्याय व्याख्यास्यामः ।
सिरानुसारिणि मले प्रथम पटलं श्रिते ।
अव्यक्तमीक्षते रूपं व्यक्तमप्यनिमित्ततः ॥ १ ॥
प्राप्ते द्वितीयं पटलमभूतमपि पश्यति ।
भूतं तु यत्नादासन्नं दूरे सूक्ष्मञ्च नेक्षते ॥ २ ॥
दूरान्तिकस्थं रूपञ्च विपर्य्यासेन मन्यते ।
दोषे मण्डलसस्थाने मण्डलानीव पश्यति ॥ ३ ॥
द्विधैक दृष्टिमध्यस्थे बहुधा बहुधा स्थिते ।
दृष्टेरभ्यन्तरगते ह्रस्वबुद्धिविपर्य्ययम् ॥ ४ ॥
नास्तिकस्थमधःसस्थे दूरग नोपरि स्थितम् ।
पार्श्वे पश्येन्न पार्श्वस्थे तिमिराख्योऽयमामयः ॥ ५ ॥
प्राप्नोति काचता दोषे तृतीयपटलाश्रिते ।
तेनोर्द्ध मीक्षते नाधस्तनुचैलावृतोपमम् ॥ ६ ॥

यथावर्णञ्च रज्येत दृष्टिर्हीयेत च क्रमात् ।
तथाप्युपेक्षमाणस्य चतुर्थं पटलं गतः ॥ ७ ॥
लिङ्गनाशं मलः कुर्वन् छादयेद् दृष्टिमण्डलम् ।
तत्र वातेन तिमिरे व्याविद्धमिव पश्यति ॥ ८ ॥
चलाविलारुणाभास प्रसक्तं वेत्तते मुहुः ।
जालानि केशान्मशकान् रश्मींश्चोपेक्षितेऽत्र च ॥ ९ ॥
काचीभूते दृगरुणा पश्यत्यास्यमनासिकम् ।
चन्द्रदीपाद्यनेकत्व बक्रमृज्वपि मन्यते ॥ १० ॥
हृद्व. काचदृग कुर्याद् रजोधूमावृतामिव ।
श्यावारुणाभां विस्तीर्णां सूक्ष्मां वा हतदर्शनाम् ॥ ११ ॥
सलिङ्गनाशो वाते तु सङ्कोचयति दृक्शिराः ।
दृग्मण्डल विशत्यन्तर्गम्भीरा दृगसौ स्मृता ॥ १२ ॥
पित्तजे तिमिरे विद्युत्खद्योतोद्योतदीपितम् ।
शिखितित्तिरिपिच्छाभ प्रायो नीलञ्च पश्यति ॥ १३ ॥
काचे दृक् काचनीलाभा तादृगेव च पश्यति ।
अर्केन्दुपरिवेषाग्निमरीचीन्द्रधनूंषि च ॥ १४ ॥
भृङ्गनीला निरालोका दृक् स्निग्धा लिङ्गनाशतः ।
दृष्टि. पित्तेन रूक्षाख्या सा रूक्षा रूक्षदर्शना ॥ १५ ॥
भवेत्पित्तविदग्धाख्या पीता पीताभदर्शना ।
कफेन तिमिरे प्रायः स्निग्धं श्वेतञ्च पश्यति ॥ १६ ॥
शङ्खेन्दुकुन्दकुसुमैः कुमुदैरिव चाचितम् ।
काचे तु निष्प्रभेन्द्वर्कप्रदीपाद्यैरिवाचितम् ॥ १७ ॥
सिताभा सा च दृष्टिः स्यात्लिङ्गनाशे तु लक्ष्यते ।
मूर्त्त कफो दृष्टिगतः स्निग्धो दर्शननाशनः ॥ १८ ॥
विन्दुर्जलस्येव चलः पद्मिनीपुटसंस्थितः ।
उष्णे सङ्कोचमायाति छायाया परिसर्पति ॥ १९ ॥

शङ्खकुन्देन्दुकुमुदस्फटिकोपमशुक्लिमा ।
रक्तेन तिमिरे रक्तं तमोभूतञ्च पश्यति ॥ २० ॥
काचेन रक्ता कृष्णा वा दृष्टिस्तादृक् च पश्यति ।
लिङ्गनाशेऽपि तादृग् दृङ् निष्प्रभा हृतदर्शना ॥ २१ ॥
ससर्गसन्निपातेषु विद्यात् सङ्कीर्णलक्षणान् ।
तिमिरादीनकस्माच्च तैः स्याद्व्यक्ताकुलेक्षणम् ॥ २२ ॥
तिमिरे शेषयोर्दृष्टौ चित्रो रागः प्रजायते ।
द्योत्यते नकुलस्येव यस्य दृङ् निचितामलैः ॥ २३ ॥
नकुलान्धः स तत्राक्षि चित्रः पश्यति नो निशि ।
अर्कोऽस्तमस्तकन्यस्तगभस्तौ स्तम्भमागताः ॥ २४ ॥
स्थगयन्ति दृशं दोषा दोषान्धः सगदोषरः ।
दिवाकरकरस्पृष्टा भ्रष्टा दृष्टिपथाच्चलाः ॥ २५ ॥
विलीनलीना यच्छन्ति व्यक्तमत्राक्षि दर्शनम् ।
उष्णतप्तस्य सहसा शीतवारिनिमज्जनात् ॥ २६ ॥
त्रिदोषरक्तसपृक्तो यात्यूष्मोर्द्वं ततोऽक्षिणी ।
दाहोषे मलिनं शुक्लमहन्याविलदर्शनम् ॥ २७ ॥
रात्रावाभ्यञ्च जायेत विदग्धोष्णेन सा स्मृता ।
भृशमस्त्राशनाद्दोषैः सास्रैर्या दृष्टिराचिता ॥ २८ ॥
सक्लेदकण्डूकलुषा विदग्धास्रेन सा स्मृता ।
शोकज्वराग्निरोरोगसन्तप्तस्यानिलादयः ॥ २९ ॥
धूमाविला धूमदर्शां दृशं कुर्युः स धूमरः ।
सहसैवाल्पसत्त्वस्य पश्यतो रूपमङ्गतम् ॥ ३० ॥
भास्वरं भास्करादि वा वाताद्या नयनाश्रिताः ।
कुर्वन्ति तेजः सशोथं दृष्टिं मुषितदर्शनाम् ॥ ३१ ॥
वैदूर्यवर्णां स्तिमितां प्रकृतिस्थामिवाव्यथाम् ।
औपसर्गिकं दृष्ट्वेष लिङ्गनाशोऽत्र वर्जयेत् ॥ ३२ ॥

विना कफाल्लिङ्गनाशान् गम्भीरां ह्रस्वजामपि ।
षट् काचा नकुलान्धस्य याप्याः शेषांस्तु साधयेत् ।
द्वादशेति गदा दृष्टौ निर्दिष्टाः सप्तविंशतिः ॥ ३३ ॥

त्रयोदशोऽध्यायः ।

अथातस्तिमिरप्रतिषेध व्याख्यास्यामः ।

तिमिर काचतां याति काचोऽप्यान्ध्यमुपेक्षया ।
नेत्ररोगेष्वतो घोर तिमिरं साधयेद् द्रुतम् ॥ १ ॥
तुलां पचेत जीवन्त्या द्रोणेऽपां पादशेषिते ।
तत् क्वाथे द्विगुणं क्षीर घृतप्रस्थ विपाचयेत् ॥ २ ॥
प्रपौण्डरीककाकोलीपिप्पलीरोध्रसैन्धवैः ।
शताह्वामधुकद्राक्षासितादारुफलत्वचैः ॥ ३ ॥
कार्षिकैर्निशि तत्पीतं तिमिरापहरं परम् ।
द्राक्षाचन्दनमञ्जिष्ठाकाकोलीद्वयजीवकैः ॥ ४ ॥
सिताशतावरीमेदापुण्ड्राह्वमधुकोत्पलैः ।
पञ्चेन्द्रीणं घृतप्रस्थं समक्षीर पिचून्मितैः ॥ ५ ॥
हन्ति तत्काचतिमिररक्तराजीशिरोरुजः ।
पटोलनिम्बकटुकादार्वीसिन्धवरावृषम् ॥ ६ ॥
सधन्वयासत्रायन्ती पर्पटं पालिकं पृथक् ।
प्रस्थमामलकानाञ्च क्वाथयेदुल्वणेऽम्भसि ॥ ७ ॥
तदाढकेऽर्धपलिकैः पिष्टैः प्रस्थं घृतात्पचेत् ।
मुस्तभूनिम्बयष्ट्याह्वकुटजोदीच्यचन्दनैः ॥ ८ ॥
सपिप्पलीकैस्तत्सर्पिर्घ्राणकर्णाक्षिरोगजित् ।
विद्रधिज्वरदुष्टास्रविसर्पापचिकुष्ठनुत् ॥ ९ ॥
विशेषाच्छुक्लतिमिरनक्तान्ध्योष्णाम्लदाहनुत् ।
त्रिफलाष्टपलं क्वाथ्यं पादशेषं जलाढके ॥ १० ॥

तेन तुल्यपयस्केन त्रिफलापलकल्कवान् ।
अर्द्धप्रस्थो घृताक्तिप्तः सितया माक्षिकेण वा ॥ ११ ॥
युक्तं पिबेत्तिमिरी तद्युक्तं चैव वरारसम् ।
यष्टीमधुद्विकाकोलीक्षीराघ्रीक्षुणामृतोत्पलैः ॥ १२ ॥
पालिकैः ससिताद्राक्षैर्घृतप्रस्थं पचेत्समैः ।
अजाक्षीरवरावासामार्कवस्वरसैः पृथक् ॥ १३ ॥
महावैफलमित्येतत्परं दृष्टिविकारजित् ।
वैफलेनाथ हविषा लिहानस्त्रिफलां निशि ॥ १४ ॥
यष्टीमधुकसंयुक्तां मधुना च परिप्लुताम् ।
मासमेकं हिताहारः पिबन्नामलकोदकम् ॥ १५ ॥
सौपर्णं लभते चक्षुरित्याह भगवान्निमिः ।
ताम्रायोर्हेमयष्ट्याक्तसिताजीर्णाज्यमाक्षिकैः ॥ १६ ॥
संयोजिता यथाकामं तिमिरघ्नी वरा वरा ।
सघृतं वा वराक्काथं शीलयेत्तिमिरामयी ॥ १७ ॥
अपूपसूपसक्तून् वा त्रिफलाचूर्णसंयुतान् ।
पायसं वा वरायुक्तं शीतं समधुशर्करम् ॥ १८ ॥
प्रातर्भक्तस्य वा पूर्वमद्यात्यथां पृथक् पृथक् ।
मृद्वीकां शर्कराक्षौद्रैः सततं तिमिरातुरः ॥ १९ ॥
स्रोतोजांशांश्चतुःषष्टिं ताम्रायोरूप्यकाञ्चनैः ।
युक्तान् प्रत्येकमेकांशैरन्धमूषोदरस्थितान् ॥ २० ॥
धापयित्वा समाहृत्त ततस्तच्च निषेचयेत् ।
रसस्कन्धकषायेषु सप्तकृत्वः पृथक् पृथक् ॥ २१ ॥
वैदूर्यमुक्ताशङ्खानां त्रिभिर्भागैर्युतं ततः ।
चूर्णाञ्जनं प्रयुञ्जीत सत्त्वं तिमिरापहम् ॥ २२ ॥
मांसीत्रिजातकायःकुङ्कुमनीलोत्पलाभयातुल्यैः ।
सितकाचशङ्खफेनकमरिचाञ्जनपिप्पलीमधुकैः ॥ २३ ॥

चन्द्रेऽश्विनीसनाथे सुचूर्णितैरञ्जयेद्युगलमक्ष्णोः ।
तिमिरार्मरक्तराजीकण्डूकाचादिशममिच्छन् ॥ २४ ॥
मरिचवरलवणभागौ भागौ द्वौ कणसमुद्रफेनाभ्याम् ।
सौवीरभागनवकं चित्रायां चूर्णितं कफामयजित् ॥ २५ ॥
द्राक्षामृणालीक्षरसे क्षीरमद्यवसासु च ।
पृथक् दिव्यासु स्रोतोजं सप्तकृत्वो निषेचयेत् ॥ २६ ॥
तच्चूर्णित स्थित शङ्खे दृक्प्रसादनमञ्जनम् ।
शस्त सर्वाक्षिरोगेषु विदेहपतिनिर्मितम् ॥ २७ ॥
निर्दग्ध वादराङ्गारैस्तुत्थ चैत्थ निषेचितम् ।
क्रमादजापयः सर्पिः क्षौद्रे तस्मात् पलद्वयम् ॥ २८ ॥
कार्षिकैस्ताप्यमरिचस्रोतोजकटुकानतैः ।
पटुरोध्रशिलापथ्याकणैलाञ्जनफेनिकैः ॥ २९ ॥
युक्त पलेन यष्ट्याश्च मूषास्तर्धातचूर्णितम् ।
हन्ति काचार्मनक्ताभ्यरक्तराजी. सुशीलितः ॥ ३० ॥
चूर्णो विशेषात्तिमिरं भास्करो भास्करो यथा ।
विशङ्गागा भुजङ्गस्य गन्धपाषाणपञ्चकम् ॥ ३१ ॥
शुल्वतालकयोर्द्वौ द्वौ वङ्गस्यैकोऽञ्जनात्तयम् ।
अश्मभूधीक्षत भ्रातं पक्व विमलमञ्जनम् ।
तिमिरान्तकर लोके द्वितीय इव भास्करः ॥ ३२ ॥
गोमूत्रे क्षगणरसेऽम्लकाञ्जिके च
स्त्रीस्तन्ये हविषि विषे च माक्षिके च ।
यत्तुत्थं ज्वलितमनेकशो निषिक्तं
तत् कुर्याद्गरुडसमं नरस्य चक्षुः ॥ ३३ ॥
श्रेष्ठाजल भृङ्गरस सविषाज्यमजापयः ।
यष्टीरसश्च यत्तीस सप्तकृत्वः पृथक् पृथक् ॥ ३४ ॥
तप्त तप्त पायित तच्छलाका नेत्रे युक्ता साञ्जनाञ्जना वा ।

तैमिर्यार्मस्रावपैच्छिल्यपैल्लं कण्डूं जाड्यं रक्तराजीश्च हन्ति ॥३५

रसेन्द्रमूजगौ तुल्यौ तयोस्तुल्यमथाञ्जनम् ।
ईषत्कर्पूरसयुक्तमञ्जनं नयनामृतम् ॥ ३६ ॥

योगोऽध्वस्तरुणरविप्रकाशगल्ल-
स्तस्यास्य समयमृतस्य गोशकृद्भिः ।
निर्दग्धं समघृतमञ्जनञ्च पेष्यं
योगोऽयं नयनबलं करोति गार्ग्यम् ॥ ३७ ॥

कृष्णसर्पवदने सहविष्कं दग्धमञ्जनमनिस्तधूमम् ।
चूर्णितं नलदपत्रविमिश्रं भिन्नतारमपि रक्षति चक्षुः ॥ ३८ ॥

कृष्णं सर्पं मृतं न्यस्य चतुरस्रापि दृषिकान् ।
चीरकुम्भे तिसप्ताह क्लेदयित्वाथ मन्थयेत् ॥ ३९ ॥

तत्र यत्रवनीतं स्यात् पुष्णीयात्तेन कुक्कुटम् ।
अभ्यस्तस्य पुरीषेण प्रेक्षते ध्रुवमञ्जनात् ॥ ४० ॥

कृष्णसर्पवसा शल्लः कतकात् पलमञ्जनम् ।
रसक्रियेयमचिरादन्धानां दर्शनप्रदा ॥ ४१ ॥

मरिचानि दशार्द्धपिप्पुस्ताभ्यात्तुल्यार्द्धपलं पिप्पुर्यष्ट्याः ।
चीरार्द्धदग्धमञ्जनमप्रतिसाराख्यमुत्तमं तिमिरे ॥ ४२ ॥

अक्षवीजमरिचामलकत्वक् तुल्ययष्टिमधुकैर्जलपिष्टैः ।
छाययैव गुटिकाः परिशुष्का नाशयन्ति तिमिराण्यचिरेण ॥४३

मरिचामलकजलोद्भवतुत्थाञ्जनताम्यधातुभिः क्रमवृद्धैः ।
षण्मात्रिक इति योगस्तिमिरार्मकुदकाचकण्डूर्हन्ता ॥ ४४ ॥

रत्नानि रूप्यं स्फटिकं सुवर्णं स्रोतोऽञ्जन ताम्रमयं सशङ्खम् ।
कुचन्दनं लोहितगैरिकञ्च चूर्णाञ्जनं सर्वदृगामयघ्नम् ॥ ४५ ॥

तिलतैलमज्जतैलं भृङ्गस्वरसोऽसनाश्च निर्यूहः ।
आयसपात्रविपक्वं करोति दृष्टेर्बलं नस्यम् ॥ ४६ ॥

दोषानुरोधेन च नैकशस्तं स्नेहाम्रविस्रावणरेकनस्यैः ।

उपाचरेदञ्जनमूर्ध्ववस्तिवस्तिक्रियातर्पणलेपसेकैः ॥ ४७ ॥
सामान्यं साधनमिदं प्रतिदोषमतः शृणु ।
वातजे तिमिरे तत्र दशमूलाम्भसा घृतम् ॥ ४८ ॥
क्षीरे चतुर्गुणे श्रेष्ठाकल्कपक्वं पिबेत्ततः ।
त्रिफलापञ्चमूलानां कषायं क्षीरसंयुतम् ॥ ४९ ॥
एरण्डतैलसंयुक्तं योजयेच्च विरेचनम् ।
समूलजालजीवन्तीतुलां द्रोणेऽम्भसः पचेत् ॥ ५० ॥
अष्टभागस्थिते तस्मिंस्तैलप्रस्थं पयः समे ।
बलात्रितयजीवन्तीवरीमूलैः पलोन्मितैः ॥ ५१ ॥
यष्टीपलैश्चतुर्भिश्च लोहपात्रे विपाचयेत् ।
लोह एव स्थितं मासं नावनादूर्ध्वजत्रुजान् ॥ ५२ ॥
वातपित्तामयान् हन्ति तद्विशेषाद्दृगामयान् ।
केशास्यकान्तिरास्कन्धपुष्टिलावण्यकान्तिदम् ॥ ५३ ॥
सितैरण्डजटासिंहीफलदारुवचानतैः ।
घोषया बिल्वमूलैश्च तैलं पक्वं पयोऽन्वितम् ॥ ५४ ॥
नस्यं सर्वोर्ध्वजत्रूत्थवातश्लेष्मामयार्त्तिजित् ।
वसाञ्जने च वैय्याघ्री वाराही वा प्रशस्यते ॥ ५५ ॥
गृध्राहिकुक्कुटोत्था वा मधुकेनान्विता पृथक् ।
प्रत्यञ्जने च स्रोतोजं रसक्षीरघृते क्रमात् ॥ ५६ ॥
निषिक्तं पूर्ववद्योज्यं तिमिरघ्नमनुत्तमम् ।
न चेदेवं शमं याति ततस्तर्पणमाचरेत् ॥ ५७ ॥
शताह्वाकुष्ठनलदकाकोलीद्वययष्टिभिः ।
प्रपौण्डरीकसरलपिप्पलीदेवदारुभिः ॥ ५८ ॥
सर्पिरष्टगुणक्षीरं पक्वं तर्पणमुत्तमम् ।
मेदस्स्वच्छदेणेयाद्युग्धसिद्धात् खजाहतात् ॥ ५९ ॥
उद्धृतं साधितं तेजो मधुकोशीरचन्दनैः ।

श्वाविच्छल्यकगोधानां दत्तनित्तिरवर्हिणाम् ॥ ६० ॥
पृथक् पृथगनेनैव विधिना कल्पयेद्रसान्।
प्रसादनं स्नेहनञ्च पुटपाक प्रयोजयेत् ॥ ६१ ॥
वातपैत्तसवच्चात्र निरूहं सानुवासनम्।
पित्तजे तिमिरे सर्पिर्जीवनीयफलत्रयैः ॥ ६२ ॥
विपाचितं पाययित्वा स्निग्धस्य व्यधयेच्छिराम्।
शर्करैलालिहच्चूर्णैर्मधुयुक्तैर्विरेचयेत् ॥ ६३ ॥
सुशीतान् सेकलेपादीन् युञ्जात्रेत्रास्रमूर्द्धसु।
सारिवापद्मकोशीरमुक्ताशाबरचन्दनैः ॥ ६४ ॥
वर्त्तिः शस्त्राञ्जने चूर्णस्तथा पत्रोत्पलाञ्जनैः।
सनागपुष्पकर्पूरयष्ट्याह्वस्वर्णगैरिकैः ॥ ६५ ॥
सौवीराञ्जनतुत्थकशृङ्गीधात्रीफलस्फटिककर्पूरम्।
पञ्चाश पञ्चाश त्रंशमथैकाशमञ्जन तिमिरघ्नम् ॥ ६६ ॥
नस्यं चाज्यं शृतं क्षीरजीवनीयसितोत्पलैः।
स्नेषोड्डवेऽमृताक्वाथवराकणशृत घृतम् ॥ ६७ ॥
विध्येच्छिरां पीतवतो दद्याच्चानु विरेचनम्।
क्वाथं पूगाभयाशुण्ठीकृष्णाकुम्भनिकुम्भजम् ॥ ६८ ॥
क्षीवेरदारुद्विनिशाकृष्णाकल्कैः पयोऽन्वितैः।
द्विपञ्चमूलनिर्यूहे तैल पक्वञ्च नावनम् ॥ ६९ ॥
शङ्खप्रियङ्गुनेपालीकटुत्रिकफलत्रिकैः।
दृग्वैमल्याय विमला वर्त्तिः स्यात् कोकिला पुनः ॥ ७० ॥
कृष्णलोहरजोव्योषसैन्धवत्रिफलाञ्जनैः।
शशगोखरसिंहोष्ट्रद्विजलालाटमस्थि च ॥ ७१ ॥
श्वेतगोवालमरिचशङ्खचन्दनफेनकम्।
पिष्टं स्तन्याजदुग्धाभ्यां वर्त्तिस्तिमिरशुक्रजित् ॥ ७२ ॥
रक्तजे पित्तवत्सिद्धिः शीतैश्चास्र प्रसादयेत्।

द्राक्षया नलदरोध्रयष्टिभिः शङ्खताम्रहिमपद्मपद्मकैः ॥७३॥
सोत्पलैश्छगलदुग्धवर्त्तितैरञ्जनं तिमिरमाशु नश्यति ।
संसर्गसन्निपातोत्थे यथादोषोदयं क्रियाम् ॥ ७४ ॥
सिद्धं मधूकक्रमिजिन्मरिचामरदारुभिः ।
सचीरं नावनं तैलं पिष्टैर्लेपो मुखस्य च ॥ ७५ ॥
नतनीलोत्पलानन्तायष्ट्याह्वसुमिषत्त्वकैः ।
साधितं नावने तैलं शिरोवस्तौ च शस्यते ॥ ७६ ॥
दद्यादुशीरमिर्य्यूहचूर्णितं कणसैन्धवम् ।
तत्पूतं सघृतं भूयः पचेत् क्षौद्रं घने क्षिपेत् ॥ ७७ ॥
शीते चास्मिन् हितमिदं सर्वजे तिमिरेऽञ्जनम् ।
अक्षीणि मज्जपूर्णानि सत्त्वानां रात्रिचारिणाम् ॥ ७८ ॥
स्रोतोजाञ्जनयुक्तानि वहत्यभ्रसि वासयेत् ।
मासं विंशतिरात्रं वा ततश्चोद्धृत्य शोषयेत् ॥ ७९ ॥
समेषशृङ्गीपुष्पाणि सयष्ट्याह्वानि तानि तु ।
चूर्णितान्यञ्जनं श्रेष्ठं तिमिरे सान्निपातिके ॥ ८० ॥
काचेऽप्येषा क्रिया मुक्ता शिरां यन्त्रनिपीडिताम् ।
आम्राय स्रुर्मला दद्याच्छाव्ये रक्ते जलौकसः ॥८१॥
गुडः फेनोऽञ्जन कृष्णा मरिच कुङ्कुमाद्रजः ।
रसक्रियेयं सक्षौद्रा काचयापनमञ्जनम् ॥ ८२ ॥
नकुलान्ध्ये विदोषोत्थे तैमिर्य्यविहितो विधिः ।
रसक्रियाघृतक्षौद्रगोमयक्षरसद्रुतैः ॥ ८३ ॥
तार्क्ष्यगैरिकतालीसैर्निशान्ध्ये हितमञ्जनम् ।
दध्ना विघृष्टं मरिच रात्र्यन्ध्याञ्जनमुत्तमम् ॥ ८४ ॥
करञ्जिकोत्पलस्वर्णगैरिकाम्भोजकेसरैः ।
पिष्टैर्गोमयतोयेन वर्त्तिर्दोषान्ध्यनाशिनी ॥ ८५ ॥
अजामूत्रेण वा कौन्तीकृष्णास्रोतोजसैन्धवैः ।

कालानुसारीत्रिकटुत्रिफलालमनःशिलाः ॥ ८६ ॥
सफेनाच्छागदुग्धेन राजप्रव्ये वर्त्तयो हिताः ।
सन्निवेश्य यकृन्मध्ये पिप्पलीरदहन् पचेत् ॥ ८७ ॥
ताः शुष्का मधुना घृष्टा निशाप्रव्ये श्रेष्ठमञ्जनम् ।
खादेच्च क्षौद्रयुक्तो माक्षिपे तैलसर्पिषा ॥ ८८ ॥
घृते सिद्धानि जीवन्त्या. पल्लवानि च भक्षयेत् ।
तथातिमुक्तकैरण्डशेफाल्यभिरुजासि च ॥ ८९ ॥
सृष्ट घृत कुम्भयोनेः पत्रे पाने च पूजितम् ।
धूमराख्यास्लपित्तोष्णविदाहे जीर्णसर्पिषा ॥ ९० ॥
स्निग्धं विरेचयेच्छीतै. शीतैर्दिह्याच्च सर्वतः ।
गोशकृद्रसदुग्धाज्यैर्विपक्व शस्यतेऽञ्जनम् ॥ ९१ ॥
स्वर्णगैरिकतालीसचूर्णावापा रसक्रिया ।
मेदाशावरकानन्तामञ्जिष्ठादार्वियष्टिभिः ॥ ९२ ॥
क्षीराष्टांशं घृतं पक्व सतैल नावन हितम् ।
तर्पणं क्षीरसर्पिः स्यादशाम्यति शिराव्यधः ॥ ९३ ॥
चिन्ताभिघातभीशोकरौक्ष्यात् सोत्कटकासनात् ।
विरेकनस्यवमनपुटपाकादिविभ्रमात् ॥ ९४ ॥
विदग्धाहारवमनात् क्षुत्तृष्णादिविधारणात् ।
अक्षिरोगावसानाच्च पश्येत्तिमिररोगवत् ॥ ९५ ॥
यथास्व तत्र युञ्जीत दोषादीन् वीक्ष्य भेषजम् ।
सूर्योपरागानलविद्युदादिविलोकनेनोपहतेक्षणस्य ।
सन्तर्पणं स्निग्धहिमादि कार्यं तथाञ्जनं हेमघृतेन घृष्टम् ॥९६

चक्षूरक्षायां सर्वकालं मनुष्यै
र्यत्नः कर्त्तव्यो जीविते यावदिच्छा ।
व्यर्थो लोकोऽयं तुल्यरात्रिन्दिवानां
पंसामन्धानां विद्यमानेऽपि वित्ते ॥ ९७ ॥

त्रिफला रुधिरस्रुतिर्विशुद्धिर्मनसो निर्वृतिरव्ययश्च नस्यम् ।
शकुनासनतासयादपूजा घृतपानञ्च सदैव नेत्ररक्षा ॥ ९८ ॥
अहितादशनात्सदा निवृत्तिर्भृशभास्वच्चलसूक्ष्मवीक्षणाच्च ।
मुनिना निमिनोपदिष्टमेतत् परमं रक्षणमीक्षणस्य पुंसाम् ॥९९॥

चतुर्दशोऽध्यायः ।

अथातो लिङ्गनाशप्रतिषेधं व्याख्यास्यामः ।

विध्येत्सुजातं निःप्रेक्षं लिङ्गनाशं कफोद्भवम् ।
आवर्त्तक्यादिभिः षड्भिर्विवर्जितमुपद्रवैः ॥ १ ॥
सोऽसञ्जातो हि विषमो दधिमस्तुनिभस्तनुः ।
श्लाक्ष्णया ऽवक्लृष्टोऽपि पुनरूर्द्धं प्रपद्यते ॥ २ ॥
करोति वेदनां तीव्रां दृष्टिञ्च स्थगयेत्पुनः ।
श्लेष्मलैः पूर्यते चाशु सोऽन्यैः सोपद्रवैश्चिरात् ॥ ३ ॥
श्लैष्मिको लिङ्गनाशो हि सितत्वाच्छ्लेष्मणः सितः ।
तस्यान्यदोषाभिभवाद् भवत्यानीलता गदः ॥ ४ ॥
तत्रावर्त्तचला दृष्टिरावर्त्तक्यरुणा सिता ।
शर्करार्कपयोलेशनिचितेव घनाति च ॥ ५ ॥
राजीमतीहृन्निचिताशालिशूकाभराजिभिः ।
विषमच्छिन्नदग्धाभा सरुक्च्छिन्नाशुका स्मृता ॥ ६ ॥
दृष्टिः काश्यसमच्छाया चन्द्रकी चन्द्रकाकृतिः ।
छत्राभा नैकवर्णा च छत्रकी नाम नीलिका ॥ ७ ॥
न विध्येदशिराहीणां न दृक्पौनसकामिनाम् ।
नाजीर्णिभीरुवमितशिरःकर्णार्त्तिशूलिनाम् ॥ ८ ॥
अथ साधारणे काले शुद्धसम्भोजितात्मनः ।
देशे प्रकाशे पूर्वाह्णे भिषग् जानूच्चपीठगः ॥ ९ ॥

यन्त्रितस्योपविष्टस्य स्विन्नाक्तस्य मुखानिलैः ।
अङ्गुष्ठमर्दिते नेत्रे दृष्टी दृष्टोत्प्लुतं मलम् ॥ १० ॥
स्रवनासां प्रेक्षमाणस्य निष्कम्पं मूर्ध्नि धारिते ।
क्षणादर्द्धाङ्गुलं मुक्त्वा तदर्द्धेमपाङ्गतः ॥ ११ ॥
तर्ज्जनीमध्यमाङ्गुष्ठैः शलाकां निश्चलं धृताम् ।
दैवच्छिद्रं नयेत्यार्श्वादूर्ध्वं मामन्ययन्निव ॥ १२ ॥
सव्यं दक्षिणहस्तेन नेत्रं सव्येन चेतरत् ।
विध्येत् सुविद्धे शब्दः स्यादरुक्त्वाम्बुस्रवत् स्रुतिः ॥ १३ ॥
सान्वयन्नातुरं चानु नेत्रं स्तन्येन सेचयेत् ।
शलाकायास्ततोऽग्रेण निर्लिखेन्नेत्रमण्डलम् ॥ १४ ॥
अबाधमानः शनकैर्नासां प्रतिनुदंस्ततः ।
उत्क्षिप्यनाक्षापहरेद्दृष्टिमण्डलगं कफम् ॥ १५ ॥
स्थिरे दोषे चले वापि खेदयेदक्षिबाह्यतः ।
अथ दृष्टेषु रूपेषु शलाकामाहरेच्छनैः ॥ १६ ॥
घृताप्लुतं पिचुं दत्त्वा बध्नीयात्ततः ।
विश्रादन्येन पार्श्वेन तमुत्तानं हयोर्ध्वगे ॥ १७ ॥
निवाते शयनेऽभ्यक्तशिरःपादं हिते रतम् ।
क्षवथुं कासमुद्गारं क्षवणं धूमपानमश्रसः ॥ १८ ॥
अधोमुखस्थितिं स्नानं दन्तधावनभक्षणम् ।
सप्ताहं नाचरेत् स्नेहपीतवच्चात्र यन्त्रणा ॥ १९ ॥
श्लक्ष्णितो लङ्घयेल्लेको रूक्षे कोष्णेन सर्पिषा ।
सञ्शोषामलकं वाऽद्यमश्नीयात्सघृतं द्रवम् ॥ २० ॥
विलेपीं वा क्षपाहारस्य क्वाथैर्मुक्ताच्चि सेचयेत् ।
वातघ्नैः सप्तमे त्वक्षि सर्वथैवाक्षि मोचयेत् ॥ २१ ॥
यन्त्रणामनुरुध्येत दृष्टेराशैथ्यलाभतः ।
रूपाणि सूक्ष्मदीप्तानि सहसा नावलोकयेत् ॥ २२ ॥

शोफरागरुजादीनामधिमन्थस्य चोद्भवः ।
अहितैर्वेधदोषाच्च यथास्वं तानुपाचरेत् ॥ २३ ॥
कल्किताः सघृता दूर्वायवगैरिकसारिवाः ।
मुखालेपे प्रयोक्तव्या रुजारागोपशान्तये ॥ २४ ॥
ससर्षपास्तिलास्तद्वन्मातुलुङ्गरसाप्लुताः ।
पयस्यासारिवानन्तामञ्जिष्ठामधुयष्टिभिः ॥ २५ ॥
अजाक्षीरयुतैर्लेपः सुखोष्णः धर्मसंक्षयम् ।
रोध्रसैन्धवमृद्वीकामधुकैश्छागलं पयः ॥ २६ ॥
घृतमाश्योतनं योज्यं रुजारागविनाशनम् ।
मधुकोत्पलकुष्ठैर्वा द्राक्षालाक्षासितान्वितैः ॥ २७ ॥
वातघ्नसिद्धे पयसि घृतं सर्पिश्चतुर्गुणे ।
पद्मकादिप्रतीवापं सर्वकर्मसु शस्यते ॥ २८ ॥
शिरां तथानुपशमे स्निग्धस्विन्नस्य मोक्षयेत् ।
मन्थोक्तांश्च क्रियां कुर्याद् व्यधे रूढेऽञ्जनं मृदु ॥ २९ ॥
आढकीमूलमरिचहरितालरसाञ्जनैः ।
विड्वेऽक्षि सगुडा वर्त्तिर्योज्या दिव्याम्बुपेषिता ॥ ३० ॥

जातीशिरीषधवमेषविषाणपुष्प-
वैदूर्यमौक्तिकफलं पयसा सुपिष्टम् ।
आजेन ताम्रमसुना प्रतनु प्रदिग्धं
सप्ताहतः पुनरिदं पयसैव पिष्टम् ॥ ३१ ॥
पिण्डाञ्जनं हितमनातपशुष्कमक्ष्णि
विड्वे प्रसादजननं बलकृच्च दृष्टेः ।
स्रोतोजविद्रुमशिलाम्बुधिफेनतोक्ष्णै
रत्नैव तुल्यमुदितङ्गणकल्पनाभिः ॥ ३२ ॥

पञ्चदशोऽध्यायः ।

अथातः सर्वाक्षिरोगविज्ञानं व्याख्यास्यामः ।

वातेन नेत्रेऽभिष्यन्दे नासानाहोऽक्षिशोफता ।
शङ्खाक्षिभ्रूललाटस्य तोदस्फुरणभेदनम् ॥ १ ॥
शुष्काल्पादूषिकाशीतमच्छमश्रुचलारुजः ।
निमेषोन्मेषणं कृच्छ्राज्जन्तूनामिव सर्पणम् ॥ २ ॥
अध्याधातमिवाभाति सूक्ष्मैः शल्यैरिवाचितम् ।
स्निग्धोष्णैश्चोपशमनं सोऽभिष्यन्द उपेक्षितः ॥ ३ ॥
अधिमन्थो भवेत्तत्र कर्णयोर्नदनं भ्रमः ।
अरुण्येव च मथ्यन्ते ललाटाक्षिभ्रुवादयः ॥ ४ ॥
हताधिमन्थः सोऽपि स्यात् प्रमादात्तेन वेदनाः ।
अनेकरूपा जायन्ते व्रणो दृष्टौ च दृष्टिहा ॥ ५ ॥
मन्याक्षिशङ्खतो वायुरन्यतो वा प्रवर्त्तयेत् ।
व्यथां तीव्रामपैच्छिल्यरागशोफं विलोचनम् ॥ ६ ॥
सङ्कोचयति पर्य्यस्यु सोऽन्यतो वातसंज्ञितः ।
तद्वत्रेत्रं भवेज्जिह्मभ्रूनवातविपर्य्यये ॥ ७ ॥
दाहो धूमायनं शोफः श्यावता वर्त्मनो बहिः ।
अन्तःक्लेदोऽम्लपीतोष्णं रागः पीताभदर्शनम् ॥ ८ ॥
क्षारोक्षितत्वताक्षित्वं पित्ताभिष्यन्दलक्षणम् ।
ज्वलदङ्गारकीर्णाभं यकृत्खण्डसमप्रभम् ॥ ९ ॥
अधिमन्थे भवेत्तत्र स्यन्दे तु कफसम्भवे ।
जाड्यं शोफो महान् कण्डूर्निद्रानाभिनन्दनम् ॥ १० ॥
सान्द्रस्निग्धबहुश्वेतपिच्छावद्भूषिकाश्रुता ।
अधिमन्थे नतं कृष्णमुन्नतं शुक्लमण्डलम् ॥ ११ ॥
प्रसेको नासिकाध्मानं पांशुपूर्णमिवेक्षणम् ।

रक्तास्रगाजीदूषीकशुक्लमण्डलदर्शनम् ॥ १२ ॥
रक्तस्यन्देन नयन सपित्तस्यन्दलक्षणम् ।
मन्थेऽक्षि ताम्रपर्य्यन्तमुत्पाटनसमानरुक् ॥ १३ ॥
रागेण बन्धूकनिभं ताम्यति स्पर्शनाक्षम् ।
असृङ् निमग्नारिष्टाभं क्षणमग्न्याभदर्शनम् ॥ १४ ॥
अधिमन्था यथास्वञ्च सर्वे स्यन्दाधिकव्यथाः ।
शङ्खदन्तकपोलेषु कपाले चातिरुक्कराः ॥ १५ ॥
वातपित्तोत्तरं घर्षतोदभेदोपदेहवत् ।
रूक्षदारुणवर्त्माक्षिकृच्छ्रोन्मीलननिमीलनम् ॥ १६ ॥
विकूर्णनं विशुष्कत्वं शीतेच्छा शूलपाकवत् ।
उक्तः शुष्काक्षिपाकोऽयं सशोफः स्यात्रिभिर्मलैः ॥ १७
सरक्तैस्तत्र शोफोऽतिरुग्दाहस्तोदनादिमान् ।
पक्वोदुम्बरसङ्काश जायते शुक्लमण्डलम् ॥ १८ ॥
अश्रूणाशीतविशदपिच्छिलाच्छघनं मुहुः ।
अल्पशोफेऽल्पशोफस्तु पाकोऽन्यैर्लक्षणैस्तथा ॥ १९ ॥
अक्षिपाकात्ययेः शोफः सरुजः कलुषाश्रुता ।
कफोपदिग्धमसितं सितं प्रक्लेदरागवत् ॥ २० ॥
दाहो दर्शनसरोधो वेदनाश्चानवस्थिताः ।
अत्रसारोऽक्लतां नीतः पित्तरक्तोल्बणैर्मलैः ॥ २१ ॥
शिराभिर्नेत्रमारूढः करोति श्यावलोहितम् ।
सशोफदाहपाकाश्रु सृग्रं चाविलदर्शनम् ॥ २२ ॥
अक्लोषितोऽयमित्युक्ता गदाः षोड़श सर्वगाः ।
हताधिमन्थमेतेषु साक्षिपाकात्ययं त्यजेत् ॥ २३ ॥
वातोद्भूतः पश्चरात्रेण दृष्टिं सप्ताहेन श्लेष्मजातोऽधिमन्थः ।
रक्तोत्थो हन्ति तङ्क्षिरात्रान् मिथ्याचारात् पैत्तिकः सद्य एव

षोड़शोऽध्यायः ।

अथातः सर्वाक्षिरोगप्रतिषेधं व्याख्यास्यामः ।

प्राग्रूप एव स्यन्देषु तीक्ष्णगण्डूषनावनम् ।
कारयेदुपवासं च कोपादन्यत्र वातजात् ॥ १ ॥
दाहोपदेहरागाश्रुशोफशान्त्यै विडालकम् ।
कुर्य्यात्सर्वत्र पत्रैलामरिचस्वर्णगैरिकैः ॥ २ ॥
सरसाञ्जनयष्ट्याह्वनतचन्दनसैन्धवैः ।
सैन्धवं नागरं तार्क्ष्यं भृष्टं मण्डेन सर्पिषः ॥ ३ ॥
वातजे घृतभृष्टं वा योज्यं शबरदेशजम् ।
मांसीपद्मकका कोलीयष्ट्याह्वैः पित्तरक्तयोः ॥ ४ ॥
मनोह्वाफलिनीचौद्रैः कफे सर्वैस्तु सर्वजे ।
सितमरिचभागमेकं चतुर्भागोनं द्विरष्टभागरक्तम् ।
सचूर्णं वस्त्रबद्धं प्रकुपितमात्रेऽवगुण्ठनं नेत्रे ॥ ५ ॥

आरण्याञ्जगणरसे पटावबद्धाः
सुस्निग्धानखवितुषीकृताः कुलत्थाः ।
तच्चूर्णं सकदवचूर्णनाभिशीर्षे
नेत्राणां विधमति सद्य एव कोपम् ॥ ६ ॥

घोषाभयातुत्थकयष्टिरोध्रैर्मूर्तीससूक्ष्मैः श्लथवस्त्रबद्धैः ।
तास्रस्थधान्याम्लनिमग्नमूर्तिरतिं जयत्यक्षिणि नैकरूपाम् ॥७॥
षोड़शभिः सलिलपलैः पलं तथैकं कटङ्कटेर्याः सिद्धम् ।
सेकोऽष्टभागशिष्टः क्षौद्रयुतः सर्वदोषकुपिते नेत्रे ॥ ८ ॥
वातपित्तकफसन्निपातजां नेत्रयोर्बहुविधामपि व्यथाम् ।
क्षिप्रमेव जयति प्रयोजितः शिग्रुपल्लवरसः समाक्षिकः ॥ ९ ॥
तरुणसुरुबकपत्रं मूलं च विभिद्य सिद्धमाजे क्षीरे ।
वाताभिष्यन्दरुजं सद्यो विनिहन्ति सप्तपिच्छिका क्षीणा ॥१०॥

आश्योतनं मारुतजे क्वाथो बिल्वादिभिर्हृतः ।
कोष्णः सहैरण्डजटाबृहतीमधुशिग्रुभिः ॥ ११ ॥
क्षौद्रेरवक्रशृङ्गेष्टोदुम्बरत्वक्तु साधितम् ।
साश्मसा पयसाजेन शूलाश्योतनमुत्तमम् ॥ १२ ॥
मञ्जिष्ठारजनीलाक्षाद्राक्षाद्विमधुकोत्पलैः ।
क्वाथः सशर्करः शीतः सेचनं रक्तपित्तजित् ॥ १३ ॥
कसेरुयष्ट्याह्वरजस्तान्तवे ग्रथितं स्थितम् ।
अक्षि दिव्यासु निहितं हितं स्यन्देऽसृपित्तजे ॥ १४ ॥
पुण्ड्रयष्टीनिशासूतीप्लुता स्तन्ये सशर्करे ।
छागदुग्धेऽथवा दाहरुग्रागाश्रुनिवर्त्तनी ॥ १५ ॥
श्वेतरोध्रं समधुकं घृतभृष्टं सुचूर्णितम् ।
वस्त्रस्थं स्तन्यसृदितं पित्तरक्ताभिघातजित् ॥ १६ ॥
नागरत्रिफलानिम्बवासारोध्ररसं कफे ।
कोष्णमाश्योतनं भिन्नैर्भेषजैः सान्निपातिके ॥ १७ ॥
सर्पिः पुराणं पवने पित्ते शर्करयान्वितम् ।
व्योषसिद्धं कफे पीत्वा यवक्षारावचूर्णितम् ॥ १८ ॥
स्रावयेद्रुधिरं भूयस्ततः स्निग्धं विरेचयेत् ।
आनूपवेसवारेण शिरोवदनलेपनम् ॥ १९ ॥
उष्णेन शूले दाहे तु पयः सर्पिर्युतैर्हिमैः ।
तिमिरप्रतिषेधञ्च वीक्ष्य युञ्जाद्यथायथम् ॥ २० ॥
अयमेव विधिः सर्वो मन्थादिष्वपि शस्यते ।
अशान्तौ सर्वथा मन्थे भ्रुवोरुपरि दाहयेत् ॥ २१ ॥
रूप्यं रूक्षेण गोदन्ता लिम्पेन्नीलत्वमागते ।
शुष्के तु मस्तुना वर्त्तिर्वातास्यामयनाशिनी ॥ २२ ॥
सुमनः कोरका गृञ्जस्त्रिफला मधुकं बला ।
पित्तरक्तापहा वर्त्तिः पिष्टा दिव्येन वारिणा ॥ २३ ॥

सैन्धवं त्रिफला व्योष शङ्खनाभिः समुद्भवः ।
फेनः शैलेयकं सर्जो वर्त्तिः श्लेष्माक्षिरोगनुत् ॥ २४ ॥
प्रपौण्डरीक यष्ट्याह्वं दार्वी चाष्टपलं पचेत् ।
जलद्रोणे रसे पूते पुनः पक्के घने क्षिपेत् ॥ २५ ॥
पुष्पाञ्जनाद्दशपलं कर्षञ्च मरिचात्ततः ।
कृतञ्चूर्णीकृतं वर्त्तिः सर्वाभिष्यन्दसम्भवान् ॥ २६ ॥
हन्ति रागरुजाघर्षान् सद्यो दृष्टिं प्रसादयेत् ।
अथ पाशुपतो योगो रहस्यं भिषजां परम् ॥ २७ ॥
शुष्काक्षिपाके हविषः पानमक्ष्णोश्च तर्पणम् ।
घृतेन जीवनीयेन नस्यं तैलेन चाणुना ॥ २८ ॥
परिषेको हितश्चात्र पयः कोष्णं ससैन्धवम् ।
सर्पिर्युक्तं स्तन्यपिष्टमञ्जनं हि महौषधम् ॥ २९ ॥
वसा चानूपसत्त्वोत्था किञ्चित्सैन्धवनागरा ।
घृताक्तान् दर्पणे दृष्टान् केशान् मल्लकसम्पुटे ॥ ३० ॥
दग्ध्वाज्यपिष्टा लोहस्था सा मषी श्रेष्ठमञ्जनम् ।
सशोफे चाल्पशोफे च स्निग्धस्य व्यधयेच्छिराम् ॥ ३१ ॥
रेकः स्निग्धैः पुनर्द्राक्षापथ्याक्काथत्रिवृद्घृतैः ।
श्वेतरोध्र घृतभृष्टं चूर्णितं तान्तवस्थितम् ॥ ३२ ॥
उष्णाम्बुना विमृदित सेकः शूलहरः परम् ।
दार्वीप्रपौण्डरीकस्य क्काथो वाश्योतने हितः ।
सैन्धवांश प्रयुञ्जीत घर्षरागाश्रुरुग्घरान् ॥ ३३ ॥
ताम्रं लोहे मूत्रघृष्टं प्रयुक्तं नेत्रे सर्पिर्धूपितं वेदनाघ्नम् ।
ताम्रैर्घृष्टो गव्यदध्नः सरो वा युक्तः क्षणासैन्धवाभ्यां वरिष्ठः॥३४
शङ्खं ताम्रे स्तन्यघृष्टं घृताक्तैः शस्याः पत्रैर्धूपितं तद्वदेव च ।
नेत्रे युक्तं हन्ति सद्यावसन्नं क्षिप्रं घर्षं वेदनां चातितीव्राम्॥३५
उदुम्बरफलं लोहघृष्टं स्तन्येन धूपितम् ।

साज्यैः शमीच्छदैर्दाहशूलरागास्रदर्षजित् ॥ ३६ ॥
शिग्रुपल्लवनिर्यासः सुघृष्टस्ताम्रसम्पुटे ।
घृतेन धूपितो हन्ति श्लेष्मघर्षास्रवेदनाः ॥ ३७ ॥
तिलाभसा सूक्ष्मपालं कांस्ये घृष्टं सुधूपितम् ।
निम्बपत्रैर्घृताभ्यक्तैर्घर्षशूलास्रगजित् ॥ ३८ ॥
सन्धावेनाञ्जिते नेत्रे विगतौषधवेदने ।
स्तन्येनाश्योतनं कार्यं त्रिःपरं नाञ्जयेच्च तैः ॥ ३९ ॥
तालीसपत्रचपलानतलोहरजोऽञ्जनैः ।
जातीमुकुलकासीससैन्धवैर्मूत्रपेषितैः ॥ ५० ॥
ताम्रमालिप्य सप्ताहं धारयेत्तं क्षयेत्ततः ।
मूषेषैवानु गुटिकाः कुर्याच्छायाविशोषिताः ॥ ५१ ॥
ताः स्तन्यघृष्टा घर्षास्रश्लेष्मकण्डूविनाशनाः ।
व्याघ्रीत्वङ्मधुक ताम्ररजोजाचीरकल्कितम् ॥ ५२ ॥
शम्यामलकपत्राभ्यधूपितं श्लेष्मरक्तप्रसुत् ।
अश्लोषिते प्रयुञ्जीत पित्ताभिष्यन्दसाधनम् ॥ ५३ ॥
उत्क्लिष्टाः कफपित्तास्रनिचयोत्थाः कुकूणकाः ।
पक्ष्मोपरोधः शुष्काक्षिपाकः पूयालसो विसः ॥ ५४ ॥
पीतक्षीरश्लोषितोऽक्ष्णाख्यस्यन्दमन्थाविनानिलात् ।
एतेऽष्टादश पित्ताख्या दीर्घकालानुबन्धिनः ॥ ५५ ॥
चिकित्सा पृथगेतेषां स्व स्वमुक्ताव वक्ष्यते ।
पिल्लीभूतेषु सामान्यादथ पित्ताक्षिरोगिणः ॥ ५६ ॥
स्निग्धस्य छर्दितवतः शिराविद्धस्तनूजः ।
विरिक्तस्य च वर्त्मानु निर्लिखेदाविशङ्कितः ॥ ५७ ॥
तुत्थकस्य पलं श्वेतमरिचानि च विंशतिः ।
विंशताकाक्षिकपलैः पिष्ट्वा ताम्रे निधापयेत् ॥ ५८ ॥
पित्तानपित्तान् कुरुते बहुवर्षोत्थितानपि ।

तत् सेकेनोपदेहास्तु कण्डूशोफांश्च नाशयेत् ॥ ४८ ॥
करञ्जबीजं सुरस सुमनःकोरकाणि च ।
सक्षुद्र साधयेत् क्वाथे पूते तत्र रसक्रिया ॥ ५० ॥
अञ्जनं पिञ्जमैषज्यं पक्ष्मणाञ्च प्ररोहणम् ।
रसाञ्जनं सर्जरसो रीतीपुष्पं मनःशिला ॥ ५१ ॥
समुद्रफेनं लवणं गैरिकं मरिचानि च ।
अञ्जनं मधुना पिष्टं क्लेदकण्डूघ्नमुत्तमम् ॥ ५२ ॥
अभयारसपिष्टं वा तगरं पिञ्जनाशनम् ।
भावितं वस्तमूत्रेण सर्ज्जेहं देवदारु च ॥ ५३ ॥
सैन्धवत्रिफलाकृष्णाकटुकाश्चञ्जनाभयः ।
सताम्ररजसो वर्त्तिः पिञ्जशुक्लकनाशिनी ॥ ५४ ॥
पुष्पकासीसचूर्णो वा सुरसारसभावितः ।
ताम्रे दशाहं तत् पैञ्जरपक्ष्मशातजिदञ्जनम् ॥ ५५ ॥
अलञ्च सौवीरकमञ्जनञ्च ताभ्यां समं ताम्ररजश्च सूक्ष्मम् ।
पिञ्जेषु रोमाणि निषेवितोऽसौ चूर्णः करोत्येकशलाकयापि ॥४६॥
लाक्षानिर्गुण्डीभृङ्गदार्वीरसेन
श्रेष्ठं कार्पास भावितं सप्तकृत्वः ।
दीपः प्रज्ञाख्यः सर्पिषा तत्समुत्था
श्रेष्ठा पिञ्जानां रोपणार्थे मषी सा ॥ ५७ ॥
वर्त्मावलेखं बहुशस्तद्वच्छोणितमोक्षणम् ।
पुनः पुनर्विरेकञ्च नित्यमाश्योतनाञ्जनम् ॥ ५८ ॥
नावन धूमपानञ्च पिञ्जरोगातुरो भजेत् ।
पूयालसे त्वशान्तेऽन्तर्दाहः सूक्ष्मशलाकया ॥ ५९ ॥
चतुर्नवतिरित्यक्ष्णोर्हेतुलक्षणसाधनैः ।
परस्परमसङ्कीर्णाः कार्त्स्न्येन गदिता गदाः ॥ ६० ॥
सर्वदा च निषेवेत स्वस्थोऽपि नयनप्रियः ।

पुराणयवगोधूमशालिषष्टिकमुद्गान् ॥ ६१ ॥
सुन्नादीन् कफपित्तघ्नान् भूरिसर्पिःपरिप्लुतान् ।
शाकं चैवं विधं मांसं जाङ्गलं दाडिमं सिताम् ॥ ६२ ॥
सैन्धवं चिफलां द्राक्षां वारिपाने च नाभसम् ।
आतपत्वं पदत्राणं विधिवद्दोषशोधनम् ॥ ६३ ॥
वर्जयेद्वेगसंरोधमजीर्णाध्यशनानि च ।
शोकक्रोधदिवास्वप्ननिशाजागरणानि च ॥ ६४ ॥
विदाहि विष्टम्भकरं यच्चेहाहारभेषजम् ।
हे पादमध्ये पृथुसन्निवेशे शिरे गते ते बहुधा च नेत्रे ।
तास्रक्षणोद्वर्त्तनलेपनादीन् पादप्रयुक्तान्नयनं नयन्ति ॥ ६५ ॥
मलोष्णसङ्कटनपीडनाद्यैस्ता दूषयन्ते नयनानि दुष्टाः ।
भजेत् सदा दृष्टिहितानि तस्मादुपानदभ्यञ्जनधावनानि ॥६६॥

सप्तदशोऽध्यायः ।

अथातः कर्णरोगविज्ञानीयं व्याख्यास्यामः ।

प्रतिश्यायजलक्रीडाकर्णकण्डूयनैर्मरुत् ।
मिथ्यायोगेन शब्दस्य कुपितोऽन्यैश्च कोपनैः ॥ १ ॥
प्राप्य श्रोत्रशिराः कुर्य्याच्छूलं स्रोतसि वेगवत् ।
अर्द्दावभेदकं स्तब्धं शिशिरानभिनन्दनम् ॥ २ ॥
चिराच्च पाकं पक्वन्तु लसीकामल्पशः स्रवेत् ।
श्रोत्रं शून्यमकस्माच्च स्यात्सञ्चारविचारवत् ॥ ३ ॥
शूलं पित्तात् सदाहोषा शीतेच्छा क्षयथुं ज्वरम् ।
आशु पाकं प्रपक्वञ्च सपीतलसिकास्रुतिः ॥ ४ ॥
सालसीका स्पृशेद्यद्यत्तत्तत्पाकमुपैति च ।
कफाच्छिरोहनुग्रीवागौरव मन्दतारुजः ॥ ५ ॥

कण्डूः क्षयथुरुष्णेच्छा पाकात् क्षेतघना स्रुतिः ।
करोति श्रवणे शूलमभिघातादि दूषितम् ॥ ६ ॥
रक्तं पित्तसमानार्त्ति किञ्चिदाधिकलक्षणम् ।
शूलं समुदितैर्दोषैः सशोफज्वरतीव्ररुक् ॥ ७ ॥
पर्य्यायादुष्णशीतेच्छं जायते श्रुतिजाड्यवत् ।
पक्वं सितासितारक्तघनपूयप्रवाहि च ॥ ८ ॥
शब्दवाहिशिरासंस्थे शृणोति पवने सुहुः ।
नादानकस्मादिविधान् कर्णनादं वदन्ति तम् ॥ ९ ॥
श्लेष्मणानुगतो वायुर्नादो वा समुपेक्षितः ।
उच्चैः क्षवाच्छ्रुतिं कुर्य्याद् बधिरत्वं क्रमेण च ॥ १० ॥
वातेन शोषितः श्लेष्मा स्रोतो लिम्पेत्ततो भवेत् ।
रुग्गौरवं पिधानञ्च सप्रतीनाहसञ्ज्ञितः ॥ ११ ॥
कण्डूशोफौ कफात् श्वेचे स्थिरौ तत्सञ्ज्ञया स्मृतौ ।
कफो विदग्धः पित्तेन सरुजं नीरुजं त्वपि ॥ १२ ॥
घनपूतिबहुक्लेदं करुते पूतिकर्णकम् ।
वातादिदूषितं श्रोत्रं मांसासृक्क्लेदजां रुजम् ॥ १३ ॥
खादन्तो जन्तवः कुर्य्युस्तीव्रां स कृमिकर्णकः ।
श्रोत्रकण्डूयनाज्जातं क्षते स्यात् पूर्वलक्षणः ॥ १४ ॥
विद्रधिः पूर्ववच्चान्यः शोफोऽर्शोऽर्बुदमीरितम् ।
तेषु रुक्पूतिकर्णत्वं बधिरत्वं च बाधते ॥ १५ ॥
गर्भेऽनिलात् सङ्कुचिता शष्कुली कुचिकर्णकः ।
एको नीरुगनेको वा गर्भे मांसाङ्कुरः स्थिरः ॥ १६ ॥
पिप्पलीपिप्पलीमानः सन्निपातादिदारिका ।
सवर्णः सरुजः स्तब्धः क्षयथुः स उपेक्षितः ॥ १७ ॥
कटुतैलनिभं पक्वः स्रवेत् क्लेदेन रोहति ।
सङ्कोचयति रूढा च सा ध्रुवं कर्णशष्कुलीम् ॥ १८ ॥

शिराख्यः कुरुते वायुः पालीशोषं तदाह्वयम् ।
क्षशा दृढा च तन्त्रीवत् पाली वातेन तन्त्रिका ॥ १८ ॥
सुकुमारे चिरोत्सर्गाच्छङ्खसैव प्रवर्द्धिते ।
कर्णे शोफः सरुक्पाल्यामरुणः परिपोटवान् ॥ २० ॥
परिपोटः स पवनादुत्थातः पित्तशोणितात् ।
गुर्वाभरणभाराद्यैः श्यावो रुग्दाहपाकवान् ॥ २१ ॥
श्वयथुः स्फोटपिटकारागोषाक्षे दसंयुतः ।
पाल्यां शोफोऽनिलकफात् सर्वतो निर्व्यथः स्थिरः ॥२२॥
स्तब्धः सवर्णः कण्डूमानुन्नम्यो गल्लिरश्च सः ।
दुर्विद्धे वर्द्धिते कर्णे सकण्डूदाहपाकरुक् ॥ २३ ॥
श्वयथुः सन्निपातोत्थः स नाम्ना दुःखवर्द्धनः ।
कफासृक्कृमिजाः सूक्ष्माःसकण्डूक्लेदवेदनाः ॥ २४ ॥
लेह्याख्याः पिटिकास्ता हि लिह्युः पालीमुपेक्षिताः ।
पिप्पलीसर्वजं शूलं विदारी कुचिकर्णकः ॥ २५ ॥
एषामसाध्या याप्यैका तन्त्रिकान्यांस्तु साधयेत् ।
पञ्चविंशतिरित्युक्ताः कर्णरोगा विभागतः ॥ २६ ॥

अष्टादशोऽध्यायः ।

अथातः कर्णरोगप्रतिषेधं व्याख्यास्यामः ।

कर्णशूले पवनजे पिबेद्वाती रसाप्लुतः ।
वातघ्नसाधितं सर्पिः कर्णं स्विन्नञ्च पूरयेत् ॥ १ ॥
पत्राणां पृथगश्वत्थबिल्वार्कैरण्डजन्मनाम् ।
तैलसिन्धूत्थदिग्धानां स्विन्नानां पुटपाकतः ॥ २ ॥
रसैः कवोष्णैस्तद्वच्च मूलकक्षारलोरपि ।
गण्डे वातहरैःस्वेदे मूत्रेषु च विपाचितः ॥ ३ ॥

मद्यस्नेहो द्रुतं हन्ति सुतीव्रामपि वेदनाम् ।
महतः पञ्चमूलस्य काष्ठात् क्षौमेण वेष्टितात् ॥ ४ ॥
तैलसिक्तात् प्रदीप्ताग्रात् स्नेहः सद्यो रुजापहः ।
योज्यश्चैवं भद्रकाष्ठात् कुष्ठात्काष्ठाच्च सारलात् ॥ ५ ॥
वातव्याधिप्रतिश्याये विहितं हितमत्र च ।
वर्जयेच्छिरसा स्नानं शीताम्भ पानमन्यपि ॥ ६ ॥
पित्तशूले सितायुक्तं घृतस्निग्ध विरेचयेत् ।
द्राक्षायष्टिसृतं स्नान्यं श्रस्यते कर्णपूरणम् ॥ ७ ॥
यष्ट्यनन्ताहिमोशीरकाकोलीरोधजीवकैः ।
मृणालबिसमञ्जिष्ठासारिवाभिश्च साधयेत् ॥ ८ ॥
यष्टीमधुरसप्रस्थं क्षीरद्विप्रस्थसयुतम् ।
तैलस्य कुडवं नस्यपूरणाभ्यञ्जनैरिदम् ॥ ९ ॥
निहन्ति शूलदाहोषाः केवलं क्षौद्रमेव वा ।
यष्ट्यादिभिश्च सघृतैः कर्णौ दिह्यात्समन्ततः ॥ १० ॥
वामयेत् पिप्पलीसिद्धसर्पिः स्निग्ध कफोद्भवे ।
धूमनावनगण्डूषस्वेदान् कुर्य्यात् कफापहान् ॥ ११ ॥
लशुनार्द्रकशिग्रूणां सुरसस्य मूलकस्य च ।
कदल्याः स्वरसः श्रेष्ठः कटुष्णः कर्णपूरणे ॥ १२ ॥
अर्काङ्कुरान्सपिष्टांस्तैलाल्लांस्लवणान्वितान् ।
सन्निधाय सुधीकाण्डे कोरिते तच्छदावृतान् ॥ १३ ॥
स्वेदयेत्पुटपाकेन स रसः शूलजित्परम् ।
रसेन बीजपूरस्य कपित्थस्य च पूरयेत् ॥ १४ ॥
सूक्ष्मेण पूरयित्वा वा फेनेनान्ववचूर्णयेत् ।
अजाविमूत्रवंशत्वक्सिद्धं तैलञ्च पूरणम् ॥ १५ ॥
सिद्धं वा सार्षप तैल हिङ्गुतुम्बरुनागरैः ।
रास्नाजे पित्तवत् कार्य्यं शिरास्रावः विमोचयेत् ॥ १६ ॥

पक्के पूयवहे कर्णे धूमगण्डूषनावनम् ।
युञ्जान्नाडीविधानञ्च दुष्टव्रणहरञ्च यत् ॥ १७ ॥
स्रोतः प्रमृज्य दिग्धन्तु द्वौ कालौ पिचुवर्त्तिभिः ।
पूरयेद् धूपयित्वा तु माक्षिकेण प्रपूरयेत् ॥ १८ ॥
सुरसादिगणक्काथफाणिताक्तांश्च योजयेत् ।
पिचुवर्त्तिं सुसूक्ष्मैश्च तच्चूर्णैरवचूर्णयेत् ॥ १९ ॥
शूलक्लेदगुरुत्वानां विधिरेष निवर्त्तकः ।
प्रियङ्गुमधुकाम्बष्ठाधातक्युत्पलपर्णिभिः ॥ २० ॥
मञ्जिष्ठालोध्रलाक्षाभिः कपित्थस्य रसेन च ।
पचेत्तैलं तदास्रावं निगृह्णात्याशु पूरणात् ॥ २१ ॥
नादबाधिर्य्ययोः कुर्य्यादातशूलोक्तमौषधम् ।
श्लेष्मानुबन्धे श्लेष्माणं प्राग्जयेद्वमनादिभिः ॥ २२ ॥
एरण्डशिग्रुवरुणमूलकात्पत्रजे रसे ।
चतुर्गुणे पचेत्तैलं क्षीरे चाष्टगुणोन्मिते ॥ २३ ॥
यच्चाक्षचौरकाकोलीकल्कयुक्तं निहन्ति तत् ।
नादबाधिर्य्यशूलानि नावनाभ्यङ्गपूरणैः ॥ २४ ॥
पक्वं प्रतिविषाहिङ्गुमिश्रित्वक्क्षार्जिकौषणैः ।
ससूक्ते पूरणात्तैलं रुक्स्रावश्रुतिनादनुत् ॥ २५ ॥
कर्णनादे हिते तैलं सर्षपोत्थञ्च पूरणे ।
शुष्कमूलकखण्डानां क्षारो हिङ्गु महौषधम् ॥ २६ ॥
शतपुष्पावचाकुष्ठदारुशिग्रुरसाञ्जनम् ।
सौवर्चलयवक्षारक्षार्जिकौद्भिदसैन्धवम् ॥ २७ ॥
भूर्जग्रन्थिविड़ मुस्तामधुसूक्तं चतुर्गुणम् ।
मातुलुङ्गरसक्षुद्वत् कदलीस्वरसञ्च तैः ॥ २८ ॥
पक्वं तैलं जयत्याशु सुक्कच्छानपि पूरणात् ।
कण्डूक्लेदञ्च बाधिर्य्यं पूतीकर्णञ्च रुक्क्रमीन् ॥ २९ ॥

क्षारतैलमिदं श्रेष्ठं मुखदन्तामयेषु च।
अथ सुप्ताविव स्यातां कर्णौ रक्तं हरेत्ततः॥ २०॥
सशोफक्लेदयोर्मन्दमृतेर्वमनमाचरेत्।
बाधिर्यं वर्जयेद्बालवृद्धयोश्चिरजं च यत्॥ २१॥
प्रतिनाहे परिक्लेद्य स्नेहस्वेदैर्विशोधयेत्।
कर्णशोधनकेनानु कर्णौ तैलस्य पूरयेत्॥ २२॥
ससुक्तसैन्धवमधोर्मांतुलुङ्गरसस्य वा।
शोधनाद् रूक्षतोत्पत्तौ घृतमण्डस्य पूरणम्॥ २३॥
क्रमोऽयं मलपूर्णेऽपि कर्णे कण्डूं कफापहम्।
नस्यादितश्छोफेऽपि कटूष्णैश्चात्र लेपनम्॥ २४॥
कर्णस्रावोदितं कुर्यात्पूतिकृमिककर्णयोः।
पूरणं कटुतैलेन विशेषात् कृमिकर्णके॥ २५॥
वमिपूर्वा हिता कर्णविद्रधौ विद्रधिक्रिया।
पित्तोत्थकर्णशूलोक्तं कर्त्तव्यं क्षतविद्रधौ॥ २६॥
अर्शोऽर्बुदेषु नासावदामा कर्णविदारिका।
कर्णविद्रधिवत्साध्या यथादोषोदयेन च॥ २७॥
पालीशोषेऽनिलश्लेष्मशूलवन्नस्यलेपनम्।
स्वेदं च कुर्यात् स्निग्धाच्च पालीमुद्वर्त्तयेत्तिलैः॥ २८॥
प्रियालबीजयष्ट्याह्वहयगन्धायवान्वितैः।
तत. पुष्टिकरैः स्नेहैरभ्यङ्गं नित्यमाचरेत्॥ २९॥
शतावरीवाजिगन्धापयस्यैरण्डजीवकैः।
तैलं विपक्वं सक्षीरं पालीनां पुष्टिकृत्परम्॥ ४०॥
कल्केन जीवनीयेन तैलं पयसि पाचितम्।
आनूपमांसक्वाथे च पालीपोषणवर्द्धनम्॥ ४१॥
पालीं छित्त्वातिसङ्क्षीणां शेषां सन्धाय पोषयेत्।
याप्येवं तन्त्रिकाख्यापि परिपाट्योऽयं विधिः॥ ४२॥

उत्पाते शीतलैर्लेपो जलौकोहृतशोणिते ।
जम्ब्वाम्रपल्लवबलायष्टीरोध्रतिलोत्पलैः ॥ ४३ ॥
सधान्याम्लैः समङ्गिष्ठैः सकदम्बैः ससारिवैः ।
सिद्धमभ्यञ्जनं तैलं विसर्पोक्तघृतानि च ॥ ४४ ॥
उन्मथ्येऽभ्यञ्जनं तैलं गोधाकर्कवसान्वितम् ।
तालपत्राखुगन्धार्कबाकूचीतिलसैन्धवैः ॥ ४५ ॥
सुरसालाङ्गलीभ्याञ्च सिद्धं तीक्ष्णञ्च नावनम् ।
दुर्विद्धेऽश्मन्तजम्ब्वाम्रपत्रक्वाथेन सेचितम् ॥ ४६ ॥
तैलेन पालीं खभ्यक्तां सुश्लक्ष्णैरवचूर्णयेत् ।
चूर्णैर्मधुकमञ्जिष्ठाप्रपुण्ड्राह्वनिशोद्भवैः ॥ ४७ ॥
लाक्षाविडङ्गसिद्धञ्च तैलमभ्यञ्जने हितम् ।
स्निग्धां गोमयजैः पिण्डैर्बहुशः परिलेहिकाम् ॥ ४८ ॥
विड्भृङ्गसारैरालिम्पेदुरभ्रीमूत्रकल्कितैः ।
कौटजेङ्गुदकारञ्जबीजग्रन्थ्याक्षवल्कलैः ॥ ४९ ॥
अथवाभ्यञ्जने तैर्वा कटुतैलं विपाचयेत् ।
सनिम्बपत्रमरिचमदनैर्लेहिकाव्रणे ॥ ५० ॥
छिन्नन्तु कर्णं शुद्धस्य बन्धमालोच्य यौगिकम् ।
शुद्धास्रं लागयेच्छस्त्रे सद्यश्छिन्ने विशोधनम् ॥ ५१ ॥
अथ ग्रथित्वा केशान्तं कृत्वा छेदनलेखनम् ।
निवेश्य सन्धिं सुषमं न निम्नं न समुन्नतम् ॥ ५२ ॥
अभ्यज्य मधुसर्पिर्भ्यां पिचुप्रोतावगुण्ठितम् ।
सूत्रेणागाढ़शिथिलं बद्ध्वा चूर्णैरवाकिरेत् ॥ ५३ ॥
शोणितस्यापनैर्व्रणमाचारं चादिशेत्ततः ।
सप्ताहादामतैलाक्तं शनैरपनयेत् पिचुम् ॥ ५४ ॥
सुरूढ़ं जातरोमाणं श्लिष्टसन्धिसमस्थिरम् ।
सुवर्णाणं सुरागन्धं शनैः कर्णं विवर्धयेत् ॥ ५५ ॥

जलशूकः स्वयंगुप्ता रजन्यौ हृहतीद्वयम् ।
अश्वगन्धाबलाहस्तिपिप्पलीगौरसर्षपाः ॥ ५६ ॥
मूलं कोशातकाश्वघ्नरूपिकासप्तपर्णजम् ।
कुक्कुन्दरीकालमृतागृहं मधुकरीकृतम् ॥ ५७ ॥
जन्तूका जलजन्मा च तथा शावरकन्दकम् ।
एभिः कल्कैः खरं पक्वं सतैलं माहिषं घृतम् ॥ ५८ ॥
हस्त्यश्वमूत्रेण परमभ्यङ्गात्कर्णवर्धनम् ।
अथ कुर्याद्यस्यस्य छिन्नां शुद्धस्य नासिकाम् ॥ ५९ ॥
छिन्यान्नासासमं पत्रं तत्तुल्यञ्च कपोलतः ।
लक्षांसं नासिकासन्ने रक्तस्तत्तनुतां नयेत् ॥ ६० ॥
सीव्येद् गण्डं ततः सूच्या सेविन्या पित्तयुक्तया ।
नासाच्छेदे च लिखिते परिवर्त्योपरि त्वचम् ॥ ६१ ॥
कपोलबन्धं सन्दध्यात्सीव्येन्नासाञ्च यत्नतः ।
नाडीभ्यामुत्क्षिपेदन्तः सुखोच्छ्वासप्रवृत्तये ॥ ६२ ॥
आमतैलेन सिक्ता तु पतङ्गमधुकाञ्जनैः ।
शोणितस्थापनैश्चान्यैः सुश्लक्ष्णैरवचूर्णयेत् ॥ ६३ ॥
ततो मधुघृताभ्यक्तं बद्ध्वा चारिकमादिशेत् ।
ज्ञात्वावस्थान्तरं कुर्यात् सद्यो व्रणविधिं ततः ॥ ६४ ॥
छिन्याद्दूढेऽधिकं मांसं नासोपान्ते च चर्मवत् ।
सीव्येत्ततश्च सुश्लक्ष्णं क्षीणं संवर्द्धयेत्पुनः ॥ ६५ ॥
निवेशिते यथान्यासं सद्यश्छेदेऽप्ययं विधिः ।
नाडीयोगाद्विनीतस्य नासासन्धानवद्विधिः ॥ ६६ ॥

एकोनविंशोऽध्यायः ।

अथातो नासारोगविज्ञानीयं व्याख्यास्यामः ।

अवश्यायानिलरजोभाष्यातिस्वप्नजागरैः ।
नीचात्युच्चोपधानेन पीतेनान्येन वारिणा ॥ १ ॥
अत्यम्बुपानरमणच्छर्दिवाष्यग्रहादिभिः ।
क्रुद्धा वातोल्बणा दोषा नासायां स्थानतां गताः ॥ २ ॥
जनयन्ति प्रतिश्याय वर्द्धमानं क्षयप्रदम् ।
तत्र वातात्प्रतिश्याये मुखशोषो भृशं क्षवः ॥ ३ ॥
घ्राणोपरोधनिस्तोददन्तशङ्खशिरोव्यथाः ।
कीटका इव सर्पन्ति मन्यते परितो भ्रुवौ ॥ ४ ॥
स्वरमादश्चिरात्याकः शिशिराच्छकफस्रुतिः ।
पित्तात्तृष्णाज्वरघ्राणपिटिकासम्भवभ्रमाः ॥ ५ ॥
नासाग्रपाको रूक्षोष्णस्ताम्रपीतकफस्रुतिः ।
कफात्कासोऽरुचिः श्वासो वमथुर्गात्रगौरवम् ॥ ६ ॥
माधुर्य्यं वदने कण्डूः स्निग्धशुक्लघना स्रुतिः ।
सर्वजो लक्षणैः सर्वैरकस्माद्वृद्धिशान्तिमान् ॥ ७ ॥
दुष्ट नासाशिराः प्राप्य प्रतिश्यायं करोत्यसृक् ।
उरस. सुप्ततातास्रनेत्रत्व श्वासपूतिता ॥ ८ ॥
कण्डूः श्रोत्राक्षिनासासु पित्तोक्त चात्र लक्षणम् ।
सर्व एव प्रतिश्याया दुष्टतां यान्त्युपेक्षिताः ॥ ९ ॥
यथोक्तोपद्रवाधिक्यात्सर्वेन्द्रियतापनः ।
साग्निसादज्वरश्वासकासोरः पार्श्ववेदन ॥ १० ॥
कुप्यत्यकस्माद्बहुशो मुखदौर्गन्ध्यशोफकृत् ।
नासिकाक्लेदसशोषशुद्धिरोधकरो मुहुः ॥ ११ ॥
पूयोपमासिता रक्तग्रथिता श्लेष्मसस्रुतिः ।
मूर्च्छन्ति चात्र क्षमयो दीर्घस्निग्धसिताण्डवः ॥ १२ ॥
पक्वलिङ्गानि तेष्वङ्गलाघव क्षवथोः शमः ।
श्लेष्मा सचिक्कणः पीतो घ्राणस्य रसगन्धयोः ॥ १३ ॥

तीक्ष्णघ्राणोपयोगार्करश्मिसूत्रत्रणादिभिः ।
वातकोपिभिरन्यैर्वा नासिकातरुणास्थिनि ॥ १४ ॥
विवर्धितेऽनिलः क्रुद्धो रुद्धः शृङ्गाटकं व्रजेत् ।
निवृत्तः कुरुतेऽत्यर्थं क्षवथुं स मुहुर्मुहुः ॥ १५ ॥
शोषयन्नासिकास्रोतः कफञ्च कुरुतेऽनिलः ।
शुष्कपूर्णाभनासात्व क्षुच्छ्वादुच्छ्वसन ततः ॥ १६ ॥
स्मृतोऽसौ नासिकाशोषो नासानाहे तु जायते ।
नद्धत्वमिव नासाया श्लेष्मरुद्धेन वायुना ॥ १७ ॥
निःश्वासोच्छ्वाससंरोधात् स्रोतसी संवृते इव ।
पचेन्नासापुटे पित्तं त्वङ्मांस दाहशूलवत् ॥ १८ ॥
स घ्राणपाकः स्रावस्तु तत्संज्ञः श्लेष्मसम्भवः ।
अच्छोजलोपमोऽजस्र विशेषान्निशि जायते ॥ १९ ॥
कफः प्रवृद्धो नासायां रुध्वा स्रोतांस्यपीनसम् ।
कुर्यात् सघुर्घुरं श्वास पीनसाधिकवेदनम् ॥ २० ॥
अवेरिव स्रवत्यस्य प्रक्लिन्ना तेन नासिका ।
अजस्रं पिच्छिलं पीतं पक्वं सिङ्घाणक घनम् ॥ २१ ॥
रक्तेन नासादग्धेन बाह्यान्तः स्पर्शनासहा ।
भवेद्भूमोपमोच्छ्वासा सा दीप्तिर्दहतीव च ॥ २२ ॥
तालुमूले मलैर्दुष्टै र्मारुतो मुखनासिकात् ।
श्लेष्मा च पूतिर्निर्गच्छेत् पूतिनास वदन्ति तम् ॥ २३ ॥
निचयादभिघाताद्वा पूयासृङ्नासिका स्रवेत् ।
तत्पूयरक्तमाख्यातं शिरोदाहरुजाकरम् ॥ २४ ॥
पित्तश्लेष्मावरुद्धोऽन्तर्नासायां शोषयेन्मरुत् ।
कफ सशुष्कपुटतां प्राप्नोति पुटकन्तु तत् ॥ २५ ॥
अर्शोऽर्बुदानि विभजेद्दोषलिङ्गैर्यथायथम् ।
सर्वेषु क्षुच्छ्वाच्छसनं पीनसः प्रततं स्रवः ॥ २६ ॥

सानुनासिकवादित्वं पूतिनासः शिरोव्यथा।
अष्टादशानामित्येषां यापयेद्दुष्टपीनसम् ॥ २७ ॥

विंशोऽध्यायः।

अथातो नासारोगप्रतिषेध व्याख्यास्यामः।

सर्वेषु पीनसेष्वादौ निवातागारगो भवेत्।
स्नेहनस्वेदवमनधूमगण्डूषधारणम् ॥ १ ॥
वासो गुरूष्णं शिरसः सुघनं परिवेष्टनम्।
लघ्वम्लल्वणं स्निग्धमुष्णं भोजनमद्रवम् ॥ २ ॥
धन्वमांसगुडक्षीरचणकत्रिकटूत्कटम्।
यवगोधूमभूयिष्ठं दधिदाडिमसाधितम् ॥ ३ ॥
बालमूलकजो यूषः कुलत्थोत्थश्च पूजितः।
कवोष्णं दशमूलाम्बु जीर्णा वा वारुणीं पिबेत् ॥ ४ ॥
जिह्वेक्षीरकतर्कारीवचाजाज्युपकुञ्चिकाः।
व्योषतालीसचविकातिन्तिडीकाम्लवेतसम् ॥ ५ ॥
साम्यजाजीहिपलिकाल्वगेलापत्रपादिकम्।
जीर्णाद्गुडात्तुलार्द्धेन पक्वेन वटकीकृतम् ॥ ६ ॥
पीनसश्वासकासघ्नं रुचिस्वरकरं परम्।
शताह्वात्वग्बलामूल श्योनाकैरण्डबिल्वजम् ॥ ७ ॥
सारग्वध पिबेद्धूम वसाज्यमदनान्वितम्।
अथवा सघृतान् सक्तून् कृत्वा मल्लकसम्पुटे ॥ ८ ॥
त्यजेत् स्नानं शुचं क्रोधं भृशं शय्यां हिमं जलम्।
पिबेद्दातप्रतिश्यायी सर्पिर्वातघ्नसाधितम् ॥ ९ ॥
पटुपञ्चकसिद्धं वा विदार्यादिगणेन वा।
स्वेदनस्यादिकां कुर्यात् चिकित्सामर्दितोदिताम् ॥ १० ॥

पित्तरक्तोत्थयोः पेयं सर्पिर्मधुरकैः शृतम् ।
परिषेकात् प्रदेहाच्च शीतैः कुर्वीत शीतलान् ॥ ११ ॥
धवत्वक्चिफलाश्यामात्रीपर्णीयष्टिबिल्वकैः ।
क्षीरे दशगुणे तैलं नावनं सनिशैः पचेत् ॥ १२ ॥
कफजे लङ्घन लेपः शिरसो गौरसर्षपैः ।
सक्षारं वा घृतं पीत्वा वमेत् पिष्टैस्तु नावनम् ॥ १३ ॥
वस्त्राम्बुना पटुव्योषवेल्लवल्गजीरकैः ।
कटुतीक्ष्णैर्घृतैर्नस्यैः कवलैः सर्वजं जयेत् ॥ १४ ॥
यच्चक्रमिक्रमं कुर्वन् पाययेद्दुष्टपीनसे ।
व्योषोरुवृक्कक्रमिजिद् दारुमाद्रीगदे गुदम् ॥ १५ ॥
वार्त्ताकवीज बिडता सिद्धार्थैः पूतिमत्स्यकैः ।
अग्निमन्थस्य पुष्पाणि पीलुशिग्रुफलानि च ॥ १६ ॥
अश्वविड्रससूत्राभ्यां वस्तिमूत्रेण चैकतः ।
क्षौमगर्भां कृता वर्त्तिं धूम घ्राणास्यतः पिबेत् ॥ १७ ॥
क्षवथौ पुटपाकाख्ये तीक्ष्णैः प्रधमनं हितम् ।
शुण्ठीं कुष्ठकणाबिल्वद्राक्षाकल्ककषायवत् ॥ १८ ॥
साधितं तैलमाज्यं वा नस्यं क्षवपुटप्रणुत् ।
नासाशोषे बलातैलं यानादौ भोजनं रसैः ॥ १९ ॥
स्निग्धो धूमस्तथा स्वेदो नासानाहेऽप्ययं विधिः ।
पाके दीप्तौ च पित्तघ्नं तीक्ष्णं नस्यादिसंशुतौ ॥ २० ॥
कफपीनसवत् पूतिनासापीनसयोः क्रिया ।
लाक्षाकरञ्जमरिचवेल्लहिङ्गुकणागुडैः ॥ २१ ॥
अविमूत्रद्रुतैर्नस्यं कारयेदसने कृते ।
शिग्रुसिंहीनिकुम्भाना बीजैः सव्योषसैन्धवैः ॥ २२ ॥
सवेल्लसुरसैस्तैल नावनं परमं हितम् ।
पूयरक्ते नवे कुर्याद् रक्तपीनसवत्क्रियाम् ॥ २३ ॥

अतिप्रवृद्धे नाडीवद्गम्भेष्वर्शोऽर्बुदेषु च ।
निकुम्भकुम्भसिन्धूत्थमनोह्वालकणाग्निकैः ॥ २४ ॥
कल्कितैर्धूपितमध्वाक्तां घ्राणे वर्त्तिं प्रवेशयेत् ।
शिग्र्वादि भावनं चात्र पूतिनासोऽपि तं भजेत् ॥ २५ ॥

एकविंशोऽध्यायः ।

अथातो मुखरोगविज्ञानं व्याख्यास्यामः ।

माक्ष्यमाहिषवाराहपिशितामकमूलकम् ।
माषसूपदधिक्षीरसुक्तेक्षुरसफाणितम् ॥ १ ॥
अवाक् शय्या च भजतो दिवतो दन्तधावनम् ।
धूमच्छर्दनगण्डूषानुचितश्च शिराव्यधम् ॥ २ ॥
कृत्वाः श्लेष्मोल्बणा दोषाः कुर्वन्त्यन्तर्मुखे गदान् ।
तत्र खण्डौष्ठ इत्युक्तो वातेनोष्ठो द्विधा कृतः ॥ ३ ॥
ओष्ठकोपे तु पवनात् स्तब्धावोष्ठौ महारुजौ ।
दार्य्येते परिपाट्येते परुषासितकर्कशौ ॥ ४ ॥
पित्तात्तीक्ष्णासहौ पीतौ सर्षपाकृतिभिश्चितौ ।
पिटिकाभिर्महाक्लेदावाशु पाकौ कफात्पुनः ॥ ५ ॥
शीतासहौ गुरू शूनौ सवर्णपिटिकाचितौ ।
सन्निपातादनेकाभौ दुर्गन्धास्रावपिच्छिलौ ॥ ६ ॥
अकस्मात् स्थानसंशून्यरुजौ विषमपाकिनौ ।
रक्तोपसृष्टौ रुधिर स्रवतः शोणितप्रभौ ॥ ७ ॥
खर्जूरसदृशं चात्र क्षीणे रक्तेऽर्बुदं भवेत् ।
मांसपिण्डोपमौ मांसाख्यातां मूर्च्छत्क्रमौ क्रमात् ॥ ८ ॥
तैलाभस्रवथुक्लेदौ सकण्डूौ मेदसा मृदु ।
क्षतजावदीर्य्येते पाट्येते वासकृत्पुनः ॥ ९ ॥

ग्रथितौ च पुनः स्यातां कण्डूलौ दशनच्छदौ ।
जलबुद्बुदवद्घातकफादोष्ठे जलार्बुदम् ॥ १० ॥
गण्डालजी स्थिरः शोफो गण्डे दाहज्वरान्वितः ।
वातादुष्णसहा दन्ताः शीतस्पर्शाधिकव्यथाः ॥ ११ ॥
दाह्यन्त इव शूलेन शीताख्यो दालनश्च सः ।
दन्तहर्षं प्रवातास्तशीतभक्ष्याक्षमा द्विजाः ॥ १२ ॥
भवन्त्यस्ताशनेनेव सरुजाश्चलिता इव ।
दन्तभेदे द्विजास्तोदभेदरुक्स्फुटनान्विताः ॥ १३ ॥
चालश्चलद्विर्दशनैर्भक्षणादधिकव्यथैः ।
कराल: सुकरालानां दशनानां समुद्भवः ॥ १४ ॥
दन्ताधिकोऽधिदन्ताख्यः स चोक्तः खलु वर्द्धनः ।
जायते जायमानेऽतिरुक् जाते तत्र शाम्यति ॥ १५ ॥
अधावनान्मलो दन्ते कफो वा वातशोषितः ।
पूतिगन्धः स्थिरीभूतः शर्करा सोऽभ्युपेक्षितः ॥ १६ ॥
शातयत्यशुभो दन्तात्कपालानि कपालिका ।
श्यावः श्यावत्वमायाता रक्तपित्तानिलैर्द्विजाः ॥ १७ ॥
समूल दन्तमाश्रित्य दोषैरुल्वणमारुतैः ।
शोषिते मज्जि शुषिरे दन्तेऽन्नमलपूरिते ॥ १८ ॥
पूतित्वात् कृमयः सूक्ष्मा जायन्ते जायते ततः ।
अहेतुतीव्रार्तिरुजः ससरुग्शोऽसितश्यवः ॥ १९ ॥
प्रभूतपूयरक्तास्तु स चोक्तः कृमिदन्तकः ।
श्लेष्मरक्तेन पूतीनि वहन्त्यस्रमहेतुकम् ॥ २० ॥
शोष्यन्ते दन्तमांसानि मृदुक्लिन्नासितानि च ।
शीतादोऽसौ उपकुशः पाकः पित्तासृगुद्भवः ॥ २१ ॥
दन्तमांसानि दह्यन्ते रक्तान्युत्क्लेदवन्त्यतः ।
कण्डूमन्ति स्रवन्त्यस्रमाधायन्तेऽङ्गजि स्थिते ॥ २२ ॥

चला मन्दरुजो दन्ताः पूतिवक्त्रञ्च जायते ।
दन्तयोस्त्रिषु वा शोफो वदनस्त्रिनिभो घनः ॥ २३ ॥
कफासात्तीव्ररुक् शीघ्रं पच्यते दन्तपुप्पुटः ।
दन्तमांसे मलैः सार्द्धैर्वाह्यान्तः क्षयथुर्गुरुः ॥ २४ ॥
सरुग्दाहः सवेङ्गिन्नः पूयास्रं दन्तविद्रधिः ।
क्षयथुर्दन्तमूलेषु रुजावान् पित्तरक्तजः ॥ २५ ॥
लालास्रावी सुषिरो दन्तमांसप्रपातनः ।
समन्निपातज्वरवान् सपूयरुधिरस्रुतिः ॥ २६ ॥
महासुषिर इत्युक्तो विशीर्णद्विजबन्धनः ।
दन्तान्ते कीलवच्छोफो हनुकर्णरुजाकरः ॥ २७ ॥
प्रतिहन्त्यभ्यवहृतिं श्लेष्मणा सोऽधिमांसकः ।
दुष्टेषु दन्तमांसेषु संरम्भो जायते महान् ॥ २८ ॥
यस्मिंश्चलन्ति दन्ताश्च सविदर्भोऽभिघातजः ।
दन्तमांसाश्रितान् रोगान् यः साध्यानप्युपेक्षते ॥ २९ ॥
अन्तस्तस्यास्रवन् दोषः सूक्ष्मां सञ्जनयेद्गतिम् ।
पूय मुहुः सा स्रवति त्वङ्मांसास्थिप्रभेदिनी ॥ ३० ॥
ताः पुनः पञ्च विज्ञेया लक्षणैः स्वैर्यथोदितैः ।
शाकपत्रखरा सुप्ता स्फुटिता वातदूषिता ॥ ३१ ॥
जिह्वा पित्तात् सदाहोषा रक्तैर्मांसाङ्कुरैश्चिता ।
श्लेष्मालोकसटाभैस्तु कफेन बहुला गुरुः ॥ २२ ॥
कफपित्तादधः शोफो जिह्वास्तम्भक्लदुन्नतः ।
मत्स्यगन्धिर्भवेत्पक्वः सोऽलसो मांसशातनः ॥ ३३ ॥
प्रबन्धनेऽधो जिह्वायाः शोफो जिह्वाग्रसन्निभः ।
साङ्गुरः कफपित्तास्रैर्लालोषास्तम्भवान् खरः ॥ ३४ ॥
अधिजिह्वः सरुक्कण्डूर्वाक्याहारविघातकृत् ।
तालुगेवोपजिह्वस्तु जिह्वाया उपरि स्थितः ॥ ३५ ॥

तालुमांसेऽनिलाद्दुष्टे पिटिका सरुजः खराः ।
बह्व्यो घना स्रावयुक्तास्तास्तालुपिटिकाः स्मृताः ॥ ३६ ॥
तालुमूले कफात्सास्रात् मल्यवस्तिनिभो मृदु ।
प्रलम्बः पिच्छिलः शोफो नासयाऽऽहारमीरयन् ॥ ३७ ॥
कण्ठोपरोधस्तृट्कासवमिक्तन्नलशुण्डिका ।
तालुमध्ये निरुग्मांस संहतं तालुमहृतिः ॥ ३८ ॥
पद्माकृतिस्तालुमध्ये रक्तात्क्षयथुरर्बुदम् ।
कच्छपः कच्छपाकारश्चिरवृद्धिः कफादरुक् ॥ ३९ ॥
कोलाभः श्लेष्ममेदोभ्यां पुप्पुटो नीरुजः स्थिरः ।
पित्तेन पाकः पाकाख्यः पूयास्रावी महारुजः ॥ ४० ॥
वातपित्तज्वरायासैस्तालुशोषस्तदाह्वयः ।
जिह्वाप्रबन्धजाः कण्ठे दारुणा मार्गरोधिनः ॥ ४१ ॥
मांसाङ्कुराः शीघ्रचया रोहिणी शीघ्रकारिणी ।
कण्ठास्यशोषकृद् वातात् सा हनुश्रोत्ररुक्करी ॥ ४२ ॥
पित्ताज्ज्वरोषाहृल्मोहकण्ठधूमायनान्विता ।
क्षिप्रजा क्षिप्रपाकार्त्तिरागिणी स्पर्शनासहा ॥ ४३ ॥
कफेन पिच्छिला पाण्डु अरुजा स्फोटकाचिता ।
तप्ताङ्गारनिभा कर्णरुक्करी पित्तजाकृतिः ॥ ४४ ॥
गम्भीरपाका निचयात्सर्वलिङ्गसमन्विता ।
दोषैः कफोल्बणैः शोफः कोलवद् ग्रथितोन्नतः ॥ ४५ ॥
शूककण्टकवत्कण्ठे शालूको मार्गरोधनः ।
वृन्दो वृत्तोन्नतो दाहज्वरकृद् गलपार्श्वगः ॥ ४६ ॥
हनुसन्ध्याश्रितः कण्ठे कार्पासीफलसन्निभः ।
पिच्छिलो मन्दरुक् शोफः कठिनस्तुण्डिकेरिका ॥ ४७ ॥
बाह्यान्तः क्षयथुर्घोरो गलमार्गार्गलोपमः ।
गलौघो मूर्द्धगुरुतातन्द्रालालाज्वरप्रदः ॥ ४८ ॥

वलय नातिरुक् शोफस्तद्वदेवायतोन्नतः ।
मांसकीलो गले दोषैरेकोऽनेकोऽथवाल्परुक् ॥ ४८ ॥
कृच्छ्रोच्छ्वासाभ्यवहृतिः पृथुमूलो गलायुकः ।
भूरिमांसाङ्कुराबद्धस्तीव्रतट्ज्वरमूर्छरुक् ॥ ५० ॥
शतघ्नी निचिता वर्त्तिः शतघ्नी वातिरुक्करी ।
व्याप्तसर्वगल शीघ्रजन्मपाको महारुजः ॥ ५१ ॥
पूतिपूयनिभस्रावी क्षयत्यर्गलविद्रधिः ।
जिह्वावमाने कण्ठादावपाक क्षयत्यु मलाः ॥ ५२ ॥
जनयन्ति स्थिर रक्तं नीरुज तद् गलार्बुदम् ।
पवनश्लेष्मभेदोभिर्गलगण्डो भवेत् त्रिधा ।
वर्द्धमानः स कालेन मुष्कवल्लम्बते निरुक् ॥ ५३ ॥
कृष्णोऽरुणो वा तोदाढ्यः स वातात् कृष्णराजिमान् ।
हृद्स्तालुगले शोष कुर्य्याच्च विरमास्यताम् ॥ ५४ ॥
स्थिर. सवर्णः कण्डूमान् शीतस्पर्शो गुरुः कफात् ।
हृद्स्तालुगले लेप कुर्य्याच्च मधुरास्यताम् ॥ ५५ ॥
मेदसः श्लेष्मवद्वानिहृध्यो सोऽनु विधीयते ।
देहहृद्विद्ध कुरुते गले शब्द स्वरेऽल्पताम् ॥ ५६ ॥
श्लेष्मरुद्धाऽनिलगतिः शुष्ककण्ठो हतस्वरः ।
ताम्यन् प्रसक्त श्वसिति येन स स्वरहानिलात् ॥ ५७ ॥
करोति वदनस्यान्तर्व्रणान् सर्वसरोऽनिलः ।
मञ्जारिणोऽरुणान् रूक्षानोष्ठौ ताम्रौ चलत्वचौ ॥ ५८ ॥
जिह्वा शीतासहा गुर्वी स्फुटिता कण्टकाचिता ।
विवृणोति च कृच्छ्रेण मुखपाको मुखस्य च ॥ ५९ ॥
अधः प्रतिहतो वायुरर्शोगुल्मकफादिभिः ।
यात्युर्द्धं वक्त्रदौर्गन्ध्य कुर्वन्नूर्ध्वगदस्तु सः ॥ ६० ॥
मुखस्य पित्तजे पाके दाहोषे तिक्तवक्त्रता ।

क्षारोक्षितक्षतसमा व्रणास्तद्वच्च रक्तजे ॥ ६१ ॥
कफजे मधुरास्यत्वं कण्डूमत्पिच्छिला व्रणाः ।
अन्तःकपोलमाश्रित्य श्यावपाण्डु कफोऽर्बुदम् ॥ ६२ ॥
कुर्य्यात् तत्पाटितं छिन्नं स्रुदितञ्च विवर्द्धते ।
मुखपाको भवेत्ताभ्यां सर्वैः सर्वातिसंज्ञकैः ॥ ६३ ॥
पूत्यास्यता च तैरेव दन्तकाष्ठादिविद्विषः ।
ओष्ठे गण्डे हिजे मूले जिह्वायां तालुके गले ॥ ६४ ॥
वक्त्रे सर्वत्र चेत्युक्ताः पञ्चसप्ततिरामयाः ।
एकादशैको दश च त्रयोदश तथा च षट् ॥ ६५ ॥
अष्टावष्टादशाष्टौ च क्रमात् तेष्वनुपक्रमाः ।
करालो मांसरक्तोष्ठावर्बुदानि जलादिना ॥ ६६ ॥
कच्छपस्तालुपिटिका गलौघः सुषिरो महान् ।
स्वरघ्नोर्ध्वगदः श्यावः शतघ्नो वलयालसाः ॥ ६७ ॥
नाड्योष्ठकोपनिचयात् रक्तात्सर्वैश्च रोहिणी ।
दशने स्फुटिते दन्तभेदः पक्वोपजिह्विका ॥ ६८ ॥
गलगण्डः स्वरभ्रंशः कृच्छ्रोच्छ्वासोऽतिवत्सरः ।
याप्यस्तु हर्षो भेदश्च शेषान् शस्त्रौषधैर्जयेत् ॥ ६९ ॥

द्वाविंशोऽध्यायः ।

अथातो मुखरोगप्रतिषेधं व्याख्यास्यामः ।
खण्डोष्ठस्य विलिख्यान्तौ सूत्वा व्रणवदाचरेत् ।
यष्टीज्योतिष्मतीरोध्रश्रावणीसारिवोत्पलैः ॥ १ ॥
पटोल्या काकमाच्या च तैलमभ्यञ्जने पचेत् ।
नस्यञ्च तैलं वातघ्नमधुरस्कन्धसाधितम् ॥ २ ॥
महास्नेहेन वातौष्ठे सिद्धेनाक्तः पिचुर्हितः ।
देवधूपमधूच्छिष्टगुग्गुलुस्वमरदारुभिः ॥ ३ ॥

यष्ट्याह्वचूर्णयुक्तेन तेनैव प्रतिसारणम् ।
नाड्योष्ठं स्वेदयेद्बुध्नसिद्धैरेरण्डपल्लवैः ॥ ४ ॥
खण्डौष्ठविहितं नस्यं तस्य मूर्ध्नि च तर्पणम् ।
पित्ताभिघातजावोष्ठौ जलौकोभिरुपाचरेत् ॥ ५ ॥
रोध्रसर्ज्जरसक्षौद्रमधुकैः प्रतिसारणम् ।
गुडूचीयष्टिपत्तङ्गसिद्धमभ्यञ्जने घृतम् ॥ ६ ॥
पित्तविद्रधिवच्चात्र क्रिया शोणितजेऽपि च ।
इदमेव भवेत्कार्य्यं कर्म्मौष्ठे तु कफोत्तरे ॥ ७ ॥
पाठाक्षारमधुव्योषैर्हृतासे प्रतिसारणम् ।
धूमनावनगण्डूषाः प्रयोज्याश्च कफच्छिदः ॥ ८ ॥
खित्र भिन्नं विमेदस्कं दहेन्मेदोजमग्निना ।
प्रियङ्गुरोध्रत्रिफलामाक्षिकैः प्रतिसारयेत् ॥ ९ ॥
सक्षौद्रा घर्षणे तीक्ष्णा भिन्नशुद्धे जलार्बुदे ।
अवगाढेऽतिवृद्धे वा क्षारोऽग्निर्वा प्रतिक्रिया ॥ १० ॥
आमाशयस्थास्रजलजीं गण्डे शोफवदाचरेत् ।
खित्रस्य शीतदन्तस्य पालीं विलिखितां दहेत् ॥ ११
तैलेन प्रतिसार्य्या च सक्षौद्रघनसैन्धवैः ।
दाडिमत्वग्वरातार्क्ष्यकान्ताजम्ब्वास्थिनागरैः ॥ १२ ॥
कवलाः क्षौरिणां क्वाथैरणुतैलञ्च नावनम् ।
दन्तहर्षे तथा भेदे सर्वा वातहरा क्रिया ॥ १३ ॥
तिलयष्टीमधुश्रृतं क्षीरं गण्डूषधारणम् ।
सक्षौद्रं दशमूलाम्बु गण्डूषाः प्रचलद्दिजे ॥ १४ ॥
तुल्यरोध्रकणाश्लेष्मापत्तङ्गपटुघर्षणम् ।
स्निग्धाः शीता यथावस्थं नस्यान्नकवलादयः ॥ १५ ॥
अधिदन्तकमालिप्तं यदा क्षारेण जर्ज्जरम् ।
क्रमिदन्तमिवोत्पाट्य तदाशूपचरेत्तदा ॥ १६ ॥

अनवस्थितरक्ते च दग्धे व्रण इव क्रिया ।
अहिंसन् दन्तमूलानि दन्तेभ्य शर्करां हरेत् ॥ १७ ॥
क्षारचूर्णैर्मधुयुतैस्ततश्च प्रतिसारयेत् ।
कपालिकायामप्येवं हर्षोक्तञ्च समाचरेत् ॥ १८ ॥
जयेद्विस्रावणैः स्निग्धमचलं कृमिदन्तकम् ।
स्निग्धैश्चालेपगण्डूषनस्याहारैश्चलापहैः ॥ १९ ॥
गुडेन पूर्णं सुषिरं मधूच्छिष्टेन वा दहेत् ।
सप्तच्छदार्कक्षीराभ्यां पूरणं कृमिशूलजित् ॥ २० ॥
हिङ्गुकट्फलकासीससर्जिकाकुष्ठवेल्लजम् ।
रजोरुजं जयत्याशु वस्त्रस्थं दशने धृतम् ॥ २१ ॥
गण्डूषं धारयेत्तैलमेभिरेव च साधितम् ।
क्षारैर्वा युक्तमेरण्डद्विव्याघ्रीभूकदम्बजैः ॥ २२ ॥
क्रियायोगैर्बहुविधैरित्यशान्तरुजं भृशम् ।
दृढमप्युद्धरेद्दन्तं पूर्वं मूलाद्विमोक्षितम् ॥ २३ ॥
सन्दंशकेन लघुना दन्तनिर्घातनेन वा ।
तैलं सयष्ट्याह्वरजो गण्डूषो मधुना ततः ॥ २४ ॥
ततो विदारियष्ट्याह्वशृङ्गाटककसेरुभिः ।
तैलं दशगुणक्षीरं सिद्धं युञ्जीत नावनम् ॥ २५ ॥
कृशदुर्बलबालानां वातार्तानां च नोद्धरेत् ।
नोद्धरेच्चोत्तरं दन्तं बह्वपद्रवकृद्धि सः ॥ २६ ॥
एषामप्युद्धृतैः स्निग्धः स्वादुः शीतः क्रमो हितः ।
विस्रावितास्रे शीतादे सक्षौद्रैः प्रतिसारणम् ॥ २७ ॥
मुस्ताार्जुनत्वक्त्रिफलाफलिनीतार्क्ष्यनागरैः ।
तत्क्वाथः कवलो नस्यं तैलं मधुरसाधितम् ॥ २८ ॥
दन्तमांसान्युपकुर्यो स्निग्धान्युष्णाम्बुधारणैः ।
मक्षलाग्रेण शाकादिपत्रैर्वा बहुशो लिखेत् ॥ २९ ॥

ततश्च प्रतिसार्य्याणि घृतमण्डमधुद्रुतैः ।
लाक्षाप्रियङ्गुपत्तङ्गलवणोत्तमगैरिकैः ॥ ३० ॥
सकुष्ठशुण्ठीमरिचयष्टीमधुरसाञ्जनैः ।
सुखोष्णो घृतमण्डोऽनु तैलं वा कवलग्रहः ॥ ३१ ॥
घृतं च मधुरैः सिद्धं हितं कवलनस्ययोः ।
दन्तपुप्पुटके स्विन्नच्छिन्नभिन्नविलेखिते ॥ ३२ ॥
यष्ट्याह्वस्वर्ज्जिकाशुण्ठीसैन्धवैः प्रतिसारणम् ।
विद्ध्यौ कटुतीक्ष्णोष्णरूक्षैः कवललेपनम् ॥ ३३ ॥
घर्षणं कटुकाकुष्ठहपुषिकालीयवोद्भवैः ।
रक्तेत्पाकं हिमैः पक्वः पाल्यो दाह्योऽवगाढकः ॥ ३४ ॥
सौधिरे छिन्नलिखिते सक्षौद्रैः प्रतिसारणम् ।
रोध्रमुस्तमिशिग्रेष्टातार्क्ष्यपत्तङ्गकिंशुकैः ॥ ३५ ॥
सकट्फलैः कषायैश्च तेषां गण्डूष इष्यते ।
यष्टीरोध्रोत्पलानन्तासारिवागरुचन्दनैः ॥ ३६ ॥
सगैरिकसितापुष्पैः सिद्धं तैलं च नावनम् ।
क्षित्त्वाधिमांसकं चूर्णैः सक्षौद्रैः प्रतिसारयेत् ॥ ३७ ॥
वचातेजोवतीपाठास्वर्ज्जिकायवशूकजैः ।
पटोलनिम्बत्रिफलाकषायः कवलो हितः ॥ ३८ ॥
विदर्भैः दन्तमूलानि मण्डलाग्रेण शोधयेत् ।
क्षारं युञ्जात्ततो नस्यं गण्डूषादि च शीतलम् ॥ ३९ ॥
सशोधोभयतः कार्यं शिरस्येवोपचरेत्ततः ।
नाडीं दन्तानुगां दन्तं समुद्धृत्याग्निना हरेत् ॥ ४० ॥
कुष्ठां नैकगतिं पूर्णां मदनेन गुडेन वा ।
धावन् जातिमदनखदिरस्वादुकण्टकैः ॥ ४१ ॥
क्षौरिद्वचाम्बुगण्डूषो नस्यं तैलं च तत्कृतम् ।
कुर्य्याद्धातोष्टकोपोक्तं कण्टकेष्वनिलात्मसु ॥ ४२ ॥

जिह्वायां पित्तजातेषु घृष्टेषु रुधिरे स्रुते ।
प्रतिसारणगण्डूषनावन मधुरैर्हितम् ॥ ४३ ॥
तीक्ष्णै. कफोत्थेष्वप्येवं सर्षपक्षारषणादिभिः ।
नवे जिह्वालसेऽप्येवं तं तु शस्त्रेण न स्पृशेत् ॥ ४४ ॥
उन्नम्य जिह्वामाकृष्टां वडिशेनाधिजिह्विकाम् ।
छेदयेत्खण्डलाग्रेण तीक्ष्णोष्णैर्घर्षणादि च ॥ ४५ ॥
उपजिह्वां परिस्राव्य यवक्षारेण घर्षयेत् ।
कफघ्नैः शुण्ठिकाः साध्या नस्यगण्डूषघर्षणैः ॥ ४६ ॥
ऐर्वारुबीजप्रतिमं हृद्यायामसिरातनम् ।
अग्रे निरिष्टं जिह्वाया वडिशाग्रवलम्बितम् ।
छेदयेन्मण्डलाग्रेण नात्यग्रे न च मूलतः ।
छेदेऽत्यसृक्क्षयान्मृत्युर्हीने व्याधिर्विवर्द्धते ॥ ४८ ॥
मरिचातिविषापाठावचाकुष्ठकुटन्नटैः ।
क्षिप्तायां सपटुक्षौद्रैर्घर्षणं कवलः पुनः ॥ ४९ ॥
कटुकातिविषापाठानिम्बरास्नावचाम्बुभिः ।
सङ्घाते पुप्पुटे कूर्मे विलिख्यैव समाचरेत् ॥ ५० ॥
अपक्वे तालुपाके तु कामीसक्षौद्रतार्क्ष्यजैः ।
घर्षणं कवलः शीतकषायमधुरौषधैः ॥ ५१ ॥
पक्वेऽष्टापदवद्भिन्ने तीक्ष्णोष्णैः प्रतिसारणम् ।
हृद्यनिम्बपटोलाद्यैस्तिक्तैः कवलधारणम् ॥ ५२ ॥
तालुशोषे त्वतृष्णस्य सर्पिरुत्तरभक्तिकम् ।
कणाशुण्ठीकृतं पानमम्बुभिर्गण्डूषधारणम् ॥ ५३ ॥
धन्वमांसरसाः स्निग्धाः क्षीरसर्पिश्च नावनम् ।
कण्ठरोगेष्वसृक्षीक्षस्तीक्ष्णैर्नस्यादि कर्म च ॥ ५४ ॥
क्वाथः पानञ्च दार्वीत्वग्निम्बतार्क्ष्यकलिङ्गजः ।
हरीतकीकषायो वा पेयो माक्षिकसंयुतः ॥ ५५ ॥

श्रेष्माघ्नोषधवत्सारदार्वीहोपिरसाञ्जनैः ।
सपाठातेजिनीनिम्बैः सक्षगोमूत्रसाधितैः ॥ ५६ ॥
कवलो गुटिका चात्र कल्पिता प्रतिसारणम् ।
शिग्रुल कटभीमुस्त देवदारुमहौषधम् ॥ ५७ ॥
वचा दन्ती च मूर्वा च लेपः कोष्णोऽर्तिशोफहा ।
अथान्तर्बाह्यतः स्निग्धां वातरोहिणिकां लिखेत् ॥ ५८ ॥
अङ्गुलीशस्त्रकेणाशु पटुयुक्तनखेन वा ।
पञ्चमूलाम्बुकवलस्तैल गण्डूषनावनम् ॥ ५९ ॥
विस्राव्य पित्तसम्भूतां सिताक्षौद्रप्रियङ्गुभिः ।
घर्षेत्सरोध्रपत्तङ्गैः कवल क्वथितैश्च तैः ॥ ६० ॥
द्राक्षापरूषककाथो हितश्च कवलग्रहे ।
उपाचरेदेवमेव ग्रल्याख्यायास्सम्भवाम् ॥ ६१ ॥
सागारधूमै. कटुकै. कफजां प्रतिसारयेत् ।
नस्यगण्डूषयोस्तैल साधित च प्रशस्यते ॥ ६२ ॥
अपामार्गफलक्षेताद्दन्तीजन्तुघ्नसैन्धवैः ।
तद्वच्च बृन्दशालूकतुण्डकेरीगिलायुषु ॥ ६३ ॥
विद्रधौ स्राविते श्रेष्मारोचनातार्क्ष्यमैरिकैः ।
सरोध्रपटुपत्तङ्गकणैर्गण्डूपघर्षणे ॥ ६४ ॥
गलगण्डः पवनजः स्निग्धो निस्रुतशोणितः ।
तिलैर्बीजैश्चनट्टोमाप्रियालशणसम्भवैः ॥ ६५ ॥
उपानाह्यो व्रणे रूढे प्रलेप्यश्च पुनः पुनः ।
शिग्रुतिल्वकतर्कारीगजकृष्णापुनर्नवैः ॥ ६६ ॥
कालामृतार्कमूलैश्च पुष्पैश्च करहाटजैः ।
एकैषिकान्वितैः पिष्टैः सुरया काञ्जिकेन वा ॥ ६७ ॥
गुडूचीनिम्बकुटजहंसपादीबलाद्वयैः ।
साधितं पाययेत्तैलं सक्षणादेवदारुभिः ॥ ६८ ॥

कर्त्तव्यं कफजेऽप्येतत् स्वेदविस्रावणे त्वति ।
लेपोजगन्धातिविषाविशल्यासविषाणिका: ॥ ६८ ॥
गुञ्जालावुशुकाह्वाश्च पलाशक्षारकल्किता: ।
मूत्रप्लुतं हठक्षार पक्वा कोद्रवभुक् पिबेत् ॥ ७० ॥
साधितं वत्सकाद्यैर्वा तैल सपटुपञ्चकै: ।
कफघ्नान् धूमवमननावनादींश्च शीलयेत् ॥ ७१ ॥
मेदोभवे शिरां विध्येत् कफघ्नञ्च विधिं भजेत् ।
असनादिरजश्चैन प्रातर्मूत्रेण पाययेत् ॥ ७२ ॥
अशान्तौ पाटयित्वा च सर्वान् व्रणवदाचरेत् ।
मुखपाकेषु सक्षौद्रा: प्रयोज्या मुखधावना: ॥ ७३ ॥
क्वथितास्त्रिफलापाठास्पृहीका जातिपल्लवा: ।
निष्टेव्या भक्षयित्वा वा कुठेरादिगणोऽथवा ॥ ७४ ॥
मुखपाकेऽनिलात् क्वाथपट्वेला: प्रतिसारणम् ।
तैल वातहरै: सिद्धं हितं कवलनस्ययो: ॥ ७५ ॥
पित्तास्रे रक्तपित्तघ्न: कफघ्नश्च कफे विधि: ।
लिखेच्छाखादिपत्रैश्च पिटिका: कठिना: स्थिरा: ॥ ७६ ॥
यथादोषोदयं कुर्य्यात् सन्निपाते चिकित्सितम् ।
नवेऽर्बुदे त्वसङ्क्षे छेदिते प्रतिसारणम् ॥ ७७ ॥
स्वर्जिकानागरक्षौद्रै: क्वाथो गण्डूष इष्यते ।
गुडूचीनिम्बकल्कोत्थो मधुतैलसमन्वित: ॥ ७८ ॥
यवान्नभुक् तीक्ष्णतैलनस्याभ्यङ्गांस्तथाचरेत् ।
वमिते पूतिवदने धूमस्तीक्ष्ण: सनावन: ॥ ७९ ॥
समङ्गाधातकीरोध्रफलिनीपद्मकैर्जलम् ।
धावन वदनस्यान्तस्चूर्णितैरवचूर्णनम् ।
शीतादीपकुशीतञ्च नावनादि च शीलयेत् ॥ ८० ॥
फलत्रयद्वीपिकिरातितिक्तयष्ट्याह्वसिद्धार्थकटुत्रिकाणि ।

मुस्ताहरिद्रादयया वशूकबृहत्त्वक्कात्त्वाग्निमवेतसाच्च ॥ ८१ ॥
अश्वत्थजम्ब्वाम्रधनञ्जयत्वक् त्वक् चाहिमारात् खदिरस्य सारः।
क्वाथेन तेषां घनतां गतेन तच्चूर्णयुक्ता गुटिका विधेयाः ॥ ८२ ॥

ता धारिता घ्नन्ति सुखेन नित्यं
कण्ठौष्ठताल्वादिगदान् सुकृच्छ्रान्।
विशेषतो रोहिणिकास्यशोष-
गन्धान् विदेहाधिपतिप्रणीताः ॥ ८३ ॥

खदिरतुलामम्बुघटे पक्त्वा तोयेन तेन पिष्टैश्च।
चन्दनजोऽङ्गकुङ्कुमपरिपेलववालकोशीरैः ॥ ८४ ॥
सुरतरुरोध्रद्राक्षामञ्जिष्ठाचोचपद्मकविड्ङ्गैः।
स्पृक्कानतनखकट्फलसूक्ष्मैलाध्यामकैः सपतङ्गैः ॥ ८५ ॥
तैलप्रस्थं विपचेत् कर्षांशैः पाननस्यगण्डूषैस्तत्।
हत्वास्ये सर्वगदान् जनयति गाम्भीं दृढं श्रुतिञ्च वाराहीम् ॥८६
उद्वर्तितञ्च प्रपुन्नाटरोध्रदार्वीभिरभ्यक्तमनेन वक्त्रम्।
निर्व्यङ्गनीलीसुखदूषिकादि सञ्जायते चन्द्रसमानकान्ति ॥८७॥
पलशतं वाणात्तोयघटे पक्त्वा रसेऽस्मिंश्च पलार्धिकैः।
खदिरजम्बूयष्ट्यानन्तास्थिरहिमारनीलोत्पलान्वितैः ॥ ८८ ॥
तैलप्रस्थं पाचयेच्छ्लक्ष्णपिष्टैरेभिर्द्व्यैर्धारितं तन्मुखेन।
रोगान् सर्वान् हन्ति वक्त्रे विशेषात्स्थैर्यं धत्ते दन्तपङ्क्तेश्चलायाः८९
खदिरसारादृढे तुले पचेदल्पात्तुला चारिमेदसः।
घटचतुष्के पादशेषेऽस्मिन् पूते पुनः क्वाथनादृघने ॥ ९० ॥
आक्षिक क्षिपेत्सुसूक्ष्मं रज सैव्याम्बुपत्तङ्गैरिकम्।
चन्दनद्वयरोध्रपुण्ड्राह्वे यष्ट्याह्वलाचाञ्जनद्वयम् ॥ ९१ ॥
धातकीकट्फलाहिनिशाविफलाचतुर्जातयोऽङ्कम्।
मुस्तमञ्जिष्ठान्यगोधारोहमासीयवासकम् ॥ ९२ ॥
पद्मकैलेयसमङ्गाश्च प्रोते तस्मिंस्त्वया पालिकां पृथक्।

जातिपत्रिकां सजातीफलां सहलवङ्गकङ्कोलकाम् ॥ ९३ ॥
स्फटिकशुभ्रसुरभिकर्पूरकुडवं च तत्रावपेत्ततः ।
कारयेद्गुटिकाः सदा चैता धार्य्या मुखे तन्नदापहाः ॥ ९४ ॥
क्वाथौषधद्रव्ययोजनेन तैलं पचेत्कल्पनयाऽनयैव ।
सर्वास्थरोगोद्धृतये तदाहुर्दन्तस्थिरत्वे त्विदमेव मुख्यम् ॥ ९५ ॥
खदिरेणैता गुटिकास्तैलमिदं वारिमेदसा प्रथितम् ।
अनुशीलयन् प्रतिदिनं स्खलोऽपि दृढद्विजो भवति ॥ ९६ ॥
क्षुद्रागुडूचीसुमनःप्रवालदार्वीत्वचासत्रिफलाकषायः ।
क्षौद्रेण युक्तः कवलग्रहोऽयं सर्वामयान् वक्त्रगतान्निहन्ति ॥९७॥

पाठादार्वीत्वक्कुष्ठमुस्तासमङ्गा-
तिक्तापीताङ्गारोद्भवतेजोवतीनाम् ।
चूर्णैः सक्षौद्रो दन्तमांसार्तिकण्डू-
पाकस्रावाणां नाशनो घर्षणेन ॥ ९८ ॥

गृहधूमताार्क्ष्यपाठाव्योषक्षाराम्लयोवरातेजोर्हैः ।
मुखदन्तगलविकारे सक्षौद्रः कालको विधार्य्यश्चूर्णः ॥९९॥
दार्वीत्वक्सिन्धूद्भवमनःशिलायावशूकहरितालैः ।
धार्य्यः पीतकचूर्णो दन्तास्यगलामये समध्वाज्यः ॥ १००॥
हिङ्गारधूमवरापञ्चपटुव्योषवेल्लगिरिताक्ष्यैः ।
गोमूत्रेण विपक्वा गलामयघ्नी रसक्रियेषा ॥ १०१ ॥

गोमूत्रक्वथनविलीनविग्रहाणां
पथ्यानां जलमिश्रकुष्ठभावितानाम् ।
अत्तारं नरमणवोऽपि वक्त्ररोगाः
श्रोतारं नृपमिव न स्पृशन्त्यनर्था. ॥ १०२ ॥

सप्तच्छदोशीरपटोलमुस्तहरीतकीतिक्तकरोहिणीभिः ।
यष्ट्याह्वराजद्रुमचन्दनैश्च क्वाथं पिबेत्पाकहरं मुखस्य ॥ १०३ ॥

पटोलशुण्ठीत्रिफलाविशाला-

त्रायन्तितिक्तादिनिशामृतानाम् ।
पीतः कषायो मधुना निहन्ति
मुखस्थितश्चास्यगदानशेषान् ॥ १०४ ॥
खरसः क्वथितो दार्व्या घनीभूतः सगैरिकः ।
आस्यस्थः समधुर्वक्त्रपाकनाडीव्रणापहः ॥ १०५ ॥
पटोलनिम्बयष्ट्याह्ववासाजात्यरिमेदसाम् ।
खदिरस्य वरायाश्च पृथगेव प्रकल्पना ॥ १०६ ॥
खदिरायोवरापार्थमदयन्त्यहिमारकैः ।
गण्डूषोऽम्बुघृतैर्धार्य्यो दुर्बलद्विजशान्तये ॥ १०७ ॥
मुखदन्तमूलगलजाः प्रायो रोगाः कफास्रभूयिष्ठाः ।
तस्मात्तेषामसकृद् रुधिरं विस्रावयेद्दुष्टम् ॥ १०८ ॥
कायशिरसोर्विरेको वमन कवलग्रहाश्च कटुकतिक्ताः ।
प्रायः शस्तं तेषां कफरक्तहरं तथा कर्म ॥ १०९ ॥
यवत्रणधान्य भक्ष विदलैः क्षारोषितैरपस्नेहाः ।
यूषा भक्ष्याश्च हिता यच्चान्यत्श्लेष्मनाशाय ॥ ११० ॥
प्राणानिलपथसस्था: खसितमपि निरुन्धन्ति प्रमादवतः ।
कण्ठामयाधिकित्सितमतोऽत तेषु कुर्वीत ॥ ११ ॥

त्रयोविंशोऽध्यायः ।

अथातः शिरोरोगविज्ञानं व्याख्यास्यामः ।
धूमातपतुषाराम्बुक्रीडातिस्वप्नजागरैः ।
उत्क्लेदाधिपुरोवातबाष्पनिग्रहरोदनैः ॥ १ ॥
अत्यम्बुमद्यपानेन कृमिभिर्वेगधारणैः ।
उपधानसृजाभ्यङ्गदिवाधः प्रततेक्षणैः ॥ २ ॥
अमात्यागन्धदुष्टामभाष्यादैश्च शिरोगताः ।
जनयन्त्यामयान् दोषास्तत्र मारुतकोपतः ॥ ३ ॥

निस्तुद्येते भृशं शङ्खौ घाटा संभिद्यते तथा ।
भ्रुवोर्मध्ये ललाटे च पततीवातिवेदनम् ॥ ४ ॥
बाध्येते स्वनतः श्रोत्रे निष्कृष्येव इवाक्षिणी ।
घूर्णतीव शिरः सर्वं सन्धिभ्य इव मुच्यते ॥ ५ ॥
स्फुरत्यतिशिराजालं कन्दराहनुसंश्रयम् ।
प्रकाशासहता घ्राणस्रावोऽकस्मात् व्यथाशमौ ॥ ६ ॥
मार्दवं मर्दनस्नेहस्वेदबन्धैश्च जायते ।
शिरस्यापोऽयमर्दं तु मूर्ध्नः सोऽहीवभेदकः ॥ ७ ॥
यच्चात्कुप्यति मासाद्वा स्वयमेव च शाम्यति ।
अतिवृद्धस्तु नयनं श्रवणं वा विनाशयेत् ॥ ८ ॥
शिरोऽभितापि पित्तोत्थं शिरो धूमायनं ज्वरः ।
स्वेदोऽच्छिदहनं मूर्च्छा निशि शीतैषि मार्दवम् ॥ ९ ॥
अरुचिः कफजे मूर्ध्नो गुरुस्तिमितशीतता ।
शिरानिस्यन्दतालस्यं रुग्मन्दाङ्गाधिका निशि ॥ १० ॥
तन्द्राशून्याक्षिकूटत्वं कर्णकण्डूयने वमिः ।
रक्तात्पित्ताधिकरुजः सर्वं स्यात्सर्वलक्षणम् ॥ ११ ॥
सङ्कीर्णैर्भोजनैर्मूर्ध्नि क्लेदिते रुधिरामिषैः ।
कोपिते सन्निपाते च जायन्ते मूर्ध्नि जन्तवः ॥ १२ ॥
शिरस्स्ते पिबन्त्योऽस्य घोराः कुर्वन्ति वेदनाः ।
चित्तविभ्रंशजननीर्ज्वरः कासो बलक्षयः ॥ १३ ॥
रौक्ष्यशोफव्यधच्छेददाहस्फुटनपूतिता ।
कपाले तालुशिरसो कण्डूः शोषः प्रमीलकः ॥ १४ ॥
तास्राच्छसिङ्घाणकता कर्णनादश्च जन्तुजे ।
वातोल्बणाः शिरः कम्पं वक्त्रसङ्गं कुर्वते मलाः ॥ १५ ॥
पित्तप्रधानैर्वातादैः शङ्खे शोफः सशोणितैः ।
तीव्रदाहरुजारागप्रलापज्वरवद्भ्रमाः ॥ १६ ॥

तिक्ताक्षः पीतवदनः क्षिप्रकारी स शङ्खकः ।
त्रिरात्रात् जीवितं हन्ति सिध्यत्यप्याशु साधितः ॥ १७ ॥
पित्तानुबद्धः शङ्खाक्षिभ्रूललाटेषु मारुतः ।
रुजं सस्यन्दनां कुर्य्यादनुसूर्य्योदयोदयाम् ॥ १८ ॥
आमध्याङ्ग विवर्द्धिष्णुः क्षुद्वतः सा विशेषतः ।
अव्यवस्थितशीतोष्णसुखा शाम्यत्यतः परम् ॥ १९ ॥
सूर्य्यावर्त्तः स इत्युक्तो दशरोगाः शिरोगताः ।
शिरस्येवञ्च वक्ष्यन्ते कपाले व्याधयो नव ॥ २० ॥
कपाले पवने दुष्टे गर्भस्थस्यापि जायते ।
सवर्णो नीरुजः शोफस्तं विद्यादुपशीर्षकम् ॥ २१ ॥
यथादोषोदयं ब्रूयात् पिटिकार्बुदविद्रधीन् ।
कपाले क्लेदबहुलाः पित्तास्रक्श्लेष्मजन्तुभिः ॥ २२ ॥
कङ्गुसिद्धार्थकनिभाः पिटिकाः क्षुरकक्षिकाः ।
कण्डूकुशच्युतिक्षापरीक्ष्यकृत् स्फुटन क्षयः ॥ २३ ॥
सूक्ष्मा कफवाताभ्यां विद्याद्दारुणकन्तु तत् ।
रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम् ॥ २४ ॥
प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः ।
रोमकूपान् रुणद्ध्यस्य तेनान्येषामसम्भवः ॥ २५ ॥
तदिन्द्रलुप्तं रूढ्वाऽपि प्राड्मूचेति चापरे ।
खलतेरपि जन्मैव सदनं तत्र तु क्रमात् ॥ २६ ॥
सा वातादग्निदग्धाभा पित्तात् स्विन्नशिरावृता ।
कफाद्बलवर्णांश्च यथास्वं निर्दिशेत् त्वचि ॥ २७ ॥
दोषैः सर्वाकृतिः सर्वैरसाध्या सा नखप्रभा ।
दग्धाग्निनेव निर्लोमा सदाऽरुक् या च जायते ॥ २८ ॥
शोकश्रमक्रोधकृतः शरीरोष्मा शिरोगतः ।
केशान् सदोषः पचति पलितं तमब्रवीत्यतः ॥ २९ ॥

तद्वातात् स्फुटितं श्यावं खर रूक्षं जलप्रभम् ।
पित्तात्सदाहं पीताभं कफात् स्निग्ध विदूषितम् ॥ ३० ॥
स्थूलं सुशुक्लं सर्वैस्तु विद्याद्वाभिन्नलक्षणम् ।
शिरोरुजोद्भवं चान्यद्विवर्णं स्वर्शनासहम् ॥ ३१ ॥
असाध्या सन्निपातेन खलतिः पलितानि च ।
शरीरपरिणामोत्थान्यपेक्षन्ते रसायनम् ॥ ३२ ॥

चतुर्विंशोऽध्यायः ।

अथातः शिरोरोगप्रतिषेध व्याख्यास्यामः ।
शिरोऽभितापेऽनिलजे वातव्याधिविधि चरेत् ।
घृताभ्यक्तशिरा रात्रौ पिबेदुष्णपयोनुपः ॥ १ ॥
माषान् मुद्गान् कुलत्थान् वा तद्वत् खादेद्घृतान्वितान् ।
तैलं तिलानां कल्कं वा क्षीरेण सह पाययेत् ॥ २ ॥
पिण्डोपनाहस्वेदाश्च मासधान्यकृता हिताः ।
वातघ्नदशमूलादिसिद्धक्षीरेण सेचनम् ॥ ३ ॥
स्निग्ध नस्यं तथा धूमः शिरः श्रवणतर्पणम् ।
वरणादौ गणे क्षुण्णे क्षीरमर्धोदकं पचेत् ॥ ४ ॥
क्षीरावशिष्टं तच्छीतं मथित्वा सारमाहरेत् ।
ततो मधुरकैः सिद्धं नस्यं तत्पूजितं हविः ॥ ५ ॥
वर्गेऽत्र पक्वं क्षीरे च पेयं सर्पिः सशर्करम् ।
कार्पासमज्जात्वङ्मुस्तासुमनःकोरकाणि च ॥ ६ ॥
नस्यमुष्णाम्बुपिष्टानि सर्वमूर्धरुजापहम् ।
शर्कराकुङ्कुमयुतं घृतं पित्तासृगन्वये ॥ ७ ॥
प्रलेपः सघृतैः कुष्ठकुटिलोत्पलचन्दनैः ।
वातोद्रेकभयाद्रक्तं न चास्मिन्नवसेचयेत् ॥ ८ ॥
इत्यशान्तौ चले दाहः कफे चोष्णं यथोदितम् ।

अर्द्धावभेदकेऽप्येषा यथादोषान्वया क्रिया ॥ ९ ॥
शिरीषबीजापामार्गमूल नस्यं विडान्वितम् ।
स्थिरारसो वा लेपे तु प्रयुक्ताटोऽम्लकल्कितः ॥ १० ॥
सूर्य्यावर्त्ते तु तस्मिंस्तु शिरयापहरेदसृक् ।
शिरोऽभितापे पित्तोत्थे स्निग्धस्य व्यधयेच्छिराम् ॥ ११ ॥
शीताः शिरोमुखालेपसेकश्रोधनवस्तयः ।
जीवनीयशृतोशीरसर्पिषो पाननस्ययोः ॥ १२ ॥
कर्त्तव्य रक्तजेऽप्येतत् प्रत्याख्याय च शङ्खके ।
श्लेष्माभितापैर्जीर्णाज्यस्नेहितं कटुकैर्वमेत् ॥ १३ ॥
स्वेदप्रलेपनस्याद्या रूक्षतीक्ष्णोष्णभेषजैः ।
शस्यन्ते चोपवासोऽत्र निचये मिश्रमाचरेत् ॥ १४ ॥
कृमिजे शोणित नस्यं तेन मूर्च्छन्ति जन्तवः ।
मत्ताः शोणितगन्धेन निर्यान्ति घ्राणवक्त्रयोः ॥ १५ ॥
सुतीक्ष्णनस्यधूमाभ्यां कुर्य्याच्छिर्हरणं ततः ।
विडङ्गसर्जिकादन्तीहिङ्गुगोमूत्रसाधितम् ॥ १६ ॥
कटुनिम्बेऽङ्कुदौपीलुतैल नस्यं पृथक् पृथक् ।
अजामूत्रद्रुत नस्ये कृमिजित् कृमिजित्परम् ॥ १७ ॥
पूतिमत्स्ययुतैः कुर्य्याद् धूम नावनभेषजैः ।
कृमिभिः पीतरक्तत्वाद्रक्तमत्र न निर्हरेत् ॥ १८ ॥
वाताभितापविहितः कम्पे दाहादिना क्रमः ।
नवे जन्मोत्तर जाते योजयेदुपशीर्षके ॥ १९ ॥
वातव्याधिक्रियां पक्के कर्मविद्रधिचोदितम् ।
आमपक्के यथायोग्यं विद्रधिपिटिकार्बुदे ॥ २० ॥
अरूंषिकाजलौकोभिर्हृतासृग् निम्बवारिणा ।
सिक्ता प्रभूतलवणैर्लिम्पेदश्वशकृद्रसैः ॥ २१ ॥
पटोलनिम्बपत्रैर्वा सहरिद्रैः सुकल्कितैः ।

गोमूत्रजीर्णपिण्याकशङ्खकवाकुमलैरपि ॥ २२ ॥
कपालभृष्टं कुष्ठं वा चूर्णितं तैलसंयुतम् ।
रूंषिकालेपनं कण्डूच्छेददाहार्त्तिनाशनम् ॥ २३ ॥
मालतीचित्रकाश्वघ्ननक्तमालप्रसाधितम् ।
वचारूंषिकयोस्तैलमभ्यङ्गः क्षुरघृष्टयोः ॥ २४ ॥
शमयन्तौ शिरस. शुद्धैः यतेत वमनादिभिः ।
विध्येच्छिरां दारुणके लालाद्यां शीलयेन्मृजाम् ॥ २५ ॥
नावनं मूर्ध्नि वस्तिञ्च लेपयेच्च समाक्षिकैः ।
प्रियालबीजमधुककुष्ठमाषैः ससर्षपैः ॥ २६ ॥
लाक्षाग्रन्थ्याकपत्रैडगजधान्योफलैस्तथा ।
कोरदूषत्तणक्षारवारिप्रक्षालनं हितम् ॥ २७ ॥
इन्द्रलुप्ते यथासन्नं शिरां विध्वा प्रलेपयेत् ।
प्रच्छाय गाढं कासीसमनोह्वातुत्थकोषणैः ॥ २८ ॥
वन्यामरतरुभ्यां वा गुञ्जामूलफलैस्तथा ।
तथा लाङ्गलिकामूलैः करवीररसेन वा ॥ २९ ॥
सक्षौद्रक्षुद्रवार्त्ताकस्वरसेन रसेन वा ।
धत्तूरकस्य पत्राणां भल्लातकरसेन वा ॥ ३० ॥
अथवा माक्षिकहरितालपुष्पत्रिकण्टकैः ।
तैलाक्ता हस्तिदन्तस्य मषी वा चौषधं परम् ॥ ३१ ॥
शुक्लरोमोद्भवे तद्वन्मषी मेषविषाणजा ।
वर्जयेद्वारिणा सेकं यावद्रोमसमुद्भवः ॥ ३२ ॥
खलतौ पलिते वल्यां हरिल्लोम्नि च शोधितम् ।
नस्यवक्त्रशिरोऽभ्यङ्गप्रदेहैः समुपाचरेत् ॥ ३३ ॥
सिद्धं तैलं अक्षय्याद्यैर्जीवनीयैश्च नावनम् ।
मासं वा [illegible] तैलं क्षीरभुङ्नावयेद्यतिः ॥ ३४ ॥
नीलोत्पलीपक्वैरक्षभृङ्गस्वरसभावितम् ।

श्लेष्मचतिलरामाणां बीजं काकाण्डकीसमम् ॥ ३५ ॥
पिष्टाजपयसा लोहाल्लिप्तादर्कांशुतापितात् ।
तैलं घृतं क्षौरभुजो नावनात् पतिमान्तकृत् ॥ ३६ ॥
क्षीराल्लहरात् भृङ्गरजसः सौरसाद्रसात् ।
प्रस्थैस्तैलस्य कुडवः सिद्धो यष्टीपलान्वितः ॥ ३७ ॥
नस्य शैलोद्भवे भाण्डे शृङ्गे मेषस्य वा स्थितः ।
क्षीरेण श्लक्ष्णपिष्टौ वा दुग्धिकाकरवीरकौ ॥ ३८ ॥
उत्पाट्य पलितं देयावाशये पलितापहौ ।
क्षीरं प्रियाल यष्ट्याह्व जीवनीयो गणस्त्विलाः ॥ ३९ ॥
कृष्णाः प्रलेपो वक्त्रस्य हरो लोमवलीहितः ।
तिलाः सामलकाः पद्मकिञ्जल्को मधुकं मधु ॥ ४० ॥
बृंहयेच्च रजेचैतत् केशान्मूर्द्धप्रलेपनात् ।
मांसी कुष्ठं तिलाः कृष्णाः सारिवा नीलमुत्पलम् ॥४१॥
क्षौद्रं च क्षीरपिष्टानि केशसवर्द्धनं परम् ।
अयोरजोभृङ्गरजस्त्रिफला कृष्णमृत्तिका ॥ ४२ ॥
स्थितमिक्षुरसे मास समूलं पलितं रजेत् ।
माषकोद्रवधान्याम्लैर्यवागूस्त्रिदिनोषिता ॥ ४३ ॥
लोहशुक्लोत्कटा पिष्टा बलाकामपि रञ्जयेत् ।
प्रपौण्डरीकमधुकपिप्पलीचन्दनोत्पलैः ॥ ४४ ॥
सिद्धं धात्रीरसे तैलं नस्येनाभ्यञ्जनेन च ।
सर्वान् मूर्द्धगदान् हन्ति पलितानि च शीलितम् ॥ ४५ ॥
वरीजीवन्तिनिर्य्यासपयोभिर्यमकं पचेत् ।
जीवनीयैश्च तन्नस्यं सर्वजत्वूर्द्धरोगजित् ॥ ४६ ॥
मयूरं पक्वपित्तान्त्रपादविट्तुण्डवर्जितम् ।
दशमूलबलाराम्नामधुकैस्त्रिपलैर्युतम् ॥ ४७ ॥
जले पक्त्वा घृतप्रस्थं तस्मिन् क्षीरसमं पचेत् ।

कल्कितैर्मधुरद्रव्यैः सर्वजत्वूर्ध्वरोगजित् ॥ ४८ ॥
तदभ्यासौकृत पानं वस्त्यभ्यञ्जननावनैः ।
एतेनैव कषायेण घृतप्रस्थं विपाचयेत् ॥ ४९ ॥
चतुर्गुणेन पयसा कल्कैरेभिश्च कार्षिकैः ।
जीवन्तीत्रिफलामेदामृद्वीकादिपरूषकैः ॥ ५० ॥
समङ्गाचविकाभार्ङ्गीकाश्मरीकर्कटाह्वयैः ।
आलगुप्तामहामेदातालुखर्जूरमुस्तकैः ॥ ५१ ॥
मृणालविसखर्जूरयष्टीमधुकजीवकैः ।
शतावरीविदारीक्षुबृहतीसारिवायुगैः ॥ ५२ ॥
दूर्वाक्षदर्भभकशृङ्गाटककसेरुकैः ।
राम्नास्थिरातामलकीसूक्ष्मैलाशठिपौष्करैः ॥ ५३ ॥
पुनर्नवातुगाक्षीरीकाकोलीधन्वयासकैः ।
मधूकाक्षोटवातामसुङ्गातामिषुकैरपि ॥ ५४ ॥
महामायूरमित्येतन्मायूरादधिकं गुणैः ।
धात्विन्द्रियस्वरभ्रंशश्वासकासार्दितापहम् ॥ ५५ ॥
योन्यसृक्शुक्रदोषेषु शस्तं वन्ध्यासुतप्रदम् ।
आखुभिः कर्कटैर्हंसैः शस्यैश्चेति प्रकल्पयेत् ॥ ५६ ॥
जत्रूर्ध्वजानां व्याधीनामेकत्रि शमतद्वयम् ।
परस्परमसङ्कीर्णं विस्तरेण प्रकाशितम् ॥ ५७ ॥
ऊर्ध्वमूलमधः शाखमृषय. पुरुष विदुः ।
मूलप्रहारिणस्तस्माद् रोगान् शीघ्रतरं जयेत् ॥ ५८ ॥
सर्वेन्द्रियाणि येनाग्निन् प्राणा येन च संश्रिताः ।
तेन तस्योत्तमाङ्गस्य रक्षायामादृतो भवेत् ॥ ५९ ॥

पञ्चविंशोऽध्यायः ।

अथातो व्रणविज्ञानीयप्रतिषेधं व्याख्यास्यामः ।

व्रणो द्विधा निजागन्तुदुष्टशुद्धविभेदतः ।
निजो दोषैः शरीरोत्थैरागन्तुर्बाह्यहेतुजः ॥ १ ॥
दोषैरधिष्ठितो दुष्टः शुद्धस्तैरनधिष्ठितः ।
संहतत्वं विहतता काठिन्यं मृदुताऽपि वा ॥ २ ॥
अत्युस्रस्रावसस्रत्वमत्यौष्ण्यमतिशीतता ।
रक्तत्व पाण्डुता कार्ष्ण्य पूतिपूयपरिस्रुतिः ॥ ३ ॥
पूतिमांसशिरास्नायुच्छवतोक्षक्षितातिरुक् ।
सरम्भदाहखयथुकण्ड्वादिभिरुपद्रुतिः ॥ ४ ॥
दीर्घकालानुबन्धश्च विद्याद्दुष्टव्रणाकृतिम् ।
स पञ्चदशधा दोषैः सरक्तैस्तत्र मारुतात् ॥ ५ ॥
श्यावः कृष्णोऽरुणो भस्मकपोताम्बिनिभोऽपि च ।
मस्तुमांसपुलाकाम्बुतुल्यतन्वल्पसस्रुतिः ॥ ६ ॥
निर्मांसस्रोदभेदाढ्यो रूक्षश्चटचटायते ।
पित्तेन क्षिप्रजः पीतो नील. कपिलपिङ्गलः ॥ ७ ॥
सूक्तकिंशुकभस्माम्बुतैलोऽत्युष्णबहुस्रुतिः ।
क्षारोक्षितक्षतसमव्यथो रागोष्मपाकवान् ॥ ८ ॥
कफेन पाण्डुः कण्डूमान् बहुश्वेतघनस्रुतिः ।
स्थूलोष्टः कठिनः स्नायुशिराजालस्ततोऽल्परुक् ॥ ९ ॥
प्रवालरक्तो रक्तेन सरक्तं पूयसुद्गिरेत् ।
वाजिस्थानसमो मन्थे युक्तो लिङ्गैश्च पैत्तिकैः ॥ १० ॥
द्वाभ्यां त्रिभिश्च सर्वैश्च विद्यात्तत्तत्समुद्भवात् ।
जिह्माग्रभो मृदुः श्लक्ष्णः स्रावौष्ठपिटिकः समः ॥ ११ ॥
किञ्चिदुन्नतमध्यो वा व्रणः शुद्धोऽनुपद्रवः ।
त्वगामिषशिरास्नायुसन्ध्यस्थीनि व्रणाश्रयाः ॥ १२ ॥

कोष्ठो मर्म च तान्यष्टौ दुःसाध्यान्युत्तरोत्तरम् ।
सुसाध्यः सत्त्वमांसाग्निवयोबलवति व्रणः ॥ १३ ॥
हस्वो दीर्घस्त्रिपुटकश्चतुरस्राकृतिश्च यः ।
तथास्फिक्पायुमेढ्रोष्ठपृष्ठान्तर्वङ्क्षगण्डगः ॥ १४ ॥
कृच्छ्रसाध्योऽक्षिदशननासिकापाङ्गनाभिषु ।
सेवनीजठरश्रोत्रपार्श्वकक्षास्तनेषु च ॥ १५ ॥
फेनपूयानिलवहः शल्यवानूर्ध्वनिर्वमी ।
भगन्दरोऽन्तर्वदनस्तथा कण्ठास्थिसंश्रितः ॥ १६ ॥
कुष्ठिनां विषजुष्टानां शोषिणां मधुमेहिनाम् ।
व्रणाः कृच्छ्रेण सिद्ध्यन्ति येषाञ्च स्युर्वणे व्रणाः ॥ १७ ॥
नैव सिद्ध्यन्ति वीसर्पज्वरातीसारकासिनाम् ।
पिपासूनामनिद्राणां श्वासिनामविपाकिनाम् ॥ १८ ॥
भिन्ने शिरः कपाले वा मस्तुलुङ्गस्य दर्शने ।
स्नायुक्षे दाच्छिराच्छेदाद् गाम्भीर्यात् कृमिभक्षणात् ॥१९॥
अस्थिभेदात्तशल्यत्वात्तविषत्वादतर्कितात् ।
मिथ्यावन्धादतिस्नेहाद् रौक्ष्याद्रोमातिघट्टनात् ॥ २० ॥
क्षोभादशुद्धकोष्ठत्वात् सौहित्यादतिकर्शनात् ।
मद्यपानाद्दिवास्वापाद् व्यवायाद्रात्रिजागरात् ॥ २१ ॥
व्रणो मिथ्योपचाराच्च नैव साध्योऽपि रोहति ।
कपोतवर्णप्रतिमा यस्यान्ताः क्लेदवर्जिताः ॥ २२ ॥
स्थिरास्त्विपिटिकावन्तो रोहतीति तमादिशेत् ।
अथात्र शोफावस्थायां यथासन्नं विशोधनम् ॥ २३ ॥
योज्य शोफो हि शुद्धानां व्रणस्याशु प्रशाम्यति ।
कुर्याच्छीतोपचारन्तु शोफावस्थस्य सन्ततम् ॥ २४ ॥
दोषाग्निरग्निवत्तेन प्रयाति सहसा शमम् ।
शोफे व्रणे च कठिने विवर्णे वेदनान्विते ॥ २५ ॥

वियुक्ते विशेषेण जलौकाद्यैर्हरेदसृक् ।
दुष्टास्रे ऽपगते सद्यः शोफरागरुजां शमः ॥ २६ ॥
क्षते क्षते च रुधिरे सुशीतैः सर्पयवीर्ययोः ।
सुश्लक्ष्णैः स्तदहः पिष्टैः क्षीरेक्षुरसद्रवैः ॥ २७ ॥
शतधौतघृतोपेतैर्मृदुरन्यैरशोषिभिः ।
प्रतिलोम हितो लेपः सेकाभ्यङ्गाश्च तत्कृताः ॥ २८ ॥
न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलैः ।
प्रदेहो भूरिसर्पिर्भिः शोफनिर्वापणः परम् ॥ २९ ॥
वातोल्बणानां स्तब्धानां कठिनानां महारुजाम् ।
स्रुतासृजाञ्च शोफानां व्रणानामपि चेष्टयाम् ॥ ३० ॥
आनूपवेसवाराद्यैः स्वेदः सोमाम्लिलाः पुनः ।
भृष्टा निर्वाटिताः क्षीरे तत्पिष्टादाहरुग्घराः ॥ ३१ ॥
स्थिरान् मन्दरुजः शोफान् स्नेहैर्वातकफापहैः ।
अभ्यज्य स्वेदयित्वा च वेसवनाद्या शनैः शनैः ॥ ३२ ॥
विस्रापनार्थं स्रवणात् तैलेनाङ्कुशकेन वा ।
यवगोधूममुद्गैश्च सिद्धपिष्टैः प्रलेपयेत् ॥ ३३ ॥
विलीयते सचेत्तैवं ततस्त्वमुपनाहयेत् ।
अविदग्धस्तथा शान्तिं विदग्धः पाकमश्नुते ॥ ३४ ॥
सकोलतिलवल्लोमा दध्यम्ला सक्तुपिण्डिका ।
सकिण्वकुष्ठलवणा कोष्णा श्लेष्मोपनाहने ॥ ३५ ॥
सुपक्वे पिण्डिते शोफे पीड़नैरुपपीड़िते ।
दारुणं दारणार्हस्य सुकुमारस्य चेष्यते ॥ ३६ ॥
गुञ्जुत्वतसिगोदन्तस्वर्णक्षीरी कपोतविट् ।
क्षारौषधानि क्षाराश्च पक्वशोफविदारणम् ॥ ३७ ॥
पूयगर्भानणुद्वारान् सोत्सङ्गान्मर्मगानपि ।
निःस्रैः पीड़नद्रव्यैः समन्तात् प्रतिपीडयेत् ॥ ३८ ॥

शुष्यन्त समुपेक्षेत प्रलेपं पीड़नं प्रति।
न मुखे चैनमालिम्पेत् तथा दोषः प्रसिच्यते ॥ ३९ ॥
कलाययवगोधूममाषमुद्गहरेणवः।
द्रव्याणां पिच्छलानाञ्च त्वग्मूलानि प्रपीड़नम् ॥ ४० ॥
सप्तसु क्षालनाद्येषु सुरसारग्वधादिकौ।
भृश दुष्टे व्रणे योज्यौ मेहकुष्ठव्रणेषु च ॥ ४१ ॥
अथवा क्षालन क्वाथः पटोलीनिम्बपत्रजः।
अविशुद्धे विशुद्धे तु न्यग्रोधादित्वगुद्भवः ॥ ४२ ॥
पटोलीतिलयष्ट्याह्वविहृद्दन्तीनिशाद्वयम्।
निम्बपत्राणि चालेयः सपटुर्व्रणशोधनः ॥ ४३ ॥
व्रणान् विशोधयेद् वर्त्या सूक्ष्मास्थान् सन्धिमर्मगान्।
कृतया विहृतादन्तीलाङ्गलीमधुसैन्धवैः ॥ ४४ ॥
वाताभिभूतान् सास्रावान् धूपयेदुग्रवेदनान्।
यवाज्यभूर्जमदनश्रीवेष्टकसुराह्वयैः ॥ ४५ ॥
निर्वापयेद् भृश शीतैः पित्तरक्तविषोल्बणान्।
शुष्काल्पमांसे गम्भीरे व्रण उत्सादनं हितम् ॥ ४६ ॥
न्यग्रोधपद्मकादिभ्यामश्वगन्धावलातिलैः।
अथास्यमांसादमांसानि विधिनोपहितानि च ॥ ४७ ॥
मांस मांसादमांसेन वर्द्धते शुद्धचेतसः।
उत्सन्नमृदुमांसानां व्रणानामवसादनम् ॥ ४८ ॥
जातीमुकुलकासीसमनोह्वालपुराग्निकैः।
उत्सन्नमांसान् कठिनान् कण्डूयुक्तांश्चिरोत्थितान् ॥ ४९ ॥
व्रणान् सुदुःखशोध्यांश्च शोधयेत् क्षारकर्मणा।
स्रवन्तोऽश्मरिजाभूत्र ये चान्ये रक्तवाहिनः ॥ ५० ॥
छिन्नाश्च सन्धयो येषां यथोक्तैर्ये च शोधनैः।
शोध्यमाना न शुद्ध्यन्ति शोध्याः स्युस्तेऽग्निकर्मणा ॥ ५१ ॥

शुद्धानां रोपणं योज्यमुक्तादाय यदीरितम् ।
अश्वगन्धारुहारोध्र कट्फल मधुयष्टिका ॥ ५२ ॥
समङ्गाधातकीपुष्पं परमं व्रणरोपणम् ।
अपेतपूतिमांसानां मांसस्थानामरोहताम् ॥ ५३ ॥
कल्क सरोहण कुर्य्यात् तिलानां मधुकान्वितम् ।
स्निग्धोष्णतिक्तमधुरकषायत्वैः स सर्वजित् ॥ ५४ ॥
सक्षौद्रनिम्बपत्राभ्यां युक्त. संशोधन परम् ।
पूर्वाभ्यां सर्पिषा चासौ युक्तः स्यादाशुरोपणः ॥ ५५ ॥
तिलवद्यवकल्कन्तु केचिदिच्छन्ति तद्विदः ।
सास्रपित्तविषागन्तुगम्भीरान् सोष्मणो व्रणान् ॥ ५६ ॥
क्षीररोपणभैषज्यघृतेनाज्येन रोपयेत् ।
रोपणौषधसिद्धेन तैलेन कफवातजान् ॥ ५७ ॥
काक्षीरोध्राभयासर्जसिन्दूराञ्जनतुत्थकम् ।
चूर्णित तैलमदनैर्युक्त रोपणमुत्तमम् ॥ ५८ ॥
समाना स्थिरमांसाना त्वक्स्थानां चूर्ण इष्यते ।
ककुभोदुम्बराश्वत्थजम्बू कट्फलरोध्रजै. ॥ ५९ ॥
त्वचमाशु निगृह्णन्ति त्वक्चूर्णैश्चूर्णिता व्रणाः ।
लाक्षामनोह्वामञ्जिष्ठाहरितालनिशाद्वयै. ॥ ६० ॥
प्रलेपः सघृतक्षौद्रस्त्वग्विशुद्धिकरः परम् ।
कालीयकलताम्बास्थिहैमकालारसोत्तमै. ॥ ६१ ॥
लेप सगैरिकमयरस. सवर्णकरणः परम् ।
दग्धो वारणदन्तोऽन्तर्धूम तैल रसाञ्जनम् ॥ ६२ ॥
रोमसञ्जननो लेपस्तद्वत्तैलपरिप्लुता ।
चतुष्पान्नखरोमास्थित्वक्शृङ्गखुरजा मषी ॥ ६३ ॥
व्रणिन. शस्त्रकर्मोक्त पथ्यापथ्यान्नमादिशेत् ।
इ पञ्चमूले वर्गश्च वातघ्नो वातिके हित. ॥ ६४ ॥

न्यग्रोधपद्मकाद्यौ तु तद्वत्पित्तप्रदूषिते ।
आरग्वधादिः श्लेष्मघ्नः कफे मिश्रस्तु मिश्रके ॥ ६५ ॥
एभिः प्रक्षालनालेपघृततैलरसक्रियाः ।
चूर्णो वर्त्तिश्च सयोज्या व्रणे सप्त यथायथम् ॥ ६६ ॥
जातीनिम्बपटोलपत्रकटुकादार्वीनिशासारिवा-
मञ्जिष्ठाभयसिद्धतुत्थमधुकैर्नक्तान्ध्रवीजान्वितैः ।
सर्पिर्माध्यमनेन सूक्ष्मवदना मर्माश्रिताः क्लेदिनो-
गम्भीराः सरुजो व्रणाः सगतयः शुद्ध्यन्ति रोहन्ति च ॥६७॥

षड्विंशोऽध्यायः ।

अथातः सद्योव्रणप्रतिषेधं व्याख्यास्यामः ।

सद्योव्रणा ये सहसा सम्भवन्त्यभिघातजाः ।
अनन्तैरपि तैरङ्गमुच्यते जुष्टमष्टधा ॥ १ ॥
दृष्टावक्रत्तविच्छिन्नप्रविलम्बितपातितम् ।
विद्धं भिन्नं विदलितं तत्र दृष्टं लसीकया ॥ २ ॥
रक्तश्लेष्मेण वा युक्तं सम्रोष क्षेदनात् स्रवेत् ।
अवगाढं ततः क्रत्तं विच्छिन्नं स्वात्ततोऽपि च ॥ ३ ॥
प्रविलम्बि सशेषेऽस्थि पातितं पतितं तनोः ।
सूक्ष्मास्य ग्रस्यविद्धं तु विद्धं कोष्ठविवर्जितम् ॥ ४ ॥
भिन्नमन्यद्विदलितं मज्जरक्तपरिप्लुते ।
प्रहारपीनोत्पेषाक्षाख्या पृथुतां गतम् ॥ ५ ॥
सद्यः सद्यो व्रणं सिञ्चेदथ यष्ट्याह्वसर्पिषा ।
तीव्रव्यथं कवोष्णेन बलातैलेन वा पुनः ॥ ६ ॥
चतोष्णो निग्रहार्थं तत्कालं विस्रुतस्य च ।
कषायशीतमधुरस्निग्धा लेपादयो हिताः ॥ ७ ॥
सद्यो व्रणेष्वायतेषु सन्धानार्थं विशेषतः ।

मधुसर्पिश्च युञ्जीत पित्तघ्नीश्च क्रिमौ क्रियाः ॥ ८ ॥
ससरक्षेषु कर्त्तव्यमूर्ध्वं चाधश्च शोधनम् ।
उपवासो हितं भुक्तं प्रतत रक्तमोक्षणम् ॥ ९ ॥
दृष्टे विदलिते चैष सुतरामिष्यते विधिः ।
तयोर्ह्यल्प स्रवत्यस्रं पाकस्तेनाश्च जायते ॥ १० ॥
अत्यर्थमस्र स्रवति प्रायशोऽन्यत्र विद्यते ।
ततो रक्तक्षयाद्वायौ कुपितेऽतिरुजाकरे ॥ ११ ॥
स्नेहपानपरीषेकस्वेदलेपोपनाहनम् ।
स्नेहवस्तिं च कुर्वीत वातघ्नौषधसाधितम् ॥
इति सप्ताहिकः प्रोक्तः सद्यो व्रणहितो विधिः ।
सप्ताहादूगतवेगे तु पूर्वोक्तं विधिमाचरेत् ॥ १२ ॥
प्रायः सामान्यकर्मेदं वक्ष्यते तु पृथक् पृथक् ।
दृष्टे रुजं निगृह्याशु व्रणे चूर्णानि योजयेत् ॥ १४ ॥
कल्कादीन्यवकृत्ते तु विच्छिन्नप्रविलम्बिनोः ।
सीवन विधिनोक्तेन बन्धनं चानुपीडनम् ॥ १५ ॥
असाध्यं स्फुटित नेत्रमदीर्णं लभ्यते तु यत् ।
सन्निवेश्य यथास्थानमव्याविद्धगिरं भिषक् ॥ १६ ॥
पीडयेत् पाणिना पद्मपलाशान्तरितेन तत् ।
ततोऽस्य सेचने नस्ये तर्पणे च हित हविः ॥ १७ ॥
विपक्वमाज यष्ट्याह्वजीवकर्षभकोत्पलैः ।
सपयस्कैः परं तद्धि सर्वनेत्राभिघातजित् ॥ १८ ॥
गलपीडावसन्नेऽक्षि वमनोत्क्लेशनक्तवाः ।
प्राणायामोऽथवा कार्यः क्रिया च क्षतनेत्रवत् ॥ १९
कर्णे स्थानात् च्युते स्रुते स्रोतस्तैलेन पूरयेत् ।
कर्कोटिकायां छिन्नायां निर्गच्छत्यपि मारुते ॥ २० ॥
सम निवेश्य बध्नीयात् स्थूला शीघ्रं निरन्तरम् ।

आजेन सर्पिषा चात्र परिषेकः प्रशस्यते ॥ २१ ॥
उत्तानोऽन्नानि भुञ्जीत शयीत च सुयन्त्रितः ।
घातं शाखासु तिर्यक्स्थं गात्रे सम्यङ्निवेशिते ॥ २२ ॥
स्यूत्वा वैल्लितबन्धेन बध्नीयाद् घनवाससा ।
चर्मणा गोष्फणाबन्धः कार्यश्चासङ्गते व्रणे ॥ २३ ॥
पादौ विलम्बिमुष्कस्य प्रोक्ष्य नेत्रे च वारिणा ।
प्रवेश्य हृषणौ सीव्येत् सेवन्या तुन्नसंज्ञया ॥ २४ ॥
कार्यश्च गोष्फणाबन्धः कक्षामावेश्य षट्कम् ।
स्नेहसेकं न कुर्वीत तत्र क्लिद्यति हि व्रणः ॥ २५ ॥
कालानुसार्यैर्गुर्वेलाजातीचन्दनपर्पटैः ।
शिलादार्व्यमृतातुत्थैः सिद्धं तैलं च रोपणम् ॥ २६ ॥
छित्त्वा निःशेषतः शाखां दग्ध्वा तैलेन युक्तितः ।
बध्नीयात् कोशबन्धेन ततो व्रणवदाचरेत् ॥ २७ ॥
कार्या शल्याहृते विद्धे भङ्गाद्विदलिते क्रिया ।
शिरसोऽपहृते शल्ये वालवर्त्तिं प्रवेशयेत् ॥ २८ ॥
मस्तुलुङ्गे स्रुतिं कृत्वा हन्यादेनं चलोऽन्यथा ।
व्रणे रोहति चैकैकं शनैरपनयेत्कचम् ॥ २९ ॥
मस्तुलुङ्गस्रुतौ खादेन्मस्तिष्कानन्यजीवजान् ।
शल्ये हृतेऽङ्गादन्यस्मात् स्नेहवर्त्तिं निधापयेत् ॥ ३० ॥
दूरावगाढाः सूक्ष्माख्या ये व्रणाः सुतशोणिताः ।
सेचयेच्छृतैलेन सूक्ष्मनेत्रार्पितेन तान् ॥ ३१ ॥
भिन्ने कोष्ठेऽसृजापूर्णे मूर्च्छाहृत्पार्श्ववेदनाः ।
ज्वरोदाहृत्तडाध्मानं भक्तस्यानभिनन्दनम् ॥ ३२ ॥
सङ्गो विण्मूत्रमरुतां श्वासः स्वेदोऽचिरक्तताम् ।
लोहगन्धित्वमास्यस्य स्याद् गात्रे च विगन्धता ॥ ३३ ॥
आमाशयस्थे रुधिरे रुधिरं छर्दयत्यपि ।

आध्मानेनातिमात्रेण शूलेन च विशस्यते ॥ ३४ ॥
पक्वाशयस्थे रुधिरे सशूलं गौरवं भवेत् ।
नाभेरधस्ताच्छीतत्वं खेभ्यो रक्तस्य चागमः ॥ ३५ ॥
अभिन्नोऽप्याशयः सूक्ष्मैः स्रोतोभिरभिपूर्यते ।
अस्रजास्यन्दमानेन पार्श्वं मूत्रेण वस्तिवत् ॥ ३६ ॥
तत्रान्तर्लोहितं शीतपादोच्छ्वासकराननम् ।
रक्ताच्च पाण्डुवदनमानद्ध च विवर्जयेत् ॥ ३७ ॥
आमाशयस्थे वमनं हितं पक्वाशयाश्रये ।
विरेचनं निरूहश्च नि.स्नेहोष्णैर्विशोधनैः ॥ ३८ ॥
यवकोलकुलत्थानां रसैः स्नेहविवर्जितैः ।
भुञ्जीतान्नं यवागूं वा पिबेत्सैन्धवसंयुताम् ॥ ३९ ॥
अतिनिःस्रुतरक्तस्तु भिन्नकोष्ठः पिबेदसृक् ।
छिन्नभिन्नान्त्रभेदेन कोष्ठभेदो द्विधा स्मृतः ॥ ४० ॥
मूर्च्छादयोऽल्पाः प्रथमे द्वितीये त्वतिबाधकाः ।
क्लिन्नान्त्रः सशयो देही भिन्नान्त्रो नैव जीवति ॥ ४१ ॥
यथास्वं मार्गमापन्ना यस्य विण्मूत्रमारुताः ।
व्युपद्रवः सभिन्नेऽपि कोष्ठे जीवत्यसंशयम् ॥ ४२ ॥
अभिन्नमन्त्रं निष्क्रान्तं प्रवेश्यं नत्वतोऽन्यथा ।
उत्पिण्डिलांशिराग्रस्तं तदप्येके वदन्ति तु ॥ ४३ ॥
प्रक्षाल्य पयसा दिग्धं व्रणश्लेष्मितपांसुभिः ।
प्रवेशयेत् कृतनखो घृतेनाक्तं शनैः शनैः ॥ ४४ ॥
क्षौरेणार्द्रीकृतं शुष्कं भूरिसर्पिः परिप्लुतम् ।
अङ्गुल्या प्रक्षयेत्कण्ठं जलेनोद्वेलयेदपि ॥ ४५ ॥
तथान्त्रं ग्रि विशन्त्यन्तस्तत्कालं पीडयन्ति च ।
व्रणस्रौत्स्यात् बहुत्वाद्वा कोष्ठमन्त्रमनाविशत् ॥ ४६ ॥
तत् प्रमाणेन जठरं पाटयित्वा प्रवेशयेत् ।

यथास्थानं स्थिते सम्यगन्ते सौम्येदनुव्रणम् ॥ ४७ ॥
स्थानादपेतमादत्ते जीवितं कुपितं च तत् ।
वेष्टयित्वानुपट्टेन घृतेन परिषेचयेत् ॥ ४८ ॥
पाययेत्तं ततः कोष्णं चित्रातैलयुतं पयः ।
मृदुक्रियार्थं शक्तश्च वाग्योगाधः प्रवृत्तये ॥ ४९ ॥
अनुवर्त्तेत वर्षञ्च यथोक्तां व्रणयन्त्रणाम् ।
उदरान्मेदसो वर्त्तिं निर्गतां भस्मना मृदा ॥ ५० ॥
अवकीर्य कषायैर्वा श्लक्ष्णैर्मूलैस्ततः समम् ।
दृढं बध्वा च सूत्रेण वर्द्धयेत् कुशलो भिषक् ॥ ५१ ॥
तीक्ष्णेनाग्निप्रतप्तेन शस्त्रेण सकृदेव तु ।
स्यादन्यथा रुगाटोपो मृत्युर्वा क्रियमानया ॥ ५२ ॥
सक्षौद्रे च व्रणे बद्धे सुजीर्णेऽन्ने घृतं पिबेत् ।
क्षीरं वा शर्कराचित्रालाक्षागोक्षुरकैः शृतम् ॥ ५३ ॥
रुग्दाहजित्प्रयुञ्जीत पञ्चमूलैः परं पूर्वोदितो विधिः ।
मेदोघ्नयुदितं तत्र तैलमभ्यञ्जने हितम् ॥ ५४ ॥
तालीस पद्मकं मांसीहरेणुगुरुचन्दनम् ।
हरिद्रे पद्मबीजानि सोशीरं मधुकं च तैः ॥ ५५ ॥
पक्वं सद्योव्रणेषूक्तं तैलं रोपणमुत्तमम् ।
गूढप्रहाराभिहते पतिते विषमोच्चकैः ॥ ५६ ॥
कार्यं वातासृजित् क्षिप्रमर्दनाभ्यञ्जनादिकम् ।
विश्लिष्टदेहं मथितं क्षीणं मर्माहताहतम् ।
वासयेत्तैलपूर्णायां द्रोण्यां मांसरसाशिनम् ॥ ५७ ॥

सप्तविंशोऽध्यायः ।

अथातो भङ्गप्रतिषेधं व्याख्यास्यामः ।
पातघातावभिद्येधा भङ्गोऽस्थ्नां सन्धिसन्धितः ।

प्रसारणाकुञ्चनयोरशक्तिः सन्धिमुक्तता ॥ १ ॥
इतरस्मिन् भृशं शोफः सर्वावस्थासतिव्यथा ।
अशक्तिश्चेष्टितेऽल्पेऽपि पीड्यमाने सशब्दता ॥ २ ॥
समासादिति भङ्गस्य लक्षणं बहुधा तु तत् ।
भिद्यते भङ्गभेदेन तस्य सर्वस्य साधनम् ॥ ३ ॥
यथा स्यादुपयोगाय तथा तदुपदेक्ष्यते ।
प्राज्याणुदारि यत्त्वस्थिस्पर्शे शब्दं करोति यत् ॥ ४ ॥
यत्रास्थिलेशः प्रविशेन्मध्यमस्थ्नो विदारितः ।
भग्नं यच्चाभिघातेन किञ्चिदेवावशेषितम् ॥ ५ ॥
लक्ष्यमाणं क्षतवद्यच्च मज्जनि मज्जति ।
तद्दुःसाध्यं क्षणाद्यत्तद्वातलालाग्निनामपि ॥ ६ ॥
भिन्नं कपालं यत् कथ्या सन्धिमुक्तं च्युतं च यत् ।
जघनं प्रतिपिष्टं च भग्नं यत्तद्विवर्जयेत् ॥ ७ ॥
असंश्लिष्टकपालं च ललाटं चूर्णितं तथा ।
यच्च भग्नं भवेच्छङ्खशिरः पृष्ठस्तनान्तरे ॥ ८ ॥
सम्यग्यमितमप्यस्थिदुर्न्यासाद्दुर्निबन्धनात् ।
सङ्क्षोभादपि यद्गच्छेद्विक्रियां तद्विवर्जयेत् ॥ ९ ॥
आदितो यच्च दुर्जातमस्थिसन्धिरथापि वा ।
तरुणास्थीनि भुज्यन्ते भज्यन्ते नलकानि तु ॥ १० ॥
कपालानि विभिद्यन्ते स्फुटन्त्यन्यानि भूयसा ।
अथावनतमुन्नम्यमुन्नतं चावपीडयेत् ॥ ११ ॥
आञ्छेदिति क्षिप्तमधोगतं चोपरि वर्त्तयेत् ।
आञ्छनोत्पीडनोन्नामचर्म्मसत्त्वोपबन्धनैः ॥ १२ ॥
सन्धीन् शरीरगान् सर्वान् चलानप्यचलानपि ।
इत्येतैः स्थापनोपायैः सम्यक् संस्थाप्य निश्चलम् ॥ १३ ॥
यष्टिं प्रभूतसर्पिर्भिर्वेष्टयित्वा सुखैस्ततः ।

कदम्बोदुम्बराश्वत्थसर्ज्जार्ज्जुनपलाशजैः ॥ १४ ॥
वशोद्भवैर्वा पृथुभिस्तनुभि मुनिवेशितैः ।
सुश्लक्ष्णैः सुप्रतिस्तब्धैर्वल्कलैः शकलैरपि ॥ १५ ॥
कुशाद्यैः सम बन्धं पट्टस्योपरि योजयेत् ।
शिथिलेन हि बन्धेन सन्धे स्थैर्यं न जायते ॥ १६ ॥
गाढ़ेनातिरुजादाहपाकक्षयभुसम्भवः ।
त्र्याहात् चाहाद्दतौ घर्मे सप्ताहान्मोक्षवेद्विमे ॥ १७ ॥
साधारणे तु पक्षाहाद् भङ्गदोषवशेन वा ।
न्यग्रोधादिकषायेण ततः शीतेन सेचयेत् ॥ १८ ॥
त पक्षमूलपक्वेन पयसा तु सवेदनम् ।
सुखोष्ण वावचार्य्यं स्याद्घृतैलं विजानता ॥ १९ ॥
विभज्य देश कालञ्च वातघ्नौषधसयुतम् ।
प्रतत सेकलेपांश्च विदध्याद् भग्नशीतलान् ॥ २० ॥
यष्टिक्षीर ससर्पिष्क मधुरौषधसाधितम् ।
प्रातः प्रातः पिबेद्भग्न शीतल लाक्षया युतम् ॥ २१ ॥
सव्रणस्य तु भग्नस्य व्रणे मधुघृतोत्तरैः ।
कषायै प्रतिसार्य्योऽथ शेषो भङ्गोदितः क्रमः ॥ २२ ॥
लब्धानि व्रणमासानि प्रलिप्य मधुसर्पिषा ।
सन्दधीत व्रणान् वैद्यो बन्धनैश्चोपपादयेत् ॥ २३ ॥
तान् समान् सुस्थितान्ज्ञात्वा फलिनीरोध्रकट्फलैः ।
समङ्गाधातकीयुक्तैश्चूर्णितैरवचूर्णयेत् ॥ २४ ॥
धातकीरोध्रचूर्णैर्वा रोहन्त्याशु तथा व्रणाः ।
इति भङ्गे उपक्रान्तः स्थिरधातौ ऋतौ हिमे ॥ २५ ॥
मांसलस्यास्रदोषस्य सुसाध्यो दारुणोऽन्यथा ।
पूर्वमध्यान्तवयसामेकद्वित्रिगुणैः क्रमात् ॥ २६ ॥
मासैः स्थैर्यं भवेत्तस्येत्यथोक्त भजतो विधिम् ।

कटीजङ्घोरुभग्नानां कपाटशयन हितम् ॥ २७ ॥
यन्त्रणार्थं तथा कीलाः पञ्च कार्या निबन्धनाः ।
जङ्घोर्वोः पार्श्वयोर्द्वौ द्वौ तल एकश्च कीलकः ॥ २८ ॥
श्रोण्यां वा पृष्ठवंशे वा वक्षस्याच्छकयोस्तथा ।
विमोक्षे भग्नसन्धीना विधिमेव समाचरेत् ॥ २९ ॥
सन्धींश्चिरविमुक्तांस्तु स्निग्धस्विन्नान् मृदूकृतान् ।
उक्तैर्विधानैर्बुध्या च यथास्व स्थानमानयेत् ॥ ३० ॥
असन्धिभग्ने रूढे तु विषमोत्क्षणसाधिते ।
आपोथ्य भङ्गं यमयेत्ततो भग्नवदाचरेत् ॥ ३१ ॥
भग्नं नैति यथा पाक प्रयतेत तथा भिषक् ।
पक्वमांसशिरास्नायुसन्धिः क्लेष न गच्छति ॥ ३२ ॥
व्याताव्याधिविनिर्दिष्टान् स्नेहान् भग्नस्य योजयेत् ।
चतुःप्रयोगान् बल्यांश्च बस्तिकर्म च शीलयेत् ॥ ३३ ॥
शाल्याज्यरसदुग्धाद्यैः पैष्टिकैरविदाहिभिः ।
मात्रयोपचरेद्भग्न सन्धिसश्लेषकारिभिः ॥ ३४ ॥
ग्लानिर्न यस्यते तस्य सन्धिविश्लेषकृद्धि सा ।
लवण कटुक क्षारमम्लं मैथुनमातपम् ।
व्यायामञ्च न सेवेत भग्नो रूक्षञ्च भोजनम् ॥ ३५ ॥

क्षणांस्तिलान् विरजसो दृढवल्लवल्लान्
सप्त क्षिपावहति वारिणि वासयेत ।
सशोषयेदनुदिन प्रविसार्य चैतान्
क्षीरे तथैव मधुकक्वथिते च तोये ॥ ३६ ॥

पुनरपि पीतपयस्कास्तान् पूर्ववदेव शोषितान् बाढम् ।
विगततुषानरजस्कान् सचूर्ण्य सुचूर्णितैर्युञ्जात् ॥ ३७ ॥
नलदवालकलोहितयष्टिकानखमिशिल्पवकुष्ठबलात्वयैः ।
अगरुचन्दनकुङ्कुमसारिवासरलसर्जरसामरदारुभिः ॥ ३८ ॥

पञ्चकादिगणोपेतैस्तिलपिष्टं ततश्च तत् ।
समस्तगन्धभैषज्यसिद्धदुग्धेन पीडयेत् ॥ ३९ ॥
शैलेयराम्नांशुमतीकसेरुकालानुसारीनतपत्ररोध्रैः ।
सचीरयुक्तैः सपयस्कदूर्वैस्तैलं पचेत्तन्नलदादिभिश्च ॥ ४० ॥
गन्धतैलमिदमुत्तममस्थिस्थैर्य्यकृज्जयति चाशु विकारान् ।
वातपित्तजनितानतिवीर्य्यान् व्यापिनोऽपि विविधैरुपयोगैः ४१

अष्टाविंशोऽध्यायः ।

अथातो भगन्दरप्रतिषेधं व्याख्यास्यामः ।
हस्त्यश्वपृष्ठगमनकठिनोत्कटकासनैः ।
अर्शोनिदानाभिहितैरपरैश्च निषेवितैः ॥ १ ॥
अनिष्टाद्दुष्टपाकेन सद्यो वा साधुगर्हणैः ।
प्रायेण पिटिकापूर्वो योऽङ्कुरे द्वाङ्कुरेऽपि वा ॥ २ ॥
पायोर्व्रणोऽन्तर्बाह्यो वा दुष्टास्रक्षांसगो भवेत् ।
बस्तिमूत्राशयाभ्यासगतत्वात् स्यन्दनात्मकः ॥ ३ ॥
भगन्दरः स सर्वश्च दारयत्यक्रियावतः ।
भगबस्तिगुदांस्तेषु दीर्य्यमाणेषु भूरिभिः ॥ ४ ॥
वातमूत्रशकृच्छुक्रं खैः सूक्ष्मैर्वमति क्रमात् ।
दोषैः पृथग्युतैः सर्वैरागन्तुः सोऽष्टमः स्मृतः ॥ ५ ॥
अपक्वं पिटिकाभाहुः पाकप्राप्तं भगन्दरम् ।
गूढमूला ससरभां रुगाढ्यां रूढकोपिनीम् ॥ ६ ॥
भगन्दरकरीं विन्द्यात्पिटिकां न त्वतोऽन्यथा ।
तत्र श्यावारुणोत्तोदभेदस्फुरणरुक्करी ॥ ७ ॥
पिटिकामारुतात्पित्तादुष्ट्रग्रीवावदुच्छ्रिता ।
रागिणी तनुरुक्षाढ्या ज्वरधूमायनान्विता ॥ ८ ॥
स्थिरा स्निग्धा महामूला पाण्डुः कण्डूमती कफात् ।

श्यावा ताम्रा सदाहोषा घोररुग्वातपित्तजा ॥ ९ ॥
पाण्डुरा किञ्चिदाश्यावा कृच्छ्रपाका कफानिलात् ।
पादाङ्गुष्ठसमा सर्वैर्दोषैर्नानाविधव्यथा ॥ १० ॥
शूलारोचकतृड्दाहज्वरच्छर्दिरुपद्रुता ।
व्रणतां यान्ति ताः पक्वाः प्रमादात्तत्र वातजा ॥ ११ ॥
दीर्यतेऽणुमुखैश्छिद्रैः शतपोनकवत् क्रमात् ।
अच्छं स्रवद्भिरास्रावमजस्रं फेनसंयुतम् ॥ १२ ॥
शतपोनकसंज्ञोऽयमुष्ट्रग्रीवस्तु पित्तजः ।
बहुपिच्छापरिस्रावी परिस्रावी कफोद्भवः ॥ १३ ॥
वातपित्तात्परिक्षेपी परिक्षिप्य गुदं गतिः ।
जायते परितस्तत्र प्राकारपरिखेव च ॥ १४ ॥
ऋजुर्वातकफाट्टव्या गुदो गत्वा तु दीर्यते ।
कफपित्ते तु पूर्वोक्तं दुर्नामाश्रित्य कुप्यतः ॥ १५ ॥
अर्शोमूले ततः शोफः कण्डूदाहादिमान् भवेत् ।
स शीघ्रं पक्वभिन्नोऽस्य क्लेदयन्मूलमर्शसः ॥ १६ ॥
स्रवत्यजस्रं गतिभिरयमर्शो भगन्दरः ।
सर्वजः शम्बुकावर्तः शम्बुकावर्तसन्निभः ॥ १७ ॥
गतयो दारयन्त्यस्मिन् रुग्वेगैर्दारुणैर्गुदम् ।
श्लिष्यतोऽभ्यवहृतो मांसमृध्या यदा गुदम् ॥ १८ ॥
क्षिणोति तिर्यङ्निर्गच्छन्नुन्मार्गं क्षततो गतिः ।
स्यात्तत पूयदीर्णायां मांसकोथेन तत्र च ॥ १९ ॥
जायन्ते कृमयस्तस्य खादन्तः परितो गुदम् ।
विदारयन्ति न चिरादुन्मार्गी क्षतजश्च सः ॥ २० ॥
तेषु रुग्दाहकण्ड्वादीन् विद्यात् व्रणनिषेधतः ।
षट् कृच्छ्रसाधनास्तेषां निचयक्षतजौ त्यजेत् ॥ २१ ॥
प्रवाहिनीं बलीं प्राप्य सेवनीं वा समाश्रितम् ।

अथास्य पिटिकामेव तथा यत्नादुपाचरेत् ॥ २२ ॥
शुद्धासृक्स्रुतिसेकाद्यैर्यथा पाकं न गच्छति ।
पाके पुनरुपस्निग्धं स्वेदित चावगाहितः ॥ २३ ॥
यन्त्रयित्वार्शसमिव पश्येत्सम्यग्भगन्दरम् ।
अवाचीन पराचीनमन्तर्मुखबहिर्मुखम् ॥ २४ ॥
अथान्तर्मुखमेषित्वा सम्यक् शस्त्रेण पाटयेत् ।
बहिर्मुखञ्च निःशेष तत क्षारेण साधयेत् ॥ २५ ॥
अग्निना वा भिषक् साधुक्षारेणैवोष्ट्रकन्धरम् ।
नाडीरेकान्तरा. कृत्वा पाटयेच्छतपोनकम् ॥ २६ ॥
तासु रूढासु शेषाश्च मृत्युदीर्णं गुदेऽन्यथा ।
परिक्षेपिणि चाप्येव नाड्युक्तैः क्षारसूत्रकैः ॥ २७ ॥
अर्शोभगन्दरे पूर्वमर्शांसि प्रतिसाधयेत् ।
त्यक्तोपचर्यैः क्षतजः शल्यं शल्यवतस्ततः ॥ २८ ॥
आहरेच्च तथा दद्यात् क्रमिघ्न लेपभोजनम् ।
पिण्डनाड्यादयः स्वेदा सुस्निग्धा रुजि पूजिताः ॥ २९ ॥
सर्वत्र च बहुच्छिद्रे छेदानालोच्य योजयेत् ।
गोतीर्थसर्वतोभद्रदलताङ्गलताङ्गलान् ॥ ३० ॥
पार्श्वं गतेन शस्त्रेण छेदो गोतीर्थको मतः ।
सर्वतः सर्वतोभद्र. पार्श्वच्छेदोऽङ्गलाङ्गल ॥ ३१ ॥
पार्श्वद्वये लाङ्गलकः समस्तांश्चाग्निना दहेत् ।
आस्रावमार्गान्निःशेषान्नैव विकुरुते पुनः ॥ ३२ ॥
यतेत कोष्ठशुद्धौ च भिषक् तस्यान्तरान्तरा ।
लेपो व्रणे विडालास्थित्रिफलारसकल्कितम् ॥ ३३ ॥

ज्योतिष्मतीमलयुलाङ्गलिशेलुपाठा-
कुष्ठाग्निसर्जकरवीरवचासुधार्कैः ।
अभ्यञ्जनाय विपचेत भगन्दराणा

तैलं वदन्ति परमं हितमेतदेषाम् ॥ ३४ ॥
मधुकरोध्रकणाबुटिरेणुकाहिरजनीफलिनीपटुसारिवाः ।
कमलकेसरपद्मकधातकीमदनसर्जरसामयरोध्रकाः ॥ ३५ ॥
सबीजपूरच्छदनैरभिस्तैलं विपाचितम् ।
भगन्दरापचीकुष्ठमधुमेहव्रणापहम् ॥ ३६ ॥
मधुतैलयुताविडङ्गसारत्रिफलामागधिकाकणाश्च लोढ्राः ।
कृमिकुष्ठभगन्दरप्रमेहक्षतनाडीव्रणरोहणा भवन्ति ॥ ३७ ॥
अमृतालुटिवेल्लवल्लकं कलिपथ्यामलकानि गुग्गुलुः ।
क्रमवृद्धमिदं मधुप्लुतं पिटिकास्थौल्यभगन्दरान् जयेत् ॥ ३८ ॥
मागधिकाग्निकलिङ्गविडङ्गैर्बिल्वप्लुतैः सवरापलषट्कैः ।
गुग्गुलुना सप्तमेन समेतैः क्षौद्रयुतैः सकलामयनाशः ॥ ३९ ॥
गुग्गुलुपञ्चपलं पलिकौंशा मागधिका त्रिफला च पृथक् स्यात् ।
त्वक् त्रुटिकर्षयुतं मधुलीढं कुष्ठ भगन्दरगुल्मगतिघ्नम् ॥ ४० ॥
शृङ्गवेररजोयुक्तं तदेव च सुभावितम् ।
क्वाथेन दशमूलस्य विशेषाद्वातरोगजित् ॥ ४१ ॥
उत्तमाखदिरसारजं रजः शीलयन्नसनवारिभावितम् ।
हन्ति तुल्यमहिषाख्यमाक्षिकं कुष्ठमेहपिटिकाभगन्दरान् ॥४२॥
भगन्दरेष्वेष विधेय उक्तः शेषाणि तु व्यञ्जनसाधनानि ।
व्रणाधिकारात्परिशीलनाच्च सम्यग्विदित्वौषधिकं विदध्यात्॥४३
अश्वपृष्ठगमनं चलरोधं मद्यमैथुनमजीर्णमसात्म्यम् ।
साहसानि विविधानि च रूढे वत्सरं परिहरेदधिकं वा ॥४४॥

एकोनत्रिंशोऽध्यायः ।

अथातो ग्रन्थ्यर्बुदश्लीपदापचीनाडीविज्ञानं व्याख्यास्यामः ।
कफप्रधानाः कुर्वन्ति मेदोमांसाश्रया मलाः ।
दुष्टोन्नतं यं ग्रथयुं स ग्रन्थिर्ग्रथनात् स्मृतः ॥ १ ॥

दोषास्रमांसमेदोऽस्थिशिराव्रणभवा नव।
ते तत्र वातादायामतोदभेदान्वितो सित ॥ २ ॥
स्थानात् स्थानान्तरगतिरकस्माद्दाननिर्वृद्धिमान्।
मृदुर्वस्तिरिवानद्धो विभिन्नोऽच्छ स्रवत्यसृक् ॥ ३ ॥
पित्तात्सदाह पीताभो रक्तो वा पच्यते द्रुतम्।
भिन्नोऽस्रमुष्ण स्रवति श्लेष्मणा नीरुजो घन ॥ ४ ॥
शीत. सवर्ण: कण्डूमान् पक्व पूय स्रवेद्घनम्।
दोषैर्दुष्टेऽस्रजि ग्रन्थिर्भवेन्मूर्च्छत्सु जन्तुषु ॥ ५ ॥
शिरामांसच्छ सश्रित्य स: स्याप. पित्तलक्षण।
मासलैर्दूषित मांसमाहारैर्ग्रन्थिमावहेत् ॥ ६ ॥
स्निग्ध महान्त कठिन शिरानद्धं कफाकृतिम्।
प्रद्वेषं मेदुरैर्मेदोनीतं मासेऽथवा त्वचि ॥ ७ ॥
वायुना कुरुते ग्रन्थि मृश स्निग्धं मृदु चलम्।
श्लेष्मतुल्याकृतिं देहक्षयवृद्धित्वयोदयम् ॥ ८ ॥
स विभिन्नो घनं मेदस्तान्त्रासितसित स्रवेत्।
अस्थिभङ्गाभिघाताभ्यामुन्नतावनतं तु यत् ॥ ९ ॥
सोऽस्थिग्रन्थि' पदातिस्तु सहसाभोऽवगाहनात्।
व्यायामाद्वा प्रतान्तस्य शिराजाल सशोणितम् ॥ १० ॥
वायु' सम्पीड्य सङ्कोच्च वक्रीकृत्य विशोष्य च।
नि स्फुर नीरुज ग्रन्थि कुरुते सशिराह्वय: ॥ ११ ॥
अरूढे रूढमात्रे वा व्रणे सर्वरसाशिन:।
सार्द्रे वा बन्धरहिते गात्रे ऽश्माभिहतेऽथवा ॥ १२ ॥
वातास्रमसृत दुष्टं सशोष्य ग्रथित व्रणम्।
कुर्य्यात्सदाह. कण्डूमान् व्रणग्रन्थिरय स्मृत: ॥ १३ ॥
साध्यादोषास्रमेदोजा न तु स्थूलखराश्रया'।
मर्मकण्ठोदरस्थाश्च महत्तु ग्रन्थितोऽर्बुदम् ॥ १४ ॥

तच्चरणं च मेदोऽन्तैः षोढादोषादिभिस्तु तत् ।
प्रायो मेदः कफाढ्यत्वात् स्थिरत्वाच्च न पच्यते ॥ १५ ॥
शिरास्थ शोणितं दोषः सङ्कोचान्तः प्रपीड्य च ।
पाचयेत तदानद्ध मांसाव मांसपिण्डितम् ॥ १६ ॥
मांसाङ्कुरैश्चित याति वृद्धिं चाशु स्रवेत्तत' ।
अजस्र दुष्टरुधिर भूरि तच्छोणितार्बुदम् ॥ १७ ॥
तेष्वसृग्मांसजे वर्ज्यं चत्वार्यन्यानि साधयेत् ।
प्रस्थिता वङ्क्षणोर्वादिमध काय कफोल्वणाः ॥ १८ ॥
दोषा मांसास्रगाः पादौ कालेनाश्रित्य कुर्वते ।
शनैः शनैर्घन शोफ श्लीपद तत्प्रचक्षते ॥ १९ ॥
परिपोटयुत क्षणमनिमित्तरुजं खरम् ।
रूक्षच्च वातात्पित्तात्तु पीतं दाहज्वरान्वितम् ॥ २० ॥
कफाद्गुरुस्निग्धमरुक्चितं मांसाङ्कुरैर्वृहत् ।
तत्पञ्जेद्वत्सरातीतं सुमहत्सुपरिस्रुति ॥ २१ ॥
पाणिना सौष्ठकर्णेषु वदन्त्यके तु पादवत् ।
श्लीपद जायते तच्च देशेऽनूपे भृश भृशम् ॥ २२ ॥
मेदस्याः कण्ठमन्याच्चकक्षावङ्क्षणगा मलाः ।
सवर्णान् कठिनान् स्निग्धान् वार्त्ताकामलकाकृतीन् ॥२३॥
अवगाढान् बहून् गण्डांश्चिरपाकाश्च कुर्वते ।
पच्यन्तेऽल्परुजस्रवन्ते स्रवन्त्यन्येतिकण्डुरा. ॥ २४ ॥
नश्यन्त्यन्ये भवन्त्यन्ये दीर्घकालानुबन्धिन. ।
गण्डमालापची चैवं दूर्वेव चयवृद्धिभाक् ॥ २५ ॥
ता त्यजेत्सज्वरच्छर्दिपार्श्वरुक्कासपीनसाम् ।
अमेदात्यक्तशोफस्य व्रणे चापथ्यसेविनः ॥ २६ ॥
अनुप्रविश्य मांसादीन् दूर पूयोऽभिधावति ।
गतिः सा पूरगमनान्नाड़ी नाड़ीव सस्रुतेः ॥ २७ ॥

नाड्येकानृजुरन्येषां सैवानेकगतिर्गतिः ।
सा दोषैः पृथगेकस्थैः ग्रन्थ्यहेतुश्च पञ्चमी ॥ २८ ॥
वातात्सरुक्सूक्ष्ममुखो विवर्णा फेनिलोऽल्पमा ।
स्रवत्यभ्यधिकं रात्रौ पित्तात्तृड्ज्वरदाहकृत् ॥ २९ ॥
पीतोष्णपूतिपूयास्रुर्दिवा चाति निषिञ्चति ।
घनपिच्छिलसस्रावा कण्डूला कठिना कफात् ॥ ३० ॥
निशि चाभ्यधिकक्लेदा सर्वैः सर्वाकृति त्यजेत् ।
अन्तःस्थितं ग्रन्थमनाहृतं तु करोति नाडीं वहते च सास्य ।
फेनानुविद्धं तनुमल्पसृष्णं सास्रञ्च पूयं सरुजञ्च नित्यम् ॥३१॥

अथ त्रिंशोऽध्यायः ।

अथातो ग्रन्थ्यर्बुदश्लीपदापचीनाडीप्रतिषेधं व्याख्यास्यामः ।
ग्रन्थिष्वादिषु कर्त्तव्या यथास्वं शोफवत् क्रिया ।
बृहतीचित्रकव्याघ्रीकणासिद्धेन सर्पिषा ॥ १ ॥
स्नेहयेच्छुद्धिकामश्च तीक्ष्णैः शुद्धस्य लेपनम् ।
सस्वेद्य बहुशो ग्रन्थिं विमृद्नीयात् पुनः पुनः ॥ २ ॥
एष वाते विशेषेण क्रमः पित्तास्रजे पुनः ।
जलौकसो हिमं सर्वं कफजे वातिको विधिः ॥ ३ ॥
तथाप्यपक्वं क्षित्त्वैनं स्थिते रक्तेऽग्निना दहेत् ।
साध्यशेषं सशेषो हि पुनराप्यायते ध्रुवम् ॥ ४ ॥
मांसव्रणोक्तवत्तौ ग्रन्थौ पाटयेदेवमेव च ।
कार्यं मेदोभवेऽप्येतत्तत्रैः क्षालादिभिश्च तम् ॥ ५ ॥
प्रमृद्यात्तिलदिग्धेन क्षुण्णं द्विगुणवाससा ।
शस्त्रेण पाटयित्वा वा दहेन्मेदसि सूढ़ृते ॥ ६ ॥
शिराग्रन्थौ नवे पेयं तैलं साहचरं तथा ।
उपनाह्योऽनिलहरैर्वस्तिकर्मशिराव्यधः ॥ ७ ॥

अर्बुदे ग्रन्थिवत् कुर्य्यात् यथास्वं सुतरां हितम् ।
श्लीपदेऽनिलजे विध्येत् स्निग्धस्विन्नोपनाहिते ॥ ८ ॥
शिरामुपरि गुल्फस्य द्व्यङ्गुले पाययेच्च तम् ।
मासमेरण्डजं तैलं गोमूत्रेण समन्वितम् ॥ ९ ॥
जीर्णे जीर्णान्नमश्नीयाच्छुण्ठीशृतपयोऽन्वितम् ।
चैरेयं वा पिबेदेवमशान्तावग्निना दहेत् ॥ १० ॥
गुल्फस्याधः शिरामोक्षः पैत्ते सर्वत्र पित्तजित् ।
शिरामङ्गुष्ठके विध्या कफजे श्लीलयेद्यवान् ॥ ११ ॥
सक्षौद्राणि कषायाणि वर्द्धमानास्तथाभयाः ।
लिम्पेत्सर्षपवार्ताकीमूलाभ्यां धान्ययाथवा ॥ १२ ॥
ऊर्द्ध्वाधः शोधनं पेयमपच्यां साधितं घृतम् ।
दन्तीद्रवन्तीत्रिवृताजालिनीदेवदालिभिः ॥ १३ ॥
श्लीलयेत्कफमेदोघ्नं धूमगण्डूषनावनम् ।
शिरयाऽपहरेद्रक्तं पिबेन्मूत्रेण तार्क्ष्यजम् ॥ १४ ॥
ग्रन्थीनपक्वानालिम्पेन्नाकुलीपटुनागरैः ।
स्विन्नान् लवणपोटल्या कठिनाननुमर्दयेत् ॥ १५ ॥
शमीमूलकशिग्रूणां बीजैः सयवसर्षपैः ।
लेपः पिष्टोऽम्लतक्रेण ग्रन्थिगण्डविलापनः ॥ १६ ॥
पाकोन्मुखान् सुतासस्य पित्तश्लेष्महरैर्जयेत् ।
अपक्वानेव चोद्धृत्य क्षाराग्निभ्यामुपाचरेत् ॥ १७ ॥
क्षुण्णानि निम्बपत्राणि क्लिन्नैर्भल्लातकैः सह ।
शरावसम्पुटे दग्ध्वा सार्धं सिद्धार्थकैः समैः ॥ १८ ॥
एतच्छागाम्बुना पिष्टं गण्डमालाप्रलेपनम् ।
काकादनीलाङ्गलिकानाडिकोत्तुण्डिकीफलैः ॥ १९ ॥
जीमूतबीजकर्कोटीविशालाक्षतवेधनैः ।
पाठान्वितैः पलार्द्धांशैर्विषकर्षयुतैः पचेत् ॥ २० ॥

प्रस्थं करञ्जतैलस्य निर्गुण्डीस्वरसाढकैः ।
अनेन माला गण्डानां चिरजा पूयवाहिनी ॥ २१ ॥
सिध्यत्यसाध्यकल्पापि पानाभ्यञ्जननावनैः ।
तैल लाङ्गलिकीकन्दकल्कपादे चतुर्गुणे ॥ २२ ॥
निर्गुण्डीस्वरसे पक्व नस्याद्यैरपचीप्रणुत् ।
भद्रश्रीदारुमरिचहिङ्गुहरिद्राविडङ्गनैः ॥ २३ ॥
मनःशिलालनलदविशालाकरवीरकैः ।
गोमूत्रपिष्टैः पलिकैर्विषस्यार्द्धपलेन च ॥ २४ ॥
आविीरसार्कजक्षीरगोशकृद्रससंयुतम् ।
प्रस्थं सर्षपतैलस्य सिद्धमाशु व्यपोहति ॥ २५ ॥
पानाद्यैः शोलितं कुष्ठं दुष्टनाडीव्रणापचीः ।
वचाहरीतकीलाक्षाकटुरोहिणिचन्दनैः ॥ २६ ॥
तैल प्रसाधितं पीतं समूलामपचीं जयेत् ।
शरपुङ्खोद्भवं मूलं पिष्टं तण्डुलवारिणा ॥ २७ ॥
नस्यालेपाच्च दुष्टाङ्गव्रणविषजन्तुजित् ।
मूलैरुत्तमकारुण्याः पीलुपर्ण्याः सहाचरात् ॥ २८ ॥
सरोध्राभयया भृङ्गयताक्षादीपिदारुभिः ।
तैलं क्षीरसमं सिद्धं नस्येऽभ्यङ्गे च पूजितम् ॥ २९ ॥
गोव्यजाश्वखुरादग्धाकटुतैलेन लेपनम् ।
ऐङ्गुदेन तु कृष्णाहिर्वायसो वा स्वयं मृतः ॥ ३० ॥
इत्यशान्तौ गदस्याग्र्यपार्श्वजङ्घासमाश्रितम् ।
वस्तेरूर्ध्वमधस्ताद्वा मेदो हृत्वाग्निना दहेत् ॥ ३१ ॥
स्थितस्योर्द्धं पदं भित्त्वा तन्मूलेन च पार्ष्णितः ।
तत ऊर्द्धं हरेद् ग्रन्थीनित्याह भगवानिमिः ॥ ३२ ॥
पार्ष्णिं प्रतिहादशचाङ्गुलानि मुष्केन्द्रबस्तिञ्च गदाग्र्यपार्श्वे ।
विदार्यमत्स्याण्डनिभानि मध्याज्जालानि कर्षेदिति सुश्रुतोक्तिः ३३

आगुल्फकर्णाक्षुमितस्य जन्तोस्तस्याष्टभागं खुडकाद्विभज्य ।
घ्राणार्जवेधः सुरराजवस्तेर्भित्त्वास्थमाच त्वपरे वदन्ति ॥ ३४ ॥
उपनाह्यानिलान्नाडीं पाटितां साधु लेपयेत् ।
प्रत्यक्पुष्पीफलयुतैस्तैलैः पिष्टैः ससैन्धवैः ॥ ३५ ॥
पैत्तीं तु तिलमञ्जिष्ठानागदन्तीशिलाह्वयैः ।
श्लैष्मिकीं तिलसौराष्ट्रीनिकुम्भारिष्टसैन्धवैः ॥ ३६ ॥
शल्यजां तिलमध्वाज्यैर्लेपयेच्छिन्नशोधिताम् ।
अशस्त्रक्षत्यामेषिण्या भित्त्वान्ते सम्यगेषिताम् ॥ ३७ ॥
क्षारपोतेन सूत्रेण बहुशो दारयेद् गतिम् ।
व्रणेषु दुष्टसूक्ष्मास्थगभीरादिषु साधनम् ॥ ३८ ॥
या वर्त्तयो यानि तैलानि तन्नाडीष्वपि शस्यते ।
पिष्टं चक्षुफलं लेपान्नाडीव्रणहरं परम् ॥ ३९ ॥
घोण्टाफलत्वग्लवणं सलाक्षं बुकस्य पत्रं वनितापयस्य ।
सुगर्कदुग्धान्वित एष कल्को वर्त्तीकृतो हन्त्यचिरेण नाडीम् ॥ ४० ॥
सामुद्रसौवर्चलसिन्धुजन्मसुपक्वघोण्टाफलवेश्मधूमाः ।
आम्रातगायत्रिजपल्लवाश्च कटङ्कटेर्व्याघ्रवधू चेतकी च ॥ ४१ ॥
कल्केऽभ्यङ्के चूर्णे वर्त्त्यां चैतेषु सेव्यमानेषु ।
अगतिरिव नश्यति गतिश्चपला चपलेषु भूतिरिव ॥ ४२ ॥

एकत्रिंशोऽध्यायः ।

अथातः क्षुद्ररोगविज्ञानं व्याख्यास्यामः ।
स्निग्धा सवर्णा ग्रथिता नीरुजा मृदुसम्मिता ।
पिटिका कफवाताभ्यां बालानामजगल्लिका ॥ १ ॥
यवप्रख्या यवप्रख्या ताभ्यां मांसाश्रिता घना ।
अवक्षाश्चालजीवृत्तास्तोकपूया घनोन्नताः ॥ २ ॥
ग्रन्थयः पञ्च वा षड्वा कक्षपीकक्षपोन्नता ।

कर्णस्योर्ध्वं समन्ताद्वा पिटिका कठिनोग्ररुक् ॥ ३ ॥
शालूकाभा पनसिका शोफस्त्वल्परुजः स्थिरः ।
हनुसन्धिसमुद्भूतस्ताभ्यां पाषाणगर्दभः ॥ ४ ॥
शाल्मलीकण्टकाकाराः पिटिकाः सरुजो घनाः ।
मेदोगर्भा मुखे यूनां ताभ्यां च मुखदूषिकाः ॥ ५ ॥
ते पद्मकण्टका ज्ञेया यैः पद्ममिव कण्टकैः ।
चीयते नीरुजैस्तैस्तैः शरीरं कफवातजैः ॥ ६ ॥
पित्तेन पिटिका वृत्ता पक्वोदुम्बरसन्निभा ।
मन्दादाहज्वरकरी विवृता विवृताननाः ॥ ७ ॥
गात्रेष्वन्तश्च वक्त्रस्य दाहज्वररुजान्विताः ।
मसूरमात्रास्तद्वर्णास्तत्संज्ञाः पिटिका घनाः ॥ ८ ॥
ततः कष्टतराः स्फोटा विस्फोटाख्या महारुजाः ।
या पद्मकर्णिकाकारा पिटिका पिटिकान्विता ॥ ९ ॥
सा विद्या वातपित्ताभ्यां ताभ्यामिव च गर्दभी ।
मण्डला विपुलोत्क्लेदा सरागपिटिकाचिता ॥ १० ॥
कक्षेति कक्षासन्धिषु प्रायो देशेषु सानिलात् ।
पित्ताद्भवन्ति पिटिकाः सूक्ष्मा लाजोपमा घनाः ॥ ११ ॥
तादृशी महती त्वेका गन्धनामेति कीर्तिता ।
घर्मस्वेदपरीतेऽङ्गे पिटिकाः सरुजो घनाः ॥ १२ ॥
राजिकावर्णसंस्थानप्रमाणा राजिकाह्वयाः ।
दोषैः पित्तोल्बणैर्मन्दैर्विसर्पन्ति विसर्पवत् ॥ १३ ॥
शोफोऽपाकस्तनुस्ताम्रो ज्वरक्लज्जालगर्दभः ।
बलैः पित्तोल्बणैः स्फोटा ज्वरिणो मांसदारणाः ॥ १४ ॥
कक्षाभागेषु जायन्ते येऽग्न्याभाः साऽग्निरोहिणी ।
पक्वाहारक्षयराचाद्या पचाद्या हन्ति जीवितम् ॥ १५ ॥
विलिङ्गा पिटिकाहत्ता जतुवृन्मिरिवेल्लिका ।

विदारीकन्दकठिना विदारीकक्षवक्षणे ॥ १६ ॥
मेदोऽनिलकफैर्ग्रन्थिः स्नायुमांसशिराश्रयैः ।
भिन्नो वसाज्यमध्वाभं स्रवेत्तत्रोल्बणोऽनिलः ॥ १७ ॥
मांसं विशोष्य ग्रथितां शर्करामुपपादयेत् ।
दुर्गन्धं रुधिरं क्लिन्नं नानावर्णं ततो मलाः ॥ १८ ॥
तां स्रावयन्ति निचितां विन्द्यात्तच्छर्करार्बुदम् ।
पाणिपादतले सन्धौ जत्रूर्ध्वं वोपचीयते ॥ १९ ॥
वल्मीकवच्छनैर्ग्रन्थिस्तद्वद्बहुगुणैर्मुखैः ।
कृच्छ्रोपक्रमकण्डूकेदाढ्यो वल्मीकोऽसौ समस्वजः ॥ २० ॥
शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः ।
ग्रन्थिः कीलवदुत्सन्नो जायते कदरस्तु तत् ॥ २१ ॥
वेगसन्धारणाद्वायुरपानोऽपानसंश्रयम् ।
अणूकरोति बाह्यान्तर्मार्गमस्य ततः शकृत् ॥ २२ ॥
कृच्छ्राद्विर्गच्छति व्याधिरयं रुद्धगुदो ततः ।
कुर्यात्पित्तानिलं पाकं नखमांसे सरुग्ज्वरम् ॥ २३ ॥
चिप्यमत्तरोगञ्च विद्यादुपनखञ्च तम् ।
क्षणोऽभिघाताद्रूक्षस्य खरस्य कुनखो नखः ॥ २४ ॥
दुष्टकर्दमसंस्पर्शात्कण्डूकेदान्वितान्तराः ।
अङ्गुल्योऽलमित्याहुस्तिलाभांस्तिलकालकान् ॥ २५ ॥
कृष्णानवेदनांस्त्वक्स्थान् माषांस्तानेव चोन्नतान् ।
माषेभ्यस्तून्नततरांश्चर्मकीलान् सितासितान् ॥ २६ ॥
तथाविधो जतुमणिः सहजो लोहितस्तु सः ।
कृष्णं सितं वा सहजं मण्डलं लाञ्छनं समम् ॥ २७ ॥
शोकक्रोधादिकुपितादातपित्तान्मुखे तनु ।
श्यामलं मण्डलं व्यङ्गं वक्त्रादन्यत्र नीलिका ॥ २८ ॥
परुषं परुषस्पर्शं व्यङ्गं श्यावञ्च मारुतात् ।

पित्तात्तास्रान्तमानील श्वेतान्तं कण्डूमत कफात् ॥२८॥
रक्ताद्रक्तान्तमातास्रं शोषं चिमचिमायते ।
वायुनोदीरितः श्लेष्मा त्वच प्राप्य विशुष्यति ॥ ३० ॥
ततस्त्वग्जायते पाण्डुः क्रमेण च विचेतना ।
अल्पकण्डूरविक्लेदा सा प्रसुप्तिः प्रसुप्तितः ॥ ३१ ॥
असम्यग्वमनोदीर्णपित्तश्लेष्मान्ननिग्रहैः ।
मण्डलान्यतिकण्डूनि रागवन्ति बहूनि च ॥ ३२ ॥
उत्कोठः सोऽनुबद्धस्तु कोठ इत्यभिधीयते ।
प्रोक्ताः षट्त्रिंशदित्येते क्षुद्ररोगा विभागशः ॥ ३३ ॥

द्वात्रिंशोऽध्यायः ।

अथातः क्षुद्ररोगप्रतिषेधं व्याख्यास्यामः ।

विस्रावयेज्जलौकोभिरपक्वामजगल्लिकाम् ।
स्वेदयित्वा यवप्रख्यां विलयाय प्रलेपयेत् ॥ १ ॥
दारुकुष्ठमनोह्वालैरित्यापाषाणगर्दभात् ।
विधिस्तांश्चाचरेत्पक्वान् व्रणवल्लाजगल्लिकान् ॥ २ ॥
रोध्रकुस्तुम्बुरुवचाप्रलेपो मुखदूषिके ।
वटपल्लवयुक्ता वा नारिकेलोत्थशुक्तयः ॥ ३ ॥
अशान्तौ वमन नस्यं ललाटे च शिराव्यधः ।
निम्बाम्बुवान्तो निम्बाम्बुसाधितं पद्मकण्टके ॥ ४ ॥
पिबेत् क्षौद्रान्वित सर्पिर्निम्बारग्वधलेपनम ।
विद्रधादींस्तु जालान्ताश्चिकित्सेन्निरिवेल्लिकान् ।
पित्तवीसर्पवत्तद्वत् प्रत्याख्यायाग्निरोहिणीम् ॥ ५ ॥
विलङ्घनं रक्तविमोक्षणञ्च विरूक्षणं कायविशोधनञ्च ।
धात्रीप्रयोगान् शिशिरप्रदेहान् कुर्य्यात्सदा जालकगर्दभस्य ॥६॥

विदारिकां हृते रक्ते श्लेष्मग्रन्थिवदाचरेत् ।
मेदोऽर्बुदक्रियां कुर्यात्सुतरां शर्करार्बुदे ॥ ७ ॥
प्रहृष्टं सुबहुच्छिद्रं सशोफं मर्मणि स्थितम् ।
वल्मीकं हस्तपादे च वर्जयेद् इतरत्पुनः ॥ ८ ॥
शुद्धस्रावे हृते लिम्पेत् सपट्टारैवतामृतैः ।
श्यामाकुलत्थिकामूलदन्तीपललसक्तुभिः ॥ ९ ॥
पक्वे तु दुष्टमांसानि गतीः सर्वाश्च शोधयेत् ।
शस्त्रेण सम्यगनु च क्षारेण ज्वलनेन वा ॥ १० ॥
शस्त्रेणोत्कृत्य निःशेषं स्नेहेन कदरं दहेत् ।
निरुद्धमणिवत्कार्यं रुद्धपायोश्चिकित्सितम् ॥ ११ ॥
चिप्त्य शुद्ध्या जितोषाणं साधयेच्छस्त्रकर्मणा ।
दुष्टं कुनखमप्येवं चरणावलसे पुनः ॥ १२ ॥
धान्याम्लसिक्तौ कासीसपटोलीरोचनातिलैः ।
सनिम्बपत्रैरालिम्पेद्धरेत्तु तिलकालकान् ॥ १३ ॥
माषांश्च सूर्यकान्तेन क्षारेण यदि वाऽग्निना ।
तद्वदुत्कृत्य शस्त्रेण चर्मकीलजतूमणी ॥ १४ ॥
लाञ्छनादित्रये कुर्याद्यथास्वं शिराव्यधम् ।
लेपयेत् क्षीरपिष्टैश्च क्षीरिवृक्षवगङ्कुरैः ॥ १५ ॥
व्यङ्गेषु दार्वीनलवा मञ्जिष्ठा वा समाक्षिका ।
लेपः कनवनीता वा श्वेताश्वखुरजा मषी ॥ १६ ॥
रक्तचन्दनमञ्जिष्ठाकुष्ठरोध्रप्रियङ्गवः ।
वटादरा मसूराश्च व्यङ्गघ्ना मुखकान्तिदाः ॥ १७ ॥
द्वे जोरके क्षणतिलाः सर्षपाः पयसा सह ।
पिष्टा. कुर्वन्ति वक्त्रेन्दुमपास्तव्यङ्गलाञ्छनम् ॥ १८ ॥
क्षीरपिष्टा घृतक्षौद्रयुक्ता वा भृष्टनिस्तुषाः ।
मसूराः क्षीरपिष्टा वा तीक्ष्णाः शाल्मलिकण्टकाः ॥ १९ ॥

सगुडः कोलमज्जा वा शशासृक्क्षौद्रकल्कितः ।
सप्ताहं मातुलुङ्गस्थं कुष्ठं वा मधुनान्वितम् ॥ २० ॥
पिष्टा वा छागपयसा सक्षौद्रा मौशली जटा ।
गौरस्थिमुशलीमूलयुक्तं वासाज्यमाक्षिकम् ॥ ॥ २१ ॥
जम्ब्वाम्रपल्लवा मस्तुहरिद्रे द्वे नवो गुडः ।
लेपः सवर्णकृत् पिष्टं खरसेन च तिन्दुकम् ॥ २२ ॥
उत्पलपत्र तगरं प्रियङ्गुकालीयकदम्बदरमज्जा ।
इदमुद्वर्त्तनमास्यं करोति शतपत्रसङ्काशम् ॥ २३ ॥
एभिरेवौषधैः पिष्टैर्मुखाभ्यङ्गाय साधयेत् ।
यथादोषर्त्तुकान् स्नेहान् मधुककाथसयुतैः ॥ २४ ॥
यवान् सर्जरस रोध्रमुशीरं चन्दनं मधु ।
घृतं गुडञ्च गोमूत्रे पचेदादर्विलेपनात् ॥ २५ ॥
तदभ्यङ्गान्निहन्त्याशु नीलिकाव्यङ्गदूषिकान् ।
मुखं करोति पद्माभ पादौ पद्मदलोपमौ ॥ २६ ॥
कुङ्कुमोशीरकालीयलाक्षायष्ट्याह्वचन्दनम् ।
न्यग्रोधपादास्तरुणान् पद्मकं पद्मकेसरम् ॥ २७ ॥
सनीलोत्पलमञ्जिष्ठं पालिकं सतिलाढकैः ।
पक्त्वा पादावशेषेण तेन पिष्टैश्च कार्षिकैः ॥ २८ ॥
लाक्षापत्तङ्गमञ्जिष्ठायष्टीमधुककुङ्कुमैः ।
अजाक्षीरद्विगुणित तैलस्य कुडव पचेत् ॥ २९ ॥
नीलिकापलितव्यङ्गवलीतिलकदूषिकान् ।
हन्ति तत्त्वस्यमभ्यस्त मुखोपचयवर्णकृत् ॥ ३० ॥
मञ्जिष्ठाशवरोऽवस्तुवरिकालाक्षाहरिद्राद्वयम् ।
नेपालीहरितालकुङ्कुमगदागोरोचनागैरिकम् ।
पत्रं पाण्डुवटस्य चन्दनयुग कालीयकं पारदम्
पत्तङ्गं कनकत्वचं कमलजं बीजं तथा केसरम् ॥ ३१ ॥

सिक्थं तुल्यं पद्मकाद्योवसाज्यं
मज्जा क्षीरं क्षीरिवृक्षाम्बु चाग्नौ ।
सिद्धं सिद्धं व्यङ्गनौल्यादिनाशे
वक्त्रे छायामैन्दवीं चाशु धत्ते ॥ ३२ ॥
मार्कवस्वरसक्षीरतोयपिष्टानि नावने ।
प्रसृतौ वातकुष्ठोक्तं कुर्य्याद्दाहं च वह्निना ।
उत्कोठे कफपित्तोक्तं कोठे सर्वञ्च कौष्ठिकम् ॥ ३३ ॥

त्रयस्त्रिंशोऽध्यायः ।

अथातो गुह्यरोगविज्ञानं व्याख्यास्यामः ।
स्त्रीव्यवायनिवृत्तस्य सहसा भजतोऽथवा ।
दोषाध्युषितसङ्कीर्णमलिनानृजः पथाम् ॥ १ ॥
अन्ययोनिमनिच्छन्तीमगम्यां नवसूतिकाम् ।
दूषित स्रृशतस्तोयं रतान्तेष्वपि नैव वा ॥ २ ॥
विवर्द्धयिषया तीक्ष्णान् प्रलेपादीन् प्रयच्छतः ।
मुष्टिदन्तनखोत्पीडाविषवच्छुक्रपातनैः ॥ ३ ॥
वेगनिग्रहदौर्घात्यखरस्पर्शविघट्टनैः ।
दोषा दुष्टा गता गुह्यं वयोविंशतिमामयान् ॥ ४ ॥
जनयन्त्युपदंशादीन् उपदंशोऽत्र पञ्चधा ।
पृथग्दोषैः सरुधिरैः समस्तैश्चात्र मारुतात् ॥ ५ ॥
मेढ्रशोफे रुजश्चित्रा. स्तम्भस्त्वक्परिपोटनम् ।
पक्वोदुम्बरसङ्काशः पित्तेन क्षयथुर्ज्वरः ॥ ६ ॥
श्लेष्मणा कठिनः स्निग्धः कण्डूमान् शीतलो गुरुः ।
शोणितेनासितस्फोटसम्भवोऽसृग्भृतिर्ज्वरः ॥ ७ ॥
सर्वजे सर्वलिङ्गत्व क्षयथुर्मुष्कयोरपि ।
तीव्रारुगाशुपचनं दरणं कृमिसम्भवः ॥ ८ ॥

याप्यो रक्तोद्भवस्तेषां मृत्यवे सन्निपातजः ।
जायन्ते कुपितैर्दोषैर्गुह्यास्रक्पिशितास्रयैः ॥ ८ ॥
अन्तर्बहिर्वा मेढ्रस्य कण्डूला मांसकीलकाः ।
पिच्छिलास्रस्रवा योनौ तद्वच्च क्षतसन्निभाः ॥ १० ॥
तैरशोंस्युपेक्षया घ्नन्ति मेढ्रपुंस्त्वभगार्त्तवम् ।
गुह्यस्य बहिरन्तर्वा पिटिकाः कफरक्तजाः ॥ ११ ॥
सर्षपा मानसस्थाना घनाः सर्षपिका स्मृताः ।
पिटिका बहवो दीर्घा दीर्यन्ते मध्यतश्च याः ॥ १२ ॥
सोऽवमन्थः कफासृग्भ्यां वेदनारोमहर्षवान् ।
कुम्भीकारक्तपित्तोत्था जाम्बवास्थिनिभाऽशुभा ॥ १३ ॥
जलजौं मेहवद्विद्यादुत्तमां रक्तपित्तजाम् ।
पिटिकां माषमुद्गाभां पिटिका पिटिकाचिता ॥ १४ ॥
कर्णिका पुष्करस्येव ज्ञेया पुष्करिकेति सा ।
पाणिभ्यां भृशसंघृष्टे संघृष्टपिटिका भवेत् ॥ १५ ॥
मृदितं मृदितं वस्त्रसदृशं वातकोपतः ।
विषमा कठिना भुग्ना वायुनाऽष्ठीलिका स्मृता ॥ १६ ॥
विमर्दनादिदुष्टेन वायुना चर्ममेढ्रजम् ।
निवर्त्तते सरुग्दाह क्वचित्पाकञ्च गच्छति ॥ १७ ॥
पिण्डितं ग्रन्थितं चर्म तत् प्रलम्बमधोमणेः ।
निवृत्तसंज्ञं सकफं कण्डूकाठिन्यवत्तु तत् ॥ १८ ॥
दुरूढं स्फुटितं चर्म निर्दिष्टमवपाटिका ।
वातेन दूषितं चर्म मणौ सक्तं रुणद्धि चेत् ॥ १९ ॥
स्रोतोमूत्र ततोऽभ्येति मन्दधारमवेदनम् ।
मणेर्विकाशरोधश्च सनिरुद्धमणिर्गदः ॥ २० ॥
लिङ्गं शूकैरिवापूर्णं ग्रथिताख्यं कफोद्भवम् ।
शूकदूषितरक्तोत्था स्पर्शहानिस्तदाह्वया ॥ २१ ॥

छिद्रेरणुमुखैर्यत्तु मेहनं सर्वतश्चितम् ।
वातश्लेष्मितकोपेन त विद्याच्छतपोनकम् ॥ २२ ॥
पित्तासृग्भ्यां त्वचः पाकस्त्वक्पाकी ज्वरदाहवान् ।
मांसाक· सर्वजः सर्ववेदनो मांसशातनः ॥ २३ ॥
सरागैरसितैः स्फोटै· पिटिकाभिश्च पीडितम् ।
मेहन वेदनाश्लेष्मास्रं विद्यादसृगर्बुदम् ॥ २४ ॥
मांसार्बुद प्रागुदितं विद्रधिश्च त्रिदोषजः ।
कृष्णानि भूत्वा मांसानि विशीर्य्यन्ते समन्ततः ॥ २५ ॥
पक्वानि सन्निपातेन तान् विद्यात्तिलकालकान् ।
मांसोत्थमर्बुद पाकं विद्रधिं तिलकालकान् ॥ २६ ॥
चतुरो वर्जयेदेषां शेषान् शीघ्रमुपाचरेत् ।
विंशतिर्व्यापदो योनेर्जायन्ते दुष्टभोजनात् ॥ २७ ॥
विषमस्थाङ्गशयनभृशमैथुनसेवनैः
दुष्टार्त्तवादपद्रव्यैर्बीजदोषेण दैवतः ॥ २८ ॥
योनौ क्रुद्धोऽनिलः कुर्य्याद् रुक्तोदायामसुप्तताः ।
पिपीलिकासृप्तिमिव स्तब्धं कर्कशतां स्तनम् ॥ २९ ॥
फेनिलारुणकृष्णाल्पतनुरूक्षार्त्तवस्रुतिम् ।
सं स वङ्क्षणपार्श्वादौ व्यथां गुल्मं क्रमेण च ॥ ३० ॥
तांस्तांश्च स्वान् गदान् व्यापद् वातिकी नाम सा स्मृता ।
सैवातिचरणा शोफसंयुक्ताऽतिव्यवायतः ॥ ३१ ॥
मैथुनादतिबालायाः पृष्ठजङ्घोरुवङ्क्षणम् ।
रुजन् सदूषयेद्योनिं वायुः प्राकरणेति सा ॥ ३२ ॥
वेगोदावर्त्तनाद्योनिं प्रपीड़यति मारुतः ।
स फेनिल रजः कृच्छ्रादुदावृत्तं विमुञ्चति ॥ ३३ ॥
हृदयं व्यापदुदावृत्ता जातघ्नी तु यदानिलः ।
जातं जातं सुतं हन्ति रौक्ष्यादुष्टार्त्तवोद्भवम् ॥ ३४ ॥

अत्याशितायाः विषमं स्थितायाः सुरते मरुत्।
अन्नेनोत्पीड़ितो योनेः स्थितः स्रोतसि वक्रयेत् ॥ ३५ ॥
सास्थिमांसं सुखं तीव्ररुजमन्तर्मुखीति सा।
वातलाहारसेविन्यां जनन्यां कुपितोऽनिलः ॥ ३६ ॥
स्त्रियो योनिमणुद्वारां कुर्यात्सूचीमुखीति सा।
वेगरोधाद्वृतौ वायुर्दुष्टो विण्मूत्रसंग्रहम् ॥ ३७ ॥
करोति योनेः शोषं च शुष्काख्या सातिवेदना।
षडहात्सप्तरात्राद्वा शुक्रं गर्भाशयान्मरुत् ॥ ३८ ॥
वमेत्सरुङ्नीरुजो वा यस्याः सा वामिनी मता।
योनौ वातोपतप्तायां स्त्रीगर्भे बीजदोषतः ॥ ३९ ॥
नृदेषिण्यस्रनी च स्यात्षण्ढसंज्ञाऽनुपक्रमा।
दुष्टो विष्टभ्य योन्यास्यं गर्भकोष्ठं च मारुतः ॥ ४० ॥
कुरुते विह्वलां सस्तां वातिकीमिव दुःखिताम्।
उत्सन्नमांसां तामाहुर्महायोनि महारुजाम् ॥ ४१ ॥
यथास्वैर्दूषणैर्दुष्टं पित्तं योनिमुपाश्रितम्।
करोति दाहपाकोष्मापूतिगन्धस्रवान्विताम् ॥ ४२ ॥
शीतोष्णभूरिकृष्णपनीलपीतासितार्तवाम्।
सा व्यापत्पैत्तिकी रक्तयोन्याख्यासृग्गतिस्मृतेः ॥ ४३ ॥
कफोऽभिष्यन्दिभिः क्रुद्धः कुर्याद्योनिमवेदनाम्।
शीतलां कण्डुलां पाण्डुपिच्छिलां तद्विधस्रुतिम् ॥ ४४ ॥
सा व्यापत्श्लैष्मिकी वातपित्ताभ्यां क्षीयते रजः।
सदाहकार्श्यवैवर्ण्यं यस्यां सा लोहिताक्षया ॥ ४५ ॥
पित्तलाया नृसंवासे च्यवथूद्गारधारणात्।
पित्तयुक्तेन मरुता योनिर्भवति दूषिता ॥ ४६ ॥
शूनास्यशीर्षसहा सार्त्तिर्नीलपीतास्रवाहिनी।
वस्तिकुक्षिगुरुत्वातीसारारोचककारिणी ॥ ४७ ॥

श्रोणिवङ्क्षणरुक्तोदज्वरक्लमा परिप्लुता ।
वातश्लेष्मामयव्याप्ता श्वेतपिच्छिलवाहिनी ॥ ४८ ॥
उपप्लुता स्मृता योनि र्विप्लुताख्या लघावनात् ।
सञ्जातजन्तुः कण्डूला कण्डूत्वा चातिरतिप्रिया ॥ ४९ ॥
अकालवाहनाद्वायुः श्लेष्मरक्तविमूर्च्छितः ।
कर्णिकाञ्जनयेद्योनौ रजोमार्गनिरोधिनी ॥ ५० ॥
सा कर्णिनी त्रिभिर्दोषैर्योनिगर्भाशयाश्रितैः ।
यथास्वोपद्रवकरैर्व्यापन्ना सान्निपातिकी ॥ ५१ ॥
इति योनिगदा नारी यैः शुक्रं न प्रतीच्छति ।
ततो गर्भं न गृह्णाति रोगांश्चाप्नोति दारुणान् ।
असृग्दरार्शोगुल्मादीनाबाधाश्चानिलादिभिः ॥ ५२ ॥

चतुस्त्रिंशोऽध्यायः ।

अथातो गुह्यरोगप्रतिषेध व्याख्यास्यामः ।
मेढ्रमध्ये शिरां विध्येदुपदंशे नवोत्थिते ।
शीतां कुर्य्यात् क्रियां शुद्धिं विरेकेण विशेषतः ॥ १ ॥
तिलकल्कघृतक्षौद्रैर्लेपः पक्वे तु पाटिते ।
जम्ब्वाम्रसुमनोनीपखेतकाम्बोजिकाङ्कुरान् ॥ २ ॥
शल्लकीवदरीबिल्वपलाशातिनिशोड्डवाः ।
त्वचः क्षीरिद्रुमाणां च त्रिफला च जले पचेत् ॥ ३ ॥
स क्वाथः क्षालनं तेन पक्वं तैलं च रोपणम् ।
तुत्थगैरिकलोध्रैलामनोह्वालरसाञ्जनैः ॥ ४ ॥
हरेणुपुष्पकासीससौराष्ट्रीलवणोत्तमैः ।
लेपः क्षौद्रयुतैः सूक्ष्मैरुपदंशव्रणापहः ॥ ५ ॥
कपाले त्रिफला दग्धा सघृता रोपणं परम् ।
सामान्यं साधनमिद प्रतिदोषं तु शोफवत् ॥ ६ ॥

न च याति यथा पाकं प्रयतेत तथा भृशम् ।
पक्वैः स्नायुशिरामांसैः प्रायो नश्यति हि ध्वजः ॥ ७ ॥
अर्शसां छिन्नदग्धानां क्रिया कार्योपदंशवत् ।
सर्षपा लिखिताः सूक्ष्मैः कषायैरवचूर्णयेत् ॥ ८ ॥
तैरेवाभ्यञ्जनं तैलं साधयेद् व्रणरोपणम् ।
क्रियेयमवमन्येऽपि रक्तं स्राव्य तथोभयोः ॥ ९ ॥
कुम्भीकायां हरेद्रक्तं पक्वायां शोधिते व्रणे ।
तिन्दुकबिल्वफलारोध्रैर्लेपस्तैलञ्च रोपणम् ॥ १० ॥
अलज्यां सुनरक्तायामयमेव क्रियाक्रमः ।
उत्तमाख्यान्तु पिटिकां सक्षिप्य बडिशोद्धृताम् ॥ ११ ॥
कल्कैर्यूषैः कषायाणां क्षौद्रयुक्तैरुपाचरेत् ।
क्रमः पित्तविसर्पोक्तःपुष्करव्यूढयोर्हितः ॥ १२ ॥
त्वक्पाके स्रंसहान्याच्च सेचयेन्मृदितं पुनः ।
बलातैलेन कोष्णेन मधुरैश्चोपनाहयेत् ॥ १३ ॥
अष्ठीलिकां छृते रक्ते श्लेष्मग्रन्थिवदाचरेत् ।
निवृत्तं सर्पिषाऽभ्यज्य स्वेदयित्वोपनाहयेत् ॥ १४ ॥
त्रिरात्रं पञ्चरात्रं वा सुस्निग्धैः शाल्वलादिभिः ।
स्वेदयित्वा ततो भूयः स्निग्धं चर्म समानयेत् ॥ १५ ॥
मणिं प्रपीड्य शनकैः प्रविष्टे चोपनाहनम् ।
मणौ पुनः पुनः स्निग्धं भोजनाद्यात्र शस्यते ॥ १६ ॥
अयमेव प्रयोज्यः स्यादवपाट्यामपि क्रमः ।
नाडीमुभयतो द्वारा निरुद्धे जतुना स्रुताम् ॥ १७ ॥
स्नेहाक्तां स्रोतसि न्यस्य सिञ्चेत् स्नेहैश्चलापहैः ।
व्यहात् व्यहात् स्थूलतरां न्यस्य नाडीं विवर्द्धयेत् ॥ १८ ॥
स्रोतोद्वारमसिद्धौ तु विद्वान् शस्त्रेण पाटयेत् ।
सेवनीं वर्जयन् युञ्ज्यात्क्षयः क्षतविधिं ततः ॥ १९ ॥

ग्रन्थितं स्वेदितं नाड्या स्निग्धोष्णैरुपनाहयेत् ।
लिम्पेत् कषायैः सक्षौद्रैर्लिखित्वा शतपोनकम् ॥ २० ॥
रक्तविद्रधिवत् कार्य्या चिकित्सा शोणितार्बुदे ।
व्रणोपचारं सर्वेषु यथावस्थं प्रयोजयेत् ॥ २१ ॥
योनिव्यापत्सु भूयिष्ठं शस्यते कर्म वातजित् ।
स्नेहनस्वेदवस्त्यादिवातजासु विशेषतः ॥ २२ ॥
न हि वातादृते योनिर्वनिताना प्रदुष्यति ।
अतो जित्वा तमन्यस्य कुर्य्याद्दोषस्य भेषजम् ॥ २३ ॥
पाययेत बलातैल मिश्रक सुकुमारकम् ।
स्निग्धस्विन्ना तथा योनिं दुःस्थितां स्थापयेत्समाम् ॥ २४ ॥
पाणिनोन्नमयेज्जिह्मां सङ्कुचां व्यधयेत् पुनः ।
प्रवेशयेच्च घृताक्ष विधृतां परिवर्त्तयेत् ॥ २५ ॥
स्थानापवृत्ता योनिर्हि शल्यभूता स्त्रियो भवेत् ।
कर्मभिर्वमनाद्यैश्च मृदुभिर्योजयेत् स्त्रियम् ॥ २६ ॥
सर्वतः सुविशुद्धायाः शेष कर्म विधीयते ।
वस्त्यभ्यङ्गपरीषेकप्रलेपपिचुधारणम् ॥ २७ ॥
काश्मर्य्यबिल्वफलाद्राक्षाकाश्मर्दनिशाद्वयैः ।
गुडूचीसैर्य्यकाभीरुशुकनासापुनर्नवैः ॥ २८ ॥
परूषकैश्च विपचेत् प्रस्थमक्षसमैर्घृतात् ।
योनिवातविकारघ्नं तत्पीत गर्भद परम् ॥ २९ ॥
वचोपकुञ्चिकाजाजीकृष्णावृषकसैन्धवम् ।
अजमोदायवक्षारशर्कराचित्रकान्वितम् ॥ ३० ॥
पिष्ट्वा प्रसन्नयाऽऽलोड्य खादेत्तद्घृतभर्जितम् ।
योनिपार्श्वार्त्तिहृद्रोगगुल्माशोंविनिवृत्तये ॥ ३१ ॥
वृषक मातुलुङ्गस्य मूलानि मदयन्तिकाम् ।
पिबेन्मद्यैः मलवणैस्तथा कृष्णोपकुञ्चिकैः ॥ ३२ ॥

रास्नाश्वदंष्ट्राद्वयकैः सूत शूलहरस्यथः ।
गुडूचीत्रिफलादन्तीक्वाथैश्च परिषेचनम् ॥ ३३ ॥
नतवार्त्ताकिनीकुष्ठसैन्धवामरदारुभिः ।
तैलात् प्रसाधिताद्वार्थैः पित्तुर्योनौ रुजापहः ॥ ३४ ॥
पित्तलानां तु योनीनां सेकाभ्यङ्गपिचुक्रियाः ।
शीठाः पित्तजितः कार्य्या स्नेहनार्थं घृतानि च ॥ ३५ ॥
शतावरीमूलतुलाचतुष्कात् क्षुण्णपीडितात् ।
रसेन क्षीरतुल्येन पाचयेत घृताढकम् ॥ ३६ ॥
जीवनीयैः शतावर्य्या मृद्वीकाभिः परूषकैः ।
पिष्टैः प्रियालैश्चाक्षांशैर्मधुकादिबलान्वितैः ॥ ३७ ॥
सिद्धशीते तु मधुनः पिप्पल्याश्च पलाष्टकम् ।
शर्करायाः दशपलं क्षिपेल्लिह्यात्पिचुन्ततः ॥ ३८ ॥
योन्यसृक्शुक्रदोषघ्नं हृष्यं पुंसवनं परम् ।
क्षत क्षयमसृक्पित्त कास श्वास हलीमकम् ॥ ३९ ॥
कामलां वातरुधिरं विसर्पं हृच्छिरोग्रहम् ।
अपस्मारार्दितायामदोषादांश्च नाशयेत् ॥ ४० ॥
एवमेव पयः सर्पिर्जीवनीयोपसाधितम् ।
गर्भद पित्तजानाञ्च रोगाणां परमं हितम् ॥ ४१ ॥
बलाद्रोणद्वयक्वाथे घृततैलाढक पचेत् ।
क्षीरे चतुर्गुणे कृष्णाकाकनासासितान्वितैः ॥४२॥
जीवन्तीक्षीरकाकोलीक्षिरावीरर्द्धिजीवकैः ।
पयस्याश्ववणीमुद्गपौलुमाषाख्यपर्णिभिः ॥ ४३ ॥
वातपित्तामयान् हत्वा पानाद् गर्भं दधाति तत् ।
रक्तयोन्यामसृग्वर्णैरनुबन्धमवेक्ष्य च ॥ ४४ ॥
यथादोषोदयं युञ्जाद् रक्तस्थापनमौषधम् ।
पाठाजम्ब्वाम्रयोरस्थिशिलोड्रं दं रसाञ्जनम् ॥ ४५ ॥

अम्बष्ठां शाल्मलीपिच्छां समङ्गां वल्कलत्वचम् ।
बाह्लीकबिल्वातिविषारोध्रतोयदगैरिकम् ॥ ४६ ॥
शुण्ठीमधूकमाचीकरक्तचन्दनकट्फलम् ।
कट्वङ्गवल्कलानन्ताधातकीमधुकार्जुनम् ॥ ४७ ॥
पृथक् गृहीत्वा सक्षौद्रं सचौद्रं तण्डुलाम्भसा ।
पिबेदर्शःस्वतीसारे रक्तं यश्चोपवेश्यते ॥ ४८ ॥
दोषा जन्तुकृता ये च बालानां तांश्च नाशयेत् ।
योनिदोषं रजोदोषं श्यावश्वेतारुणासितम् ॥ ४९ ॥
चूर्णं पुष्यानुगं नाम हितमात्रेयधूजितम् ।
योन्यां बलासदुष्टायां सर्वं रूक्षोष्णमौषधम् ॥ ५० ॥
धातक्यामलकीपत्रश्रोतोजमधुकोत्पलैः ।
जम्ब्वाम्रसारकासीसरोध्रकट्फलतिन्दुकैः ॥ ५१ ॥
सौराष्ट्रिकादाडिमत्वग्गुडुम्बरशलाटुभिः ।
अजमात्रैरजामूत्रे क्षीरे च द्विगुणे पचेत् ॥ ५२ ॥
तैलप्रस्थं तदभ्यङ्गपिचुबस्तिषु योजयेत् ।
शूनोतानोन्नता स्रस्ता पिच्छिला स्राविणी तथा ॥ ५३ ॥
विप्लुतोपप्लुता योनिः सिद्धैरेतैस्फोटशूलिनी ।
यवान्नमभयारिष्टं सीधुतैलञ्च शीलयेत् ॥ ५४ ॥
पिप्पल्ययोरजःपथ्याप्रयोगांश्च समाचिकान् ।
कासीस त्रिफलाकाङ्क्षीसाम्रजम्बूस्थिधातुकी ॥ ५५ ॥
पैच्छिल्ये क्षौद्रसयुक्तश्चूर्णो वैशद्यकारकः ।
पलाशधातुकीजम्बूसमङ्गामोचसर्जजः ॥ ५६ ॥
दुर्गन्धे पिच्छिले क्लेदे दस्तभ्नश्चूर्ण इष्यते ।
आरग्वधादिवर्गस्य कषायः परिषेचनम् ॥ ५७ ॥
स्रस्तानां कर्कशानां च कार्यं मार्दवकारकम् ।
धारणं वेसवारस्य कृसरा पायसस्य च ॥ ५८ ॥

दुर्गन्धानां कषायः स्यात्तैलं वा कल्क एव वा ।
चूर्णो वा सर्वगन्धानां पूतिगन्धापकर्षणः ॥ ५८ ॥
श्लेष्मलानां कटुप्रायाः समूत्रा वस्तयो हिताः ।
पित्ते समधुकक्षीरा वाते तैलाम्लसंयुताः ॥ ६० ॥
सन्निपातसमुत्थायाः कर्म साधारणं हितम् ।
एवं योनिषु शुद्धासु गर्भं विन्दन्ति योषितः ॥ ६१ ॥
अदुष्टे प्राक्तते बीजे जीवोपक्रमणे सति ।
पञ्चकर्मविशुद्धस्य पुरुषस्यापि चेन्द्रियम् ॥ ६२ ॥
परीक्ष्य वर्णैर्दोषाणां दुष्टं तद्घ्नैरुपाचरेत् ।
मञ्जिष्ठाकुष्ठतगरत्रिफलाशर्करा वचाः ॥ ६३ ॥
हे निशे मधुकं मेदा दीप्यकः कटुरोहिणी ।
पयस्याहिङ्गुकाकोलीवाजिगन्धाशतावरीः ॥ ६४ ॥
पिष्ट्वाक्षांशैर्घृतप्रस्थं पचेत् क्षीराच्चतुर्गुणम् ।
योनिशुक्रप्रदोषेषु तत्सर्वेषु च शस्यते ॥ ६५ ॥
आयुष्यं पौष्टिकं मेध्यं धन्यं पुंसवनं परम् ।
फलसर्पिरिति ख्यातं पुत्र्यं पीतं फलाय यत् ॥ ६६ ॥
म्रियमाणप्रजानां च गर्भिणीनां च पूजितम् ।
एतत्परञ्च बालानां ग्रहघ्नं देहवर्धनम् ॥ ६७ ॥

पञ्चत्रिंशोऽध्यायः ।

अथातो विषप्रतिषेधं व्याख्यास्यामः ।
मथ्यमाने जलनिधावमृतार्थं सुरासुरैः ।
जातः प्रागमृतोत्पत्तेः पुरुषो घोरदर्शनः ॥ १ ॥
दीप्ततेजाश्चतुर्दंष्ट्रो हरिल्लोमोऽनलेक्षणः ।
जगद्विघसं तं दृष्ट्वा तेनासौ विषसंज्ञितः ॥ २ ॥
सृष्टस्तु ब्रह्मणा मूर्त्या ततः स्थावरजङ्गमे ।

सोऽध्यतिष्ठन्निज रूपमुज्झित्वा वह्ननात्मकम् ॥ ३ ॥
स्थिरमत्युल्बणं वीर्यं यत्कन्देषु प्रतिष्ठितम् ।
कालकूटेन्द्रवत्साख्यमृङ्गीहालाहलादिकम् ॥ ४ ॥
सर्पलूतादिदंष्ट्रासु दारुणं जङ्गम विषम् ।
स्थावरं जङ्गमं चेति विष प्रोक्तमकृत्रिमम् ॥ ५ ॥
कृत्रिम गरसज्ञं तु क्रियते विविधौषधैः ।
हन्ति योगवशेनाशु चिराच्चिरतराच्च तत् ॥ ६ ॥
श्लीपदापाण्डुदरोत्पाददुर्नामादीन् करोति च ।
तीक्ष्णोष्णरूक्षविशद व्यवाय्याशुकरं लघु ॥ ७ ॥
विकाशि सूक्ष्ममव्यक्तरसं विषमपाकि च ।
ओजसो विपरीतं तत् तीक्ष्णाद्यैरन्वित गुणैः ॥ ८ ॥
वातपित्तोत्तर नृणां सद्यो हरति जीवितम् ।
विष हि देहं सम्प्राप्य प्राग् दूषयति शोणितम् ॥ ९ ॥
कफपित्तानिलांश्चानु समं दोषान् सहाशयान् ।
ततो हृदयमास्थाय देहोच्छेदाय कल्पते ॥ १० ॥
स्थावरस्योपयुक्तस्य वेगे पूर्वं प्रजायते ।
जिह्वायाः स्थावता स्तम्भो मूर्च्छा वास: क्लमो वमिः ॥११॥
द्वितीये वेपथुः स्वेदो दाहः कण्ठे च वेदना ।
विष चामाशयं प्राप्त कुरुते हृदि वेदनाम् ॥ १२ ॥
तालुशोषस्तृतीये तु शूलं चामाशये भृशम् ।
दुर्बले हरिते शूने जायेते चास्य लोचने ॥ १३ ॥
पक्वाशयगते तोदहिध्माकासान्वकूजनम् ।
चतुर्थे जायते वेगे शिरसश्चातिगौरवम् ॥ १४ ॥
कफप्रसेको वैवर्ण्यं पर्वभेदश्च पञ्चमे ।
सर्वदोषप्रकोपश्च पक्वाधाने च वेदना ॥ १५ ॥
षष्ठे सन्नाप्रणाशश्च सुभृशं चातिसार्यते ।

स्कन्धपृष्ठकटीभङ्गो भवेन्मृत्युश्च सप्तमे ॥ १६ ॥
प्रथमे विषवेगे तु वान्तं शीताम्बुसेचितम् ।
सर्पिर्मधुभ्यां संयुक्तमगदं पाययेद् द्रुतम् ॥ १७ ॥
द्वितीये पूर्ववद्वान्त विरिक्तं चानुपाययेत् ।
तृतीयेऽगदपानं तु हित नस्य तथाञ्जनम् ॥ १८ ॥
चतुर्थे स्नेहसयुक्तमगद प्रतियोजयेत् ।
पञ्चमे मधुकक्वाथमाच्छिकाभ्यां युत हितम् ॥ १९ ॥
षष्ठेऽतिसारवच्छिरवपीड़स्तु सप्तमे ।
मूर्ध्नि काकपदं कृत्वा सास्रग्वा पिशितं क्षिपेत् ॥ २० ॥
कोशातक्यम्लिका: पाठासूर्यवल्ल्यमृताभया: ।
शेलु: शिरीष: किणिही हरिद्रे क्षौद्रसाह्वया ॥ २१ ॥
पुनर्नवे त्रिकटुकं बृहत्यौ सारिवे बला ।
एषां यवागूं निर्यूहेऽशीतां सघृतमाच्छिकाम् ॥ २२ ॥
युञ्ज्याद्देगान्तरे सर्वविषघ्नीं कृतकर्मण: ।
तद्वन्मधूकमधुकपद्मकेसरचन्दनै: ॥ २३ ॥
अञ्जनं तगरं कुष्ठं हरितालं मन:शिला ।
फलिनी त्रिकटु स्रुक्का नागपुष्पं सकेसरम् ॥ २४ ॥
हरेणु मधुकं मांसी रोचना काकमालिका ।
श्रीवेष्टकं सर्जरस: शताह्वा कुङ्कुमं बला ॥ २५ ॥
तमालपत्रतालीसभूर्जोशीरे निशाद्वयम् ।
कन्योपवासिनी स्नाता शुक्लवासा मधुद्रुतै: ॥ २६ ॥
द्विजानभ्यर्च्य तै: पुण्ये कल्पयेदगदोत्तमम् ।
वैद्यश्चात्र तदा मन्त्रं प्रयतात्मा पठेदिमम् ॥ २७ ॥
नम: पुरुषसिंहाय नमो नारायणाय च ।
यथासौ नाभिजानाति रणे कृष्णपराजयम् ॥ २८ ॥
एतेन सत्यवाक्येन अगदो मे प्रसिद्ध्यतु ।

नमो वैदूर्य्यमाते हुलुहुलु रक्ष मां सर्वविषेभ्यः ॥ २९ ॥
गौरि गान्धारि चण्डालि मातङ्गि स्वाहा ।
पिष्टे च द्वितीयोमन्त्र. श्रीं हरिमायि स्वाहा ॥ ३० ॥
अशेषविषवेतालग्रहकार्मणपाप्मसु ।
मरकव्याधिदुर्भिक्षयुद्धाशनिभयेषु च ॥ ३१ ॥
पाननस्याञ्जनालेपमणिबन्धादियोजितः ।
एष चन्द्रोदयो नाम शान्तिः स्वस्त्ययन परम् ॥ ३२ ॥
जीर्णं विषघ्नौषधिभिर्हृतं वा दावाग्निवातातपशोषितं वा ।
स्वभावतो वा सुगुणैर्न युक्तं दूषीविषाख्यां विषमभ्युपैति ॥३३॥
वीर्य्याल्पभावादविभाव्यमेतत्कफावृतं वर्षगणानुबन्धि ।
तेनार्दितो भिन्नपुरीषवर्णो दुष्टास्रजो रोगी लडरोचकार्त्तः ॥ ३४ ॥
मूर्च्छन् वमन् गद्गदवाक् विमुह्यन् भवेच्च दूषीदरलिङ्गजुष्टः ।
आमाशयस्थे कफवातरोगी पक्वाशयस्थेऽनिलपित्तरोगी ॥ ३५ ॥
भवेन्नरो ध्वस्तशिरोरुहाङ्गो विलूनपक्षः स यथा विहङ्गः ।
स्थितं रसादिष्वथवा विचित्रान् करोति धातुप्रभवान् विकारान्३६
प्राग्वाताजीर्णशीताम्बुदिवास्वप्नाहिताशनैः ।
दुष्टं दूषयते धातूनतो दूषीविषं स्मृतम् ॥ ३७ ॥
दूषीविषार्त्तं सुस्निग्धमूर्ध्वं चाधश्च शोधितम् ।
दूषीविषारिमगदं लेहयेत् मधुना प्लुतम् ॥ ३८ ॥
पिप्पल्यो ध्यामक मांसी रोध्रमेला सुवर्चिका ।
क्षुटन्नट नतं कुष्ठं यष्टी चन्दनगैरिकम् ॥ ३९ ॥
दूषीविषारिर्नाम्नाऽय न चान्यत्रापि दृश्यते ।
विषदिग्धेन विद्धस्तु प्रतास्यति मुहुर्मुहुः ॥ ४० ॥
विवर्णभाव भजते विषादं चाशु गच्छति ।
कोटैरिवावृतं चास्य गात्रं चिमिचिमायते ॥ ४१ ॥
श्रोणिपृष्ठशिर. स्कन्धसन्धयः स्युः सवेदनाः ।

कृष्णदुष्टासृविस्रावी हृन्मूर्च्छाज्वरदाहवान् ॥ ४२ ॥
दृष्टिकालुष्यवमथुश्वासकासकरः क्षणात् ।
आरक्तपीतपर्य्यन्त स्रावमध्योऽतिरुग्व्रणः ॥ ४३ ॥
सूयते पच्यते सद्यो गत्वा मांसं च कृष्णताम् ।
प्रक्लिन्न शीर्य्यतेऽभीक्ष्णं सपिच्छिलपरिस्रवम् ॥ ४४ ॥
कुर्य्यादमर्मविद्धस्य हृदयावरणं द्रुतम् ।
शल्यमाकृष्य तप्तेन लोहेनानु दहेद् व्रणम् ॥ ४५ ॥
अथवा मुष्ककक्षेतासोमवल्कताम्रवल्लित' ।
शिरीषाद् गृध्रनख्याश्च क्षारेण प्रतिसारयेत् ॥ ४६ ॥
शुकनासाप्रतिविषाव्याघ्रीमूलैश्च लेपयेत् ।
कीटदष्टचिकित्सां च कुर्य्यात्तस्य यथार्हतः ॥ ४७ ॥
व्रणे तु पूतिपिशिते क्रिया पित्तविसर्पवत् ।
सौभाग्यार्थं स्त्रियो भर्त्रे राज्ञे वाऽरातिचोदिताः ॥ ४८ ॥
गरमाहारसंयुक्तं यच्छन्त्यासनवर्त्तिनः ।
नानाप्राण्यङ्गशमलविरुद्धौषधिभस्मनाम् ॥ ४९ ॥
विषाणां चाल्पवीर्य्याणां योगो गर इति स्मृतः ।
तेन पाण्डु कृशोऽल्पाग्निः कासश्वासज्वरार्दितः ॥ ५० ॥
वायुना प्रतिलोमेन स्वप्नचिन्तापरायणः ।
मन्दोदरयकृत्प्लीही दीनवाग् दुर्बलोऽलसः ॥ ५१ ॥
शोफवान् सततार्त्तः शुष्कपादकरः क्षयी ।
स्वप्ने गोमायुमार्जारनकुलव्यालवानरान् ॥ ५२ ॥
प्रायः पश्यति शुष्कांश्च वनस्पतिजलाशयान् ।
मन्यते कृष्णमात्मानं गौरो गौरं च कालकः ॥ ५३ ॥
विकीर्णनासानयनं पश्येत्तद्विकृतेन्द्रियः ।
एतैरन्यैश्च बहुभिः क्लिष्टो घोरैरुपद्रवैः ॥ ५४ ॥
गरार्त्तो नाशमाप्नोति कश्चित्क्षयोऽचिकित्सितः ।

गरार्तो वान्तवान् भुक्त्वा तत्पथ्यं पानभोजनम् ॥ ५५ ॥
शुद्धश्छर्च्छीलयेद्वेग सूत्रस्थानविधे स्मरन् ।
शर्कराक्षौद्रसयुक्त चूर्णं ताप्यसुवर्णयोः ॥ ५६ ॥
लेह प्रशमयत्युग्र सर्वयोगकृत विषम् ।
मूर्वामृतानतकणापटोलीचव्यचित्रकान् ॥ ५७ ॥
वचामुस्तविडङ्गानि तक्र कोष्णाम्बुमस्तुभिः ।
पिबेद्वमन वान्तेन गरोपहतपावक ॥ ५८ ॥
पारावतामिषशठीपुष्कराद्य घृत हिमम् ।
मरत्वणारुजाकासश्वासहिध्माज्वरापहम् ॥ ५९ ॥
विषप्रकृतिकालान्नदोषदूष्यादिसङ्गमे ।
विषसङ्कटमुद्दिष्टं शतस्यैकोऽत्र जीवति ॥ ६० ॥
क्षुत्तृष्णाधर्मदौर्बल्यक्रोधशोकभयश्रमैः ।
अजीर्णवर्चो द्रवतः पित्तमारुतलक्षिभिः ॥ ६१ ॥
तिलपुष्पफलाघ्राणभूस्फोटाघ्यघनगर्जितैः ।
हस्तिमूषिकवादित्रनिःस्वनैर्विषसङ्कटैः ॥ ६२ ॥
पुरोवातोत्पलामोदमदनैर्वर्धते विषम् ।
वर्षासु चाम्बुयोनित्वात्सक्तं द गुडवद्गतम् ॥ ६३ ॥
विसर्पति घनापाये तदगस्त्यो हिनस्ति च ।
प्रयाति मन्दवीर्यत्व विष तस्माद्वनात्यये ॥ ६४ ॥
इति प्रकृतिसात्म्यर्तुस्थानवेगबलाबलम् ।
आलोच्य निपुणं बुद्ध्या कर्मानन्तरमाचरेत् ॥ ६५ ॥
श्लैष्मिक वमनैरुष्णरूक्षतीक्ष्णैः प्रलेपनैः ।
कषायकटुतिक्तैश्च भोजनैः शमयेद्विषम् ॥ ६६ ॥
पैत्तिक स्रंसनैः सेकप्रदेहैश्च शशीतलैः ।
कषायतिक्तमधुरैर्घृतयुक्तैश्च भोजनैः ॥ ६७ ॥
वातात्मक जयेत् स्वादुस्निग्धाम्ललवणान्वितैः ।

सघृतैर्भोजनैर्लेपैस्तथैव पिशिताशनैः ॥ ६८ ॥
नाघृतं स्म सनं शस्तं प्रलेपोभोज्यमौषधम् ।
सर्वेषु सर्वावस्थेषु विषेषु न घृतोपमम् ॥ ६९ ॥
विद्यते भेषज किञ्चिद्विशेषात् प्रबलेऽनिले ।
अयत्नात् श्लैष्मिक साध्य यत्नात्पित्ताशयाश्रयम् ।
सुदुःसाध्यमसाध्यं वा वाताशयगत विषम् ॥ ७० ।

षट्त्रिंशोऽध्यायः ।

अथातः सर्पविषप्रतिषेध व्याख्यास्यामः ।

दर्वीकरा मण्डलिनो राजीमन्तश्च पन्नगाः ।
त्रिधा समासतो भौमा भिद्यन्ते ते त्वनेकधा ॥ १ ॥
व्यासतो योनिभेदेन नोच्यन्तेऽनुपयोगिनः ।
विशेषाद्रूक्षकटुकमल्पोष्णं स्वादु शीतलम् ॥ २ ॥
विष दर्वीकरादीनां क्रमाद्वातादिकोपनम् ।
तारुण्यमध्यवृद्धत्वे वृष्टिशीतातपेषु च ॥ ३ ॥
विषोल्बणा भवन्त्येते व्यन्तरा ऋतुसन्धिषु ।
रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः ॥ ४ ॥
फणिनः शीघ्रगतयः सर्पा दर्वीकराः स्मृताः ।
ज्ञेया मण्डलिनोऽभोगा मण्डलैर्विविधैश्चिताः ॥ ५ ॥
प्रांशवो मन्दगमना राजीमन्तस्तु राजिभिः ।
स्निग्धा विचित्रवर्णास्तिर्यग्गूढं विचिचिताः ॥ ६ ॥
गोधासुतस्तु गौधेरो विषे दर्वीकरैः समः ।
चतुष्पाद् व्यन्तरान् विद्यादेतेषामेव सङ्करात् ॥ ७ ॥

व्यामिश्रलक्षणास्ते हि सन्निपातप्रकोपनाः।
आहारार्थं भयात्पादस्पर्शादतिविषात् क्रुधः ॥ ८ ॥
पापवृत्तितया वैराद्वे वर्षयमचोदनात्।
दशन्ति सर्पास्तेषूक्ता विषाधिक्य यथोत्तरम् ॥ ९ ॥
आदिष्टाल्लक्षणं ज्ञात्वा प्रतिकुर्य्याद्यथायथम्।
व्यन्तर. पापशीलत्वान्मार्गमाश्रित्य तिष्ठति ॥ १० ॥
यत्र लालापरिक्लेदमात्र गात्रे प्रदृश्यते।
न तु दष्टाकृतं दश्च तत्तुण्डाहतमादिशेत् ॥ ११ ॥
एक दंष्ट्रापद द्वे वा व्यालौढाख्यमशोणितम्।
दंष्ट्रापदे सरक्ते द्वे व्यालुप्त त्रीणि तानि तु ॥ १२ ॥
मांसच्छेदादविच्छिन्नरक्तवाहीनि दष्टकम्।
दंष्ट्रापदानि चत्वारि तद्दष्टनिपीडितम् ॥ १३ ॥
निर्विषं दयमव्राद्यमसाध्य पश्चिम वदेत्।
विषमाद्येयमप्राप्य रक्तं दूषयते वपुः ॥ १४ ॥
रक्तमक्षपि तु प्राप्त वर्धते तैलमम्बुवत्।
भीरोस्तु सर्पसंस्पर्शाद्भयेन कुपितोऽनलः ॥ १५ ॥
कदाचित् कुरुते शोफ सर्पाङ्गाभिहत तु तत्।
दुष्टान्धकारे विदस्य केनचिद्दष्टशङ्कया ॥ १६ ॥
विषोद्वेगो ज्वरच्छर्दिर्मूर्च्छादाहोऽपि वा भवेत्।
ग्लानिर्मोहोऽतिसारो वा तच्छङ्काविषमुच्यते ॥ १७ ॥
तुद्यते सविषो दश्च: कण्डूशोफरुजान्वितः।
दह्यते ग्रथितः किञ्चिद्विपरीतस्तु निर्विषः ॥ १८ ॥
पूर्वं दर्वीकृतां वेगे दुष्टं स्रावीभवत्यसृक्।
श्यावता तेन वल्मादौ सर्पन्तीव च कीटकाः ॥ १९ ॥
द्वितीये ग्रन्थयो वेगे तृतीये मूर्ध्नि गौरवम्।
दुर्गन्धो दंशविक्लेदश्चतुर्थे छीवनं वमिः ॥ २० ॥

सन्धिविश्लेषणं तन्द्रा पञ्चमे पर्वभेदनम् ।
दाहो हिक्षा च षष्ठे च हृत्पीडा गात्रगौरवम् ॥२१॥
मूर्च्छा विपाकोऽतीसारः प्राप्य शुक्रन्तु सप्तमे ।
स्कन्धपृष्ठकटीभङ्गः सर्वचेष्टानिवर्त्तनम् ॥ २२ ॥
अथ मण्डलिदष्टस्य दुष्ट पीतीभवत्यसृक् ।
तेन पीताङ्गता दाहो द्वितीये क्षयशूद्भवः ॥ २३ ॥
तृतीये दंशविक्लेदः स्वेदस्तृष्णा च जायते ।
चतुर्थे ज्वर्यते दाहः पञ्चमे सर्वगात्रगः ॥ २४ ॥
दष्टस्य राजिभिर्दुष्ट पाण्डुतां याति शोणितम् ।
पाण्डुता तेन गात्राणां द्वितीये गुरुताऽति च ॥ २५ ॥
तृतीये दंशविक्लेदो नासिकाक्षिमुखस्रवाः ।
चतुर्थे गरिमा मूर्ध्नो मन्यास्तम्भश्च पञ्चमे ॥ २६ ॥
गात्रभङ्गो ज्वरः शीतः श्लेष्मयोः पूर्ववद्वदेत् ।
कुर्य्यात्यञ्चसु वेगेषु चिकित्सां न ततः परम् ॥ २७ ॥
जलाशुता रतिक्षीणा भीता नकुलनिर्जिताः ।
शीतवातातपव्याधिक्षुत्तृष्णाश्रमपीडिताः ॥ २८ ॥
तूर्णं देशान्तरायाता विमुक्तविषकञ्चुकाः ।
कुशीषधीकण्टकवद् ये चरन्तीव काननम् ॥ २९ ॥
देशञ्च दिव्याध्युषितं सर्पास्तेऽल्पविषा मताः ।
श्मशानचितिचैत्यादौ पञ्चमीपक्षसन्धिषु ॥ ३० ॥
अष्टमीनवमीसन्ध्यामध्यरात्रिदिनेषु च ।
याम्याग्नेयमघाश्लेषाविशाखापूर्वनैर्ऋते ॥ ३१ ॥
नैर्ऋताख्ये मुहूर्त्ते च दष्ट मर्मसु च त्यजेत् ।
दष्टमात्रः सिताख्यातः शीर्य्यमाणशिरोरुहः ॥ ३२ ॥
स्तब्धजिह्वो मुहुर्मूर्च्छन् शीतोच्छ्वासो न जीवति ।
हिक्षा श्वासो वमिः कासो दष्टमात्रस्य देहिनः ॥३३॥

जायन्ते युगपद् यस्य स हृच्छूली न जीवति।
फेनं वमति निःसङ्गः श्यावपादकराननः॥ ३४॥
नासावसादो भङ्गोऽङ्गे विड्भेदः श्वयथन्वितः।
विषपीतस्य दष्टस्य दिग्धे नाभिहतस्य च॥ ३५॥
भवन्त्येतानि रूपाणि सम्प्राप्ते जीवितक्षये।
न नस्यैश्चेतना तीक्ष्णैर्न क्षतात् क्षतजागमः॥ ३६॥
दग्धाहतस्य नीराजीप्रयातस्य यमान्तिकम्।
अतोऽन्यथा तु त्वरया प्रदीप्ताङ्गारवद्विषम्॥ ३७॥
रक्षन् कण्ठगतान् प्राणान् विषमाशु शमं नयेत्।
मात्राशतं विष क्षिप्त्वा दग्धे दष्टस्य देहिनः॥ ३८॥
देहं प्रक्रमते धातून् रुधिरादीन् प्रदूषयत्।
एतस्मिन्नन्तरे कर्म दंशस्योत्कर्त्तनादिकम्॥ ३९॥
कुर्याच्छीघ्रं यथा देहे विषवल्ली न रोहति।
दष्टमात्रो दशेदाशु तमेव यवनाशिनम्॥ ४०॥
लोष्टं महीं वा दशनैश्छित्त्वा चानु ससंभ्रमम्।
निष्ठीवेन समालिम्पेद्दंशं कर्णमलेन वा॥ ४१॥
दंशस्योपरि बध्नीयादरिष्टां चतुरङ्गुले।
क्षौमादिभिर्वेणिकया सिद्धैर्मन्त्रैश्च मन्त्रवित्॥ ४२॥
अम्बुवत् सेतुबन्धेन बन्धेन स्तभ्यते विषम्।
न वहन्ति शिरास्वास्य विषं बन्धाभिपीडिताः॥ ४३॥
निष्पीड्यानूद्धरेद्दंशं मर्मसन्ध्यगतं तथा।
न जायते विषावेगो बीजनाशादिवाङ्कुरः॥ ४४॥
दंशं मण्डलिना मुक्त्वा पित्तलत्वादथापरम्।
प्रतप्तैर्हेमलोहाद्यैर्दहेदाशूल्मुकेन वा॥ ४५॥
करोति भस्मसात् सद्यो वह्निः किं नाम न क्षणात्।
आचूषेत् पूर्णवक्त्रो वा सद्यस्त्यागदगोमयैः॥ ४६॥

प्रच्छायान्तरस्थितायां मांसलं तु विशेषतः ।
अङ्गं सहैव दंशेन लेपयेदगदैर्मुहुः ॥ ४७ ॥
चन्दनोशीरयुक्तेन सलिलेन च सेचयेत् ।
विषे प्रविसृते विध्याच्छिरां सा परमा क्रिया ॥ ४८ ॥
रक्ते निर्ह्रियमाणे हि कृत्स्नं निर्ह्रियते विषम् ।
दुर्गन्धं सविषं रक्तमग्नौ चटचटायते ॥ ४९ ॥
यथादोषं विशुद्धं च पूर्ववल्लक्षयेदसृक् ।
शिरास्वदृश्यमानासु योज्याः शृङ्गजलौकसः ॥ ५० ॥
शोणितं स्रुतशेषं च प्रविलीनं विषोल्बणम् ।
लेपसेकैस्तु बहुशः स्तम्भयेद् भृशशीतलैः ॥ ५१ ॥
अस्रावे विषवेगाद्धि मूर्च्छायमदहृद्द्रवाः ।
भवन्ति तान् जयेच्छीतैर्वीजैश्चारोमहर्षतः ॥ ५२ ॥
स्रावे तु रुधिरे सद्यो विषवेगः प्रशाम्यति ।
विषं कर्षति तीक्ष्णत्वाद् हृदयं तस्य गुप्तये ॥ ५३ ॥
पिबेद् घृतं घृतक्षौद्रमगदं वा घृताप्लुतम् ।
हृदयावरणे चास्य श्लेष्मा हृद्युपचीयते ॥ ५४ ॥
प्रहृत्तगौरवोत्क्लेशहृल्लासं वामयेत्ततः ।
द्रवैः काञ्जिककौलत्थतैलमद्यादिवर्जितैः ॥ ५५ ॥
वमनैर्विषहृल्लिङ्गे नैवं व्याप्नोति तद्वपुः ।
भुजङ्गदोषप्रकृतिस्थानवेगविशेषतः ॥ ५६ ॥
सुसूक्ष्मं सम्यगालोच्य विशिष्टां वाऽऽचरेत् क्रियाम् ।
सिन्धुवारितमूलानि श्वेता च गिरिकर्णिका ॥ ५७ ॥
पानं दर्वीकरैर्दष्टे नस्यं मधु सपाकलम् ।
कृष्णसर्पेण दष्टस्य लिम्पेद्दंशं हृतेऽसृजि ॥ ५८ ॥
चारटीनाकुलीभ्यां वा तीक्ष्णमूलविषेण वा ।
पानं च क्षौद्रमञ्जिष्ठाशटहधूमयुतं घृतम् ॥ ५९ ॥

तण्डुलीयककाश्मर्य्यकिंशिहीगिरिकर्णिकाः।
मातुलुङ्गो सिता सेतुः पाननस्याञ्जनैर्हितः॥ ६०॥
अगदः फणिनां घोरे विषे राजीमतामपि।
समाः सुगन्धा मृद्वीका श्वेताख्या गजदन्तिका॥६१॥
अर्द्धांशं सौरसं पत्रं कपित्थं विल्वदाडिमम्।
सचौद्रो सण्डलिविषे विशेषादगदो हितः॥ ६२॥
पञ्चवल्कवरायष्टीनागपुष्पैलवालुकम्।
वीजकर्षभकौशीरं सितापद्मकमुत्पलम्॥ ६३॥
सचौद्रो हिमवान्नाम हन्ति मण्डलिनां विषम्।
लेपात् क्षयथुवीसर्पविस्फोटज्वरदाहहा॥ ६४॥
काश्मर्य्यवटशृङ्गाणि जीवकर्षभकौ सिता।
मञ्जिष्ठा मधुकं चेति दष्टो मण्डलिना पिबेत्॥ ६५॥
वंशत्वक्वीजकटुकापाटलीवीजनागरम्।
शिरीषवीजातिविषे मूलं गावेधुकं वचा॥ ६६॥
पिष्टो गोवारिणाष्टाङ्गो हन्ति गोनसजं विषम्।
कटुकातिविषाकुष्ठवचाहधूमहरेणुकाः॥ ६७॥
सचौद्रव्योषतगरा घ्नन्ति राजीमतां विषम्।
निखनेत्काष्ठचित्राया दंशे यामद्वये भुवि॥ ६८॥
उद्धृत्य प्रक्षितं सर्पिर्धान्यस्थाग्रां प्रलेपयेत्।
पिबेत् पुराणं च घृतं वराचूर्णावचूर्णितम्॥ ६९॥
जीर्णे विरिक्ते भुञ्जीत यवान्नं सूपसंस्कृतम्।
करवीरार्ककुसुममूललाङ्गलिकाकणाः॥ ७०॥
कल्कयेदारनालेन पाठामरिचसंयुताः।
एष व्यन्तरदष्टानामगदः सार्वकार्मिकः॥ ७१॥
शिरीषपुष्पस्वरसे सप्ताहं मरिचं सितम्।
भावितं सर्पदष्टानां पाने नस्याञ्जने हितम्॥ ७२॥

पिप्पलं नतकुष्ठाभ्यां घृतक्षौद्रचतुष्पलम् ।
अपि तक्षकदष्टानां पानमेतत् सुखप्रदम् ॥ ७३ ॥
अथ दर्वीकृतां वेगे पूर्वे विस्राव्य शोणितम् ।
अगदं मधुसर्पिर्भ्यां संयुक्तं त्वरितं पिबेत् ॥ ७४ ॥
द्वितीये वमनं कृत्वा तद्वदेवागदं पिबेत् ।
विषापहैः प्रयुञ्जीत तृतीयेऽञ्जननावने ॥ ७५ ॥
पिबेच्चतुर्थे पूर्वोक्तां यवागूं वमने कृते ।
षष्ठपञ्चमयोः शीतैर्दिग्धं सिक्तमभीक्ष्णशः ॥ ७६ ॥
पाययेद्वमनं तीक्ष्णं यवागूं च विषापहैः ।
अगद सप्तमे तीक्ष्णं युञ्जादञ्जननस्ययोः ॥ ७७ ॥
कृत्वावगाढं श्वभ्रेण मूर्ध्नि काकपदं गतः ।
मांसं सरुधिरं तस्य चर्म वा तत्र निक्षिपेत् ॥ ७८ ॥
तृतीये वमितः पेयां वेगे मण्डलिनां पिबेत् ।
अतीक्ष्णमगदं षष्ठे गण्डूषं वा पद्मकादिकम् ॥ ७९ ॥
आद्येऽवगाढं प्रच्छायवेगे दष्टस्य राजिलैः ।
अलाम्बुना हरेद्रक्तं पूर्ववच्चागदं पिबेत् ॥ ८० ॥
षष्ठेऽञ्जनं तीक्ष्णतममवपीडं च योजयेत् ।
अनुक्तेषु च वेगेषु क्रियां दर्वीकरोदिताम् ॥ ८१ ॥
गर्भिणीबालवृद्धेषु मृदु विध्येच्छिरां न च ।
त्वङ्मांसोच्छ्वासिनि वक्त्रं रसः शार्दूलजो नखः ॥ ८२ ॥
तमालः केसरं शीतं पीतं तण्डुलवारिणा ।
हन्ति सर्वविषाण्येतद्वज्रमिवासुरान् ॥ ८३ ॥
बिल्वस्य मूलं सुरसस्य पुष्पं फलं करञ्जस्य नतं सुराह्वम् ।
फलत्रिकं व्योषनिशाद्वयञ्च वस्तस्य मूत्रेण सुवञ्चयिष्टम् ॥८४॥
भुजङ्गलूतोन्दुरवृश्चिकाद्यैर्विषूचिकाजीर्णगरज्वरेषु ।
आर्त्तान्नरान् भूतविधर्षितांश्च स्वस्थीकरोत्यञ्जनपाननस्यैः ॥८५॥

ग्रलेपाद्यैश्च निःशेषं दंशादप्युद्धरेद्विषम्।
भूयो वेगाय जायेत शेषं दूषीविषाय वा ॥ ८६ ॥
विषापायेऽनिल क्रुद्ध स्नेहादिभिरुपाचरेत्।
तैलमद्यकुलत्थाम्लवर्ज्यैः पवननाशनैः ॥ ८७ ॥
पित्तं पित्तज्वरहरैः कषायस्नेहवस्तिभिः।
समाच्छिकेन वर्गेण कफमारग्वधादिना ॥ ८८ ॥
सिता वैगन्धिको द्राक्षा पयस्या मधुकं मधु।
पाने समन्वयूताम्बु प्रोक्षणं सान्त्वहर्षणम् ॥ ८९ ॥
सर्पाभिहते युञ्जात्तथा शङ्काविषार्दिते।
कर्केतनं मरकतं वज्रं वारणमौक्तिकम् ॥ ९० ॥
वैदूर्यं गर्दभमणिं पिचुक विषमूषिकाम्।
हिमवद्गिरिसम्भूतां सोसराजीं पुनर्नवाम् ॥ ९१ ॥
तथा द्रोणां महाद्रोणां मानसीं सर्पजं मणिम्।
विषाणि विषशान्त्यर्थं वीर्य्यवन्ति च धारयेत् ॥ ९२ ॥
स्त्री जर्जरपाणिश्च चरेद्रात्रौ विशेषतः।
तच्छायाशब्दवित्रस्ताः प्रनश्यन्ति भुजङ्गमाः ॥ ९३ ॥

सप्तत्रिंशोऽध्यायः।

अथातः कीटलूतादिविषप्रतिषेधं व्याख्यास्यामः ॥
सर्पाणामेव विण्मूत्रशुक्राण्डशवकोथजाः।
दोषैर्व्यस्तैः समस्तैश्च युक्ताः कीटाश्चतुर्विधाः ॥ १ ॥
दष्टस्य कीटैर्वायव्यैर्दंशस्तोदरुजोल्बणः।
आग्नेयैरल्पसस्रावी दाहरागविसर्पवान् ॥ २ ॥
पक्वपीलुफलप्रख्यः खर्जूरसदृशोऽथवा।
कफाधिकैर्मन्दरुजः पक्वोदुम्बरसन्निभः ॥ ३ ॥
स्रावाढ्यः सर्वलिङ्गेषु विवर्ज्यः सान्निपातिकैः।

वेगाश्च सर्पवच्छोफो वर्द्धिष्णुर्विसरक्तता ॥ ४ ॥
शिरोऽक्षिगौरवं मूर्च्छा भ्रमः श्वासोऽतिवेदना।
सर्वेषां कर्णिकाशोफो ज्वरः कण्डूररोचकः ॥ ५ ॥
वृश्चिकस्य विषं तीक्ष्णमादौ दहति वह्निवत्।
ऊर्द्ध्वमारोहति क्षिप्रं दंशे पश्चात्तु तिष्ठति ॥ ६ ॥
दंशः सद्योऽतिरुक्श्यावस्तुद्यते स्फुटतीव च।
ते गवादिशकृत्कोथाद्दिग्धदष्टादिकोथतः ॥ ७ ॥
सर्पकोथाश्च सम्भूता मन्दमध्यमहाविषाः।
मन्दाः पीताः सिताः श्यावा रूक्षकर्बुरमेचकाः ॥८॥
रोमशा बहुपर्वाणो लोहिताः पाण्डुरोदराः।
धूम्रोदरस्निग्धपर्वाणो मध्यास्तु कपिलारुणाः ॥ ९ ॥
पिशङ्गाः शबलाश्चित्राः शोणिताभा महाविषाः।
अग्न्याभा हेरकपर्वाणो रक्ताः केचित् सितोदराः ॥ १० ॥
तैर्दष्टः शूनरसनः स्तब्धगात्रो ज्वरार्दितः।
खैर्वमन् शोणितं कृष्णमिन्द्रियार्थानसंविदन् ॥ ११ ॥
स्विद्यन्मूर्च्छन् विशुष्कास्यो विह्वलो वेदनातुरः।
विशीर्य्यमाणमांसश्च प्रायशो विजहात्यसून् ॥ १२ ॥
उच्चिटिङ्गस्तु वक्त्रेण दशत्यभ्यधिकव्यथः।
साध्यतो वृश्चिकात् स्तब्धं शेफसो हृष्टरोमताम् ॥ १३ ॥
करोति सेकमङ्गानां दंशः शीताम्बुनेव च।
उष्णधूमः स एवोक्तो रात्रिचाराच्च रात्रिकः ॥ १४ ॥
वातपित्तोत्तराः कोटाः श्लैष्मिकाः कफभोन्दुराः।
प्रायो वातोल्बणविषा वृश्चिकाः सोष्णधूमकाः ॥ १५ ॥
यस्य यस्यैव दोषस्य लिङ्गाधिक्यं प्रतर्कयेत्।
तस्य तस्यौषधैः कुर्य्याद्विपरीतगुणैः क्रियाम् ॥ १६ ॥
क्षुत्पीड़ोद्वानिलस्तम्भः शिरायामोऽस्थिपर्वरुक्।

घूर्णनोद्वेष्टन गात्रस्रावतां वातिके विषे ॥ १७ ॥
संज्ञानाशोष्णनिःश्वासौ हृद्ग्रहः कटुकास्यता ।
मांसावदरणं शोफो रक्तपीतत्व पैत्तिके ॥ १८ ॥
छर्दिरोचकहृल्लासप्रसेकोत्क्लेशपीनसैः ।
सशैत्यसुखमाधुर्यैर्विद्यात् श्लेष्माधिक विषम् ॥ १९ ॥
पिण्याकेन व्रणालेपस्तैलाभ्यङ्गश्च वातिके ।
नाडीस्वेदो पुलाकाद्यैर्हर्षणश्च विधिर्हितः ॥ २० ॥
पैत्तिकं स्तम्भयेत्सेकैः प्रदेहैश्चातिशीतलैः ।
लेखनच्छेदनस्वेदवमनैः श्लैष्मिकं जयेत् ॥ २१ ॥
कीटानां त्रिःप्रकाराणां त्रैविध्येन प्रतिक्रिया ।
स्वेदालेपनसेकांस्तु कोष्णान् प्रायोऽवचारयेत् ॥ २२ ॥
अन्यत्र मूर्च्छिताद् दशपाक्तः कोथतोऽथवा ।
नृकेशाः सर्षपाः पीता गुडो जीर्णश्च धूपनम् ॥ २३ ॥
विषदंशस्य सर्वस्य काश्यपः परमब्रवीत् ।
विषघ्नश्च विधिः सर्वं कुर्यात् संशोधनानि च ॥ २४ ॥
साधयेत्सर्पवद्दष्टान् विषोग्रैः कीटलूषिकैः ।
तण्डुलीयकतुल्यांशां त्रिहतां सर्पिषा पिबेत् ॥ २५ ॥
याति कीटविषैः कम्प न कैलास इवानिलैः ।
क्षीरिवृक्षत्वगालेपः शुद्धे कीटविषापहः ॥ २६ ॥
मुक्तालेपो वरः शोफतोददाहज्वरप्रणुत् ।
वचाहिङ्गुविडङ्गानि सैन्धवं गजपिप्पली ॥ २७ ॥
पाठा प्रतिविषा व्योषं काश्यपेन विनिर्मितम् ।
दशाङ्गमगदं पीत्वा सर्वकीटविषं जयेत् ॥ २८ ॥
सद्यो वृश्चिकजं दंशं चक्रतैलेन सेचयेत् ।
विदारिगन्धासिद्धेन क्वथितेनेतरेण वा ॥ २९ ॥
लवणोत्तमयुक्तेन सर्पिषा वा पुनः पुनः ।

सिञ्चेत् कोष्णारनालेन सक्षीरलवणेन वा ॥ ३० ॥
उपनाहो घृते भृष्टः कल्कोजाज्याः ससैन्धवः ।
आदंशं खेदितं चूर्णैः प्रच्छाय प्रतिसारयेत् ॥ ३१ ॥
रजनीसैन्धवव्योषशिरीषफलपुष्पजैः ।
मातुलुङ्गाम्लगोमूत्रपिष्टश्च सुरसाव्रजम् ॥ ३२ ॥
लेपः सुखोष्णश्च हितः पिण्याको गोमयोऽपि वा ।
पाने सर्पिर्मधुयुतं क्षीरं वा भूरिशर्करम् ॥ ३३ ॥
पारावतशकृत्पथ्यातगरं विश्वभेषजम् ।
बीजपूररसोन्मिश्रः परमो दृश्चिकागदः ॥ ३४ ॥
सद्यश्चैवलोष्टदष्टा च हन्ति दृश्चिकजं विषम् ।
हिङ्गुना हरितालेन मातुलुङ्गरसेन च ॥ ३५ ॥
लेपाञ्जनाभ्यां गुटिका परमं दृश्चिकापहा ।
करञ्जार्जुनशैलूनां कटभ्याः कुटजस्य च ॥ ३६ ॥
शिरीषस्य च पुष्पाणि मस्तुना दंशलेपनम् ।
यो सुह्यति प्रस्खलति प्रलपत्युग्रवेदनः ॥ ३७ ॥
तस्य पथ्यानिशाकृष्णामञ्जिष्ठातिविषौषधम् ।
सान्ताम्बुहृतं वार्ताकरसपिष्टं प्रलेपनम् ॥ ३८ ॥
सर्वत्र चोग्रालिविषे पाययेद्घृतसर्षपौ ।
विध्येच्छिरां विदध्याच्च वमनाञ्जननावनम् ।
उष्णस्निग्धाम्लमधुरं भोजनं चानिलापहम् ॥ ३९ ॥
नागरं गृहकपोतपुरीषं बीजपूररसो हरितालम् ।
सैन्धवश्च विनिहन्त्यगदोऽयं लेपतोऽलिकुलजं विषमाशु ॥ ४० ॥
अन्ते दृश्चिकदष्टानां समुद्दीर्णे भृशं विषे ।
विषेणालेपयेद्दंशमुच्चिटिङ्गेऽप्ययं विधिः ॥ ४१ ॥
नागपुरीषच्छत्रं रोहिषमूलञ्च शैलुतोयेन ।
कुर्याद् गुटिकां लेपादियमलिविषनाशनी श्रेष्ठा ॥ ४२ ॥

अर्कस्य दुग्धेन शिरीषबीजं विभावितं पिप्पलीचूर्णमिश्रम्।
एषो गदो हन्ति विषाणि कीटभुजङ्गलूतोन्दुरहृश्चिकानाम् ॥४३॥
शिरीषपुष्पं सकरञ्जबीजं काश्मीरजं कुष्ठमनःशिला च।
एषो गदो रात्रिकहृश्चिकानां संक्रान्तिकारी कथितो जिनेन
॥ ४४ ॥

कीटेभ्यो दारुणतरा लूताः षोडश ता जगुः।
अष्टाविंशतिरित्येके ततोऽप्यन्ये तु भूयसीः ॥ ४५ ॥
सहस्ररश्म्यनुचरा वदन्त्यन्ये सहस्रशः।
वङ्गपद्मरूपा तु लूतैकैव विषात्मिका ॥ ४६ ॥
रूपाणि नामतस्तस्या दुर्ज्ञेयान्यतिसङ्करात्।
नास्ति स्थानव्यवस्था च दोषतोऽतः प्रचक्षते ॥ ४७ ॥
कृच्छ्रसाध्या पृथग्दोषैरसाध्या निचयेन सा।
तद्दंशः पैत्तिको दाहतृट्स्फोटज्वरमोहवान् ॥ ४८ ॥
भृशोष्मा रक्तपीताभः क्लेदी द्राक्षाफलोपमः।
श्लैष्मिकः कठिनः पाण्डुः परूषकफलाकृतिः ॥ ४८ ॥
निद्रां शीतज्वरं कासं कण्डूञ्चैकुरुते भृशम्।
वातिकः परूषश्यावः पर्वभेदज्वरप्रदः ॥ ५० ॥
तद्विभागं यथास्वञ्च दोषलिङ्गैर्विभावयेत्।
असाध्यायान्तु हृन्मोहश्वासहिक्काशिरोरुजाः ॥ ५१ ॥
श्वेताः पीताः सिता रक्ता पिटिकाः श्वयथूद्भवाः।
वेपथुर्वमथुर्दाहस्तृडास्यं वक्त्रनासता ॥ ५२ ॥
श्यावौष्ठवक्त्रदन्तत्वं पृष्ठग्रीवावभञ्जनम्।
पक्वजम्बुसवर्णञ्च दंशात् स्रवति शोणितम् ॥ ५३ ॥
सर्वापि सर्वजा प्रायो व्यपदेशस्तु भूयसा।
तीक्ष्णमध्यावरत्वेन सा त्रिधा हन्त्युपेक्षिता ॥ ५४ ॥
सप्ताहेन दशाहेन पक्षेण च परं क्रमात्।

लूतादंशश्च सर्वोऽपि दद्रूमण्डलसन्निभः ॥ ५५ ॥
सितोऽसितोऽरुणः पीतः श्यावो वा मृदुरुन्नतः।
मध्ये कृष्णोऽथवा श्यावः पर्य्यन्ते जालकावृतः ॥ ५६ ॥
विसर्पवांश्कोफयुतस्तप्यते बहुवेदनः।
ज्वरारुचिकविक्लेदकोथावदरणान्वितः ॥ ५७ ॥
क्लेदेन यत्स्रवत्यङ्गं तत्रापि कुरुते व्रणम्।
श्वासदष्टाग्निकृन्मूत्रशुक्रस्रोतानखार्तवैः ॥ ५८ ॥
अष्टाभिरुद्दमत्येषा विषं वक्त्रैर्विशेषतः।
लूता नामेर्दशत्यूर्द्धमूर्द्धं वा ऽधश्च कीटकाः ॥ ५९ ॥
तद्दूषितञ्च वस्त्रादिदेहे पृक्तं विकारकृत्।
दिनार्धं लक्ष्यते नैव दंशो लूताविषोद्भवः ॥ ६० ॥
सूचीव्यधवदाभाति ततोऽसौ प्रथमेऽहनि।
अव्यक्तवर्णः प्रचलः किञ्चित्कण्डूरुजान्वितः ॥ ६१ ॥
द्वितीयेऽभ्युन्नतोऽन्तेषु पिटकैरिव वाचितः।
व्यक्तवर्णो ततो मध्ये कण्डूमान् ग्रन्थिसन्निभः ॥ ६२ ॥
तृतीये सज्वरो रोमहर्षकृद्रक्तमण्डलः।
शरावरूपस्तोदाढ्यो रोमकूपेषुसंस्रवः ॥ ६३ ॥
महांश्चतुर्थे श्वयथुस्तापश्वासभ्रमप्रदः।
विकारान् कुरुते तांस्तान् पञ्चमे विषकोपजान् ॥ ६४ ॥
षष्ठे व्याप्नोति मर्माणि सप्तमे हन्ति जीवितम्।
इति तीक्ष्णं विषं मध्यं हीनञ्च विभजेद्भतः ॥ ६५ ॥
एकविंशतिरात्रेण विषं शाम्यति सर्वथा।
अथाशु लूतादष्टस्य शस्त्रेणादंशमुद्धरेत् ॥ ६६ ॥
दहेच्च जाम्बवौष्ठाद्यैर्न तु पित्तोत्तरं दहेत्।
कर्कशं भिन्नरोमाणं मर्मसन्ध्यादिसंश्रितम् ॥ ६७ ॥
प्रसृतं सर्वतो दंशं न छिन्दीत दहेच्च।

लेपयेद्दग्धभगदैर्मधुसैन्धवसंयुतैः ॥ ६८ ॥
सुशीतैः सेचयेच्चापि कषायैः क्षीरिवृक्षजैः।
सर्वतोऽपहरेद्रक्तं शृङ्गाद्यैः सिरयापि वा ॥ ६९ ॥
सेकालेपास्तताः शीता बोधिश्चे भ्रान्तकाक्षरैः।
फलिनीहरिनिशाचौद्रसर्पिर्भिः पद्मकाह्वयः ॥ ७० ॥
अशेषलूता कीटानामगदः सर्वकार्मिकः।
हरिद्रादयपत्तङ्गमञ्जिष्ठानतकेसरैः ॥ ७१ ॥
सचौद्रसर्पिःपूर्वस्मादधिकश्चम्पकाह्वयः।
तद्वद्गोमयनिर्ण्योडाश्वकर्णाष्टतमाक्षिकैः ॥ ७२ ॥
अपामार्गमनोह्वालदार्वीध्यामकगैरिकैः।
नतैलाकुष्ठमरिचयष्ट्याह्वघृतमाक्षिकैः ॥ ७३ ॥
अगदो मन्दरो नाम तथाऽन्यो गन्धमादनः।
नतरोध्रवचाकट्वीपाठैलापत्रकुङ्कुमैः ॥ ७४ ॥
विषघ्नं बहुदोषेषु प्रयुञ्जीत विशोधनम्।
यष्ट्याह्वमदनाङ्कोल्लजालिनीसिन्दुवारिकाः ॥ ७५ ॥
कफे श्लेष्माम्बुना पीत्वा विषमाशु[समुद्वमेत्।
शिरीषपत्रत्वक्मूलफल वाङ्कोल्लमूलवत् ॥ ७६ ॥
विरेचयेच्च विफलानीलिनीविद्रुतादिभिः।
निवृत्ते दाहशोफादौ कर्णिकां पातयेद् व्रणात् ॥ ७७ ॥
कुसुम्भपुष्पं गोदन्तः स्वर्णक्षीरी कपोतविट्।
विद्रुतासैन्धव दन्तीकर्णिकापातन तथा ॥ ७८ ॥
मूलमुत्तरवारुण्या वंशनिर्लेखसंयुतम्।
तद्वच्च सैन्धवं कुष्ठं दन्ती कटुकदौग्धिकम् ॥ ७९ ॥
राजकोशातकीमूलं किणीवा मथितोद्भवः।
कर्णिकापातसमये हृद्धयेच्च विषापहैः ॥ ८० ॥
स्नेहकार्यमशेषञ्च सर्पिषैव समाचरेत्।

विषस्य हृद्ये तैलमग्नेरिव तृणोलुपम् ॥ ८१ ॥
श्वेतवेरवैकङ्कतगोपकन्यामुस्ताश्मभीचन्दनटिण्टुकानि ।
शैवालनीलोत्पलवक्रयष्टीत्वग्नाकुलीपद्मकराठमध्यम् ॥ ८२ ॥
रजनीघनसर्पलोचनाकणशुण्ठीकणमूलचित्रकाः ।
वरुणागुरुविल्वपाटलीपिचमन्दाभयशेलुकेसरम् ॥ ८३ ॥
विल्ववन्दननतोत्पलशुण्ठीपिप्पलीनिचुलवेतसकुष्ठम् ।
शुक्तिशाकवरपाटलिभार्ङ्गीसिन्दुवारकघाटवराङ्गम् ॥ ८४ ॥
पित्तकफानिललूताः पानाञ्जननस्यलेपसेकैन ।
अगदवरा इत्तस्थाः कुमतोरिव वारयन्त्येते ॥ ८५ ॥
रोध्रं सेव्यं पद्मकं पद्मरेणुः कालीयाख्यं चन्दनं यच्च रक्तम् ।
काम्पिल्लपुष्पं दुग्धिनीकाशृणालं लूताः सर्वा घ्नन्ति सर्वक्रियाभिः
॥ ८६ ॥

अष्टत्रिंशोऽध्यायः ।

अथातो मूषिकालर्कविषप्रतिषेध व्याख्यास्यामः ॥
खाननश्चपलः पुत्रोहसिरश्चिक्किरोजिरः ।
कषायदन्तः कुलकः कोकिलः कपिलोऽसितः ॥ १ ॥
अरुणः शबलः श्वेतः कपोतः पलितोन्दुरः ।
छुच्छुन्दरो रसालाख्यो दशाष्टौ चेति मूषिकाः ॥ २ ॥
शुक्रं पतति यत्तेषां शुक्रदिग्धैः स्पृशन्ति वा ।
यदङ्गमङ्गैस्तत्राशे दूषितं पाण्डुतां गते ॥ ३ ॥
अन्वयः क्षयथुः कोथो मण्डलानि भ्रमोऽरुचिः ।
शीतज्वरोऽतिरुक् सादो वेपथुः पर्वभेदनम् ॥ ४ ॥
रोमहर्षः स्तुतिर्मूर्च्छा दीर्घकालानुबन्धनम् ।
श्वेष्मानुबद्धबह्वास्रपीतकच्छर्दनं सटट् ॥ ५ ॥
व्यवायाक्षुविषं क्षुच्छ भूयो भूयश्च कुप्यति ।

मूर्च्छागशोफवैवर्ण्यक्लेदशब्दाश्रुतिज्वराः ॥ ६ ॥
शिरोगुरुत्वं लालास्रक् क्रदिश्वासाध्यलक्षणम्।
शूनवस्तिं विवर्णेष्ठमाख्यामैर्ग्रन्थिभिश्चितम् ॥ ७ ॥
कुच्छ्रोन्दरमगन्धञ्च वर्जयेदाखुदूषितम्।
शूनः श्लेष्मोल्बणा दोषाः संज्ञां सन्नावहाश्रिताः ॥८॥
सुप्तन्तः कुर्वते क्षोभं धातूनामतिदारुणम्।
लालावानस्रवधिरः सर्वतः सोऽभिधावति ॥ ९ ॥
स्रस्तपुच्छहनुस्कन्धशिरोदुःखी नतानतः।
दंशस्तेन विदष्टस्य सुप्तः क्षणं चरत्यसृक् ॥ १० ॥
छर्च्छिरोरुग्ज्वरस्तम्भस्तृष्णामूर्च्छाङ्गवो नु च।
अनेनान्येऽपि बोद्धव्या व्याला दष्टप्रहारिणः ॥ ११ ॥
कण्डूनिस्तोदवैवर्ण्यसुप्तिक्लेदज्वरभ्रमाः।
विदाहरागरुक्पाकशोथग्रन्थिविकुच्छनम् ॥ १२ ॥
दंशावदरणं स्फोटाः कर्णिका मण्डलानि च।
सर्वत्र सविषे लिङ्गं विपरीतन्तु निर्विषे ॥ १३ ॥
दष्टो येन तु तच्चेष्टा रुतं कुर्वन् विनश्यति।
पश्यंस्तमेव चाकस्मादादर्शसलिलादिषु ॥ १४ ॥
योऽग्नेरस्त्रस्येददष्टोऽपि शब्दस्पर्शदर्शनैः।
जलसन्त्रासनामानं दष्ट तमपि वर्जयेत् ॥ १५ ॥
आखुना दष्टमात्रस्य दंशं काण्डेन दाहयेत्।
दर्पणेनाथवा तीव्ररुजा स्यात् कर्णिकान्यथा ॥ १६ ॥
दग्धं विस्रावयेद्दंशं प्रच्छिन्नञ्च प्रलेपयेत्।
शिरीषरजनीवक्रकुङ्कुमासृतवल्लिभिः ॥ १७ ॥
अगारधूमसंश्लिष्टरजनीलवणोत्तमैः।
लेपो जयत्याखुविषं कर्णिकायाञ्च पातनः ॥ १८ ॥
ततोऽम्बुभिः क्षालयित्वाऽनु तोयैरनु च लेपयेत्।

पालिन्दीक्षेतकटभीविल्वमूलगुडूचीभिः ॥ १९ ॥
अन्यैश्च विषशोफघ्नैः शिरा वा मोक्षयेद् द्रुतम् ।
कर्दनं नीलिनीक्षाद्यैः शुक्राख्याङ्कोल्लयोरपि ॥ २० ॥
कोशातक्याः शुक्राख्यायाः फलजीमूतकस्य च ।
मदनस्य च सच्चूर्णं दत्त्वा पीत्वा विषं वमेत् ॥ २१ ॥
वचामदनजीमूतकुष्ठं वा मूत्रपेषितम् ।
पूर्वकल्पेन पातव्यं सर्वेन्द्रविषापहम् ॥ २२ ॥
विरेचनं त्रिवृन्नीलीत्रिफलाकल्क इष्यते ।
अञ्जनं गोमयरसो श्वेतसूक्ष्मरजोऽन्वितः ॥ २३ ॥
कपित्थगोमयरसौ मधुमानवलेहनम् ।
तन्दुलीयकमूलेन सिद्धं पाने हितं घृतम् ॥ २४ ॥
हरिद्रानिशाकटभीरक्तायष्ट्याह्वैर्वाऽमृतान्वितैः ।
आस्फोतमूलसिद्धं वा पञ्चकापित्थमेव वा ॥ २५ ॥
सिन्धुवारनतं शिग्रु विल्वमूलं पुनर्नवा ।
वचाश्वदंष्ट्राजीमूतमेषां क्वाथ समाक्षिकम् ॥ २६ ॥
पिबेच्छाल्योदनं दत्त्वा भुञ्जानो मूषिकार्दितः ।
तक्रेण शरपुङ्खाया बीजं सच्चूर्णं वा पिबेत् ॥ २७ ॥
अङ्कोल्लमूलकल्को वा वस्तमूत्रेण कल्कितः ।
पानालेपनयोर्युक्तः सवास्तुविषनाशनः ॥ २८ ॥
कपित्थमध्यतिलकतिलाङ्कोल्लजटाः पिबेत् ।
गवां मूत्रेण पयसा मञ्जरी तिलकस्य वा ॥ २९ ॥
अथवा सैर्यकान्मूलं सक्षौद्रं तन्दुलाम्बुना ।
कटुकालाम्बुविन्यस्तं पीतं वाम्बुनि शोषितम् ॥ ३० ॥
सिन्धुवारस्य मूलानि विडालास्थिविषं नतम् ।
जलपिष्टो गदो हन्ति नखास्यैराखुजं विषम् ॥ ३१ ॥
सशेषं मूषिकविषं प्रकुप्यत्यभ्रदर्शने ।

यथायथं वा कालेषु दोषाणां हृद्विहेतुषु ॥ ३२ ॥
तत्र सर्वं यथावस्थं प्रयोज्याः स्युरुपक्रमाः।
यथास्वं ये च निर्दिष्टास्तथा दूषीविषापहाः ॥ ३३ ॥
दंशं श्वलर्कदष्टस्य दग्धमुष्णेन सर्पिषा।
प्रदिह्यादगदैस्तैस्तैः पुराणञ्च घृतं पिबेत् ॥ ३४ ॥
अर्कक्षीरयुतञ्चास्य योज्यमाशु विरेचनम्।
अङ्कोलोत्तरमूलाम्बु त्रिफलं सहविः फलम् ॥ ३५ ॥
पिबेत् सधत्तूरफला श्वेतां वापि पुनर्नवाम्।
ऐकध्य पलल तैलं रूषिकायाः पयो गुडः ॥ ३६ ॥
भिनत्ति विषमालर्कं घनहन्तिमवानिलः।
समन्त्रं सौषधीरत्नं स्रपनञ्च प्रयोजयेत् ॥ ३७ ॥
चतुष्पाद्भिर्द्विपाद्भिर्वा नखदन्तपरिक्षतम्।
शूयते पच्यते रागज्वरस्रावरुजान्वितम् ॥ ३८ ॥
सोमवल्कोऽश्वकर्णश्च गोजिह्वा हंसपादिका।
रजन्यौ गैरिकं लेपो नखदन्तविषापहः ॥ ३९ ॥

इति विषतन्त्रं षष्ठं समाप्तम्।

एकोनचत्वारिंशोऽध्यायः।

अथातो रसायनाध्यायं व्याख्यास्यामः ॥
दीर्घमायुः स्मृतिं मेधामारोग्यं तरुणं वयः।
प्रभावर्णस्वरौदार्यं देहेन्द्रियबलोदयम् ॥ १ ॥
वाक्सिद्धिं प्रणतां कान्तिमवाप्नोति रसायनात्।
लाभोपायो हि शस्तानां रसादीनां रसायनम् ॥ २ ॥
पूर्वे वयसि मध्ये वा तत्प्रयोज्यं जितात्मनः।
स्निग्धस्य स्नुतरक्तस्य विशुद्धस्य च सर्वथा ॥ ३ ॥
अविशुद्धे शरीरे हि युक्तो रासायनो विधिः।

वाजीकरो वा मलिने वस्त्रे रङ्ग इवाफलः ॥ ४ ॥
रसायनानां द्विविधं प्रयोगमृषयो विदुः।
कुटीप्रावेशिकं मुख्यं वातातपिकमन्यथा ॥ ५ ॥
निर्वाते निर्भये हर्म्ये प्राप्योपकरणे पुरे।
दिग्युदीच्यां शुभे देशे त्रिगर्भां सूक्ष्मलोचनाम् ॥ ६ ॥
धूमातपरजोव्यालस्त्रीमूर्खाद्यविलङ्घिताम्।
सज्जवैद्योपकरणां सुसृष्टां कारयेत् कुटीम् ॥ ७ ॥
अथ पुण्येऽह्नि सम्पूज्य पूज्यांस्तां प्रविशेच्छुचिः।
तत्र संशोधनैः शुद्धः सुखो जातबलः पुनः ॥ ८ ॥
ब्रह्मचारी धृतियुतः श्रद्दधानो जितेन्द्रियः।
दानशीलदयासत्यव्रतधर्मपरायणः ॥ ९ ॥
देवतानुस्मृतौ युक्तौ युक्तस्वप्नप्रजागरः।
प्रियौषधः पेशलवाक् प्रारभेत रसायनम् ॥ १० ॥
हरीतकीमामलकं सैन्धवं नागरं वचाम्।
हरिद्रां विप्पलीं वेल्लं गुडक्षीराम्बुना पिबेत् ॥ ११ ॥
स्निग्धः स्विन्नो नरः पूर्वं तेन साधु विरिच्यते।
ततः शुद्धशरीराय कृतसंसर्जनाय च ॥ १२ ॥
त्रिरात्रं पञ्चरात्रं वा सप्ताह वा घृतान्वितम्।
दद्याद्यावकमाशुद्धेः पुराणयवकृतोऽथवा ॥ १३ ॥
इत्थं संस्कृतकोष्ठस्य रसायनमुपाहरेत्।
यस्य यद्यौगिकं पश्येत् सर्वमालोच्य सात्म्यवित् ॥१४॥
पथ्यासहस्रं त्रिगुणधात्रीफलसमन्वितम्।
पञ्चानां पञ्चमूलानां सार्द्धं पलशतद्वयम् ॥ १५ ॥
जले दशगुणे पक्त्वा दशभागस्थिते रसे।
आपोथ्य कृत्वा व्यस्थीनि विजयामलकान्यथ ॥ १६ ॥
विनीय तस्मिन्निर्यूहे योजयेत् कुडवांशकम्।

त्वगेलामुस्तरजनीपिप्पल्यगुरुचन्दनम् ॥ १७ ॥
मण्डूकपर्णीकनकशङ्खपुष्पीवचाप्लवम् ।
यष्ट्याह्वयं विडङ्गञ्च चूर्णितं तुलयाधिकम् ॥ १८ ॥
सितोपलार्द्धभागञ्च पात्राणि त्रीणि सर्पिषः ।
द्वे च तैलात् पचेत् सर्वं तदग्नौ लेहतां गतम् ॥ १९ ॥
अवतीर्णं हिमं युञ्जाद्दिशैः क्षौद्रयुतैस्त्रिभिः ।
ततः खजेन मथित निदध्याद् घृतभाजने ॥ २० ॥
यानोपरुन्ध्यादाहारमेकं मात्रास्य सा स्मृता ।
षष्टिकः पयसा चात्र जीर्णे भोजनमिष्यते ॥ २१ ॥
वैखानसा बालखिल्यास्तथा चान्ये तपोधनाः ।
ब्रह्मणा विहित धन्यमिद प्राश्य रसायनम् ॥ २२ ॥
तन्द्राश्रमक्लमवलीपलितामयवर्जिताः ।
मेधास्मृतिबलोपेता बभूवुरमितायुषः ॥ २३ ॥
अभयामलकसहस्रं निरामय पिप्पलीसहस्रयुतम् ।
तरुणपलाशक्षारद्रवीकृत स्थापयेद्भाण्डे ॥ २४ ॥
उपयुक्ते च क्षारे छायासंशुष्कचूर्णितं योज्यम् ।
पादांशेन सितायास्तुर्गुणाभ्या मधुघृताभ्याम् ॥ २५ ॥
तद्धृतकुम्भे भूमौ निधाय षण्मासमस्थमुद्धृत्य ।
प्राङ्मुखे प्राश्य यथानलमुचिताहारो भवेत् सततम् ॥२६॥
इत्युपयुञ्जानादशेषं वर्षशतमलामयो जरारहितः ।
जीवति बलपुष्टिवपुः स्मृतिमेधाद्यन्वितो विशेषेण ॥२७॥
निरुजार्द्रपलाशस्य क्षिप्ते शिरसि तत् क्षतम् ।
अन्तर्दिहस्तं गम्भीरं पूर्य्यमामलकैर्नवैः ॥ २८ ॥
आमूल वेष्टित दर्भैः पद्मिनीपङ्कलेपितम् ।
आदीप्य गोमयैर्वह्निं निर्वाते खे दयेत्ततः ॥ २९ ॥
खिन्नानि तान्यामलकानि हत्वा खादेन्नरः क्षौद्रघृतान्वितानि ।

क्षीरं सृतं चानुपिबेत्प्रकामं तेनैव वर्त्तेत च मासमेकम् ॥ ३० ॥
वर्ज्यानि वर्ज्यानि च तत्र यत्नात् स्पृश्य च शीताम्बु न पार्थिनापि
एकादशाहेऽस्य ततो व्यतीते पतन्ति केशा दशना नखाश्च ॥३०
अथाल्पकैरेव दिनैः सुरूपः स्त्रीष्वक्षयः कुञ्जरतुल्यवीर्य्यः ।
विशिष्टमेधाबलबुद्धिसत्त्वो भवत्यसौ वर्षसहस्रजीवी ॥ ३२ ॥
दशमूलबलामुस्तजीवकर्षभकोत्पलम् ।
पर्णिन्यौ पिप्पलीशृङ्गी मेदातामलकीत्रुटिः ॥ ३३ ॥
जीवन्ती जोङ्गक द्राक्षा पौष्कर चन्दन शठी ।
पुनर्नवडिकाकोलोकाकनासासृताह्वयाः ॥ ३४ ॥
विदारीक्षुषमूलं च तदैकध्य पलोन्मितम् ।
जलद्रोणे पचेत् पञ्चधात्रीफलशतानि च ॥ ३५ ॥
पादशेषं रसं तस्माद् व्यस्थीन्यामलकानि च ।
गृहीत्वा भर्जयेत्तैलघृताद् द्वादशभिः पलैः ॥ ३६ ॥
मत्स्यण्डिकातुलार्द्धेन युक्तं तल्लेहवत् पचेत् ।
स्नेहार्द्धं मधुसिद्धे तु तुगाक्षीर्य्याश्चतुष्पलम् ॥ ३७ ॥
पिप्पल्या द्विपल दद्याच्चतुर्जात कणार्द्धितम् ।
अतोऽवलेहयेन्मात्रां कुटीस्थः पथ्यभोजनः ॥ ३८ ॥
इत्येष च्यवनप्राशो यं प्राश्य च्यवनो मुनिः ।
जराजर्जरितोऽप्यासीन्नारीनयननन्दनः ॥ ३९ ॥
कास श्वास ज्वरं शोषं हृद्रोगं वातशोणितम् ।
मूत्रशुक्राश्रयान् दोषान् वैस्वर्य्यं च व्यपोहति ।
बालवृद्धक्षतक्षीणक्षयाणामङ्गवर्द्धनः ॥ ४० ॥
मेधां स्मृतिं कान्तिमनामयत्वमायुःप्रकर्षं पवनानुलोम्यम् ।
स्त्रीषु प्रहर्षं बलमिन्द्रियाणामग्नेश्च कुर्य्यादिधिनोपयुक्तः ॥४१॥
मधुकेन तुगाक्षीर्य्या पिप्पल्या सिन्धुजन्मना ।
पृथग्लोहैः सुवर्णेन वचया मधुसर्पिषा ॥ ४२ ॥

सितया वा समायुक्ता समायुक्ता रसायनम्।
त्रिफला सर्वरोगघ्नी मेधायुःस्मृतिबुद्धिदा ॥ ४३ ॥
मण्डूकपर्ण्याः स्वरसं यथाग्नि क्षीरेण यष्टीमधुकस्य चूर्णम्।
रसं गुडूच्याः सहमूलपुष्पाः कल्कं प्रयुञ्जीत च शङ्खपुष्पाः ॥४४
आयुःप्रदान्यामयनाशनानि बलाग्निवर्णस्वरवर्द्धनानि।
मेध्यानि चैतानि रसायनानि मेध्या विशेषेण तु शङ्खपुष्पी ॥४५॥
नलदं कटुरोहिणी पयस्या मधुकं चन्दनसारिवोशगन्धाः।
त्रिफला कटुकत्रय हरिद्रे सपटोल लवण च तैः सुपिष्टैः ॥४६॥
त्रिगुणेन रसेन शङ्खपुष्पाः सपयस्कं घृतनल्वण विपक्वम्।
उपयुज्य भवेज्जडोऽपि वाग्मी श्रुतधारी प्रतिभानवानरोगः ॥४७

पेष्यैर्मृणालविसकेसरपत्रबीजैः
सिद्धं सहेमशकलं पयसा च सर्पिः।
पद्मारविन्दमिति तत्प्रथितं पृथिव्यां
प्रभ्रष्टपौरुषबलप्रतिभैर्निषेव्यम् ॥ ४८ ॥
यन्नालकन्ददलकेसरबद्विपक्व
नीलोत्पलस्य तदपि प्रथितं द्वितीयम्।
सर्पिश्चतुः कुवलय सहिरण्यपत्रं
मेध्यं गवामपि भवेत् किमु मानुषाणाम् ? ॥४८॥
ब्राह्मीवचासैन्धवशङ्खपुष्पीमल्याच्चकल्पाम्लसुवर्चलेभ्यः।
वैदेहिका च त्रियवाः पृथक् स्युर्यवौ सुवर्णस्य तिलो विषस्य॥५०
सर्पिषश्च पलमेकत एतद्योजयेत् परिणते च घृताढ्यम्।
भाजनं समधु वत्सरमेवं शीलयन्नधिकधीस्मृतिमेधः ॥५१॥
अतिक्रान्तजराव्याधितन्द्रालस्यश्रमक्रमः।
जीवत्यब्दशतं पूर्णं श्रीतेजःकान्तिदीप्तिमान् ॥ ५२ ॥
विशेषतः कुष्ठकिलासगुल्मविषज्वरोन्मादगरोदराणि।
अथर्वमन्त्रादिकृतानि कृत्याः शाम्यन्त्यनेनातिबलाश्च वाताः ॥५३

शरन्मुखे नागबलां पुष्ययोगे समुद्धरेत् ।
अक्षमात्रं ततो मूलाच्चूर्णितात् पयसा पिबेत् ॥ ५४ ॥
लिह्यान्मधुघृताभ्यां वा क्षीरवृत्तिरनन्नभुक् ।
एष वर्षप्रयोगेण जीवेद्वर्षशतं बली ॥ ५५ ॥
फलोन्मुखो गोक्षुरक. समूलस्कायाविशुष्कः सुविचूर्णिताङ्गः ।
सुभावितः स्वेन रसेन तस्मान्मात्रां परां प्रास्तिकों पिबेद्यः ॥५६
क्षीरेण तेनैव च शालिमश्नन् जीर्णे भवेद् सहितुलोपयोगात् ।
शक्रः सुरूपः सुभगः शतायुः कामी ककुद्मानिव गोकुलस्थः ॥५७
वाराहीकन्दमार्द्रार्द्रं क्षीरेण क्षीरपः पिबेत् ।
मास निरन्नो मासञ्च क्षीरान्नादो जरां जयेत् ॥ ५८ ॥
तत् कन्दश्लक्ष्णचूर्णं वा स्वरसेन सुभावितम् ।
घृतक्षौद्रप्लुतं लिह्यात्तत्पक्वं वा घृतं पिबेत् ॥ ५९ ॥
तद्वद्विदार्य्यतिबलाबलामधुकवायसीः ।
श्रेयसीश्रेयसीयुक्ता. पथ्याधात्रीक्षिरामृताः ॥ ६० ॥
मण्डूकीशङ्खकुसुमावाजिगन्धाशतावरीः ।
उपयुञ्जीत मेधावी वय स्थैर्य्यबलप्रदाः ॥ ६१ ॥
यथास्व चित्रकः पुष्पैर्ज्ञेयः पीतसितासितैः ।
यथोत्तरं सगुणवान् विधिना च रसायनम् ॥ ६२ ॥
छायाशुष्कं ततो मूलं मासं चूर्णीकृतं लिहन् ।
सर्पिषा मधुसर्पिर्भ्यां पिबन् वा पयसा यतिः ॥ ६३ ॥
अश्नन्नसा वा हितान्नाशी शतं जीवति नीरुजः ।
मेधावी बलवान् कान्तो वपुष्मान् दीप्तपावकः ॥ ६४ ॥
तैलेन लोढ्रो मासेन वातान् हन्ति सुदुस्तरान् ।
मूत्रेण श्वित्रकूटानि पीतस्तक्रेण पायुजान् ॥ ६५ ॥
भल्लातकानि पुष्टानि धान्यराशौ निधापयेत् ।
ग्रीष्मे संगृह्य हेमन्ते खादुस्निग्धहिमैर्वपुः ॥ ६६ ॥

संस्कृत्य तान्यष्टगुणे सलिलेऽष्टौ विपाचयेत् ।
अष्टांशशिष्टं तत्काथ्य सक्षीर शीतलं पिबेत् ॥ ६७ ॥
वर्द्धयेत् प्रत्यहं चानु तत्रैकैकमरुष्करम् ।
सप्तरात्रत्रयं यावत् त्रीणि त्रीणि ततः परम् ॥ ६८ ॥
आचत्वारिंशतस्तानि क्षपयेद् वृद्धिवत्ततः ।
सहस्रमुपयुञ्जीत सप्ताहैरिति सप्तभिः ॥ ६९ ॥
यन्त्रितात्मा घृतक्षीरशालिषष्टिकभोजनः ।
तद्विगुणितं कालं प्रयोगान्ते ऽपि चाचरेत् ॥ ७० ॥
आशिषो लभते पूर्वा वह्नेर्दीप्तिं विशेषतः ।
प्रमेहकृमिकुष्ठार्शोमिदोदोषविवर्जितः ॥ ७१ ॥
पिष्टस्वेदनमृजैः पूर्णं भल्लातकैर्विजर्जरितैः ।
भूमिनिखाते कुम्भे प्रतिष्ठित क्षणश्लिष्टम् ॥ ७२ ॥
परिवारितं समन्तात्पचेत्ततो गोमयाग्निना मृदुना ।
तत्स्वरसो यत्नवते ग्राह्योत्तं दिनेऽन्यस्मिन् ॥ ७३ ॥
अमुमुपयुज्य स्वरस मध्वष्टमभागिक द्विगुणसर्पिः ।
पूर्वविधियन्त्रितात्मा प्राप्नोति गुणान् स तानेव ॥ ७४ ॥
पुष्टानि पाकेन परिच्युतानि भल्लातकान्याढ़कसम्मितानि ।
पृष्टेष्टिकाचूर्णकणैर्जलेन प्रक्षाल्य सशोष्य च मारुतेन ॥ ७५ ॥
जर्जराणि विपचेज्जलकुम्भे पादशेषधृतगालितशीते ।
तद्रस पुनरपि क्षपयेत चीरकुम्भसहित चरणस्थे ॥ ७६ ॥
सर्पिः पक्वं तेन तुल्यप्रमाण युञ्जात् स्वेच्छं शर्कराया रजोभिः ।
एकीभूतं तत् खजत्तोभनेन क्षाप्यं धान्ये सप्तरात्रं सुगुप्तम् ॥७७

तममृतरसपाकं यः प्रगे प्राग्रमश्नन्
अनु पिबति यथेष्ट वारिदुग्धं रसं वा ।
स्मृतिमतिबलमेधासत्त्वसारैरुपेतः
कनकनिचयगौरः सोऽश्नुते दीर्घमायुः ॥ ७८ ॥

द्रोणेऽम्भसो व्रणक्लतां त्रिगुणाद्विपक्वात्
क्काथाढ़के पलसमैस्तिलतैलपात्रम् ।
तिक्ताविषाद्वयवरागिरिजन्मतार्क्ष्यैः
सिद्धं परं निखिलकुष्ठनिबर्हणाय ॥ ७९ ॥
सद्दामलकशुक्तिभिर्दधिसरेण तैलेन वा
गुड़ेन पयसा घृतेन यवसक्तुभिर्वा सह ।
तिलेन सह माक्षिकेण पललेन सूपेन वा
वपुष्करमरुष्करं परममेध्यमायुष्करम् ॥ ८० ॥
भल्लातकानि तीक्ष्णानि पाकीन्यग्निसमानि च ।
भवन्त्यमृतकल्पानि प्रयुक्तानि यथाविधि ॥ ८१ ॥
कफजो न स रोगोऽस्ति न विबन्धोऽस्ति कश्चन ।
यं न भल्लातकं हन्याच्छीघ्रमग्निबलप्रदम् ॥ ८२ ॥
वातातपविधानेऽपि विशेषेण विवर्जयेत् ।
कुलत्थदधिसूक्तानि तैलाभ्यङ्गाग्निसेवनम् ॥ ८३ ॥
वृक्षास्तुवरका नाम पश्चिमार्णवतीरजाः ।
वीचीतरङ्गविक्षोभमारुतोद्भूतपल्लवाः ॥ ८४ ॥
तेभ्यः फलान्याददीत सुपक्वान्यब्दागमे ।
मज्जा फलेभ्यश्चादाय शोषयित्वाऽवचूर्ण्य च ॥ ८५ ॥
तिलवत् पीड़येद् द्रोण्यां क्काथयेद्वा कुसुम्भवत् ।
तत्तैलं सम्भृतं भूयः पचेदासलिलक्षयात् ॥ ८६ ॥
अवतार्य्य करीषे च पक्वमात्रं निधापयेत् ।
स्निग्धस्विन्नो हृतमलः पश्चादुद्धृत्य तत्ततः ॥ ८७ ॥
चतुर्थभक्तान्तरितः प्रातः पाणितलं पिबेत् ।
मन्त्रेणानेन पूतस्य तैलस्य दिवसे शुभे ॥ ८८ ॥
मज्जासार । महावीर्य्य ! सर्वान् धातून् विशोधय ।
शङ्खचक्रगदापाणिस्त्वामाज्ञापयतेऽच्युतः ॥ ८९ ॥

तेनास्योर्ध्वं मधस्ताच्च दोषा याम्यसक्तत्तः।
सायमस्नेहलवणां यवागूं शीतलां पिबेत् ॥ ८० ॥
पञ्चाहानि पिबेत्तैलमित्थं वर्ज्यानि वर्जयेत्।
पञ्च मुद्गरसान्नाशी सर्वकुष्ठैर्विमुच्यते ॥ ८१ ॥
तदेव खदिरक्वाथे त्रिगुणे साधु साधितम्।
निहितं पूर्ववत् पञ्च पिबेन्मासं सुयन्त्रितः ॥ ८२ ॥
तेनाभ्यक्तशरीरश्च कुर्वन्नाहारमोरितम्।
अनेनाशु प्रयोगेण साधयेत् कुष्ठिनं नरम् ॥ ८३ ॥
सर्पिर्मधुयुतं पीतं तदेव खदिराहिना।
पक्वं मांसरसाहारं करोति त्रिंशतायुषम् ॥ ८४ ॥
तदेव नस्ये पञ्चाशद्दिवसानुपयोजितम्।
वपुष्मन्तं श्रुतधरं करोति त्रिंशतायुषम् ॥ ८५ ॥
यष्ट्याष्टौ सप्तदश वा पिप्पलीर्मधुसर्पिषा।
रसायनगुणान्वेषी समामेका प्रयोजयेत् ॥ ८६ ॥
तिसस्तिसस्तु पूर्वाह्णे भुक्ताग्रे भोजनस्य च।
पिप्पल्यः किंशुकक्षारभाविता घृतभर्जिताः ॥ ८७ ॥
प्रजोल्या मधुसर्पिभ्यां रसायनगुणैषिणा।
क्रमवृद्ध्या दशाहानि दश पैप्पलिका दिनम् ॥ ८८ ॥
वर्द्धयेत् पयसा सार्द्धं तथैवापनयेत् पुनः।
जीर्णौषधश्च भुञ्जीत षष्टिकं क्षीरसर्पिषा ॥ ८९ ॥
पिप्पलीनां सहस्रस्य प्रयोगोऽयं रसायनम्।
पिष्टास्ता बलिभिः पेयाः सृता मध्यबलैर्नरैः ॥१००॥
तद्वच्च छागदुग्धेन द्वे सहस्रे प्रयोजयेत्।
एभिः प्रयोगैः पिप्पल्यः कासश्वासगलग्रहान् ॥ १०१ ॥
यक्ष्मामेहयहृच्छूलपाण्डुत्वविषमज्वरान्।
घ्नन्ति शोफं वमिं हिक्कां प्लीहानं वातशोणितम् ॥१०२॥

विल्वार्द्धमात्रेण च पिप्पलीनां पात्रं प्रलिम्पेदयसो निशायाम्
प्रातः पिबेत्सलिलाञ्जलिभ्यां वर्षं यथेष्टाशनपानचेष्टः ॥ १०३ ॥
शुण्ठीविडङ्गत्रिफलागुडूचीयष्टीहरिद्रातिबलाबलाश्च ।
मुस्तासुराङ्गागुरुचित्रकाश्च सौगन्धिकं पङ्कजमुत्पलानि ॥१०४॥
धवाश्वकर्णासनबालपत्रसारास्तथा पिप्पलीवत् प्रयोज्याः ।
लोहोपलिप्ता पृथगेव जीर्वेत्समाः शतं व्याधिजराविमुक्तः १०५
क्षीराञ्जलिभ्यां च रसायनानि युक्तान्यमून्यायसलेपनानि ।
कुर्वन्ति पूर्वोक्तगुणप्रकर्षमायुःप्रकर्षं द्विगुणं ततश्च ॥ १०६ ॥

असनखदिरयूषैर्भावितां सोमराजीं
मधुघृतशिखिपथ्यालोहचूर्णैरुपेताम् ।
शरदमवलिहानः पारिणामान् विकारान्
त्यजति मितहिताशी तद्दिवाहारजातान् ॥१०७॥

तीव्रेण कुष्ठेन परीतमूर्त्तिर्यः सोमराजीं नियमेन खादेत् ।
सवत्सरं कृष्णतिलद्वितीयां समोमराजीं वपुषाऽतिशेते ॥१०८॥
ये सोमराज्या वितुषीकृतायाश्चूर्णैरुपेतास्त्वयसः सृजातात् ।
उद्धृत्य सारं मधुना लिहन्ति तक्रं तदेवानुपिबन्ति चान्ते ॥१०९॥
कुष्ठिनः कुथ्यमानाङ्गास्ते जाताङ्गुलिनासिकाः ।
भान्ति द्वित्वा इव पुनः प्ररूढनवपल्लवाः ॥ ११० ॥
शीतवातहिमदग्धतनूनां स्वभ्यभुग्नकुटिलव्यथितास्थाम् ।
भेषजस्य पवनोपहतानां वक्ष्यते विधिरतो लशुनस्य ॥१११॥

राहोरमृतचौर्य्येण लूनाद्ये पतिता गलात् ।
अमृतस्य कणा भूमौ ते रसोनत्वमागताः ॥ ११२ ॥
द्विजा नाश्नन्ति तमतो दैत्यदेहसमुद्भवम् ।
साक्षादमृतसम्भूतैर्ग्रामणीः स रसायनम् ॥ ११३ ॥
शीलयेल्लशुनं शीते वसन्तेऽपि कफोल्वणः ।
घनोदयेऽपि वातार्त्तः सदा वा ग्रीष्मलीलया ॥ ११४ ॥

स्निग्धशुद्धतनुः शीतमधुरोपस्कृताशयः।
तदुत्तमावतंसाभ्यां चर्चितानुचराजिरः ॥ ११५ ॥
तस्य कन्दान् वसन्तान्ते हिमवच्छकदेशजान्।
अपनीतत्वचो रात्रौ तीमयेन्मदिरादिभिः ॥ ११६ ॥
तत्कल्कक्षरमं प्रातः शुचितान्नावपीडितम्।
मदिरायाः सुरूढायास्त्रिभागेन समन्वितम् ॥ ११७ ॥
मद्यस्यान्यस्य तैलस्य मस्तुनः काञ्जिकस्य वा।
तत्काल एव वा युक्त युक्तमालोच्य मात्रया ॥ ११८ ॥
तैलसर्पिर्वसामज्जक्षीरमांसरसैः पृथक्।
क्वाथेन वा यथाव्याधि रस केवलमेव वा ॥ ११९ ॥
पिबेद् गण्डूषमात्र प्राक् कण्ठनाडीविशुद्धये।
प्रततं स्वेदनं चानु वेदनायां प्रशस्यते ॥ १२० ॥
शीताम्बुसेकः सहसा वमिमूर्च्छायमोर्मुखे।
शेषं पिबेत् क्षमापाये स्थिरता गत ओजसि ॥ १२१ ॥
विदाहपरिहाराय परं शीतानुलेपनः।
धारयेत् साम्बुकणिका मुक्ताः कर्पूरमालिकाः ॥ १२२ ॥
कुडवोऽस्य परा मात्रा तदर्धं केवलस्य तु।
पलं पिष्टस्य तन्मज्ज सभक्तं प्राक् च शीलयेत् ॥१२३॥
जीर्णशाल्योदनं जीर्णे शङ्खकुन्देन्दुपाण्डुरम्।
भुञ्जीत यूषैः पयसा रसैर्वा धन्वचारिणाम् ॥ १२४ ॥
मद्यमेकं पिबेत्तत्र लट्प्रवन्ध्ये जलान्वितम्।
अमद्यपस्त्वारनालं फलाम्बुपरिसिच्यिकाम् ॥ १२५ ॥
तल्लल्लं वा समघृतं घृतपात्रे खजाहतम्।
स्थितं दशाहादश्नीयात्तद्वदा वयसा समम् ॥ १२६ ॥
विकङ्कुकप्राच्यरसोनगर्भान् सशूल्यमांसान् विविधोपदंशान्।
विमर्दकान्वा घृतशुक्तयुक्तान् प्रकाममद्याल्लघु तुल्यमश्नन् ॥१२७॥

पित्तरक्तविनिर्मुक्तसमस्तावरणाहते।
शुद्धे वा विद्यते वायौ न द्रव्यं लङ्घनात् परम्॥ १२८॥
प्रियाम्बुगुडदुग्धस्य मांसमद्याम्लविद्विषः।
अतितिक्तोरजीर्णं च रसोनो व्यापदेद् ध्रुवम्॥१२९॥
पित्तकोपभयादन्ते युञ्जान्मृदु विरेचनम्।
रसायनगुणानेव परिपूर्णान् समश्नुते॥ १३०॥
ग्रीष्मेऽर्कतप्ता गिरयो जतुतुल्यं वमन्ति यत्।
हेमादिषड्धातुरस प्रोच्यते तच्छिलाजतु॥ १३१॥
सर्वं च तिक्तकटुकं नात्युष्णं कटुपाकतः।
छेदनं च विशेषेण लौह तत्र प्रशस्यते॥ १३२॥
गोमूत्रगन्धि रूक्षं गुग्गुल्वाभ विशर्करं मृत्स्नम्।
स्निग्धमनम्लकषायं मृदु गुरु च शिलाजतु श्रेष्ठम्॥१३३॥
व्याधिव्यधितसात्म्यं समनुस्मरन् भावयेदयः पात्रे।
प्राक् केवलजलधौत शुष्क क्वाथैस्ततो भाव्यम्॥१३४॥
समगिरिजमष्टगुणिते निःक्वाथ्य भावनौषधैस्तोये।
तन्निर्य्यूहेऽष्टांशे पूतोष्णे प्रक्षिपेद् गिरिजम्॥ १३५॥
तत् समरसतां यातं संशुष्कं प्रक्षिपेद्रसे भूयः।
स्वे स्वैरेव क्वाथैर्भाव्यं वारान् भवेत् सप्त॥ १३६॥
अथ स्निग्धस्य शुद्धस्य घृतं तिक्तकसाधितम्।
लघ्वह युञ्जीत गिरिजमेकैकेन तथा लघ्वहम्॥ १३७॥
फलत्रयस्य यूषेण पटोल्या मधुकस्य च।
योगयोग्यं ततस्तस्य कालापेक्ष प्रयोजयेत्॥ १३८॥
शिलाजमेवं देहस्य भवत्यत्युपकारकम्।
गुणान् समग्रान् कुरुते सहसा व्यापदं न च॥ १३९॥
एकत्रिंशत्सप्ताहं कर्षमर्द्धपल पलम्।
हीनमध्योत्तमो योगः शिलाजस्य क्रमात्मतः॥ १४०॥

सस्कृतं संस्कृते देहे प्रयुक्तं गिरिजाह्वयम् ।
युक्त्या व्यस्तैः समस्तैर्वा तान्त्रायोरूप्यहेमभिः ॥ १४१ ॥
क्षीरेणालोडितं कुर्याच्छीघ्रं रासायनं फलम् ।
कुलत्थां काकमाचीं च कपोतांश्च सदा त्यजेत् ॥ १४२ ॥
न सोऽस्ति रोगो भुवि साध्यरूपो जलश्लजं यं न जयेत् प्रसह्य ।
तत् कालयोगैर्विधिवत् प्रयुक्तं स्वस्थस्य चोर्जां विपुलां दधाति
॥ १४३ ॥

कुटीप्रवेशः क्षणिनां परिच्छदवतां हितः ।
अतोऽन्यथा तु ये तेषां सूर्य्यमारुतिको विधिः ॥ १४४ ॥
घातातपसहा योगा वक्ष्यन्तेऽतो विशेषतः ।
सुखोपचारा भग्नेऽपि ये न देहस्य बाधकाः ॥ १४५ ॥
शीतोदकं पयः क्षौद्रं घृतमेकैकशो दिशः ।
त्रिशः समस्तमथवा प्राक् पीतं स्थापयेद्वयः ॥ १४६ ॥
गुडेन मधुना शुण्ठ्या क्षणया लवणेन वा ।
हरीतकीं सर्पिषि सम्प्रताप्य समश्नतस्तत् पिबतो घृतञ्च ।
भवेच्चिरस्थायि बलं शरीरे सकृत् कृतं साधु यथा कृतघ्ने ॥ १४८ ॥
धात्रीरसक्षौद्रसिताघृतानि हिताशनानां लिहतां नराणाम् ।
प्रणाशमायान्ति जराविकारा ग्रन्था विशाला इव दुर्गृहीताः
॥ १४९ ॥

धात्रीकृमिघ्नासनसारचूर्णं सतैलसर्पिर्मधुलोहरेणु ।
निषेवमाणस्य भवेन्नरस्य तारुण्यलावण्यमविप्रनष्टम् ॥ १५० ॥
लोहं रजो वेल्लभवं च सर्पिः क्षौद्रद्रुतं स्थापितमब्दमात्रम् ।
सामुद्रके बीजकसारकृष्णे लिहन् बली जीवति क्षणकेशः ॥ १५१ ॥
विडङ्गभल्लातकनागराणि येऽश्नन्ति सर्पिर्मधुसंयुतानि ।
जरानदीं रोगतरङ्गिणीं ते लावण्ययुक्ताः पुरुषास्तरन्ति ॥ १५२ ॥

खदिरासनयूषभावितायाक्षिफलाया घृतमाक्षिकप्लुताया:।
नियमेन नरा निषेवितारो यदि जीवन्त्यरुज: किमत्र चित्रम्
॥१५३॥
बीजकस्य रसमङ्गुलिहार्य्यं शर्करामधुघृतं त्रिफलां च।
श्लीयत्सु पुरुषेषु जरता स्वागतापि विनिवर्त्तत एव ॥१५४॥
पुनर्नवस्याङ्गपल नवस्य
पिष्टं पिबेद् य: पयसाऽर्द्धमासम्।
मासद्वयं तत्त्रिगुण समा वा
जीर्णोऽपि भूय: स पुनर्नव: स्यात् ॥ १५५ ॥
मूर्वाह्वहल्वं शमतीबलानामुशीरपाठासनसारिवाणाम्।
कालानुसार्य्यागुरुचन्दनानां वदन्ति पौनर्नवमेव कल्पम् ॥१५६॥
शतावरीकल्ककषायसिद्धं ये सर्पिरश्नन्ति सिताद्वितीयम्।
तान् जीविताध्वानमभिप्रपन्नान्न विप्रलुम्पन्ति विकारचौरा:१५७
पीताश्वगन्धापयसाऽर्द्धमासं घृतेन तैलेन सुखाम्बुना वा।
कृशस्य पुष्टिं वपुषो विधत्ते बालस्य शस्यस्य यथा सुवृष्टि: ॥१५८॥
दिने दिने कृष्णतिलप्रकुञ्चं समश्नता शीतजलानुपानम्।
पोष: शरीरस्य भवत्यनल्पो दृढीभवन्त्यामरणाच्च दन्ता: ॥१५८॥
चूर्णं खदट्वामलकामृतानां लिहन् ससर्पिर्मधुभागमिश्रम्।
हृष: स्थिर: शान्तविकारदु:ख: समा: शतं जीवति कृष्णकेश:
॥ १६० ॥
सार्द्धं तिलैरामलकानि कृष्णैरक्षाणि संचुद्य हरीतकीर्वा।
येऽद्युर्मयूरा इव ते मनुष्या रम्यं परीणाममवाप्नुवन्ति ॥१६१॥
शिलाजतुक्षौद्रविडङ्गसर्पिर्लोहाभयापारदताप्यभव:।
आपूर्य्यते दुर्बलदेहधातुस्त्रिपञ्चरात्रेण यथा शशाङ्क: ॥ १६२ ॥
ये मासमेकं स्वरसं पिबन्ति दिने दिने भृङ्गरज:समुत्थम्।
क्षीराशिनस्ते बलवीर्य्ययुक्ता: समा: शतं जीवितमाप्नुवन्ति१६३

मास वचामप्युपसेवमानाः क्षीरेण तैलेन घृतेन वाऽपि ।
भवन्ति रक्षोभिरधृष्यरूपा मेधाविनो निर्मलसृष्टवाक्याः ॥१६४॥
मण्डूकपर्णीमपि भक्षयन्तो भृष्टां घृते मांसमनन्नभक्ष्याः ।
जीवन्ति कालं विपुलं प्रगल्भास्तारुण्यलावण्यगुणोदयाढ्याः ॥१६५॥
लाङ्गलीत्रिफलालोहपलपञ्चाशतोन्मितम् ।
मार्कवस्वरसे षष्ठ्या गुटिकानां शतत्रयम् ॥ १६६ ॥
छायाविशुष्कं गुटिकार्द्धमद्यात् पूर्वं समस्तामपि ता क्रमेण ।
भजेद्विरिक्तः क्रमशश्च मण्ड पेया विलेपीं रसकौदनं च ॥१६७॥
सर्पिः स्निग्धं मांसमेकं यतात्मा मासादूर्ध्वं सर्वथा स्नैरवृत्तिः ।
वर्ज्यं यत्नात् सर्वकालं त्वजीर्णं वर्षेष्वेवं योगमेवोपयुञ्जात्॥१६८॥

भवति विगतरोगो योऽभ्यसाध्यामयार्त्तः
प्रबलपुरुषकारः शोभते योऽपि दृष्टः ।
उपचितपृथुगात्रश्चोत्तनेत्रादियुक्तः
तरुण इव समानां पञ्च जीवेच्छतानि ॥१६९॥

गायत्रीशिखिशिग्रुपाशनशिवावेल्लाच्चकारुष्करान्
पिष्ट्वाष्टादशसङ्गुणेऽम्भसि घृतान् खण्डैः सहायोमयैः
पात्रे लोहमये त्रयह रविकरैरालोडयन् पाचयेत्
अग्नौ चानुमृदौ सलोहशकलं पादस्थितं तत् पचेत् ॥१७०॥

पूतस्यांशं क्षीरतोऽंशस्तथाग्नौ
भाङ्गीन्निर्यासाद् द्वौ वरायास्त्रयोंऽशाः ।
अंशाश्चत्वारश्चेह हैयङ्गवीनात्
एकीकृत्यैतत् साधयेत् क्षणलौहैः ॥१७१॥
विमलखण्डसितामधुभिः पृथक्
युतमयुक्तमिदं यदि वा घृतम् ।
स्वरुचिभोजनपानविचेष्टितः
भवति नाम पलशतं परिलीलयन् ॥ १७२ ॥

ओमाग्निर्भूतपाप्मा वनमहिषबलो वाजिवेगः स्थिराङ्गः
केशैर्भृङ्गाङ्गनीलैर्मधुसुरभिमुखो नैकयोषिन्निषेवी ।
वाङ्मेधाधीसमृद्धः सपटुहुतवहो मासमात्रोपयोगात्
धत्ते ऽसौ नारसिंह वपुरनलशिखातप्तचामीकराभम् ॥१७३॥
अत्तार नारसिंहस्य व्याधयो न स्पृशन्त्यपि ।
चक्रोज्ज्वलभुजं भीता नारसिंहमिवासुराः ॥ १७४ ॥
भृङ्गप्रवालानसुनैव भृष्टान् घृतेन यः खादति यन्त्रितात्मा ।
विशुद्धकोष्ठोऽसनसारसिद्धदुग्धानुपस्तत् कृतभोजनार्थः ॥१७५॥
मासोपयोगात् ससुखो जीवत्यब्दशतद्वयम् ।
गच्छति सकृदप्युक्तमविलुप्तस्मृतीन्द्रियः ॥ १७६ ॥
अनेनैव च कल्पेन यस्तैलमुपयोजयेत् ।
तानेवाप्नोति स गुणान् कृष्णकेशश्च जायते ॥१७७॥
उक्तानि शक्यानि फलान्वितानि युगानुरूपाणि रसायनानि ।
महानुभावान्यपि चापराणि प्राच्यादिकष्टानि न कीर्त्तितानि
॥ १७८ ॥
रसायनविधिभ्रंशाज्जायेरन् व्याधयो यदि ।
यथास्वमौषधं तेषां कार्यं मुक्त्वा रसायनम् ॥ १७९ ॥
सत्यवादिनमक्रोधमध्यात्मप्रवणेन्द्रियम् ।
शान्तं सद्वृत्तनिरतं विद्यान्नित्यरसायनम् ॥ १८० ॥
गुणैरेभिः समुदितः सेवते यो रसायनम् ।
स निवृत्तात्मा दीर्घायुः परत्रेह च मोदते ॥१८१॥
शास्त्रानुसारिणी चर्य्या चित्तज्ञाः पार्श्ववर्त्तिनः ।
बुद्धिरस्खलितार्थेषु परिपूर्णं रसायनम् ॥ १८२ ॥

चत्वारिंशोऽध्यायः।

अथातो वाजीकरणाध्यायं व्याख्यास्यामः॥
वाजीकरणमन्विच्छेत् सतत विषयी पुमान्।
तुष्टिः पुष्टिरपत्य च गुणवत्तच संश्रितम्॥ १॥
अपत्यसन्तानकर यत् सद्यः सप्रहर्षणम्।
वाजी वाऽतिबलो येन यात्यप्रतिहतोऽङ्गनाः॥ २॥
भवत्यतिप्रियः स्त्रीणां येन येनोपचीयते।
तद्वाजीकरण तद्धि देहस्योर्जस्कर परम्॥ ३॥
धर्म्यं यशःस्यमायुष्य लोकद्वयरसायनम्।
अनुमोदामहे ब्रह्मचर्य्यमेकान्तनिर्मलम्॥ ४॥
अल्पसत्त्वस्य तु क्लेशैर्बाध्यमानस्य रागिणः।
शरीरक्षयरक्षार्थं वाजीकरणमुच्यते॥ ५॥
कल्पस्योदग्रवयसो वाजीकरणसेविनः।
सर्वेष्वृतुष्वहरहर्व्यायो न निवार्य्यते॥ ६॥
अथ स्निग्धविशुद्धानां निरूहान् सानुवासनान्।
घृततैलरसक्षीरशर्कराक्षौद्रसयुतान्॥ ७॥
योगविद्योजयेत् पूर्वं क्षीरमांसरसाशिनम्।
ततो वाजीकरान् योगान् शुक्रापत्यविवर्द्धनान्॥ ८॥
अच्छायः पूताकुसुमः फलेन रहितो द्रुमः।
यथैकश्चैकशाखश्च निरपत्यस्तथा नरः॥ ९॥
स्खलद्गमनमव्यक्तवचनं धूलिधूसरम्।
अपि लालाविलमुख हृदयाह्लादकारकम्॥ १०॥
अपत्यं तुष्यता केन दर्शनस्पर्शनादिषु।
किं पुनर्य्यद्यशोधर्ममानस्त्रीकुलवर्द्धनम्॥ ११॥
मृदुकाये यथाशक्ति वृष्ययोगान् प्रयोजयेत्।

शरेक्षुकुशकाशानां विदार्य्या वीरणस्य च ॥ १२ ॥
मूलानि कण्टकार्य्याश्च जीवकर्षभकौ बलाम् ।
मेदे द्वे द्वे च काकोल्यौ शूर्पपर्ण्यौ शतावरीम् ॥ १३ ॥
अश्वगन्धामतिबलामात्मगुप्ता पुनर्नवाम् ।
वीरां पयस्या जीवन्तीमृद्धिं राज्ञां त्रिकण्टकम् ॥१४॥
मधुक शालिपर्णीं च भागांस्त्रिपलिकान् पृथक् ।
माषाणामाढकं चैतद् द्विद्रोणे साधयेदपाम् ॥१५॥
रसेनाढकशेषेण पचेत्तेन घृताढ़कम् ।
दत्त्वा विदारीधात्रीक्षुरसानामाढ़काढकम् ॥ १६ ॥
घृताच्चतुर्गुणं क्षीरं पेथाणीमानि चावपेत् ।
वीरां स्वगुप्तां काकोल्यौ यष्टीं फल्गूनि पिप्पलीम् ॥१७॥
द्राक्षां विदारीं खर्जूरं मधुकानि शतावरीम् ।
तत् सिद्धपूतं चूर्णस्य पृथक् प्रस्थेन योजयेत् ॥ १८ ॥
शर्करायास्तुगायाश्च पिप्पल्या कुडवेन च ।
मरिचस्य प्रकुञ्चेन पृथगर्द्धपलोन्मितैः ॥ १९ ॥
स्वगेलकेसरैः श्लक्ष्णैः क्षौद्राद् द्विकुडवेन च ।
पलामात्रं ततः खादेत् प्रत्यहं रसदुग्धभुक् ॥ २० ॥
तेनारोहति वाजीव कुलिङ्ग इव हृष्यति ।
विदारीपिप्पलीशालिप्रियालेक्षुरकाद्रजः ॥ २१ ॥
पृथक् स्वगुप्ता मूलाच्च कुडवांश तथा मधु ।
तुलार्द्धं शर्कराचूर्णात् प्रस्थार्द्धं नवसर्पिषः ॥ २२ ॥
सोऽक्षमात्रमतः खादेत् यस्य रामाशतं गृहे ।
सात्मगुप्ताफलान् क्षीरे गोधूमान् साधितान् हिमान् ॥२३॥
माषान्वा सघृतक्षौद्रान् खादन् गृष्टिपयोऽनुपः ।
जागर्त्ति रात्रिं सकलामखिन्नः खेदयेत् स्त्रियः ॥२४॥
वस्त्राण्डसिद्धे पयसि भावितानसकृत्तिलान् ।

यः खादेत्ससितान् गच्छेत्स स्त्रीशतमपूर्ववत् ॥ २५ ॥
चूर्णं विदार्य्या बहुशः स्वरसेनैव भावितम् ।
क्षौद्रसर्पिर्युतं लीढ्वा प्रमदाशतमृच्छति ॥ २६ ॥
कृष्णाधात्रीफलरजः स्वरसेन सुभावितम् ।
शर्करामधुसर्पिर्भिर्लीढ्वा योऽनु पयः पिबेत् ॥ २७ ॥
स नरोऽशीतिवर्षोऽपि युवेव परिहृष्यति ।
कर्षं मधुकचूर्णस्य घृतक्षौद्रसमन्वितम् ॥ २८ ॥
पयोऽनुपानं यो लिह्यान्नित्यवेगः स नो भवेत् ।
कुलीरशृङ्ग्या यः कल्कमालोड्य पयसा पिबेत् ॥ २९ ॥
सिताघृतपयोऽन्नाशी स नारीषु वृषायते ।
यः पयस्यां पयःसिद्धां खादेन्मधुघृतान्विताम् ॥ ३० ॥
पिबेद्वाष्कयणं चानु क्षीरं न क्षयमेति सः ।
स्वयंगुप्तेक्षुरकयोर्बीजचूर्णं सशर्करम् ॥ ३१ ॥
घारोष्णेन भरः पीत्वा पयसा रासभायते ।
उच्चटाचूर्णमप्येवं शतावर्य्याश्च योजयेत् ॥ ३२ ॥
चन्द्रशुभ्रं दधिसरं ससितं षष्टिकौदनम् ।
पटे सुमार्जितं भुक्त्वा वृद्धोऽपि तरुणायते ॥ ३३ ॥
खदष्टेक्षुरमाषात्मगुप्तावीजशतावरीः ।
पिबन् क्षीरेण जीर्णोऽपि गच्छति प्रमदाशतम् ॥ ३४ ॥
यत्किञ्चिन्मधुरं स्निग्धं बृंहणं बलवर्द्धनम् ।
मनसो हर्षणं यच्च तत्सर्वं वृष्यमुच्यते ॥ ३५ ॥
द्रव्यैरेवंविधैस्तस्माद्दर्पितः प्रमदां व्रजेत् ।
आत्मवेगेन चोदीर्णः स्त्रीगुणैश्च प्रहर्षितः ॥ ३६ ॥
सेव्याः सर्वेन्द्रियसुखा धर्मकल्पद्रुमाङ्कुराः ।
विषयातिशयाः पञ्च शराः कुसुमधन्वनः ॥ ३७ ॥
दृष्टा ह्येकैकशोऽप्यर्था हर्षप्रीतिकराः परम् ।

किं पुनः स्त्रीशरीरे ये सङ्घातेन प्रतिष्ठिताः ॥ ३८ ॥
नामापि यस्या हृदयोत्सवाय यां पश्यतां हर्षिरनाप्तपूर्वा ।
सर्वेन्द्रियाकर्षणपाशभूतां कान्तानुवृत्तिव्रतदीक्षिता या ॥३९॥
कलाविलासाङ्गवयोविभूषाशुचिः सलज्जा रहसि प्रगल्भा ।
प्रियंवदा तुल्यमनःशया या सा स्त्री हर्षत्वाय परं नरस्य ॥४०॥
आचरेच्च सकलां रतिचर्यां कामशास्त्रविहितामनवद्याम् ।
देशकालबलशक्त्यनुरोधाद् वैद्यतन्त्रसमयोक्तविधिज्ञः ॥४१॥
अभ्यञ्जनोद्वर्तनसेकगन्धसृक्पत्रवस्त्राभरणप्रकाराः ।
गान्धर्वकाव्यादिकथाप्रवीणाः समस्तभावा वशगा वयस्याः ॥४२॥
दीर्घिका स्वभवनान्तर्निविष्टा पद्मरेणुमधुमत्तविहङ्गाः ।
नीलसानुगिरिकूटनितम्बे काननानि पुरकण्ठगतानि ॥४३॥
दृष्टिसुखा विविधा तरुजातिः श्रोत्रसुखः कलकोकिलनादः ।
अङ्गसुखर्तुवशेन विभूषाचित्तसुखः सकलः परिवारः ॥४४॥
ताम्बूलमच्छमदिरा कान्ता कान्ता निशा शशाङ्काङ्का ।
यद्यच्च किञ्चिदिष्टं मनसो वाजीकरं तत्तत् ॥ ४५ ॥
मधुसुखमिव सोत्पल प्रियायाः कलरणना परिवादिनी प्रियेव ।
कुसुमचयमनोरमा च शय्या किसलयिनी लतिकेव पुष्पितायाः
॥ ४६ ॥
देशे शरीरे च न काचिदर्त्तिरर्थेषु नाल्पोऽपि मनोविघातः ।
वाजीकराः सन्निहिताश्च योगाः कामस्य कामं परिपूरयन्ति॥४७
सुस्नापपर्पटकं ज्वरे क्षपि जले मृद्वृष्टलोष्टोद्भवं
लाजाच्छर्दिषु वस्तिजेषु गिरिज मेहेषु धात्रीनिशे ।
पाण्डौ श्रेष्ठभयोभयानिलकफे श्लीहामये पिप्पली
सन्धाने क्रमिजा विषे शुकतरुर्मेदोऽनिले गुग्गुलुः ॥४८॥
द्वषोऽस्रपित्ते कुटजोऽतिसारे भल्लातकोऽर्शःसु गरेषु हैम ।
स्थूलेषु तार्क्ष्यं क्रमिषु क्रमिघ्नं शोषे सुराच्छागपयोऽनु मांसम्४९

अम्लामयेषु त्रिफला गुडूची वातासृरोगे मथितं ग्रहिण्याम्।
कुष्ठेषु सेव्यः खदिरस्य सारः सर्वेषु रोगेषु शिलाह्वयं च ॥५०॥

उन्माद घृतमसव शोकं मद्यं विसंस्मृतिं ब्राह्मी।
निद्रानाशं क्षीरं जयति रसाला प्रतिश्यायम् ॥ ५१ ॥
मांसं कार्श्यं लशुनः प्रभञ्जनं स्तब्धगात्रतां खेदः।
गुडमञ्जर्याः खपुरो नस्यां स्कन्धांसबाहुरुजम् ॥ ५२ ॥
नवनीतखण्डमर्दितमौष्ट्रं मूत्रं पयश्च हन्त्युदरम्।
नस्यं मूर्द्धविकारान् विद्रधिमचिरोत्थमसृविस्रावः ॥५३॥
नस्यं कवलमुखजां नस्याञ्जनतर्पणानि नेत्ररुजः।
हृद्यत्वं क्षीरघृते मूर्च्छां शीताम्बुमारुतच्छायाः ॥५४॥
समशुक्तार्द्रकमाचा मन्दे वह्नौ श्रमे सुरा स्नानम्।
दुःखसहत्वे स्थैर्यं व्यायामो गोचुरूर्हितः क्षुच्छे ॥५५॥
कासे निदिग्धिका पार्श्वशूले पुष्करजा जटा।
वयसः स्थापने धात्री त्रिफला गुग्गुलुर्व्रणे ॥ ५६ ॥
वस्तिर्वातविकारान् पैत्तान् रेकः कफोद्भवान् वमनम्।
क्षौद्रं जयति बलास सर्पिः पित्त समीरणं तैलम् ॥ ५७ ॥
इत्यग्र्यं यत् प्रोक्तं रोगाणामौषधं शमायालम्।
तद्देशकालबलतो विकल्पनीय यथायोगम् ॥५८॥

इत्यात्रेयादागमस्यार्थसूत्र तत् सूत्राना पेशलानामभज्ञः।
भेडादीनां सम्मतो भक्तिनम्रः पप्रच्छेदं संशयानोऽग्निवेशः ॥५९

दृश्यन्ते भगवन्। केचिदात्मवन्तोऽपि रोगिणः।
द्रव्योपस्थातसम्पन्ना हृद्यवैद्यमतानुगाः ॥ ६० ॥
क्षीयमाणामयप्राणा विपरीतास्तथापरे।
हिताहितविभागस्य फलं तस्मादनिश्चितम् ॥ ६१ ॥
किं शास्ति शास्त्रमस्मिन्निति कल्पयतोऽग्निवेशमुख्यस्य।
शिष्यगणस्य पुनर्वसुराचख्यौ कात्स्न्र्यं तत्त्वम् ॥ ६२ ॥

न चिकित्साऽचिकित्सा च तुल्या भवितुमर्हति।
विनापि क्रिययाऽस्वास्थ्यं गच्छतां षोडशांशया ॥६२॥
आतङ्कपङ्कमग्नानां हस्तालम्बो भिषग्जितम्।
जीवितं म्रियमाणानां सर्वेषामेव भौषधात् ॥ ६४॥
न ह्युपायमपेक्षन्ते सर्वे रोगा न चान्यथा।
उपायसाध्याः सिध्यन्ति नाहेतुर्हेतुमान् यतः ॥६५॥
अप्येवोपाययुक्तस्य धीमतो जातुचित् क्रिया।
न सिध्येद्वैवगुण्यान्न त्वियं षोड्शात्मिका ॥६६॥
कस्यासिद्धोऽग्नितोयादिस्वेदस्तम्भादिकर्मणि।
न प्रीणनं कर्शनं वा कस्य चीरगवेधुकम् ॥ ६७ ॥
कस्य मात्रात्मगुप्तादौ वृथात्वं नास्ति निश्चयः।
विष्मूत्रकरणाच्चेषौ कस्य संशयितौ यवे ॥ ६८ ॥
विषं कस्य जरां याति मन्त्रतन्त्रविवर्जितम्।
कः प्राप्तः कल्पतां पथ्याहृते रोहिणिकादिषु ॥ ६९ ॥
अपि चाकालमरणं सर्वसिद्धान्तनिश्चितम्।
महतापि प्रयत्नेन वार्यतां कथमन्यथा ॥ ७० ॥
चन्दनाद्यपि दाहादौ रूढ़मागमपूर्वकम्।
शास्त्रादेव गतं सिद्धं ज्वरे लङ्घनबृंहणम् ॥ ७१ ॥
चतुष्पादगुणसम्पन्ने सम्यगालोच्य योजिते।
मा कृथा व्याधिनिर्घातं विचिकित्सां चिकित्सते ॥७२॥
एतद्धि मृत्यपाशानामकण्ठे छेदनं दृढ़म्।
रोगोत्त्रासितभीतानां रक्षासूत्रमसूत्रकम् ॥ ७३ ॥
एतत्तदमृतं साक्षाज्जगत्यायासवर्जितम्।
याति हालाहलत्वं च सद्यो दुर्भाजनास्थितम् ॥७४॥
अज्ञातशास्त्रसद्भावान् शास्त्रमात्रपरायणान्।
त्यजेद् दूरेण भिषग्पाशान् पाशान् वैवस्वतानिव ॥७५॥

भिषजां साधुवृत्तानां भद्रमागमशालिनाम्।
अध्यस्तकर्मणां भद्रं भद्रं भद्राभिलाषिणाम् ॥ ७६ ॥
इति तन्त्रगुणैर्युक्तं तन्त्रदोषविवर्जितम्।
चिकित्सा शास्त्रमखिलं व्यापठ्य परितः स्थितम् ॥७७॥
विपुलामलविज्ञानमहामुनिमतानुगम्।
महासागरगम्भीरसंग्रहार्थोपलक्षणम् ॥ ७८ ॥
अष्टाङ्गवैद्यकमहोदधिमन्थनेन
योऽष्टाङ्गसंग्रहमहामृतराशिराप्तः।
तस्मादनल्पफलमल्पसमुद्यमानां
प्रीत्यर्थमेतदुदितं पृथगेव तन्त्रम् ॥ ७९ ॥
इदमागमसिद्धत्वात् प्रत्यक्षफलदर्शनात्।
यन्त्रवत् सम्प्रयोक्तव्यं न मीमांस्यं कथञ्चन ॥ ८० ॥
दीर्घजीवितमारोग्यं धर्ममर्थं सुखं यशः।
पाठाववोधानुष्ठानैरधिगच्छत्यसौ ध्रुवम् ॥ ८१ ॥
एतत् पठन् संग्रहबोधशक्तः स्वभ्यस्तकर्मा भिषगप्रकम्प्यः।
आकम्पयत्यन्यविशालतन्त्रकृताभियोगान् यदि तत्र चित्तम् ॥८२
यदि चरकमधीते तद् ध्रुवं सुश्रुतादि-
प्रणिगदितगदानां नाममात्रेऽपि बाह्यः।
अथ चरकविहीनः प्रक्रियायामखिन्नः
किमिह खलु करोतु व्याधितानां वराकः ? ॥८३॥
अभिनिवेशवशादभियुज्यते सुभणितेऽपि न यो दृढमूढकः।
पठतु यत्नपरः पुरुषायुषं स खलु वैद्यकभाष्यमनिर्विदः ॥८४॥
वाते पित्ते श्लेष्मशान्तौ च पथ्यं तैलं सर्पिर्माक्षिकञ्च क्रमेण।
एतद् ब्रह्मा भाषते ब्रह्मजो वा का निर्मन्त्रे वक्तृभेदोक्तिः ? ॥८५
अभिधात्ववशात् किंवा द्रव्यशक्तिर्विशिष्यते।
अतो मत्तरमुत्सृज्य माध्यस्थमवलम्ब्यताम् ॥ ८६ ॥

ऋषिप्रणीते प्रीतिश्चेन्मुक्ता चरकसुश्रुतौ ।
भेडाद्याः किं न पठ्यन्ते तस्माद्ग्राह्यं सुभाषितम् ॥८७॥
हृदयमिव हृदयमेतत् सर्वायुर्वेदवाङ्मयपयोधेः ।
दृष्ट्वा यच्छुभमाप्तं शुभमस्तु परं ततो जगतः ॥ ८८ ॥

इति श्रीसिंहगुप्तसूनुवाग्भटविरचितायामष्टाङ्गहृदय-
संहितायामुत्तरस्थानं समाप्तम् ।

सूचीपत्रम् ।

पृष्ठा

अथ सूत्रस्थानम् ।

आयुष्कामीयाध्याय १
दिनचर्याध्याय. ५
ऋतुचर्याध्यायः ९
रोगानुत्पादनीयाध्यायः १२
द्रव्यद्रव्यविज्ञानीयाध्यायः १६
अन्नस्वरूपविज्ञानीयाध्याय· २२
अन्नरक्षाध्याय· २७
मात्राशितीयाध्यायः ४१
द्रव्यादिविज्ञानीयाध्याय· ४८
रसभेदीयाध्याय· ५०
दोषादिविज्ञानीयाध्यायः ५४
दोषभेदीयाध्यायः ५८
दोषोपक्रमणीयाध्यायः ६५
द्विविधोपक्रमणीयाध्यायः ६८
शोधनादिगणसंग्रहाध्यायः ७१
स्नेहविध्यध्यायः ७६
स्वेदविध्यध्याय· ८०
वमनविरेचनविध्यध्यायः ८२
बस्तिविध्यध्यायः ८७
नस्यविध्यध्यायः ९५

पृष्ठा

धूमपानविध्यध्याय· ९८
गण्डूषादिविध्यध्याय· १००
आश्चोतनाञ्जनविध्यध्यायः १०२
तर्पणपुटपाकविध्यध्यायः १०६
बन्धविध्यध्याय १०८
शस्त्रविध्यध्याय· ११२
शिराव्यधविध्यध्याय· ११७
शल्याहरणीयाध्यायः १२२
शस्त्रकर्मविध्यध्यायः १२६
क्षाराग्निकर्मविध्यध्याय· १३२

शारीरस्थानम् ।

गर्भावक्रान्तिशारीराध्यायः १३८
गर्भव्यापदशारीराध्यायः १४६
अङ्गविभागशारीराध्यायः १५१
गर्भविभागशारीराध्यायः १६१
विकृतिविज्ञानीय-
शारीराध्यायः १६७
द्रुतादिविज्ञानीय-
शारीराध्यायः १७७

	पृष्ठा
निदानस्थानम् ।	
सर्वरोगनिदानम्	१८४
ज्वरनिदानम्	१८६
रक्तपित्तकासनिदानम्	१९१
श्वासहिक्कानिदानम्	१९६
राजयक्ष्मादिनिदानम्	१९८
मदात्ययनिदानम्	२०२
अर्शसां निदानम्	२०६
अतीसारग्रहणीरोग-योनिर्निदानम्	२११
मूत्राघातनिदानम्	२१२
प्रमेहनिदानम्	२१६
विद्रधिग्रन्थ्यर्बुदनिदानम्	२२०
उदरनिदानम्	२२५
पाण्डुरोगगोपकविसर्प-निदानम्	२२८
कुष्ठश्लीपदनिदानम्	२३४
वातव्याधिनिदानम्	२३८
वातशोणितनिदानम्	२१६

	पृष्ठा
क्रिमिकुष्ठरोग हृद्व्याधिचिकित्सिताध्याय	२६०
मदात्ययचिकित्सिताध्यायः	२६६
अर्शसां चिकित्सिताध्यायः	२०६
अतीसारचिकित्सिताध्यायः	२२०
ग्रहणीदोषचिकित्सिताध्यायः	२२६
मूत्राघातचिकित्सिताध्यायः	२३७
प्रमेहचिकित्सिताध्यायः	२४२
विद्रधिचिकित्सिताध्यायः	२४५
गुल्मचिकित्सिताध्यायः	२४८
उदरचिकित्सिताध्यायः	२६०
पाण्डुरोगचिकित्सिताध्यायः	२७०
श्वयथुचिकित्सिताध्याय	२७४
विसर्पचिकित्सिताध्यायः	२७८
कुष्ठचिकित्सिताध्यायः	२८१
श्लीपदचिकित्सिताध्याय	२६०
कृमिचिकित्सिताध्यायः	२६२
वातव्याधिचिकित्सिताध्यायः	२६२
वातशोणितचिकित्सिताध्यायः	३००

चिकित्सितस्थानम् ।

ज्वरचिकित्सिताध्यायः	२४८
रक्तपित्तचिकित्सिताध्यायः	२६१
कासचिकित्सिताध्यायः	२६५
श्वासहिक्काचिकित्सिताध्यायः	२७६
राजयक्ष्मादिचिकित्सिताध्यायः	२८२

कल्पस्थानम् ।

वमनकल्पः	३०६
विरेचनकल्पः	३१२
वमनविरेचनव्यापत्-सिद्धिकल्पः	३१७
दोषहरणसाधनकल्पसिद्धिकल्पः	३२१

	पृष्ठा
वस्तिव्यापत्सिद्धिकल्पः	४२६
क्षेमजकल्पः	४२१

उत्तरस्थानम् ।

बालोपचरणीयाध्याय.	४३२
बालामयप्रतिषेधाध्याय·	४३७
बालग्रहप्रतिषेधाध्याय·	४४२
भूतविज्ञानाध्यायः	४४८
भूतप्रतिषेधाध्याय·	४५२
उन्मादप्रतिषेधाध्यायः	४५७
अपस्मारप्रतिषेधाध्यायः	४६१
वर्त्मरोगविज्ञानीयाध्यायः	४६४
वर्त्मरोगप्रतिषेधाध्यायः	४६७
सन्धिसितासितरोगविज्ञानम्	४७०
सन्धिसितासितरोगप्रतिषेधाध्यायः	४७२
दृष्टिरोगविज्ञानीयाध्याय·	४७७
तिमिरप्रतिषेधाध्याय·	४८०
शिक्ष्णनाहप्रतिषेधाध्यायः	४८८
सर्वाक्षिरोगविज्ञानाध्यायः	४९१
सर्वाक्षिरोगप्रतिषेधाय·	४९२
कर्णरोगविज्ञानीयाध्यायः	४९८
कर्णरोगप्रतिषेधाध्यायः	५००
नासारोगविज्ञानीयाध्यायः	५०५

	पृष्ठ
नासारोगप्रतिषेधाध्याय.	५०८
मुखरोगविज्ञानाध्यायः	५१
मुखरोगप्रतिषेधाध्याय·	५१५
शिरोरोगविज्ञानाध्यायः	५२४
शिरोरोगप्रतिषेधाध्यायः	५२७
व्रणविज्ञानीयप्रतिषेधाध्याय·	५३२
सद्योव्रणप्रतिषेधाध्यायः	५३७
भग्नप्रतिषेधाध्यायः	५४१
भगन्दरप्रतिषेधाध्यायः	५४५
अन्यत्रर्बुदश्लीपदापची-नाडीविज्ञानाध्यायः	५४८
अन्यत्रर्बुदश्लीपदापची-नाडीप्रतिषेधाध्याय.	५५१
क्षुद्ररोगविज्ञानाध्यायः	५५४
क्षुद्ररोगप्रतिषेधाध्यायः	५५७
गुह्यरोगविज्ञानाध्यायः	५६०
गुह्यरोगप्रतिषेध्यायः	५६४
विषप्रतिषेधाध्यायः	५६६
सर्पविषप्रतिषेधाध्याय·	५७५
कीटलतादिविषप्रतिषेधाध्यायः	५८२
मूषिकालर्कविषप्रतिषेध्यायः	५८६
रसायनाध्याय·	५९२
वाजीकरणाध्यायः	६०८